

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पूर्वार्द्धकथनं ... इतिस्मारकतया महामांगलिकत्वात् सत्तार्थनिर्देशोप्येवं ... ॥
श्रोत्रं ... स्वेदाध्ययनेकहं ... आदि ... ॥

सि॰कौ॰
उ॰
१

श्रीमहागणाधिपतये नमः ॥ श्रेयो हि नीचगो गुर्लभे महर्षिभिरदृदिवं नो हूयमानोप्यगुणो विभुर्विज
यतेनरो १ पूर्वार्द्धकथितास्तुर्यपंचमाध्यायवर्त्तिनः प्रत्ययाश्चाथकथ्यंते तृतीयाध्यायगोचराः २
तत्र आदौ दश लकाराः प्रदर्श्यंते लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एषु पंचमो
लकारश्छंदोमात्रगोचरः ॥ वर्त्तमाने लट् वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात् अटावितौ लः कर्म
णि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युः अकर्मकेभ्यो भावे कर्त्तरि च
स्युः लस्य अधिकारोयं तिप्तस्झिसिप्थस्थमिब्वस्मस्ताऽऽतांझथासाथांध्वमिड्वहिमहिङ् ।
एतेऽष्टादश लादेशाः स्युः लः परस्मैपदं लादेशाः परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदं तङ्प
त्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसंज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदा
त्तेत उपदेशे यो ङित् तदंताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रिया
फले स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले शेषात्कर्त्तरि परस्मैपदं आ
त्मनेपदनिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ति
ङ उभयोः पदयोः त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येकशः ।

रामः
१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
२

ऽनुवर्त्तते तेनेह न एधांचक्रे इत्यादि ... यथार्थकथनेमाभूत् ... परोक्षे लिट् भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् लस्य तिवादयः परस्मैपदानां णलतुसुस्थलथुसणल्वमाः लिटस्तिवादीनां नवानां णलादयो नवस्युः भू अ इति स्थिते भुवो वुग्लुङ्लिटोः भुवो वुगागमः स्याल्लुङ्लिटोः अचि नित्यत्वाद्वुक् गुणवृद्धी बाधते एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्य इत्यधिकृत्य लिटि धातोरनभ्यासस्य लिटि परे अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः आदिभूतादचः परस्य तु द्वितीयस्य भूव् भूव् अ इति स्थिते पूर्वोऽभ्यासः अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् हलादिः शेषः अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते इति वलोपः ह्रस्वः अभ्यासस्याचो ह्रस्वः स्यात् भवतेरः भवतेरभ्यासोकारस्य अः स्याल्लिटि अभ्यासे चर्च अभ्यासे झलां चरः स्युर्जशश्च झशां जशः खयां चरः तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचर इति विवेकः आन्तरतम्यात् असिद्धवदत्राभात् इत्यधिकृत्य समानाश्रये तस्मिन्कर्त्तव्ये तदसिद्धं स्यात् इति वुकोऽसिद्धत्वादुवङि प्राप्ते भुवो वुग्लुङ्लिटोः इति

सामानाधिकरण्यमेकार्थबोधकत्वं तत्र च मन्त्यास स्थालकारे सोऽपि प्राश्येनाह तिङ्वाच्य
नि अर्थो तिङ्ग्रहणं न स्यान्निलकारे लासीता के एतौ हि पचेद्य तिङ एन त्वाच्येत्युक्तं
नि २ त्वां संभवानेऽयं वाक्ये तयदा उपपदे नतु [illegible]
सि इति स्यान्निनीमध्य सचेतद यावगच्छति सत्यासु भोः प्रयोग एव त्याभिहु [illegible]

लथ्य प्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः युष्मद्युपपदे समानाधिकर
णे स्थानिन्यपि मध्यमः तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात् प्रहा
से च मन्योपपदे मन्यतेरुत्तम एकवच्च मन्यधातुरुपपदं यस्य धातोः तस्मिन् प्रकृतिभूते सति मध्यमः
स्यात्परिहासे गम्यमाने मन्यतेस्तूत्तमः स्यात् स चैकार्थस्य वाचकः अस्मद्युत्तमः तथाभूतेऽस्मद्युत्तमः स्या
त् शेषे प्रथमः मध्यमोत्तमयोरविषये प्रथमः स्यात् भूसत्तायाम् कर्तृविवक्षायां भू ति इति स्थि
का६ ते तिङ्शित्सार्वधातुकं तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः कर्तरि शप् कर्त्रर्थे सार्वधातुके
परे धातोः शप् स्यात् सार्वधातुकार्धधातुकयोः इगन्तांगस्य गुणः स्यात् सार्वधातुकार्धधातुकयोः
परतः अवादेशः भवति भवतः झोंतः प्रत्ययावयवस्य झस्यान्तादेशः स्यात् अतो गुणे भवन्ति भ
वसि भवथः भवथ अतो दीर्घो यञि अतोंगस्य दीर्घः स्याद्यञादौ सार्वधातुके परे भवामि भवावः
भवामः स भवति तौ भवतः ते भवन्ति त्वं भवसि युवां भवथः यूयं भवथ अहं भवामि आवां भवा
वः वयं भवामः एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोऽतिथिभिः एतं एल मन्ये ओदनं भोक्ष्ये भो
क्ष्यध्वे भोक्ष्ये भोक्ष्यावहे भोक्ष्यामहे इत्यादि मन्यसे मन्येथे मन्यध्वे इत्यादि रूपं अस्मद्युपपदे इत्या

ज्यमाने प्रयो
माह प्रयुज्यमाने चेति

अत आदिति वक्तव्ये दीर्घग्रहणं अंतस्यापि भवत्वित्येयोरिति सुतोऽमाभूत् इत्येतदर्थं = ४ सार्वधातुके किं केशवः अकृता=
दीर्घश्च यथा स्यात् ७१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]

...तिषेधार्थत्वं बोधनद्वारा सर्वादेशार्थं त्वे। तादेशात् ... ततो वाहुः=२ संप्रसारण

तङ्वास्यात् अनेकाल्त्वात्सर्वादेशः यद्यपि ङित्त्वेस्य यमपवादः तथाप्यनन्यार्थे ङित्त्वे घनङादिषु
चरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थतया संभवत्प्रयोजनङकारेतानङित्त्वं परं प्रवृत्तं प
रेण बाध्यते उभयोरुत्सर्गापवादयोरपि संभवलत्वात् भवतात् लोटो लङ्वत् लोटो लङ इव कार्यं स्यात्
तेन तामादयः सलोपश्च तथाहि तस्थस्थमिपां तांतंतामः ङितश्चतुर्णां तामादयः क्रमात्स्युः नि
त्यंङितः सकारान्तस्य ङित उत्तमस्य लोपः स्यात् अलोन्त्यस्येति सलोपः भवतां भवत सेर्ह्यपिच्च ।
लोटः सेर्हिः स्यात् सोऽपिच्च भवतात् अतो हेः अतः परस्य हेर्लुक् स्यात् भव भवतं भवत मेर्निः
लोटो मेर्निः स्यात् आडुत्तमस्य पिच्च लोडुत्तमस्याडागमः स्यात्स पिच्च हिन्योरुत्वं न इकारोच्चारण
सामर्थ्यात् भवानि भवाव भवाम अनद्यतने लङ् अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् लुङ्
लङ्लृङ्क्ष्वडुदात्तः एषु परेष्वंगस्याडागमः स्यात्स चोदात्तः इतश्च ङितो लस्य परस्मैपदमि
कारान्तस्य लोपः स्यात् अभवत् अभवतां अभवन् अभवः अभवतं अभवत अभवं
अभवाव अभवाम विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु द्योत्येषु वाच्ये
षु वा लिङ् विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनं निमंत्रणं नियोगकरणं आवश्यके श्राद्धभो
जनादौ दौहित्रादेः प्रवर्तनं आमंत्रणं कामचारानुज्ञा अधीष्टः सत्कारपूर्वको व्यापारः प्रवर्तना

समवलत्वादितिमंद
प्रवृत्तैवतत्वमिति
भावः ३=

3

...ङादिनावृद्धि
इत्वाभावः संभवत्प्र
योजनेतिइदंपुष्टेऽनेन स
र्वादेशत्वेएवनात्मादे
शादि ... प्रसक्त्वः
मेयरमिति संभवत्प्र
योजनेत्यत्रहिबहु
भावे ... भावेन ...
त्व ... नेन ...
... यान
दप्रकृति इति ...=

राम.
३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कोवक्तव्यो बभूव बभूवतुः बभूवुः आर्द्धधातुकस्येड्वलादेः वलादेरार्द्धधातुकस्येडागमः स्यात्
बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम अनद्यतने लुट् भविष्यत्यनद्यतनेर्थे धातोर्लुट्
स्यात् स्यतासी लृलुटोः लृ इति लृङ्लृटोर्ग्रहणं धातोः स्यतासी प्रत्ययौ स्तो लृलुटोः परतः शबा
द्यपवादः आर्द्धधातुकं शेषः तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः आर्द्धधातुकसंज्ञः स्यात्
लुटः प्रथमस्य डारौरसः डारौरस एते क्रमात्स्युः डित्वसामर्थ्यादभस्यापि टेर्लोपः पुगन्तलघूपधस्य
च पुगंतस्य लघूपधस्य चांगस्येको गुणः स्यात्सार्वधातुकार्द्धधातुकयोः येन नाव्यवधानं तेन व्यव
हितेपि वचनप्रामाण्यात् तेन भिनत्तीत्यादौ अनेकव्यवहितस्येको न गुणः भवित् आम्नेको
गुणप्राप्ते दीधीवेवीटां दीधीवेव्योरिटश्च गुणो न स्तः भविता तासस्त्योर्लोपः तासेरस्तेश्च
लोपः स्यात्सादौ प्रत्यये परे रिच रादौ प्रत्यये प्राग्वत् भवितारौ भवितारः भवितासि भवितास्थः
भवितास्थ भवितास्मि भवितास्वः भवितास्मः लृट् शेषे च भविष्यदर्थाद्धातोर्लृट् स्यात् क्रिया
क्रियार्थायां ३ र्थायां क्रियायां सत्यामसत्यां च स्यः इट् भविष्यति भविष्यतः भविष्यंति भविष्यसि भविष्यथः भविष्य
थ भविष्यामि भविष्यावः भविष्यामः लोट् च विध्यादिष्वर्थेषु धातोर्लोट् स्यात् आशिषि लिङ्
लोटौ एरुः लोट इकारस्य उः स्यात् भवतु तुह्योस्तातङाशिष्यन्यतरस्यां आशिषि तुह्योस्ता
इह इटः धातोरेव ग्रहणं [illegible] हचर्पसा निम त्वात् अनित्य [illegible]
माननिमित्ते [illegible] चतुरितिकृत्वार्थे इति [illegible] इस्यकत्वार्थं वर्तमानत्वेज्ञात पुनस्तकृ [illegible] तामनिमित्ते मानं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ् भूतार्थे धातोर्लुङ् स्यात् मा
उ॰ ङि लुङ् सर्वलकारापवादः स्मोत्तरे लङ् च स्मोत्तरे माङि लङ् स्यात् लुङ् च च्लि लुङि शबाद्यपवादः च्ले
ध सिच् इचावितौ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु एभ्यः सिचो लुक् स्यात् गापाविहेणादेशपिबती गृ
ह्येते भूसुवोस्तिङि भूसु एतयोः सार्वधातुके तिङि परे गुणो न स्यात् अस्तिसिचोऽपृक्ते सिच अस् च इति समा
हारद्वंद्वं सिच् शब्दस्य सौत्रं भत्वं अस्तीत्यव्ययेन कर्मधारयः ततः पंचम्याः सोऽलुक् विद्यमानात्सिचोऽस्ते नाप
श्च परस्यापृक्तस्य हल ईडागमः स्यात् इति ईट् नेह सिचो लुप्तत्वात् अभूत् हलः ... अभूतां सि
5 जभ्यस्तविदिभ्यश्च सिचोभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्यात् इति प्राप्ते आतः सिचि लुकि
सति आदन्तादेव झेर्जुस् स्यात् अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम न माङ्योगे अ
डाटौ न स्तः माभवान् भूत् मास्मभवत् मास्मभूत् लिङ्निमित्ते लृङ् क्रियातिपत्तौ हेतुहेतुमद्भावादि
याध लिङ्निमित्ते लभविष्यत्यर्थे लृङ् क्रियायाः अनिष्पत्तौ अभविष्यत् अभविष्यतां अभविष्यन् अभ
विष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम ते प्राग्धातोः ते गत्युपस राम॰
र्गसंज्ञकाः धातोः प्रागेव प्रयोक्तव्याः आनि लोट् उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य ण ध
त्वं स्यात् प्रभवाणि दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः दुःस्थितिः दुर्भवानि अंतः श

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनुबंधकार्ये कर्तव्ये अनल्विधाविति निषेधो न प्रवर्तते [illegible]
[illegible]
[illegible]
[illegible]

यो लिङ्। चतुर्णां द्वयमुपादानं प्रपंचार्थं। यासुट् परस्मैपदेषूदात्तो ङिच्च। लिङः परस्मैपदानां यासु
डागमः स्यात् स चोदात्तो ङिच्च। ङित्वात् [illegible] कश्चित्तु वंधको येऽत्र न ल्विधाविति प्रतिषेध इ
ति आदेशस्य स्थानवः [illegible] लिङ्गेनैव ज्ञाप्यमाणे [illegible] सुट् तिथोः। लिङस्तकारथ
कारयोः सुडागमः स्यात्। सुटा यासुट् न बाध्यते लिङो यासुट् तकारस्य सुडिति विषयभेदात्। लि
ङः सलोपोऽनन्त्यस्य। सार्वधातुक लिङो नन्त्यस्य सस्य लोपः स्यात्। इति सकारद्वयस्यापि निवृत्तिः।
सुट् श्रवणं त्वाशीर्लिङि स्फुटतरं तु तत्रात्मनेपदे। अतो येयः। अतः परस्य सार्वधातुकाव
यव स्य या इत्यस्य इय् स्यात्। गुणः। यलोपः। भवेत्। सार्वधातुके किं चिकीर्ष्यात्। मध्येऽपवादन्यायेन
नानेन लोप एव बाध्येत। भवेदित्यादौ तु परत्वाद्दीर्घः स्यात्। भवेतां। झेर्जुस्। लिङो झेर्जुस् स्यात्। जर
त्। उस्यपदान्तात्। अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यादिति पाठे परत्वाल्लोपस्य
ज्ञातो येय इति प्राचः [illegible] व्याख्येयं एवं
च सलोपस्यापवाद इयः अतो येय इत्यत्र तु संधिरार्षः। भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भ
वेम। लिङाशिषि। आशिषि लिङ्स्तिङार्धधातुकसंज्ञः स्यात्। किदाशिषि। आशिषि लिङो या
सुट् कित् स्यात्। स्कोरिति सलोपः। क्ङिति च। गित्कित्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः।

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अभेदान्वय इति सामान्यविशेषयोरभेदान्वयो लोकसिद्धः इति भावः
एवं चैधांचक्रे एधांचभूवेत्यादौ एकः कर्तृकाभूतानन्तरं ...
...भिन्ना क्रियेति तुल्यो बोधः=१

एकसूत्रे ... विधिप्रतिषेधेति का
... पूर्ववदिसनुवृत्तिः=२

सि॰ कौ॰
३

[illegible]

न्यवान्वितत्वादाम्प्रकृतीनां विशेषणवाचित्वात्तदर्थयोरभेदान्वयः संपदिस्तु प्रत्याहारो लभ्यतेऽपि अनन्वितार्थ
त्वाननुप्रयुज्यते लसस्तु क्रियाफलेपरगामिनि परस्मैपदे प्राप्ते आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य आम्प्रत्ययो
यस्माद्विहितस्तद्धुलाले विहानेव कृञोऽदिः आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात् कृञोप्यात्मनेपदं स्यात् इह पूर्वव
दिस्यनुवर्त्य वाक्यभेदेन संबध्यते एवं चेहांचक्रे इत्यात्मनेपदं न तु तद्विपरीतमिति तेन कर्तृगेपि क्रियाफले ईहांचक्रे
इत्यादौ न लङ् लिटस्तझयोरेशिरेच् लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः एकारोच्चारणं ज्ञापकं लङादे
शानां टेरेत्वं नेति तेन तझोरोरसौ न स्त इति स्थितं असंयोगाल्लिट् कित् असंयोगात्परोपि लिट् कित्स्या
त् क्ङिति च इति निषेधात्सार्वधातुकार्धधातुकयोरिति गुणो न द्वित्वात्परत्वाद्यणि प्राप्ते द्विर्वचनेऽचि
द्वित्वनिमित्ते अचि परे अच आदेशो न स्यात् द्वित्वे कर्तव्ये उरत् अभ्यासऋवर्णस्य अत्स्यात् प्रत्यये प
रे रपरत्वं हलादिः शेषः प्रत्यये किं ववृश्च कुहोश्चुः अभ्यासस्य कवर्गहकारयोश्चवर्गादेशः स्यात् ए
धांचक्रे एधांचक्राते एधांचक्रिरे एकाच उपदेशेऽनुदात्तात् उपदेशे यो धातुरेकाजनुदात्तश्च ततः प
रस्य वलादेरार्धधातुकस्येण् न स्यात् उपदेशे इत्युभयान्वयि एकाच इति किं यङ्लुकि मा भूत् निर्वध्यास्या
त् स्मरेति हि श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि १
एवं च द्वैवर्ण्यादेकाज्ग्रहणेन ज्ञाप्यते अच इत्येव च एकत्वविवक्षया तद्धतो ग्रहणेन सिद्धे एकग्रहणसामर्थ्या
अन्यथा अङ्गाधिकारेण प्रत्ययात्तेषां भावे ... कारस्यायाकारस्यानिवर्त्यते
न न संप्रसारणे संप्रसारणमिति निषेधः कृति ... परस्ति त्रिरिव्याप्ति ... वसिद्धये पर

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

राम॰ ५

[illegible]

वाचं २

ऽस्याड् किंविधिणत्वेऽप्युपसर्गत्वं अंतर्धा अंतर्धिः अंतर्भवाणि शेषे विभाषा अकखादावषांत उपदेशे
उपदेशे अकादिखादिर्षांतवर्जे गदनशादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं स्याद्वा प्र
णिभवति प्रनिभवति इहोपसर्गाणामसमस्तत्वेपि संहितानित्यात् उक्तं संहितैकपदे नित्या नित्या धातू
पसर्गयोः नित्या समासे वाक्ये तु सा विवक्षामपेक्षते इति सन्नाद्यर्थनिर्देशश्चोपसर्गास्त्वर्थविशेषद्योत
काः प्रभवति पराभवति संभवति अनुभवति अभिभवति उद्भवति परिभवति इत्यत्र विलक्षणार्था व
गतिः उक्तं च उपसर्गेण धात्वर्थो बलादन्यत्र नीयते प्रहाराहारसंहारविहारपरिहारवत् इति एध वृद्धौ कत्यंताः
षड्विंशस्त्वनुदात्तेतः टित आत्मनेपदानां टेरे टितो लस्यात्मनेपदानां टेरेत्वं स्यात् एधते सार्वधातुकमपित्
अपित्सार्वधातुकं ङिद्वत्स्यात् आतो ङितः अतः परस्य ङिद्वर्तमान इय् स्यात् एधेते एधंते थासः से टितो
लस्य थासः से स्यात् एधसे एधेथे एधध्वे अतो गुणे एधे एधावहे एधामहे इजादेश्च गुरुमतोऽन्
ऋच्छः इजादिर्यो धातुर्गुरुमान् ऋच्छत्यन्यस्तत आम् स्यात् लिटि आमो मकारस्य नेत्वं आस्कासोराम्वि
धानाल्ज्ञापकात् आमः आमः परस्य लुक् स्यात् कृञ्चानुप्रयुज्यते लिटि आमंताल्लिट्परा कृभ्वस्त
योऽनुप्रयुज्यंते आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति सूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगो अन्यस्यापीति ज्ञा
यते न कृभ्वस्तियोगस्यतः कृञो ङिद्वितीयेतित्रकारेण प्रत्याहाराश्रयणात् कृभ्वस्तिलाभः तेषां क्रियासामा

नं २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. स्यातं एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां एधिषीध्वं एधिषीय एधिषी
उ. वहि एधिषीमहि ऐधिष्ट ऐधिषातां आत्मनेपदेष्वनतः अनकारात्परस्यात्मनेपदेषु झस्य अत्
६ तृ.३ आदेशः स्यात् ऐधिषत ऐधिष्ठाः ऐधिषाथां इणः षीध्वंलुङ्लिटां धोऽङ्गात् ऐधिढ्वं इड्विन एवेणोह
गस्येते इति मतेन तु ऐधिध्वं ह्रस्वयोर्विरामस्य च द्वित्वविकल्पात् षोडश रूपाणि ऐधिषि ऐधिष्वहि ऐधि
ष्महि ऐधिष्यत ऐधिष्येतां ऐधिष्यन्त ऐधिष्यथाः ऐधिष्येथां ऐधिष्यध्वं ऐधिष्ये ऐधिष्यावहि ऐ
धिष्यामहि उदात्तत्वा हलादेरिह प्रसंगादनुदात्ताः संगृह्यन्ते ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडी
वृ.३.१ ङ्श्रिभिः वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः १ शक्लृपच्मुचिरिच्वच्विच्सिच्प्रच्छि
6 त्यज्निजिर्भजः भञ्ज्भुज्भ्रस्ज्मस्जियज्युज्रुज्रञ्ज्विजिर्स्वञ्जिसञ्ज्सृजः २ अद्क्षुद्खिद्।
ति.५ छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद् शद्सदी स्विद्यतिः स्कन्दिहदी क्रुध्क्षुधिबुध्यति ३ बन्धिर्यु
धिरुधी राधिव्यध्शुधः साधिसिध्यती मन्यहन्नाप्क्लिप्तृप्तिपस्तृप्यतिदृप्यती ४ लिप्लु
प्वप्शप्स्वप्सृपियम्रम्लभ्गम्नम्यमो रमिः क्रुशिर्दंशिदिशी दृश्मृश्रिश्रुश्लिशवि
श्स्पृशः कृषिः त्विषतुषद्विषदुष्पुष्यपिष्विष्शिष्शुष् श्लिष्यतयो घसिः वसतिर्दहदिहिदुहो राम: ६
नह्मिह्रुह्लिह्वहिस्तथा ६ अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतं तुदादौ मस्जभेदेन स्थितो यो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

डुष्२ दिह्२

दनेकाच्को पदेशो व्यावर्त्यते तेन ववर्धेऽहं ह्युपदेशे एकाचो पित्न निषेधः आदेशोपदेशे अनेकाच्त्वा
त् अनुदात्तत्वादुपदेशमेव संग्रहीष्यते एधांचकृषे एधांचक्राथे इणःषीध्वं लुङ् लिटां धोङ्गात् इण
न्तादंगात्परे षां षीध्वं लुङ्लिटां धस्य मूर्धन्यादेशः स्यात् एधांचकृढ्वे एधांचकृवहे एधांचकृमहे एधां
बभूव अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न अन्यथा कृ स्वचानुप्रयुज्यत इति कृञ्चितिवा ब्रूयात् आत ना
लिटि ५ आदेः अभ्यासस्यादेरतो दीर्घः स्यात् परस्यापवादः एधामास एधामासतुरित्यादि एधिता एधिता
रौ एधितारः एधितासे एधितासाथे धि च धादौ प्रत्यये परे सलोपः स्यात् एधिताध्वे ह एति तास
स्त्योः सस्य हः स्यादेति परे एधिताहे एधितास्वहे एधितास्महे एधि ष्यते एधिष्येते एधिष्यंते एधि
ष्यसे एधिष्येथे एधिष्यध्वे एधिष्ये एधिष्यावहे एधिष्यामहे आमेतः लोट एकारस्य आम् स्या
त् एधतां एधेतां एधंतां सवाभ्यां वामौ सवाभ्यां परस्य लोडेतः क्रमाद्व अम् आमोपवादः एधै ए एतौस्तः ५
धावहै एधामहै आडजादीनां अजादीनां आट् स्यात् लुङादिषु अटोपवादः आटश्च ऐधत ऐधे
तां ऐधंत ऐधथाः ऐधेथां ऐधध्वं ऐधे ऐधावहि ऐधामहि लिङः सीयुट् सलोपः एधेत एधे
यातां झस्य रन् लिङो झस्य रन् स्यात् एधेरन् एधेथाः एधेयाथां एधेध्वं इटोत् लिङादेशस्यटोत्स्यात्
एधेय एधेवहि एधेमहि आशीर्लिङि आर्धधातुकत्वात् लिङः सलोपो न सीयुट् सुटोः प्रत्ययावयवत्वा
एधस्व ऐधेथां एधध्वं ऐतैत ऐलोटु
तमस्य एत ऐ स्यात् आमोपवादः ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किं तत्सरलुः अनादेशादेः किं वकरणात्तु लिटीति आदेशविशेषणात् इह स्यादेव नेमिथ सेहे स्कुदि
आप्रवणे। आप्रवणमुत्प्लवनमुद्धरणं च इदित्वान्नुम् स्कुन्दते चुस्कुन्दे श्विदि श्वैत्ये अकर्मकः
श्विन्दते शिश्विन्दे वदि अभिवादनस्तुत्योः वन्दते ववन्दे भदि कल्याणे सुखे च भन्दते बभन्दे मदि स्तुति
मोदमदस्वप्नकान्तिगतिषु मन्दते ममन्दे स्पदि किंचिच्चलने स्पन्दते पस्पन्दे क्लिदि परिदेवने शोके
इत्यर्थः सकर्मकः। क्लिन्दते चैत्रं चिक्लिन्दे मुद हर्षे मोदते दद दाने ददते न शसददवादिगुणा
नां शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च य आकारस्तस्य एत्वाभ्यासलोपौ न स्तः दददे द
ददाते दददिरे ष्वद स्वर्द आस्वादने अयमनुभवे सकर्मकः रुचावकर्मकः धात्वादेः षः सः धा
तोरादेः षस्य सः स्यात् सात्पदाद्योरिति षत्वनिषेधः अनुस्वदते स्वर्दते उर्द माने क्रीडायां च
उपधायां च धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परतः इको दीर्घः स्यात् ऊर्दते ऊर्दाञ्च
क्रे कुर्द खुर्द गुर्द गुद क्रीडायामेव कूर्दते चुकूर्दे खूर्दते गूर्दते जुगूर्दे गोदते जुगुदे षूद क्षरणे
सूदते सुषूदे सेकृसृपसृस्तृसृजस्तृस्त्या न्येह त्याजत्साद्यः एकाचः षोपदेशाः ष्वष्कस्विद्
स्वद् स्वञ्ज् स्वप स्मिङः दंत्यः केवलदंत्यः न तु दंतोष्ठ्योपि ष्वष्कादीनां षत्वग्रहणात् ह्लादव्य
क्ते शब्दे। ह्लादते जह्लादे ह्लादी सुखे च चादव्यक्ते शब्दे ह्लादते जह्लादे स्वाद आस्वादने

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चखुरादिषु ७ तदृप्रपीतीवारयितुं श्यनादिर्दिशा आहृतः किंच स्विषपयोसिध्यबुध्योमन्यपु
ष्यश्लिषः श्यना ८ वसिः शाबालुकापीति निर्दिष्टोऽस्यानिवृत्तये निजिरविजिरपाक्षु इति सावबं
धात्वमीतण्वा विदतिश्वाद्रुदोगादेरिहोभाव्यो परिदृश्यते व्याघ्रभूत्यादयस्त्वेनं नेहपठ्ठन्ति स्थितं
१० रंजिमस्जी अदिपदीतुदत्तुद मुचिविशी शिषिः भाष्यानुक्तानवेद्योक्ता व्याघ्रभूत्यादिसंमताः
११ स्पर्ध संघर्षे संघर्षः पराभिभवेच्छा धात्वर्थेनोपसंग्रहादकर्मकः स्पर्धते पस्पर्धे अभ्यास
स्यश २ पूर्वाः खयः शिष्यन्ते हलादिः शेषस्यापवादः पस्पर्धे स्पर्धिता स्पर्धिष्यते स्पर्धतां अस्प
र्धत अस्पर्धेत स्पर्धिषीष्ट अस्पर्धिष्ट अस्पर्धिष्यत गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च गाधते जगा
धे बाधृ लोडने लोडनं प्रतिघातः बाधते नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु आशिषि नाथ इति
वाच्यं आस्याशिष्येवात्मनेपदं स्यात् नाथते अन्यत्र नाथति नाधते दध धारणे दधते अत एक
हल्मध्येनादेशादेर्लिटि लिटि मित्त्यादेशादिकं न भवति यदेगंत दवयवस्यासंयुक्तहलमध्यस्थ
स्याकारस्यैकारः स्यादभ्यासलोपश्च किति लिटि थलि च सेटि इत्युक्ते थलि च प्रागुक्तम् आदेश स्यात्.३
श्चेह हेतुरूप्य संपादक एवाश्लोयलेशासिद्धयोः प्रतिषेधवचनात् ज्ञापकात् तेन प्रकृतिज श्च रांते रामश्रीरामराम
भसत्वपि एत्वाभ्यासलोपोस्त एव देधे देधाते देधिरे अतः किं दिदिवतुः लयरः किं ररासे एकेत्यादि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि. कौ. ३. ८
यति स्यति स्तौति स्तोभति स्थासेनयसेधसिचसञ्जस्वञ्जां। उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्
सद्गिरप्रतेः। प्रतिभिन्नादुपसर्गात् सदेः सस्य षः स्यात्। स्तम्भेः। स्तम्भेः सौत्रस्य सस्य षः स्यात्। योगवि
भाग उत्तरार्थः। किंच। अप्रतेरिति नानुवर्तते। वाक्प्रतिष्टम्भ विष्टम्भ। अवाच्चालम्बनाविदूर्ययोः।
अवात्स्तम्भेरेतयोरर्थयोः षत्वं स्यात्। वेश्च स्वनो भोजने। व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने। परिनिवि
भ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जां। परिनिविभ्यः परेषामेषां सस्य षः स्यात्। निषेधति। प्राक्
सितादड्व्यवायेपि। सेव सित इत्यत्र सितशब्दात्प्राग्ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात्
८ न्यषेधत् न्यषेधीत् न्यषेधिष्यत्। स्थादिष्वभ्यासेन चाभ्यासस्य। प्राक्सितात्स्थादिष्वभ्यासेन व्य
वायेपि षत्वं स्यात् एषामेव चाभ्यासस्य न तु सुनोत्यादीनां। निषिषेध निषिषिधतुः। सेधतेर्गतौ। गत्यर्थस्य षि ८
सेधतेः षत्वं न स्यात्। गंगां विसेधति। षिधू शास्त्रे मांगल्ये च। शास्त्रं शासनं मांगल्यं मंगलक्रियास्वा
स्तौति ४ र्थेण्यन्तः। स्वरतिसूतिसूयतिधूञूदितो वा। स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्वा स्यात्। झष
स्तथोर्धोधः। झषः परयोस्तथोर्धः स्यान्न तु दधातेः। जश्त्वं। सिषेद्ध सिषेधिथ सेद्धा सेधिता सेत्स्य। षम्भुः
ति सेधिष्यति। असेत्सीत्। झलो झलि। झलः परस्य सस्य लोपः स्यात् झलि। असैद्धां। असैत्सुः। असै ८
त्सीत् असैद्धं असैद्ध असैत्सं असैत्स्व असैत्स्म पक्षे असेधीत् असेधिष्टामित्यादि। खाद भक्ष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वादते पर्द कुत्सिते शब्दे गुदरवे इत्यर्थः पर्दते यती प्रयत्ने यतते युतृ जुतृ भासने
योतते युयुते जोतते विथृ वेथृ याचने विथते वेथते श्रथि शैथिल्ये श्रन्थते ग्रथि कौटिल्ये ग्र-
न्थते कत्थ श्लाघायां कत्थते एधाद्या अनुदात्तेतो गताः अथाष्टत्रिंशत्तवर्गीयान्ताः परस्मैपदिनः
अत सातत्यगमने अतति अत आदेः आत आततुः आतुः लुङि आतिस ईत इति स्थिते
इट ईटि इटः परस्य सस्य लोपः स्यात् ईटि परे सिज्लोप एकादेशे सिद्धो वाच्यः आतीत् आतिष्टां
आतिषुः वदव्रजहलन्तस्याचः वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात् सिचि परस्मैप-
देषु इति प्राप्ते नेटि इडादौ सिचि प्रागुक्तं न स्यात् मा भवानतीत् अतिष्टां अतिषु चिती संज्ञाने
चेतति चिचेत अचेतीत् अचेतिष्टां अचेतिषुः च्युतिर् आसेचने सेचनमार्द्रीकरणं आङीषद-
र्थेऽभिव्याप्तौ च इर इत्संज्ञा वाच्या च्योतति चुच्योत इरितो वा इरितो धातोश्च्लेरङ् वा स्यात् परस्मैपदे
अच्युतत् अच्योतीत् श्च्युतिर् क्षरणे श्च्योतति चुश्च्योत अश्च्योतत् अश्च्युतत् अश्च्योतीत्
यकाररहितोऽप्ययं श्चोतति मन्थ विलोडने यासुटः किदाशिषीति कित्वादनिदितामिति लोपः मथ्या-
त् कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः इदित्वान्न लोपः कुन्थ्यात् पुन्थ्यात् लुन्थ्यात् मन्थ्या-
त् षिध गत्यां सेधति सिषेध सेधिता असेधीत् सात्पदाद्योरिति निषेधे प्राप्ते उपसर्गात्सुनोतीति सु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ १ खर्द इति चखर्द आलि आदिबंधने ओंतति अंदति आनंत आनंद उदिपं उमै स्यर्य इंदति इंदां
चकार विदि अवयवे पवर्गीयादिः विंदति अवयवं करोतीत्यर्थः भिदीति पाठांतरं गडिवदने कदेशे
गंडति अंतस्यादयः पंचैतेन तिङ्विषया इति काश्यपः अन्येतु तिङमपीच्छंति णिदि कुत्सायां निं
दति मणिंदति टुनदि समृद्धौ आदिर्ञिटुडवः उपदेशे धातो राद्याएते इतः स्युः नंदति इदित्वान्नलोपो
ननंद्यात् चदि आल्हादे दीप्तौ च चंदति चचंद त्रदि चेष्टायां तत्रंद कदि क्रदि क्लदि आह्वाने रोदने
७ च चकंद चक्रंद चक्लंद क्लिदि परिदेवने चिक्लिंद शुन्ध शुद्धौ शुशुंध नलोपः शुध्यात् ७५ अथ
कवर्गीयांता अनुदात्तेतो द्विचत्वारिंशत् शीकृ सेचने तालव्यादिः ईत्यादिरित्येके शीकते शिशीके
लोकृ दर्शने लोकते लुलोके श्लोकृ संघाते संघातो ग्रंथः सच इह ग्रथ्यमानस्य व्यापारो ग्रंथितुर्वा
आद्ये ऽकर्मको द्वितीये सकर्मकः श्लोकते द्रेकृ ध्रेकृ शब्दोत्साहयोः उत्साहो वृद्धिरौद्धत्यं च द्रेके दि
ध्रेके रेकृ शंकायां रेकते सेकृ स्रेकृ स्रकि श्रकि श्लकि गतौ त्रयोदंत्यादयः द्वौ तालव्यादी अथोप
देशात्वान्नषः सिसेके शकि शंकायां शंकते शशंके अकि लक्षणे अंकते आनंके वकि कौटि
ल्ये वंकते मकि मंडने मंकते कक लौल्ये लौल्यं गर्वश्चापल्यं च ककते चकके कुक वृक आदाने
कोकते चुकुके वर्कते अनुपधेभ्यो लिटः कित्वं गुणात्पूर्वं विप्रतिषेधेन ववृके चकतृप्तौ प रामः ९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तुरित्यादौ कित्वप्रचारितार्थ्यम् दिधुते विभिदचुरित्यादौ नित्यत्वात्कि संज्ञा वृद्धके इत्यादौ गुरोः कृते संयोगात्परत्वाद्दनिलः २१

नदभ्रवसंदेषुच णदि। नद नृतीष्टनादिएतान्वर्जयित्वान्ये णोपदेशा बोध्याः — नृदिष्वविति तन्नृ [illegible] हलः [illegible] तस्मान्नुडित्येव ब्रूयात् नचाटत्वादेवानि
सेगः अभ्रोतनेच्छत्यनेनाद्वि हलो यदि भवति [illegible] नियमात् नचास्य [illegible] इत्यव ब्रूयात् यद्वा द्विहल ग्रहणात् ख्यापयत्यवर्णो
पधस्य पदि भवति तर्हि आ [illegible] नियमान्नसर्व सिद्धमिति भाष्यकैय्यटयोः स्थितौ = ११

ऐ॥ अकार इत् खादति चखाद खद स्थैर्ये हिंसायां च चाद्भक्षणे स्थैर्येऽकर्मकः खदति अत उपधा
याः उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये चखाद णलुत्तमो वा उत्तमो णल् णिद्वा स्यात् चखा
द चखद अतो हलादेर्लघोः हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात् अखादीत्
अखदीत् वद स्थैर्ये पवर्गीयादिः बदति बबाद बेदतुः बेदिथ बबाद बबद अबादीत् अबदीत्
गद व्यक्तायां वाचि नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यति नि२
चिनोतिदेग्धिषु च उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद्गदादिषु परेषु प्रणिगदति जगाद रद वि
लेखने विलेखनं भेदनं रराद णद अव्यक्ते शब्दे णो नः धातोरादेर्णस्य नः स्यात् णोपदेशास्त्वन
र्दनाटिनाथनाधनंदनक्कनॄनृतः नाटेर्दीर्घोर्हस्यपर्युदासात् घटादिर्णोपदेश एव तवर्गचतुर्थान्त
नाधतेर्नृनृत्योश्च केचि[illegible] णोपदेशतामाहुः उपसर्गादसमासेऽपि णोपदेशस्य उपसर्गस्थान्निमि
त्तात्परस्य णोपदेशस्य धातोः नस्य णः स्यात् समासेऽसमासेऽपि प्रणदति प्रणिनदति अर्द गतौ या
चने च अत आदेः तस्मान्नुड् द्विहलः द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात् आनर्द
आर्दीत् नर्द गर्द शब्दे णोपदेशत्वाभावान्नणः प्रनर्दति गर्दति जगर्द तर्द हिंसायां तर्दति कर्द कु
त्सिते शब्दे कुत्सिते कुक्षिभवे कर्दति खर्द दंदशूके दंदशूके हिंसादिरूपायां दंदशूकक्रियायामित्यर्थः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ १० णिचश्च त्याह्रस्वे कृते लतो दीर्घः वाणो दांगवलीय इति न्यायान्नपरत्वाच्च उंखति ववखतु वंखति
मे खलुः त्वगिं कंपने च युगि जुगि वुगि वर्जने युंगति घघ हसने घघति जघाघ मघि मंडने मं
घति लघि शोषणे लंघति शिघि आघ्राणे शिंघति अथ चवर्गीयांताः तत्रानुदात्तेत एकविंश
तिः वर्च दीप्तौ वर्चते षच सेचने सेवने च सचते सेचे सचिता लोचृ दर्शने लोचते षच व्य
क्तायां वाचि शचे श्वच श्वचि गतौ श्वचते श्वंचते कच बंधने कचते कचि काचि दीप्तिबंधन
योः चकंचे चकांचे मच मुचि कल्कने कल्कनं दंभः शाठ्यं च कथनमित्यन्ये मेचे मुमुंचे मचि
10 धारणोच्छ्रायपूजनेषु ममंचे पचि व्यक्तीकरणे पंचते ष्टुच प्रसादे स्तोचते तुष्टुचे ऋज गतिस्था
नार्जनोपार्जनेषु अर्जते नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते तेन द्विहल्त्वान्नुट्
आनृजे ऋजि भृजी भर्जने ऋंजते उपसर्गादृतीति वृद्धिः प्रार्जते ऋंजांचक्रे आर्जिष्ट।
भृजते बभृजे अभर्जिष्ट एजृ भ्रेजृ भ्राजृ दीप्तौ एजांचक्रे ईज गतिकुत्सनयोः ईजांचक्रे ॥१८॥
अथ द्विसप्ततिः व्रजंताः परस्मैपदिनः शुच शोके शोचति कुच शब्दे तारे कोचति कुंच क्रुं
च कौटिल्याल्पीभावयोः अनिदितामिति नलोपः कुच्यात् क्रुच्यात् वंचु चंचु तंचु त्वंचु
म्रुंचु म्लुंचु म्रुचु म्लुचु गत्यर्थाः वच्यात् चच्यात् तच्यात् त्वच्यात् अम्रुंचीत् जं स्तम्भु च राम॰ १०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुध्याद्दाहरणे षोडयति षडयतीत्यादिरत्र वार्त्तिकंभाष्ये व्याख्यातं तथाहि धात्वादे रिति सूत्रे उपदेश इत्यनुवर्तते न च सुध्यातृ नामुपदेशोस्ति ष्विष्कष्वष्कतौ तु पकारादेर्लोपो वा रिति पलो १:२२

तीषाते च चकते चेके ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि
घिगत्यर्थाः कंकते इत्यौ तु त्रौके सुध्यातु ष्विष्क ष्वस्कतीनां सत्वप्रतिषेधो वक्तव्यः ष्वष्कते षष्वष्के।
अत्र तृतीयो दंत्यादिरित्येके लघि भोजननिवृत्तावपि अघि वघि मघि गत्याक्षेपे आक्षेपो निंदा ग
तौ गत्यारंभे चेत्यन्ये अंघते आनंघे वंघते मंघते मघि कैतवे च राघृ लाघृ द्राघृ सामर्थ्ये राघते
घ्राघ इत्यपि केचित् द्राघृ आयामे श्लाघृ कत्थने ।। [illegible] अथ परस्मैपदिनः पंचाशत् फक्क नी
चैर्गतौ नीचैर्गतिर्मंदगमनं असद्व्यवहारश्च फक्कति तकहसने तकति तकि कृच्छ्रजीवने तं
कति बुक्क भषणे भषणं श्वरवः बुक्कति कल हसने प्रतिकलति ओखृ राखृ लाखृ द्राखृ ध्रा
खृ शोषणालमर्थयोः ओखांचकार शाखृ श्लाखृ व्याप्तौ शाखति उख उखि वख वखि मख मखि
णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि
श्लगि इगि रिगि लिगि गत्यर्थाः द्वितीयांताः पंचदश तृतीयांतास्त्रयोदश इहखांतेषु रिख त्रख
त्रिखि शिखि इत्यपि चत्वारः केचित्पठंति अभ्यासस्यासवर्णे अभ्यासस्य इवर्णोवर्णयोः इयङु
वङौ स्तोऽसवर्णेचि उवोख सन्निपातपरिभाषया इज्यादेरित्याम् न ऊखतुः ऊखुः इहसवर्णदी
र्घस्याभ्यासग्रहणेन ग्रहणाद्ध्रस्वः प्राप्तो न भवति सकृत्प्रवृत्तत्वात् आंगत्वाद्विपर्जेन्यवल्गन्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सप्तम्यां तु यङ्लुक्स्यादिति भावः ॥२ सिद्धे सत्यारम्भमाणो विधिर्नियमायेत्युक्तेर्भाष्यकारेष्टानियमप्रवृत्तिर्विध्यत इति ॥३

२४५५

सि॰कौ॰ उ॰ ११ ऋर्जति चर्कर्जे त्वर्जे ष्टर्ज नेच चत्वर्जे अज गतिक्षेपणयोः अजति अजेर्व्यघञपोः अजेर्वी इत्ययमादेशः
स्यात् आर्धधातुके विषये घञमपं च वर्जयित्वा वा लाराबाई धातुके वेय्यते विवाय विव्यतुः वियुः अत्र व
कारस्य हल्परत्वा उपधायां चेति दीर्घे प्राप्ते अचः परस्मिन्निति स्थानिवद्भावेनाचपरत्वं न च न पदान्तेति
निषेधः स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् इत्युक्तेः यलि एकाच इतो ए निषेधे प्राप्ते
ऽस्तस्य वस्तु स्तुस्तु श्रु वो लिटि एभ्यो लिट इण्न स्यात् क्रादीनां चतुर्णां ग्रहणं नियमार्थं प्रकृत्याश्रयः प्रत्यया
वा॰६ श्रयो वा पाणिनिरेन बेधः स लिटि चेत्क्रादिभ्य एव नान्येभ्य इति तत्र चतुर्णां यलि भारद्वाजनियमप्राप्ति
लस्य व माद्विश्रुक्रादिनियमप्रापितस्य चेटो निषेधार्थं अचस्तास्वत्थल्यनिटो नित्यं उपदेशेऽजन्तो योधा
तुस्तासौ नित्यानिट् ततः परस्य थल इण्न स्यात् उपदेशेऽत्वतः उपदेशे अकारवतस्तासौ नित्यानिटः पर
स्य थल इण्न स्यात् ऋतो भारद्वाजस्य तासौ नित्यानिटः ऋदन्तादेव थलो नेट् भारद्वाजस्य मते तेनान्य
स्य स्यादेव अयमत्र संग्रहः अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयं ऋदन्त ईदृङ्नित्यानिट् क्राद्य
न्यो लिटि सेड्भवेत् ॥१ न च स्तुद्र्वादीनामपि थलि विकल्पः शंक्यः अचस्तास्वदिति उपदेशेऽत्वत इति च राम॰
योगद्वयप्राप्तिनसैव क्रिप्रतिषेधस्य भारद्वाजनियमोऽनिवर्तकः अनन्तरस्येति न्यायात् विवयिथ । ११

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पुछतीति अत्ररङ्गत्वात् नुकिअलक्षणत्वात्... णोन च वार्णादाङ्गं बलीय इति वाच्यम् यत्राङ्ग वार्णो वो युगपत्प्राप्तिः समानाश्रयत्वं च तत्रैव तदेतिके पयद्भिः सिद्धांतितत्वात् न ह्स
चवैपरित्यात् ॥ ९

म्रुचु म्लुचु ग्रुचु ग्लुचु म्लुञ्चु ग्लुञ्चु स्थिताः एभ्यः श्लेरङ् वा स्यात् अम्रुचत् अम्रोचीत् अम्लुचत् अम्लोचीत् ग्रु
चु ग्लुचु कुजु खुजु स्तेयकरणे जुग्रोच अग्रुचत् अग्रोचीत् जुग्लोच अग्लुचत् अग्लोचीत् अकोजीत् अखो
जीत् ग्लुञ्चु षस्ज गतौ अङ् अग्लुचत् अग्लुञ्चीत् सस्य श्चुत्वेन शः जश्त्वेन जः सज्जति ससज्ज अयमा
त्मनेपद्यपि ससज्जे गुजि अव्यक्ते शब्दे गुंजति गुंज्यात् अर्च पूजायां आनर्च म्लेछ अव्यक्ते शब्दे अ
स्फुटे अपशब्दे चेत्यर्थः म्लेछति मिम्लेछ लछ लाछि लक्षणे ललछ ललां वाछि इच्छायां वांछति
आछि आयामे आंछति अत आदेरित्यत्र पक्षे स्वाभाविक ह्रस्वपरित्यहार्थं तेन दीर्घाभावान्नुट् तदं
आंछत पक्षे णत्वमुत्वार्थमिति मैत्रेयः नुट् आनांछ ह्रीछ लज्जायां ह्रीछति जिह्रीछ हुर्छा कौ
टिल्ये कौटिल्यमपसरणमिति मैत्रेयः उपधायां चेति दीर्घः हूर्छति मुर्छा मोहसमुच्छ्राययोः मूर्छति स्फु
र्छा विस्तृतौ स्फूर्छति युछ प्रमादे युछति उछि उंछे उंछः कणश आदानं कणिशाद्यर्जनं शिलमिति
यादवः उंछति उंछांचकार उछी विवासे विवासः समाप्तिः प्रायेणायं विपूर्वः व्युच्छति ध्रज ध्रजि धृज ध
जि ध्वज ध्वजि गतौ ध्रजति ध्रंजति धर्जति धंजति ध्वजति ध्वंजति कूज अव्यक्ते शब्दे कूजति चुकूज ।
अर्ज षर्ज अर्जने अर्जति आनर्ज सर्जति ससर्ज गर्ज शब्दे गर्जति तर्ज भर्त्सने तर्जति कर्ज व्यथने ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ उ॰ १२ ठच एठं चक्रे हिडि गत्यनादरयोः हिंडते जिहिंडे हुडि संघाते जुहुंडे कुडि दाहे चुकुंडे वडि विभाजने मडि च
भडि परिभाषणे परिहासः सनिंदोपालंभश्च परिभाषणं पिडि संघाते मुडि मार्जने मार्जनं शुद्धिन्यग्भावश्च मुंड
ते तुडि तोडने तोडनं दारणं हिंसनं च तुंडते हुडि वरणे हरण इत्येके चडि कोपे शडि रुजायां संघाते च तडि ताडने
पडि गतौ कडि मदे खडि मंथे हेडृ होडृ अनादरे जिहेडे जुहोडे वाडृ आप्लाव्ये वगाढिः आप्लाव्यं माप्लवं
वाडते द्राडृ ध्राडृ विशरणे शाडृ श्लाघायां अथ आटवर्गीयांताः समाप्ताः परस्मैपदिनः शौटृ गर्वे शौटति यौटृ
बंधने यौटति म्रेटृ म्रेडृ उन्मादे द्वितीयो डांतः टांतमध्ये पाठस्त्वर्थसाम्यात् नाम्रतिवत् म्रेटति म्रेडति कु॰
12 कटे वर्षावरणयोः कटति चटे इत्येके चकार इत् सिच्यतो हलादेरिति वृद्धौ प्राप्तायां ह्म्यन्तक्षणश्वसजागृणिश्व्ये
दितां ह्मयांतस्य क्षणादेश्चैतस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि अकटीत् अट पट गतौ आट आ
टतुः पपाट पेटतुः पेटुः रट परिभाषणे लट बाल्ये शट रुजाविशरणगत्यवसादनेषु वट वेष्टने ववाट व
वटतुः ववटुः ववटिथ किट खिट त्रासे शिट षिट अनादरे शेटति शिशेट सेटति सिषेट जट झट संघाते
भट भृतौ तट उच्छ्राये खट कांक्षायां णट नृत्तौ पिट शब्दसंघातयोः हट दीप्तौ षट अवयवे लुट विलोडने सम॰
डांतोयमित्येके चिट परप्रैष्ये विट शब्दे बिट आक्रोशे वशादिः हिट इत्येके इट किट कटी गतौ एटति केटति १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विवेथ आजिथ विव्यथुः विव्य विवाय विवय विव्यिव विव्यिम आजिव आजिम वेता अजिता वेष्यति
अजिष्यति अजतु आजत् अजेत् वीयात् सिचिवृद्धिः परस्मैपदेषु इगंतांगस्य वृद्धिः स्यात् परस्मैपद
देसिचि अवैषीत् आजीत् अवेष्यत् आजिष्यत् तेज पालने तेजति खज मंथे खजति खजि गतिवैकल्ये
खंजति एज़ कंपने एजांचकार ट्वोस्फूर्जा वज्रनिर्घोषे स्फूर्जति पस्फूर्ज क्षि क्षये अकर्मकः अंतर्भावित
ण्यर्थस्तु सकर्मकः क्षयति चिक्षाय चिक्षियतुः चिक्षियुः चिक्षयिथ चिक्षेथ चिक्षियिव चिक्षियिम क्षे
ता अकृत्सार्वधातुकयोर्दीर्घः अजंतांगस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः क्षीयात् अक्षैषी
त् क्षीज अव्यक्ते शब्दे कूजिनासहायं पठिंतु युक्तः विक्षीज लज लजि भर्जने लाज लाजि भर्त्सने च जज ज
जि युद्धे तुज हिंसायां तोजति तुतोज तुजि पालने गज गजि गृज गृजि मुज मुजि शब्दार्थाः गज मदे च व
ज व्रज गतौ वदव्रजेति वृद्धिः अव्राजीत् १८ अथ टवर्गीयांताः शाडांताः अनुदात्तेतः षट्त्रिंशत् अट्ट अतिक्र अ६
मणहिंसयोः दोपधोयं तोपधइत्येके अट्टते आनट्टे वेष्ट वेष्टने विवेष्टे चेष्ट चेष्टायां अचेष्टिष्ट गोष्ट लोष्ट
संघाते जुगोष्टे लुलोष्टे घट्ट चलने जघट्टे स्फुट विकसने स्फोटते पस्फुटे अठि गतौ अंठते आनंठे व
ठि एकचर्यायां ववंठे मठि कठि शोके शोकः इत्याध्यानं मंठते मुठि पालने मुंठते हेठ विबाधायां जिहेठे ए

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिं॰कौ॰
पु॰
१३

ले इति रवर्गीयान्ताः आद्यपवर्गीयान्ताः तत्रानुदात्तेतः स्तोभसंस्त्याश्चतुस्त्रिंशत् तिपृ तेपृ ष्टिपृ ष्टेपृ क्षर-
णार्थाः आद्योनुदात्तः क्षीरस्वामी त्वयं सेडिति बभ्राम तेपते तितिपे कादिनियमादिट् तितिपिषे तेप्ता ते-
प्स्यते लिङ्सिचावात्मनेपदेषु इकः समीपाद्धलः परोक्षलादि लिङ् आत्मनेपदपरस्मिंश्चेत्सेतौ कितौ स्तः कि-
त्वान्न गुणः तिप्सीष्ट तिप्सीयास्तां तिप्सीरन् अतिप्त अतिप्सातां अतिप्सत तितेपे तिष्टिपे तिष्टिपाते
तिष्टिपिरे तिष्टेपे तिष्टेपाते तिष्टेपिरे तेपृ कंपने च ग्लेपृ दैन्ये ग्लेपते टुवेपृ कंपने वेपते केपृ गेपृ ग्ले-
पृ च चालके पृ ने गतौ च सूत्र विभागादिति स्वामी मैत्रेयस्तु चकारमंतरेण पठित्वा कंपने इत्यपेक्षत इत्या-
ह ग्लेपेरर्थभेदात्पुनःपाठः मेपृ रेपृ लेपृ गतौ त्रपूष लज्जायां त्रपते तृफलभजत्रपश्च एषामत ए-
कारोभ्यासलोपश्च स्यात् किति लिटि सेटि थलि च त्रेपे त्रेपाते त्रेपिरे ऊदित्त्वादिड्वा त्रपिता त्रप्ता त्र-
प्सीष्ट त्रपिषीष्ट कपि चलने कंपते चकंपे रबि लबि अबि शब्दे रंबे ललंबे आनंबे लबि अवस्रंसने च १९
कबृ वर्णे कबते चकबे क्लीबृ अधार्ष्ट्ये चिक्लीबे क्षीबृ मदे क्षीबते शीभृ कत्थने शीभते चीभृ च रेभृ श-
ब्दे रिरेभे अभि रभि शब्दे इत्यन्ये अंभते रंभते ष्टभि स्कभि प्रतिबंधे स्तंभते उत्तंभते उदस्थास्तंभो- राम॰
रिति पूर्वसवर्णः विस्तंभते स्तम्भेरिति षत्वं तु न भवति स्तुविधोर्निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात् त- १३
दोजं तु स्थास्तंभोरिति पवर्गीयोपधपाठः स्तम्भेरिति तवर्गीयोपधपाठश्चेति माधवः केचित्सकार
अत उभयोर्ग्रहणं यत्र पवर्गीयाः पाठः ... तवर्गीयः पाठः =२

13

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कटति ईकारः स्त्रीं दितो निष्ठायामिति इणनिषेधार्थः केचित्तु इदितं मत्वा नुमि सति कंटतीत्यादि वदंति अंतेच
इ ई इति प्रश्लिष्य अयति इयाय इयतुः इयुः इययिथ इयेथ इयाय इययदीर्घस्यात्विजादेरित्याम् भिन्नयां चका
रेत्यादि उदाहरंति मदि भूषायां कुडि वैकल्ये कुण्डति कुण्डते इतितु हेगलं मुटपुटमर्दने चुडि अल्पीभा
वे मुडि खंडने मुण्डति भडि चेत्येके पुंडति रुटिलुटि स्तेये रुंटति लुंटति रुठिलुठीत्येके रुडिलुडीत्यपरे स्फु
लाप टिरविशरणे इरिदेङ्गा अस्फुटत् अस्फोटीत् स्फुटीत्यपि केचित् । इदित्वान्नुम् स्फुंटति पठ व्यक्तायांवाचि पे
ठतुः पेठिथ अपठीत् अपाठीत् वठ स्थौल्ये ववठतुः ववठिथ मठ मदनिवासयोः कठ कृच्छ्रजीवने रठ परि
भाषणे हठ प्लुतिशठत्वयोः बलात्कारे इत्येके हठति जहाठ रुठ लुठ उठ उपघाते ओठति उठेत्येके ऊठति ऊठां
चकार पिठ हिंसासंक्लेशनयोः शठ कैतवेच शुठ प्रतिघाते शोठति शुठीति स्वामी शुंठति कुठिच कुंठति
लुठि आलस्ये प्रतीघातेच शुठि शोषणे रुठि लुठि गतौ चुड्ड भावकरणे भावकरणमभिप्रायसूचनं चुड्डति
चुड्ड अड्ड अभियोगे अड्डति आनड्ड कड्ड कार्कश्ये कड्डति चड्डादय स्त्रयोदोपधाः तेन क्विपि चुत् अ
त् कत् इत्यादि क्रीडृ विहारे चिक्रीड तुडृ तोडने तोडति तुतोड तुड्डु इत्येके हुडृ हूडृ होडृ गतौ हुड्यात् हूड्या
त् होड्यात् रौडृ अनादरे रोडृ लोडृ उन्मादे अड उद्यमे अडति आड आडतुः आडुः लड विलासे लडति लड
पोर्ललयो श्चैकत्वस्मरणाल्ललति इति स्वाम्यादयः कड मदे कडति कडीत्येके कंडति गडि वदनैकदेशे गंड

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ त्रुंपति तुत्रुंप तुत्रुंपतुः संयोगात्परस्य लिटः कित्त्वाभावान्नलोपो न किदाशिषि इति कित्त्वान्नलोपः त्रुप्यात् प्रास्त्रुं
उ॰ पतो णविकर्त्तरीति पारस्करादिगणे पाठात्सुट् प्रस्त्रुंपति गोः स्थितपा निर्दिशाघ ङलुकि न प्रतत्रुंपीति त्रोपति त्रुं
१४ पति त्रुंपति तोफति त्रुंफति त्रोफति त्रुंफति इत्याद्यो द्वौ पंचमषष्ठौ च नीरेफाः अन्ये सरेफाः आद्याश्चत्वारः प्रथ
मान्ताः ततो द्वितीयान्ताः अष्टावप्युकारवन्तः पर्फ रफ रफि अर्व पर्व लर्व वर्व मर्व कर्व खर्व गर्व शर्व षर्व चर्व
गतौ आद्यः प्रथमान्तः ततो द्वौ द्वितीयान्तौ तत एकादश तृतीयान्ताः द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः पर्फ
ति पपर्फ रफति रंफति ध २१ अर्वति आनर्व पर्वति लर्वति वर्वति पवर्गीयादिरयं मर्वति कर्वति खर्व
14 ति गर्वति शर्वति षर्वति चर्वति ध २२ कुवि आच्छादने कुंवति लुवि तुवि अर्दने लुंवति तुंवति चुवि वक्त्र
संयोगे चुंवति ष्टभु ष्टंभु हिंसार्थौ सभंति ससर्भ सभिंता स्तंभति सस्तंभ स्तभ्यात् षिभु षिंभु इत्येके से
भति सिंभति शुभ शुंभ भाषणे भासने इत्येके हिंसायामित्यन्ये अथानुनासिकान्ताः तत्र कामन्तोऽष्टावनु
दात्तेतो दश घिणि घुणि घृणि ग्रहणे जुघुणे घिंसते जिघिंसे घुंसते जुघुंसे घृंसते जघृंसे घुण घू
र्ण भ्रमणे घोणते घूर्णते इमौ तुदादौ परस्मैपदिनौ पण व्यवहारे स्तुतौ च पन च स्तुतावित्येव संबध्यते रा॰
स्तुत्यर्थाद्विदेशात् पनिसाहचर्यात् पणेरपि स्तुतावेवायप्रत्ययः व्यवहारे तु पणते पेणे पणिता इत्यादि स्तुतौ १४
तु अनुबंधस्य केवले चरितार्थत्वादाय प्रत्ययान्तात्नात्मनेपदं पणायति पणायां चकार पेणे पणायिता सि पनि
आर्धधातुकविषये आयादीनां वैकल्पिकत्वेन तदभावे चरितार्थमिति भावः अवयवे चरितार्थत्वे लिङ्गसमुदायस्य प्रकारके =२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayu Sharada Peetham

प्रकाच्चकास्यचकादवकयोर्याचारक्रियाविज्ञपकौ तथायगायेयङ्-लिङ्-चेति धारणामी सनाद्यवः सनाद्यंतासात्वद्यत्र स्यात्तं तं भूवाद्यो धातव स्येव सत्रपितु युक्तं = १ आयेप॰ २ लिङ्
पर्यः परस्मात्स्मात्तु आर्धधातुकोपदेशकालेऽदकारान्तमित्यनु [illegible] पदे वस्येमाणेन संगच्छते निभावः आयङ्ङे-लिङ्-चेति आयादयः = ६

आोपदेशिक इत्साह तम्भते स्तंभते टस्तंभे जभी जृभि गात्रविनामे रधिजभोरचि एतयोर्नुमागमः स्यादचि जं
भते जजंभे जंभिता अजंभिष्ट जंभते शल्भ कत्थने शशल्भे वल्भ भोजने दंस्तोऽस्यादि ववल्भे गल्भ धा
र्ष्ट्ये गल्भते श्रंभु स्रंभु प्रमादे तालव्यादिर्दंत्यादिश्च श्रंभते स्रंभते ष्टुभु स्तंभे स्तोभते विष्टोभते तुष्टुभे
व्यष्टोभिष्ट ४०० अथ परस्मैपदिनः ४० गुपू रक्षणे गुपूधूपविच्छिपणिपनिभ्य आयः एभ्य आयः प्रत्ययः
स्यात्स्वार्थे पुगंतेति गुणः सनाद्यंता धातवः सनादयः क्रमे र्णिङंताः प्रत्यया अंते येषां ते धातुसंज्ञाः स्युः
धातुत्वाल्लडादयः गोपायति आयादय आर्धधातुके वा आर्धधातुकविवक्षायामायादयो वा स्युः कास्प्र
त्ययादाममंत्रे लिटि कास्धातोः प्रत्ययांतेभ्यश्चाम् स्याल्लिटि न तु मंत्रे कास्यनेकाच्ग्रहणं कर्तव्यं सूत्रे प्र
उने९ त्ययग्रहणमपनीय तत्स्थाने काच इति वाच्यमित्यर्थः अतो लोपः आर्धधातुकोपदेशकाले यदकारांतस्या नं९
कारस्य लोपः स्यादार्धधातुके परे गोपायांचकार गोपायांबभूव गोपायामास जुगोप जुगुपतुः ऊदित्वादि
ट् जुगोपिथ जुगोप्थ गोपायिता गोपिता गोप्ता गोपाय्यात् गुप्यात् अगोपायीत् अगोपीत् अगौ
प्सीत् धूप संतापे धूपायति धूपायांचकार दुधूप धूपायितासि धूपितासि जप जल्प व्यक्तायां वाचि
जप मानसे च चप सांत्वने षप समवाये समवायः संबंधः सम्यगवबोधो वा सपति रप लप व्यक्तायां
वाचि चुप मंदायां गतौ चोपति चुचोप चोपिता तुप तुंप त्रुप त्रुंप तुफ तुंफ त्रुफ त्रुंफ हिंसार्थाः तोपति तुतोप ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तायघो देशपदेतु वाक्येकवाक्यतेत्यस्ति विशेषः तेनेदानीकाप्येकालपूर्वनयपाध्यमतेनाचख्या चष्टे सन्नाया इत्यादिना श्लोकद्वयेन=५

सि॰कौ॰ उ॰ १५ स्तो॰ जादेस्तु द्वितीयस्य सन्वल्लघुनि चङ्परेऽनग्लोपे चङ्परे इति वक्ष्यती हि॰ सचा गसोति च द्वयमपि ।
अवर्त्तते अगसंज्ञानिमित्ते यच्चङ्परं णिचिति यावत् तस्मिं यल्लघु तस्मिं गस्याभ्यासस्तस्य सनीव कार्यं
स्यात् णाव ग्लोपे सति अथ वा गस्येति नावर्त्तते चङ्परे णौ यदंगं तस्य योऽभ्यासो लघुपरस्तस्य सनीव कार्यं
मित्यादि प्राग्वत् सन्यतः अभ्यासस्यात इकारः स्यात् सनि दीर्घो लघोः लघोरभ्यासस्य दीर्घः सन्वद्भाववि
षये अचीकमत णिङभावपक्षे कमेश्च ङ वक्तव्यः णेरभावान्नदीर्घः सन्वं नानेकाच्चितिमध्य
व॰ १ चकास्त्यथोपयत्यूर्णोत्यादीनां द्विरुच्यते किंतस्यावयवः कश्चित्तस्मादेकाच्चिदद्वयं वसु
15 तोंगस्यावयवो योऽभ्यास इति वर्णनात् उर्णोदीर्घ्यीपयतो द्वयंस्यादितिमन्महे २ च॰ स्तोतुभयमिदेन का॰ ६
स्यात्स्याच्चव्यवस्थया णेर्विरोध्यं सन्निहितं लघुनीसंगमेक्वा ४ इति व्याख्या विकल्पस्य केयटेनैव
वर्णनात् णेरग्लोपेपि संबंध स्तव गितामपि सिद्धये ४५० अथ क्रमप्राप्तास्त्रिंशत्परस्मैपदिनः अण
रण वण भण मण कण क्वण व्रण भ्रण ध्वण पाद्धार्थाः अणति रणति वणति वकारादित्वादेत्वा
भ्यासलोपौ नस्तः ववणतुः ववणिथ धणिरपि केश्चित्पठ्यते धणति आण अपनयने अपनयनं रामः १५
नामचौर्यभेदः आणति आणचकार ४५ शोणृ वर्णगत्योः शोणति शुशोण श्रोण संघाते श्रु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नासे पणाय्यात् पणिषीष्ट पनायति पनायांचकार पेने भामक्रोधे भामते बभामे क्षमूष् सहने क्षम
ते चक्षमे चक्षमिषे चक्षंसे चक्षमिध्वे चक्षंध्वे चक्षमिवहे म्वोश्च मांतस्य धातोर्नकारादेशः स्यात्
मकारे वकारे च परे णत्वं चक्षण्वहे चक्षमिमहे चक्षम्महे क्षमिष्यते क्षंस्यते क्षमेत आशिषि क्षमि
षीष्ट क्षंसीष्ट क्षमिष्ट अक्षंस्त कमु कान्तौ कान्तिरिच्छा कमेर्णिङ् स्वार्थे ङित्वात्तङ् कामयते अ
यामंताल्वाय्यित्निष्णुषु आम् अंत आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात् वक्ष्यमाणणिलोपा
पवादः कामयांचक्रे आयादय आर्द्धधातुके वा चकमे कामयिता कमिता कामयिष्यते कमिष्यते णि
श्रिद्रुस्रुभ्यः कर्तरि चङ् एभ्यः ण्यंतात् श्र्यादिभ्यश्च च्लेः चङ् स्यात् कर्त्रर्थे लुङि परे काम् इ अत इति स्थिते
णेरनिटि अनिडादावार्द्धधातुके परे णेर्लोपः स्यात् परत्वाद् एरनेकाच इति प्राप्ते एवं णिलोपो वियङ्यणगु
णवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेनेति वार्त्तिके णिलोपस्य पाचयते पाक्रिरिस्यादिक्ति जेतमव को णा इति तु
भावः वस्तुतस्तु अनिटीति श्रवणसामर्थ्याद् आर्द्धधातुकमात्रमस्य विषयः तथा चेयङादेरपवाद एवायं इ
यङ् अत इत्युत् यण आदिष्टत् गुणः कारणं वृद्धिः कारकः दीर्घः कार्यते णौ चङ्युपधाया ह्रस्वः च
ङ्परे णौ यदंगं तस्योपधाया ह्रस्वः स्यात् ६।१।११ चङि च ङि परे अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ १६ यइट् ततः परेषांषीध्वंलुङ्लिटांधस्यमूर्धन्यःस्यात् अयिषीढ्वं अयिषीध्वं आयिढ्वं आयिध्वं उ
पसर्गस्यायतौ अयतिपरस्योपसर्गस्ययोरेफस्तस्यलत्वंस्यात् प्लायते पलायते निस्दुसोरुत्वस्यासिद्धत्वा
न्नलत्वंस्यान्निरयते दुरयते निरदुरोस्तु निलयते दुलयते प्रत्ययत इति त्विणेन्नेदं आयकयमुदयति विततो
ईश्वेस्मिरञ्जाविति माघः इत्यकिरकरीस्यत्र प्रश्लिष्टस्य भविष्यति यथा अनुदात्तेत्वलक्षणमात्मनेपदम
नित्यं चान्दिङोङित्करणात् ज्ञापकात् वादित्वात् वयेये पयेमयेचयेतयेप्रणयते नेये दयदान गतिर
रा॰६ क्षणहिंसादानेषु आदानेयहं दयांचक्रे रयगतौ ऊयीतंतुसंताने ऊयांचक्रे पूयी विसरणे दुर्गंधे च विस
16 रणं चकुत्साकरणं पूयते पुपूये क्नूयी शब्दे उंदे च क्नूयते चुक्नूये क्ष्मायी विधूनने चक्ष्माये स्फायी ओ
प्यायी वृद्धौ स्फायते पस्फाये प्यायते लिड्यङोश्च लिटि यङि च प्यायः पीभावः स्यात् ततः प्रसंग
विज्ञानात्सिद्धं पीशब्दस्यद्वित्वं एरनेकाच इतियण् पिप्ये पिप्याते पिप्यिरे दीपजनबुधपूरितायि
प्यायिभ्योन्यतरस्यां एभ्यश्च्लेश्चिण्वास्यादेकवचनेतशब्देपरे चिणोलुक् चिणःपरस्य लुक्स्यात् अ
प्यायि अप्यायिष्ट तायृ संतानपालनयोः संतानः प्रबंधः तायते ततायेआतायि अतायिष्ट शल राम॰
चलनसंवरणयोः शेले वलवल्लसंवरणे संचरणेच ववले ववल्ले मलमल्लधारणे मेले ममल्ले भल १६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सेलृ इति केचित्पठन्ते १

ष्ठेवृ ष्टेवृ च पेलृ फेलृ शेलृ षेलृ गतौ मेलृ स्खलृ संचलने खोलृ खोर्ऋ गतिप्रतिघाते धोर्ऋ गतिचातुर्ये

श्रा ए ष्ठेलृ एलृ च षो णा स्य स्त्रयो ऽमी ताल व्योष्माद्यः पे एलृ गतिमें ए श्रे वृ रोड पिपे एवं अण शाब्दे उ वेणि

पदेशेनो लेयो रेफात्य स्वा सत्वं अणति नोपदेशफलं यङ्लुकि स्थन्ति वणोत्यपि केचित् वेणतुः वेणि

प्या कनी दीप्तिकान्तिगतिषु चकान हनवन शब्दे स्तनति वनति वनषण संभक्तौ संभक्तिः संमेतनं वने

रर्थभेदा स्तुनः पाठः सनति ससान सेनतुः ये विभाषा जनसनखनामात्त्ववा स्याद्यादौ क्ङिति सायात सन्या

त् ५०० अमगत्यादिषु कनी दीप्तिकान्तिगती सत्र गतेः परयोः शब्दसंभक्त्योरादिशब्देन संग्रहः अमति

आम इमद्म मीमृ गतौ इमति दद्म मस्यन्ते लिन वृद्धिः अदमीत् जहम्म मीमति मिमीम अयं शब्दे च

चमु छमु जमु झमु अदने ष्ठिवुक्लमुचमां शितीति एषामचो दीर्घः स्याच्छितीति आङि चम इति वक्तव्यं ।

आचामति आङि किं चमति विचमति अचमीत् जिमी केचित्पठन्ति जेमति क्रमु पादविक्षेपे वाभ्राश

३।१।७०

भ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः एभ्यः श्यन्वा स्यात् कर्त्रर्थे सार्वधातुके परे शपोऽपवादः क्रमः परस्मै

पदेषु क्रमेर्दीर्घः स्यात् परस्मैपदपरे शितीति क्राम्यति क्रामति चक्राम क्राम्यतु क्रामतु स्नुक्रमोरनात्मनेपदनिमि ८३

परस्मै ३ त्ते अनुत्रेवेट् अक्रमीत् अयं रेवसंता आत्मनेपदीनः ३४ अयवयपयमयचयतयणय गतौ अय

३।१।३७

ते दयायासश्च दय् अय् आस् एभ्य आम्स्याल्लिटि अयांचक्रे अयेल अयिषीष्ट विभाषेटः इणः परी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनात्मनेपद इति निमित्त आत्मनेपदनिमित्ताभावे इत्यर्थः उभयोरपि कर्मव्यतिहारस्तु [illegible] स्नुक्रमोरिति नियमादिट् [illegible] स्नुक्रमो उदात्त

त्वादिट् सिद्धे नियमार्थोऽयमित्याह अत्रैव ङितीति = ३

सि.कौ. बंधने कूल आवरणे शल रुजायां संघाते च तल निष्कर्षे निष्कर्षो निष्कोषणं तच्चांतर्गतस्य बहि
उ. र्निःसारणं तुल्ल फल संघाते मूल प्रतिष्ठायां फल निष्पत्तौ फेलतुः फेलुः चुल्ल भावकरणे भावकरणं
१७ अभिप्रायसूचनं फुल्ल विकसने चिल्ल शैथिल्ये भावकरणे च तिल गतौ तेलति तिल्ल इत्येके वेल्ल चे
ल केल खेल क्ष्वेल वेल्ल चलने पंचम इदितः षष्ठोलोपधः पेल फेल शेल गतौ षेल इत्येके स्खल
संचलने च स्खाल अस्खालीत् खल संचये गल अदने गलति अगालीत् षल गतौ सल।
हल ति* विशरणे श्वल श्वल्ल आशुगमने शश्वाल अश्वालीत् शश्वल्ल अश्वल्लीत् खोरृ खोलृ ग खोरृ ६
तिप्रतिघाते खोरति खोलति धोरृ गतिचातुर्ये धोरति त्सर छद्मगतौ तत्सार अत्सारीत् क्म
17 र हूर्छने चक्मार अभ्र वभ्र मभ्र चर गत्यर्थाः चरतिर्भक्षणेपि अभ्रति आनभ्र मा भवानभ्रीत् अ
गोत्वरस्य रेफस्यातः समीपत्वाभावान्न वृद्धिः ष्ठिवु निरसने ष्ठिवुक्लमुचमामिति दीर्घः ष्ठीवति
अस्य द्वितीयस्य ठकारस्य ठकारो वेति वृत्तिः तिष्ठेव तिष्ठिवतुः तिष्ठिवुः टिष्ठेव टिष्ठिवतुः हलि च
ति दीर्घः ष्ठीव्यात् जि जये अयमजंतेषु पठितुंयुक्तः जय उत्कर्षप्राप्तिः अकर्मकोयं जयति राम
सन्लिटोर्जेः जयतेः सन्लिण्निमित्तो योभ्यासस्तस्मात्परस्य कुत्वं स्यात् जिगाय जिग्यतुः जि १७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

देयाख्यातत्वाच्च = ६

भल्ल परिभाषणहिंसादानेषु बभले बभल्ले कल शब्दसंख्यानयोः कलते चकले कल्ल अव्यक्ते शब्दे
कल्लते अशब्दे इति स्वामी अशब्दस्तूष्णीभाव इति च तेवृ देवृ देवने चलितेवे दिदेवे षेवृ गेवृ ग्लेवृ पेवृ
वृमेवृ म्लेवृ सेवने परिनिविभ्य इति षत्वं परिषेवते परिषिषेवे अयं सोपदेशोऽपि इति न्यासकारः अस्या
तज्ज्ञाय्यविरुद्धं गेवते जिगेवे जिग्लेवे पिपेवे मेवते मिमेवे म्लेवते शेवृ खेवृ क्लेवृ इति अपि एके रेवृ प्ल
वगतौ प्लवगतिः प्लुतगतिः रेवते ५१४ अवस्यन्ताः परस्मैपदिनः मव्य बन्धने ममव्य सूर्क्ष्य ईर्क्ष्य ईर्ष्य
ईर्ष्यार्थाः हय गतौ अहयीत् यान्तत्वान्न वृद्धिः शुच्य अभिषवे अवयवानां शिथिलीकरणं सुरायाः
संधानं वा अभिषवः स्नानं च शुशुच्य चुच्य इत्येके हर्य गतिकान्त्योः जहर्य ५२० अल भूषणप
र्याप्तिवारणेषु अलति आल अलीत् त्वांतस्य त्वेति लुङ्मप्रथमैकपदं अलः समीपो योऽन्त्यो लदन्तांग
स्यातो वृद्धिः स्यात् परस्मैपदेषु परस्मिन्नेटीति निषेधस्यातो हलादेरिति विकल्पस्य चापवादः माभवान्
लील् अयं स्वरितेदित्येके तन्मते अलते इत्याद्यपि ञिफला विशरणे तृफले त्यत्वं पे लतुः
फेलुः अफालीत् मील श्मील स्मील क्ष्मील निमेषणे निमेषणं संकोचः द्वितीयस्तालव्यादिः र
ती यो दंत्यादिः पील प्रतिष्टम्भे प्रतिष्टम्भो रोधनं णील वर्णे निणील शील समाधौ शीलति कील

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ तु॰ १८ प्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु अवति आवीत्
धावु गतिशुद्ध्योः स्वरितेत् धावति धावते दधाव दधावे अथोष्मान्ता आत्मनेपदिनः धुक्ष धिक्ष संदीपन
क्लेशनजीवनेषु धुक्षते धिक्षते दिधिक्षे वृक्ष वरणे वृक्षते ववृक्षे शिक्ष विद्योपादाने शिक्षते भिक्ष भिक्षा
यामलाभे लाभे च भिक्षते क्लेश अव्यक्तायां वाचि बाधने इति दुर्गः क्लेशते चिक्लेशे दक्ष वृद्धौ शीघ्रार्थे च दक्ष
ते ददक्षे दीक्ष मौंड्येज्योपनयननियमव्रतादेशेषु दीक्षते दिदीक्षे ईक्ष दर्शने ईक्षांचक्रे ईष गतिहिंसाद
र्शनेषु ईषांचक्रे भाष व्यक्तायां वाचि भाषते वर्ष स्नेहने दंत्योष्ठ्यादिः ववर्षे गेषृ अन्विच्छायां ग्लेष इत्ये
18 के अन्विच्छा अन्वेषणं जिगेषे पेषृ प्रयत्ने जेषृ णेषृ एषृ प्रेषृ गतौ जेषते नेषते एषांचक्रे पिप्रेषे रे
षृ हेषृ ह्रेषृ अव्यक्ते शब्दे आद्यौ वृकशब्दे ततो द्वौ अश्वशब्दे रेषते हेषते ह्रेषते कासृ शब्दकुत्सायां
कासांचक्रे भासृ दीप्तौ बभासे णासृ रासृ शब्दे नासते प्रणासते णस कौटिल्ये नसते भ्यस भये भ्यसते
बभ्यसे आङः शसि इच्छायां आशंसते आशशंसे ग्रसु ग्लसु अदने जग्रसे जग्लसे ईह चेष्टायां ईहां
चक्रे बहि महि वृद्धौ बंहते मंहते अहि गतौ अंहते आनंहे गर्ह गल्ह कुत्सायां गर्हते जगर्हे वर्ह वल्ह । राम॰
प्राधान्ये ओष्ठ्यादी वर्ह वल्ह परिभाषणहिंसाछादनेषु दंत्योष्ठ्यादी केचित्तु पवर्गीयौ दंत्योष्ठ्यादिताम् अनयोरो १८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्युः जिगयिथ जिगेथ जिगाय जिगय जिग्यिव जिग्यिम जेता जेष्यति जीयात् अजैषीत् जीव
प्राणधारणे जिजीव. पीवमीवतीवनीव स्थौल्ये पिपीव मिमीव तितीव निनीव क्षीवु क्षेवु निरसने उ वीतुर्वीध
वी दुर्वी धुर्वी हिंसार्थाः ऊर्वाचकार उपधायांच तुतूर्व गुर्वी उद्यमने गूर्वति मूर्वी बंधने पुर्व पर्व मर्व पू
रणे चर्व अदने भर्व हिंसायां कर्व खर्व गर्व दर्पे. अर्व शर्व षर्व हिंसायां आनर्व शर्वति सर्वति उवि
व्याप्तौ इन्वति इन्वांचकार पिवि मिवि णिवि सेचने तृतीयो मूर्धन्यो ष्मादिरित्येके सेवने इतितरंगिण्यां पिन्वति
हिवि दिवि धिवि धिजि विप्रीणनार्थाः हिन्वति दिन्वति धिन्विकृण्व्योरच अनयोरकारोंतादेशः स्याद् प्रत्यय श्वरा[illegible]
विषये अतोलोपः तस्य स्थानिवद्भावात् लघूपधगुणो न उप्रत्ययस्य पित्सुगुणः धिनोति धिनुतः धिन्वंति लो
पश्चास्यान्यतरस्यां म्वोः असंयोगपूर्वीयःप्रत्ययो कारस्तदंतस्यांगस्य लोपो वा स्यात् म्वोः परयोः धिन्वः धि
नुवः धिन्मः धिनुमः मिपि तुपरत्वात् गुणः धिनोमि उतश्च प्रत्ययादसंयोगपूर्वात् असंयोगपूर्वीयःप्रत्ययोका
रस्तदंतादंगात्परस्य हेर्लुक्स्यात् धिनु नित्यत्वात् उकारलोपात् पूर्वमाट् धिनवानि धिनवाव धिनवाम धि
न्वतीत्यादि रिवि रवि धवि गत्यर्थाः रिण्वति रण्वति धन्वति कृवि हिंसाकरणयोश्च चकारात्प्रीतौ कृणोति इत्या
दि धिनोतिवत् अयंस्वादोच मव बंधने च मवतः मेवः अमावीत् अमवीत् अवरक्षणगतिकांतिप्रीति त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ अक्ष्णुहि अक्ष्णवानि आक्ष्णोत् आक्ष्णवं अक्ष्णुयात् अक्ष्यात् अक्षास्तां ऊदित्वादिट् नेटि मा भवान
उ॰ क्षीत् आक्षिष्टां आक्षिषुः उडभावे तु मा भवानाक्षीत् आष्टां आक्षुः तक्ष त्वक्ष तनूकरणे तक्षू करणे तक्ष।
१९ तनूकरणे तक्षः श्नुर्वा स्यात् स्वार्थविषये तक्ष्णोति तक्षति काष्ठं ततक्षिथ ततष्ठ अतक्षीत् अतक्षिष्टां
अताक्षीत् अताष्टां तनूकरणे किं वाग्भिः संतक्षति भर्त्सयति इत्यर्थः उक्ष सेचने उक्षांचकार रक्ष पा
लने णिक्ष चुंबने प्रणिक्षति त्रक्ष ष्ट्रक्ष णक्ष गतौ त्रक्षति स्त्रक्षति नक्षति वक्ष रोषे संघाते इत्येके।
मृक्ष संघाते म्रक्ष इत्येके तक्ष त्वचने त्वचनं संवरणं त्वचो ग्रहणं च पक्ष परिग्रहे इत्येके सूर्क्ष आदरे।
सुसूर्क्ष अनादर इति क्वाचित्कोपपाठः अवज्ञावहेलनमसूर्क्षणमित्यमरः काक्षि वाक्षि माक्षि कांक्षा
19 यां द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते च चूष पाने चुचूष तूष तुष्टौ पूष वृद्धौ मूष स्तेये लूष रूष भू
षायां शूष प्रसवे प्रसवोऽभ्यनुज्ञानं तालव्योष्मादिः यूष हिंसायां जूष च भूष अलंकारे भूषति ऊष रुजा लं५
यां ऊषांचकार ईष उंछे कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः तृतीयषष्ठौ तालव्यो
ष्मादी सप्तमो दंत्योष्मादिः चकाष चखाष शिशेष शिशेषिथ शेष्टा क्सः अशिक्षत् अशेक्ष्यत् जे
षतुः जझषतुः शेषतुः ववषतुः मेषतुः तीषसहलुभरुषरिषः ३ इडित्यादेः परस्य तादेरार्द्धधातुकस्येड्वा। राम॰
स्यात् रोषिता रोष्टा रोषिष्यति भष भर्त्सने भर्त्सनं श्वरवः भषति उष दाहे ओषति उवोष विदजागृभ्योऽम् १९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यादित्वाच्चाऊः ज्ञिहगतौ पिच्छिदे विहजेह्वास्प्रयते आघोदंतो स्यादिः अंत्यःकेवलो स्यादिः उभावप्यौ
स्यादी इत्येके दंत्योष्ठ्यादी इत्यपरे जेहति गत्यर्थोपि ववादे ग्राह निद्राक्षये निक्षेपइत्येके काष्ठदीप्तौ चकाशे
ऊहवितर्के ऊहते ऊहांचक्रे गाहूविलोडने गाहते जगाहे जगाहिषे जघाक्षे जगाहिढ्वे जगाहिध्वे।
जघाढ्वे गाहिता ढेढेलोपः हस्यलोपःस्यात् ढेपरे गाढा गाहिष्यते घाक्ष्यते गाहिषीष्ट घाक्षीष्ट अगा
हिष्ट अगाढ अघाक्षातां अघाक्षत अगाढाः अघाड्ढं अघाक्षि गृहूग्रहणे गर्हते ऋदुपधेभ्यो लि
टः कित्त्वं गुणात्पूर्वविप्रतिषेधेन जगृहे जगृहिषे जघृक्षे जगृहिढ्वे जगृहिध्वे जघृढ्वे गर्हिता गर्ढा ग
र्हिष्यते घर्क्ष्यते गर्हिषीष्ट घृक्षीष्ट लुङि अगर्हिष्ट इडभावे पाक्षइगुपधादनिटःक्सः इगुपधोपःशल
न्तस्तस्मादनिटश्च्लेः क्सादेशःस्यात् अघृक्षत क्सस्याचि अजादौ तङि क्सस्य लोपःस्यात् अलोंत्यस्य
अघृक्षातां ग्लहश्च ग्लहते घुषिकांतिकरणे घुंषते जुघुंषे केचित् घषेत्यउपधंपठंति अथादंत्यंताः
वाभिशायप्रकाशने:॥ परस्मैपदिनः घुषिर अविशब्दने विशब्दनं प्रतिज्ञानंततोन्यस्मिन्नर्थे इत्येके शब्दे इत्यन्ये पेठुः घोषति जु
घोष घोषिता इरित्वादङ्वा अघुषत् अघोषीत् अक्षू व्याप्तौ अक्षोन्यतरस्यां अक्षोवा श्नुप्रत्ययःस्यात्
कर्त्रर्थे सार्वधातुकेपरे पक्षेशप् अक्ष्णोति अक्ष्णुतः अक्ष्णुवंति अक्षति अक्षतः अक्षंति आनक्ष
आनक्षिथ आनष्ट अक्षिता अष्टा अक्षिष्यति स्कोरितिकलोपः षढोःकःसि अक्ष्यति अक्ष्णोतु।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ २०

20

स्तगतौ पिपिसतुः पिपेसतुः हसे हसने एदित्वान्न वृद्धिः अहसीत् णिश समाधौ तालव्योष्मान्तः प्रणेशति
मिश मश शब्दे रोषकृते च तालव्योष्मौ ३० शव गतौ दन्त्योष्मान्तः तालव्योष्मादिः शवति अशावीत् अश
वीत् अशाविशम् शाशा शुल गतौ तालव्योष्माद्यन्तः शशाश शेशतुः शेशुः शेशिथ शसु हिंसायां द
न्त्योष्मान्तः न शसददवादिगुणानामित्येत्वं न शशाश शशासतुः शशासुः शशासिथ शंसु स्तुतौ अयं दुर्गतावपीति
दुर्गः नृशंसो घातुकः क्रूर इत्यमरः शशंस आशिषि नलोपः शस्यात् चह परिकल्कने कल्कनं दम्भः
शाठ्यं च अचहीत् मह पूजायां अमहीत् रह त्यागे रहि गतौ रंहति रंह्यात् दृह दृहि वृह वृहि वृ
द्धौ दर्हति ददर्ह ददृहतुः दृंहति ७५० वर्हति वृंहति बृहि शब्दे च बृंहितं करि गर्जितं बृहि रइत्येके
अवृहत् अवर्हीत् तुहिर दुहिर उहिर अर्दने तोहति तुतोह अतुहत् अतोहीत् दोहति अदुहत्
अदोहीत् अनिट्कारिकास्वस्य ग्रहणं नेच्छन्ति ओहति उवोह ऊहतुः ऊहुः ओहिता माभवानुहत्
ओहीत् अर्ह पूजायां आनर्ह अथ कृपूपर्यन्ताः अनुदात्तेतः द्युत दीप्तौ द्योतते द्युतिस्वाप्योः संप्र
सारणं अनयोरभ्यासस्य संप्रसारणं स्यात् दिद्युते दिद्युताते दिद्युतिरे द्योतिता द्युद्भ्यो लुङि द्युतादिभ्यः
परस्मैपदं लुङः वा स्यात् पुषादीति सूत्रेण परस्मैपदे ऽङ् अद्युतत् अद्योतिष्ट श्विता वर्णे श्वेतते शि राम॰
श्विते अश्वितत् अश्वेतिष्ट ञिमिदा स्नेहने मेदते मिदेर्गुणः मिदेरिकोगुणः स्यात् इत्संज्ञकशकारादौ २०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तरस्यां एभ्यो लिट्याम् वास्यात् ओषांचकार उवोष ऊषतुः उवोषिथ जिषु विषु मिषु सेचने जिजेष।
क्रादिनियमादिट् विवेषिथ विविषिव विविषिम वेष्टा वेक्ष्यति अविक्षत् अवेक्ष्यत् पुष पुष्टौ पोष
ति पोषिता पोषिष्यति अपोषीत् अनिट्सु पुष्येति श्यना निर्देशात् अयं सेट् अलोनक्सः अङ् विधौ
दैवादिकस्य ग्रहणात् अङ् श्रिषु श्लिषु प्रुषु प्लुषु दाहे श्रेषति शिश्रेष श्रेषिता शिश्लेष श्लेषिता अय
मपि सेट् अनिट्सु दैवादिकस्यैव ग्रहणमिति कैयटादयः यत्तु निट्कारिकायां द्वयोर्ग्रहणमित्युक्तं
तत्स्वोक्तिविरोधात् ग्रंथांतरविरोधात् च उपेक्ष्यं पुप्रोष पुप्लोष पृषु वृषु मृषु सेचने मृषसहने च इ
तरौ हिंसासंक्लेशनयोश्च पर्षति पपर्ष पृष्यात् घृषु संघर्षे हृषु अलीके तुस ह्रस ह्लस रस शब्दे तु
तोस जह्रास जह्रसतुः जह्लास ररास लस श्लेषणक्रीडनयोः घस्लृ अदने अयं न सार्वधातुके लिङ्
न्यतरस्यामित्यदेर्घस्लादेशविधानात् ततश्च यत्र लिंगवचनं चास्ति तत्रैवास्य प्रयोगः अत्रैव पाठः
शापि परस्मैपदे लिंगं लृदित्करणमङि अनिट्कारिकासु पाठो वलादावार्धधातुके लिंगं कस्मरचितु वि
शेष्यो पादानं घसति घस्ता सः स्यार्धधातुके सस्यतः स्यात्सादावार्धधातुके घत्स्यति घसतुः अघसत्
घसेत् लिंगाद्यभावादाशिष्यस्याप्रयोगः पुषादिद्युतादि लृदितः परस्मैपदेषु पप्रत्यन् विकरणे पुषादेर्द्युता
देर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु अघसत् जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु जर्जति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ २१

२१

तिपरस्मैपदे लृटे ऊदित्त्वलक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्नेड् इति निषेधः स्यन्त्स्यति।
स्यन्दिष्यते। स्यन्त्स्यते। स्यन्दिषीष्ट। स्यन्त्सीष्ट। द्युद्भ्यो लुङीति परस्मैपदे पक्षे ऽङ् नलोपः। अस्यदत्। अस्यन्दिष्ट।
अस्यन्त। अस्यन्त्साताम्। अस्यन्त्सत। अस्यन्त्स्यत्। अस्यन्दिष्यत। अस्यन्त्स्यत। अनुविपर्यभिनिभ्यः स्यन्दतेरप्रा
णिषु। एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्। अनुष्यन्दते। अनुस्यन्दते वा जलम्। अप्राणिषु
किम्। अनुस्यन्दते हस्ती। अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यन्दते इत्यत्रापि पक्षे षत्वं भवत्येव। प्राणि
षु नेत्युक्तौ तु न स्यात्। कृपू सामर्थ्ये। कृपो रो लः। कृप उः रः लः इति पदच्छेदः। कृपेति लुप्तषष्ठीकं पदम्। तच्चाव
र्तते। कृपेर्यो रेफस्तस्य लः स्यात्। कृपेर्ऋकारस्यावयवो यो रेफसदृशस्तस्य लकारसदृशः स्यात्। कल्प
ते। चक्लृपे। चक्लृपिषे। चक्लृप्से। इत्यादि स्यन्दवत्। लुटि च कॢपः। लुटि स्यसनोश्च कृपेः परस्मैपदं वा स्या
त्। तासि च क्लृपः। कृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्। तङानयोरभावे। कल्प्तासि। क
ल्प्तास्थः। कल्पितासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिषीष्ट। लिङ्सिचेति कित्त्वं क्लृ
प्सीष्ट। अक्लृपत्। अकल्पिष्ट। अक्लृप्त। अकल्प्स्यत्। अकल्पिष्यत। अकल्प्स्यत। वृत्। वृत्तः संपूर्णो
द्युतादिर्वृतादिश्चेत्यर्थः। अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः। षित्त्वं च। घट चेष्टायाम्। घटते। जघटे

त्वरत्संभ्रमे इत्यस्यानन्तरं ज्वरादयः षित इत्युक्ते त्वरत्यन्ता इत्यस्योद्देश्यत्वे बहूनां नन्तु फणान्ताः सर्वे मीतीति सिद्धं तथापि स्पष्टप्रतिपत्त्यर्थमाह षित्तश्चेति
प्रयोजनं तु षिद्भिदादिभ्य इत्यङ्ङिति राघ...॥२॥

प्राण्यप्राणिकर्तृकस्याप्राणिकर्तृकत्वात्षत्वमेवेति भावः॥

राम॰ २१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एधा आदित्त्वाभावान्नानेन गुणः ञिमिदे अमिदत् अमेदिष्ट ञिष्विदा स्नेहनमोचनयोः मोहन
योरित्येके स्वेदते सिष्विदे अस्विदत् अस्वेदिष्ट ञिक्ष्विदा चेत्येके अक्ष्विदत् अक्ष्वेदिष्ट ७५० रुच
दीप्तावभिप्रीतौ च रोचते सूर्यः हरये रोचते भक्तिः अरुचत् अरोचिष्ट घुट परिवर्त्तने घोटते जुघुटे
अघुटत् अघोटिष्ट रुट लुट लुठ प्रतीघाते अरुटत् शुभ दीप्तौ क्षुभ संचलने णभ तुभ हिंसायां
आद्याऽभावेपि नभं तामन्यके सम माभ्वन्नन्यके सर्वे इति निरुक्ते अनभत् अनभिष्ट अतुभत् अ
तोभिष्ट इमौ दिवादौ क्र्यादौ च स्रंसु ध्वंसु भ्रंसु नंभ्र अवस्रंसने ध्वंसु गतौ च आङितु न लोपः अस्र
सत् अस्रंसिष्ट नास्रसत् कदिणांग्रैव मिति रघुकाव्य ७६० भ्रंशु इत्यपि केचित्पठंति अत्र तृतीय
एव तालव्यांत इत्यन्ये भ्रंशु भ्रंशु अधःपतने इति दिवादौ ॥ स्रंभु विश्वासे अस्रभत् अस्रंभिष्ट इ
त्यादिरयं तालव्यादिस्तु प्रमादेव गतः वृतु वर्त्तने वर्त्तते वृद्भ्यः स्यसनोः वृतादिभ्यः परस्मैपदं वास्या
त् स्ये सनि च न वृद्भ्यः चतुर्भ्यः वृतु वृधु शृधु स्यंदूभ्यः सकारादेरार्द्धधातुकस्येण्न स्यात् तङानयोरभावे
वर्त्स्यति वर्त्तिष्यते अवृतत् अवर्त्तिष्ट अवर्त्स्यत् अवर्त्तिष्यत अ वृधु वृद्धौ शृधु शब्दकुत्सायां इमौ ह
निवत् स्यंदूप्रश्रवणे स्यंदते सस्यंदे सस्यंदिषे सस्यंत्से सस्यंदिध्वे सस्यंध्वे स्यंता रद्भ्यः स्यसनोरि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ २२

भ्यः प्रागेवानुवादे कर्त्तव्ये तन्मध्ये नुवादसामर्थ्यात्परस्मैपदं हेडृ हेडति जिहेड हिडयति अहिडि अहीडि अना
दरे तु हेडयति वटभट परिभाषणे वटवेष्टने भटभृताविति पठितयोः परिभाषणे मित्वार्थोऽनुपवादः न
टनृत्तौ इत्ययमेव पूर्वं मपठितः तत्रायं विवेकः पूर्वं पठितस्य नाटयत्यर्थः यत्कारिणनट व्यपदेशः पदार्था
भिनयो नृत्यं गात्रविक्षेपमात्रं नृत्तं केचित्तु घटादौ नाठनलाविति पठंति गतावित्यन्ये णोपदेशपर्यु
दासवाक्ये भाष्यकृता नाटीति दीर्घपाठात् घटादिर्णोपदेश एव ष्टक प्रतीघाते स्तकति चकस्तेन्नौ स्तमि
प्रतीघाततयोः पूर्वं पठितस्य लक्षिमात्रे मित्वार्थोऽनुवादः आत्मनेपदिषु पठितस्य परस्मैपदि घनुवादात्प
रस्मैपदं कखे हसने ए दित्वान्नवृद्धिः अकखीत् ७५० रगे शंकायां लगे षंगे रगे लगे षगे ष्टगे संव
रणे कगे नोच्यते अस्यायमर्थ इति विशिष्य नोच्यते क्रियासामान्यार्थत्वात् अनेकार्थत्वादित्यन्ये
अक अग कुटिलायां गतौ रणगतौ चकाण ८०० रराण चणशणश्रण दाने च अणगतावित्यन्ये श्रथ
श्नथ क्नथ हिंसार्थाः जासिनि प्रहणेति सूत्रे क्राथेति मित्वपि वृद्धिर्निपात्यते क्राथयति मित्वं तु निपा
तनात् परत्वाच्चिण्णमुलोर्दीर्घो तिदो र्धे चरितार्थे अक्रथि अक्राथि क्रथंक्रथं क्राथंक्राथं वनैं च हिंसा
यामिति शेषः वनु चनोच्यते वनु इत्ययं पूर्वं एवायं धातुर्मं तु लौनादिकस्यानुवादः उदित्करणसामर्थ्यात्
तेन क्रियासामान्ये वनतीत्यादि प्रवनयति अनुपसृष्टस्य तु मित्वविकल्पो वक्ष्यते ८१९ ज्वलदीप्तौ

राम॰ २२

मित्वविकल्प इति ग्ला
ला वनु वमां चेति गणसू॰

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

घटादयो मित इति वक्ष्यमाणेन मित्संज्ञा तत्फलं तु णौ मितां ह्रस्वः चिण्णमुलोर्दीर्घोन्यतरस्यामिति वक्ष्यते
घटयति विघटयति कथं तर्हि कमलवनोद्घाटनं कुर्वते ये प्रविघाटयिता समुत्पतन् हरिदश्वः कमला
करानिवेत्यादि श्रृणु घट संघात इति चौरादिकस्येदं न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोयमिति वाच्यं
नान्ये मितो हेतौ इति निषेधात् अहेतौ स्वार्थे णिचि ज्ञपयादिपंचकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः व्य
थ भयसंचलनयोः व्यथते व्यथो लिटि व्यथोभ्यासस्य संप्रसारणं स्याल्लिटि हलादिः शेषापवाद। प्रस्थह
लादिशेषेण निवृत्तिः विव्यथे ७७० प्रथ प्रख्याने पप्रथे प्रस विस्तारे पप्रसे म्रद मर्दने स्खद स्खद
ने स्खदनं विद्रावणं क्षजि गतिदानयोः मित्त्वसामर्थ्यादनुपधत्वेपि चिण्णमुलोरिति दीर्घविकल्पः अक्ष
ञ्जि अक्षाञ्जि क्षञ्जं क्षञ्जम् क्षाञ्जम् क्षाञ्जम् दक्ष गतिहिंसनयोः योयं दक्षि शीघ्रार्थयोरनुदात्तेत्सु
पठितस्तस्येहार्थविशेषे मित्त्वार्थोनुवादः क्रप कृपायां गतौ च क्रदि क्रदि क्लदि वैक्लव्ये वैकल्य इत्येके त्र
योप्यनिदित इति नंदी इदित इति स्वामी क्रदिक्लदी इदितौ क्रद क्लद इति चानिदितौ इति मैत्रेयः क्रदिक्रदि
क्लदीनामाह्वानरोदनयोः परस्मैपदेषु पठितानां पुनरिह पाठो मित्त्वार्थः ञित्वरा संभ्रमे घटादयः षितः षि
त्वादङ् स तु वक्ष्यते अथ फणांताः परस्मैपदिनः ज्वर रोगे ज्वरति गड सेचने गडति जगाड हेड वेष्टने
हेडृ अनादरे इत्यात्मनेपदेषु गतः स एवोत्तरस्यानुबंधे [illegible] ने अर्थविशेषे मित्त्वार्थं परस्मैपदिभ्यो ज्वरादि

© Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आत्मनेपदार्थे२

सि॰ कौ॰ उ॰ २३ नां मलेत्तु नकाप्यनुपपत्तिः कंपने चलिः चल कंपन इति ज्वलादिः चलयति शाखां कंपनादन्यत्र तु
शीलं चालयति अन्यथाकरोतीत्यर्थः हरतीत्यर्थ इति स्वामी सूत्रं चालयति क्षिपतीत्यर्थः छदि
ऊर्जने छद अपवारण इति यो जादिकस्य स्वार्थे णिजभावेमित्यार्थोयमनुवादः अनेकार्थत्वादूर्जे
रर्थे वृत्तिः छदं लं प्रयुंक्ते प्रेरयति छदयति बलवंतं प्राणवंतं वा करोतीत्यर्थः अन्यत्र छादयति
अपवारयंते प्रयुंक्ते इत्यर्थः स्वार्थे णिचि तु छादयति बलीभवतीत्यर्थः प्राणीभवति अपवा
23 रयति वेत्यर्थः जिह्वोन्मथने लडि ः लड विलास इति पठितस्यमित्वार्थोयमनुवादः उन्मथ
नं ज्ञापनं जिह्वाशब्देन षष्ठीतत्पुरुषः लडयति जिह्वां तलीयान्तत्पुरुषो वा लडयति शात्रं लडय
ति दधिः अन्यत्र लाडयति पुत्रं मदी हर्षग्लेपनयोः ग्लेपनं दैन्यं दैवादिकस्यमित्वार्थोयमनुवादः
मदयति हर्षयति ग्लेपयति वेत्यर्थः अन्यत्र माद्यति चित्तविकारमुत्पादयतीत्यर्थः ध्वन शब्दे
भाव्यर्थमित्वार्थमनूद्यते ध्वनयति घंटां अन्यत्र ध्वानयति अस्पष्टाक्षरमुच्चारयतीत्यर्थः अत्र भोजः
दलिवलिस्खलिरणिध्वनित्रपिक्षपयश्चेति पपाठ तत्र ध्वनिरणी उदाहृतौ दल विदारणे वल सं
वरणे स्खल संचलने त्रपूष लज्जायामिति गताः तेषां णौ दलयति वलयति स्खलयति त्रपयति राम॰ २३

लडयति जिह्वां प्रसार्य मुखाद्बहिर्निष्कासयतीत्यर्थः
लडयति बालमाहारं भक्षयति १×

तान्प्रत्ययार्थमिति ज्वलितिकसंतेभ्यो णः इति ज्वलादिषु प्रत्ययार्थं ९ =

एतस्यैव पार्थं पठिष्यमाण एवायमित्यार्थमनूद्यते प्रज्वलयति ज्वल ह्वल ह्मल चलने प्रज्वलयति प्र
ह्मलयति स्मृ आध्याने चिंतायामिति पठिष्यमाणस्य मित्वार्थोऽनुवादः आध्यानं उत्कंठापूर्वकं स्मर
णं दॄ भये दॄ विदारणे इति क्र्यादेरयमनुवादः दृणंतं प्रेरयति दरयति भयादन्यत्र दारयति धात्वंतर
मेवेदमिति मतं तु दृ स्ती स्यादिके वि छ्वादेः अत्र ह्रस्व र प्र्ययेति सूत्रे वि दृ इति दीर्घस्थाने ह्रस्वं
पठंति तन्नेति माधवः नॄ नये क्र्यादिषु पठिष्यमाणस्यानुवादः नयः अन्यत्र नारयति श्रा पाके।
श्रै इति कृतात्वस्य श्रा इत्यदादिकस्य च सामान्येनानुकरणं लुग्विकरणालुग्विकरणयोरलुग्वि
करणस्य लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति परिभाषाभ्यां श्रपयति विक्लेदयतीत्यर्थः पाका
दन्यत्र श्रापयति स्वेदयतीत्यर्थः मारणतोषणनिशामनेषु ज्ञा निशामनं चाक्षुषं ज्ञानमिति मा
धवः ज्ञापनमात्रमित्यन्ये निशाने ष्विति पाठांतरं निशानं नाम तीक्ष्णीकरणं एष्वेवार्थेषु ज्ञाना
तिर्मित् ज्ञप मिच्चेति चुरादौ ज्ञापनं मारणादिकं च तस्यार्थः कथं विज्ञापना भर्तृषु सिद्धमेति त
ज्ज्ञापयत्याचार्य इति च शृणु माधवमते अचाक्षुषज्ञाने मित्वाभावात् ज्ञापनमात्रे मित्वमि
ति मते तु ज्ञानियोगे [illegible] निशाने ष्व इति पठतां हरदत्तादी

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नियमवांल्लति नियमवच्छ्व्लालाच विमतोल्लोकि एतरी शएप्रत्ययेग्ण चलेयं=२ ञ्चादयापनत्युवच्चाचरथुरन्नाहनिषधानन्तरकठनपद्य ... नयरकरणालभ्यमकालावधारणं स्वजलुचरितार्थकीर्चवसुवाधात्यज्यते अत्रनुविधानसामर्थ्यादातोव्यत्वस्यादितिभावः=९

र्यवसितं नियमयन्तित्यादितु नियमवच्छ्वसान्तात्करोतीति णोवोध्यं स्वदिरवपरिभ्यांच मित्त्वेत्येव।
अवस्वादयति परिस्वादयति अपावपरिभ्य इति न्यासकारः स्वामीतु नकमीति नञ्मुत्तरत्रिसत्र्या
अननुवर्त्य शमः अदर्शने इति चिच्छेद यमस्त्वपरिवेषणे मित्वमाह तन्मतेपर्यवसितंपनियमयन्ति
त्यादिसम्यगेव उपसृष्टस्य स्वदेश्च दवादिषु र्वैस्यैवेति नियमात् प्रस्वादयतीत्याह तस्मात्सूत्रद्वयेउदा
हरणप्रत्युदाहरणयोर्न्यासःफलितः इदंच मतं वृत्तिन्यासादिविरोधादुपेक्ष्यं फणगतौ नेतिनिवृत्तं
असंभवात् निषेधास्त्रवंमुसोन पठितः फणादिकार्यानुरोधात् फणांचसप्तानां एषांवा एत्वा एत्वा
भ्यासलोपौस्तः कितिलिटि सेटि थलिच फेणतुः फेणुः फेणिथ पफणतुः पफणिथ फणयति व
त् घटादिः समासः फणेः प्रागेव वृदित्येके तन्मते फाणयतीत्येव राज दीप्तौ स्वरितेत् राजति राजते
रेजतुः रराजतुः रेजे रराजे अतिइत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वं टुभ्राज टुभ्राश टुभ्ला
श दीप्तौ अनुदात्तेतः भ्राजतेरिहपाठः फणादिकार्यार्थः पूर्वपाठस्तुब्रश्चादिषत्वाभावार्थः त
त्रैहिराजिसाहचर्यात्फणादेरेवग्रहणं भ्रेजे बभ्राजे वाभ्राशेतिश्यन्वा भ्राश्यते भ्रेशे बभ्राशे
भ्लाश्यते भ्लाशते भ्लेशे बभ्लाशे द्वावपीमौ तालव्यान्तौ स्यमुस्वनध्वन शब्दे स्यमादयः त्रयस्तेताः रामः
परस्मैपदिनः स्येमतुः सस्यमतुः अस्यमीत् स्वेनतुः सस्वनतुः अस्वानीत् अस्वनीत् विषणति २४

25

... ली॰ ... =३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्ठै च्छये इति वक्ष्यमाणस्य कृतात्वस्यैकानिर्देशः स्नपयति स्वन अवतंसने शब्दे इति पठिष्यमाणस्या
नुवादः स्वनयति अन्यत्र स्वानयति घटादयो मितः मित्संज्ञा इत्यर्थः जनीजॄष्क्नसुरंजोऽमन्ताश्च मित
इत्यनुवर्त्तते जॄष् इति षित्निर्देशात् जीर्यतेर्ग्रहणं जरणात्तु जारयति केचित्तु जनीजॄष्क्नसु इति
पठित्वा क्नसु निरसने इति दैवादिकमुदाहरंति ज्वलह्वलह्मलनमामनुपसर्गाद्वा एषां मित्वं वा प्राप्त
विभाषेयं ज्वलयति ज्वालयति उपसृष्टेस्तु नित्यं मित्वं प्रज्वलयति कथं तर्हि प्रज्वालयति उन्नामय ८५
तीति घन्नेतान्नतकरोतीति णौ कथं संक्रामयति इति मितां ह्रस्व इति सूत्रे वा चित्तविरागे इत्यतो वे
ति अनुवर्त्य व्यवस्थित विभाषाश्रयणादिति वृत्तिकृत् एतेन रज्ञो विस्रामयन् राजर्षीन् विश्रा
मयेति सः इत्यादि व्याख्यातं ग्लास्नावनुवमां च अनुपसर्गाद् एषां मित्वं वा स्यात् आद्ययोरप्राप्ते इत
रयोः प्राप्ते विभाषा नकम्यमिचमां अमंतत्वात् प्राप्तं मित्वं न स्यात् कामयते आमयति चामयति
शमोऽदर्शने शाम्यतिर्दर्शने मिन्न स्यात् निशामयति रूपं अन्यत्र तु प्रशमयति निशमय्य वधः कथाः
कथं तर्हि निशामय तदुत्पत्तिं विस्तराद्गदतो मम इति शाम आलोचने इति चौरादिकस्य धातोर्नामने
कार्यत्वात् श्रवणेऽपि वृत्तिः शाम्यतिवत् यमोऽपरिवेषणे यच्छति भोजनं ततोऽन्यत्र मिन्न स्यात् आ
यामयति ज्ञपयति ज्ञापयति वेत्त्यर्थे परिवेषणे तु यमयति ब्राह्मणान् भोजयतीत्यर्थः प

CC-0 Lal Bahadur Shastri University Delhi. Digitized by ... Shiksha Peetham

...मपलक्षणं न हाहते ज्ञाविवरं ... लक्षणायामनुषंगादेः सार्वधातुकार्थ्यं ... परस्मैपदज्ञानमुक्तं ... इति भावः ॥ ८

सि॰कौ॰ उ॰ २५ त्वष्टुत्व हलोपाः ॥ सिविसहोरेवर्णस्य अनयोरवर्णान्तस्यो स्यात् हलोपे सोढः सोढस्य सदेः सस्य षत्वं
न स्यात् परिसोढा सिवादीनां वाड्व्यवायेपि परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्याद् ड्व्यवायेपि पर्यष
हत पर्यसहत रम क्रीडायां रेमे रेमिषे रंता रंस्यते रंसीष्ट अरंस्त अथ कसंताः परस्मैपदिनः षद्लृ विश
रणगत्यवसादनेषु पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौ
शीयसीदाः ॥ पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे सीदति ससाद सेदतुः सेदुः सेदिथ
25 ससत्थ सत्ता सत्स्यति लृदित्वादङ् असदत् सदिरप्रतेः निषीदति न्यषीदत् सदेः परस्य लिटि सदेर
भ्यासस्य षत्वं न स्यात् लिटि निषसाद निषेदतुः शद्लृ शातने विशीर्णतायामयं शातनं तु विषयेत
या निर्दिश्यते शदेः शितः शिज्ञ्विनोस्मादात्मनेपदं स्यात् शीयते शशाद शेदतुः शेदिथ शश
त्थ शत्ता अशदत् क्रुश आह्वाने रोदने च क्रोशति क्रोष्टा ञ्जुः क्तः अक्रुक्षत् कुच संपर्चनकौ कुंवश
टिल्यप्रतिष्टंभविलेखनेषु कोचति चुकोच बुध अवगमे बोधिता बोधिष्यति ८५० रुह बीजजन्म
नि प्रादुर्भावे च रोहति रुरोह रुरोहिथ रोढा रोक्ष्यति अरुक्षत् कसगतौ अकासीत् अकसीत् वृत् राम:
ज्वलादिगणः समाप्तः अथ यजन्तांताः स्वरितेतः हिक्क अव्यक्ते शब्दे हिक्कति हिक्कते अंचु गतौ याचे २५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जिहिक्क जिहिक्के १

भयादिजनितोद्वेगो वैक्लव्यं=३ वेधुत्वानुकूलव्यापारोद्वित्यर्थः=५ तदभाववद्विशेष्यकं तत्प्रकारकं ज्ञानं चेधात्वर्थः मुक्तोरत्रिनमिनिरुद्धात नलिङरूपे भ्रमतिरति प्रयोगात्=८

अवधमति समरादेर्मुक्तो इत्यर्थः वेश्वस्वन इति पत्नं परगाद्योगताः दध्वनतुः षमष्टम ।
अवैकल्ये ससाम तस्ताम ज्वलदीप्तौ अज्वालीत् चलकंपने जलघातने घातनं तैक्ष्ण्यं।
जलति टल ट्वल वैक्लव्ये ष्ठल स्थाने हलविलेखने णलगंधे वंधने इत्येके ८३० पलगतौ।
बल प्राणने धान्यावरोधे च वेलतुः वेलुः पुलमहत्वे पोलति कुलसंस्त्याने वंधुषु च संस्त्यानं सं
घातः वंधुशब्देन तद्व्यापारो लक्ष्यते कोलति चुकोल शलहुलपत्लृ गतौ शशाल जुहोल पपात
पेततुः पतिता पतःश्रम् अङिपरे अपप्तत् नेगंनदपतेति णत्वं प्रणिपपात क्वथे निष्पा
के क्वथति चक्काथ अक्कथीत् पथेगतौ अपथीत् मथेविलोडने मेथतुः अमथीत् ८५०
टुवम उद्गिरणे इहैवनिपातनात् अत इत्वमिति सुधाकरः ववाम ववमतुः वादित्वादेत्वाभ्यास
लोपौन भागवृत्तौ तु वेमुरित्याद्युदाहृतं तज्ज्ञाप्यादौ नदृष्टं भ्रमुचलने वा भ्राशेति श्यन्वा भ्र
म्यति भ्रमति भ्राम्यतीति तु दिवादौ वक्ष्यते वाजृभ्रमुत्रसां एषामेत्वाभ्यासलोपौ वास्तः कि ति
लिटि सेटि थलि च भ्रेमतुः वभ्रमतुः अभ्रमीत् क्षर संचलने अक्षारीत् अथसहवनुदात्ते
तौ सह मर्षणे परितिविभ्यइति षत्वं परिषहते सेहे सहिता तीयसहेति वेट् इडभावे ढत्वध

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अत्रेय श्रुपपरितिल घासदेति सूत्रे आदिग्रहणं प्रथर्थे त्युक्ताः सेतुपहतो नेयसिद्धे एवंच्या दिग्रहणे मोलपदाशिक गतिपत्यर्थं अनवंधाश्रै कांतास्य धाश्रेशदोयकारो लुप्तो निर्दि
ष्टः तथाचडपदेशत्वाद्दित्वाभावात् सिद्धो तवेमुरुस्यकविरुद्धमिर सिमदिश्यो गोपहाल कलाः इति=४

सि.कौ. ३. २६

चषभक्षणे छषहिंसायां चच्छषतुः चच्छषे रुष आदानसंवरणयोः म्लक्ष्म्लक्ष अदने दासृदाने मा
हृमाने गुहूसंवरणे ऊदुपधाया गोहः गुहउपधाया ऊ स्यात् गुणहेतावजादौ प्रत्यये गूहति गूहते ऊदित्वा
दिड्वा गूहित्वा गोढा गूहिष्यति घोक्ष्यति गूहेत् गुह्यात् अगूहीत् इड्भावे क्सः अघुक्षत् लुग्वा दुहदि
हलिहगुहामात्मनेपदे दंत्ये एषां क्सस्य लुग्वा स्यात् दंत्ये तङि ढत्वधत्वष्टुत्वढलोपदीर्घाः अगूढ अघुक्षत
क्सस्याचीत्यंतलोपः अघुक्षातां अघुक्षत अगुह्वहि घुक्षावहि अघुक्षामहि अथाजंता उभयपदिनः श्रि
९८ ञ् सेवायां श्रयति श्रयते शिश्राय शिश्रियतुः श्रयिता णिश्रीति चङ् अशिश्रियत् ८५० भृञ् भरणे
बभार बभ्रतुः बभर्थ बभृव बभृषे भर्ता ऋद्धनोः स्ये ऋतो हंतेश्च स्यस्य इट् स्यात् भरिष्यति रिङ्शयग्लि
ङ्क्षु रीय क्रियाद्यावार्द्धधातुके लिङि च ऋतो रिङादेशः स्यात् रीङ् प्रकृते रिङ्विधि सामर्थ्याद्दीर्घो न ।
पा.८९ ऋं उश्च ऋवर्णांतात् परौ झलादी लिङ् सिचौ कितौ स्तः भृषीष्ट भृषीष्ट भृषीयास्तां अभार्षी
त् अभार्ष्टां आभार्षुः ह्रस्वादंगात् सिचो लोपः स्यात् झलि अभृत अभृषातां अभरिष्यत् हृञ् हरणे
हरणं प्रापणं स्वीकारः स्तेयं नाशनं च जहर्थ जह्रिव जह्रिम जह्रिषे हर्ता हरिष्यति धृञ् धारणे ध
रति अधार्षीत् अधृत णीञ् प्रापणे निनयिथ निनेथ निन्यिषे अथाजंताः परस्मैपदिनः धेट् पाने राम:
धयति आदेच उपदेशेऽशिति उपदेशे एजंतस्य धातोरात्वं नस्याच्छिति आत औ णलः आदंताद्धातोर्णा २६.

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेच अंचति अंचते अचुइस्येके अचिरुस्यपरे टुयाचष्टयाच्ञायां याचति याचते रेट्टपरिभाषणे रेट
ति रेटते चचेचदे याचते चचाद् चेदे अचदीत् प्रोष्ठ पर्याप्तौ उप्रोच्य मिदृमेद् मेधाहिंसनयोः मिमेद
मिमिदे ८६१ धांता विमाविति स्वामी नमा मिमेद्य धांताविति न्यासः मिथ संगमेच मेथति मिमेथे णिद
णेद कुत्सासन्निकर्षयोः निनेद निनिदतुः निनिदे निनेदतुः निनेदे शृधुमृधु उंदने क्लेदने शर्द्धते
शर्धिता मर्धति मर्धते मर्धिता बुधिरबोधने बोधति बोधते इरित्वादङ्वा अबुधत् अबोधीत्
५६ अबोधिष्ट दीपजनबुधेति चिणं न भवति [illegible] सर्वेत्तरसा
हचर्येण दैवादिकस्यैव तत्र ग्रहणात् ऊबुंदिर् निशामने निशामनं ज्ञानं बुबुंदे बुबुंद अबुदत् अबुं
दीत् वेणृगतिज्ञाननिशामनचिंतानवादित्रग्रहणेषु वेणति वेणते नांतोप्ययं ८ खनु अवदारणे ।
खनति खनते गमहनजनखनघसां लोपः क्ङित्यनङि एषामुपधाया लोपः स्यादजादौ क्ङिति न त्व
ङि चख्नतुः येविभाषा खायात् खन्यात् चीव आदानसंवरणयोः चिचीव चिचीवे चाय पूजानिशाम
नयोः व्यय गतौ अव्ययीत् दाश्ट दाने ददाश ददाशे भेष भये गतावित्येके भेषति भेषते भ्रेष्ट भ्लेष्ट
गतौ असगतिदीप्त्यादानेषु असति असते आस आसे अयंषां तोपि स्पश बाधनस्पर्शनयोः
स्पर्शनं ग्रथनं स्प शति स्पशते ८० लषकांतौ वा भ्राशेति श्यन्वा लषति लषति लेषतुः लेषे

ऊंदसे७

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ ए॰ १० शोप्ये पाके पै ओवै शोषणे पायात् अपासीत् घुमास्थेतीत्वं तदपवाद एलिङि त्येत्वं गातिस्थे
उ॰ ति सिचलुङ्न पारूपस्य लाक्षणिकत्वात् ष्टै वेष्टने स्तायति स्नै वेष्टने शोभायां चेत्येके स्नायति दैप्
२७ शोधने दायति अघुत्वादेत्वसिचलुकौ न दायात् अदासीत् पा पाने पाघ्राध्मेति पिबादेशः नस्यादन्तवा
न्नोपधागुणः पिबति पेयात् अपात् घ्रा गंधोपादाने जिघ्रति घ्रेयात् घ्रायात् अघ्रासीत् अघ्रात् ध्मा
२७ शब्दाग्निसंयोगयोः धमति ष्ठा गतिनिवृत्तौ तिष्ठति स्थादिष्वभ्यासेनेति षत्वं अधितष्ठौ उपसर्गादिति
षत्वं अधिष्ठाता स्थेयात् अस्थात् ए॰ २० म्ना अभ्यासे मनति दाण् दाने प्रणियच्छति देयात् अदा
त् ह्वृ कौटिल्ये ह्वरति ऋतश्च संयोगादेर्गुणः ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्यात् लिटि किद्र्थ
पी ६ मेदं परत्वादत्स्यपि भवति रपरत्वं उपधावृद्धिः जह्वार जह्वरतुः जह्वरुः जह्वर्थ ह्वर्ता ऋद्धनोः स्ये
ह्वरिष्यति गुणोर्तिसंयोगाद्योः अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च
ह्वर्यात् अह्वार्षीत् अह्वार्ष्टां स्वृ शब्दोपतापयोः स्वरति सस्तीति वेट् सस्वरिथ सस्वर्थ वमयोस्तु श्यु
कः किति श्र्युक एकाच उगन्ताच्च परयोर्गित्कितोरिण्न स्यात् परमपि स्वरत्यादि विकल्पं बाधि
त्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् सस्वरिव सस्वरिम राम॰
परत्वादृद्धनोः स्य इति नित्यमिट् स्वरिष्यति स्वर्यात् अस्वारीत् अस्वारिष्टां अस्वार्षीत् अ २७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लऔकारादेशः स्यात् दधौ आतोलोपइटिच अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातोलोपस्यात्
द्वित्वात्परत्वाल्लोपे प्राप्ते द्विर्वचनेऽचीति निषेधः द्वित्वेकृते आतोलोपः दधतुः दधुः दधिथ दधाथ द
धिव दधिम धाता दाधाघ्वदाप् दारूपाधारूपाश्च धातवोघुसंज्ञाःस्युः दाप्दैपौविना एर्लिङि घुसंज्ञानां
मास्थादीनांच एत्वंस्यादार्धधातुके किति लिङि धेयात् धेयास्तां धेयासुः विभाषाधेट्श्व्योः आभ्यांच्ले
श्चङ्वास्यात् कर्तृवाचिनि लुङि परेचङीति द्वित्वं अदधत् अदधतां अदधन् विभाषाघ्राधेट्शाच्छा
सः एभ्यः सिचोलुग्वास्यात्परस्मैपदेपरे अधात् अधातां अधुः यमरमनमातांसक्च एषांसक्स्या
देभ्यः सिचइट्स्यात् परस्मैपदेषु अधासीत् अधासिष्टां अधासिषुः ग्लैम्लैहर्षक्षये हर्षक्षयोधातु
क्षयः ग्लायति जग्लौ जग्लिथ जग्लाथ वान्यस्यसंयोगादेः घुमास्थादेरन्यस्यसंयोगादेर्धातोरातए
त्वंवास्यादार्धधातुके किति लिङि ग्लायात् ग्लेयात् अग्लासीत् म्लायति द्यैन्यक्करणे न्यक्करणंति
रस्कारः द्रैस्वप्ने ध्रैतृप्तौ ध्यैचिन्तायां रैशब्दे स्त्यैष्ट्यैशब्दसंघातयोः स्त्यायति षोपदेशस्या
पि सत्वेकृतेनष्टुत्वं षोपदेशफलंतु तिष्ठासति अतिष्ठिपदित्यत्र षत्वं खैखदने क्षैजैषैक्षये।
क्षायति जायति जज्ञौ जाता जास्यति सायति ससौ साता घुमास्थेत्यत्र विभाषाघ्राधेडित्यत्रच
स्यतेरेवग्रहणं नत्वस्य तेन नएत्वं सिचलुकौ न सायात् असासीत् कैगैशब्दे गेयात् अगासीत्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by ... Peetham

भवति अयं कुटादौ गत्यर्थोपि उङ् गतौ उदोष्ठ उदविष्ठ उदुविव उदोष्य उदुव णिश्रीति चङ् अउउडु
वत् जि जि अभिभवे अभिभवो न्यूनीकरणं न्यूनीभवनं च आद्यः सकर्मकः शत्रून् जयति द्वितीयेत्वकर्म
कः अध्ययनात्पराजयते अध्येतुं ग्लायतीत्यर्थः विपराभ्यां जेः इति तङ् पराजेरसोढः इति अपादानत्वं
अयडीडिताङ्गिः ष्मिङ् ईषद्धसने स्मयते सिष्मिये सिष्मियिढ्वे सिष्मियिध्वे ॥ ९८० ॥ गुङ् अव्यक्ते
शब्दे गवते जुगुवे गाङ् गतौ गाते गाते गाते इट एत्वे कृते वृद्धिः गेलङ् इति आगे गेत गेयातां गेरन्
गासीष्ट गासीयास्तां गासीरन् गाङ् कुटादि सूत्रे ङकारादेशस्यैव गाङो ग्रहणं नत्वस्य तेनाङित्वात् घु
मास्थेतीत्वं न अगास्त आगादिको यमिति हरदत्तादयः फलेतु न भेदः कुङ् घुङ् उङ् ङुङ् शब्दे अन्य
स्तु उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्याहुः कवते चुकुवे घवते अवते ऊवे वा णौ दांगवतीय इत्युवङ्
ततः सवर्णदीर्घः ओता ओष्यते ओषीष्ट औष्ट ङवते ञुङुवे ङोता च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ ४५
क्लुङ् इत्येके ॥ ९९० ॥ रुङ् गतिरेषणयोः रेषणं हिंसा रुरुवे रविता से धृङ् अवध्वंसने धरते दध्रे मे
ङ् प्रणिदाने प्रणिदानं विनिमयः प्रत्यर्पणं च प्रणिमयते नेर्गद इति णत्वं नत्र घुप्रकृति माङ् इति पठि
त्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात् देङ् रक्षणे दयते दयते दिगिलिटि दिग्यादेशेन द्वित्ववा
धनाभिव्यक्त इति वृत्तिः दिग्ये दिग्याते दिग्यिरे स्थाघ्वोरिच्च अनयोरिदादेशः स्यात् सिच्च कित्स्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्मार्ष्टा स्मृ चिंतायां ह्वृ संवरणे सृ गतौ आदित्वान्नेट् ससर्थ सस्रिव रिङ् स्रियात् असार्षीत् असा
र्षुः सर्तिशास्त्यर्तिभ्यश्च एभ्यः च्लेरङ् स्यात्कर्त्तरि लुङि. इह लुग्विकरणशास्तिना साहचर्यात् सर्तेर्जौ
होत्यादिकस्यैव ग्रहणे तेन भ्वादेर्नाङ् शीघ्रगतौ तु पाघ्रेति धौरादेशः धावति ऋ गतिप्रापणयोः
ऋच्छति ऋच्छत्यृतां तौदादिक ऋच्छेः ऋ धातोः ऋतां च गुणः स्याल्लिटि णलि प्राग्वदुपधावृद्धिः आर
आरतुः आरुः इडत्यर्तिव्ययतीनां अद् ऋ व्येञ् एभ्यः स्थलो नित्यमिट् स्यात् आरिथ अर्त्ता अरिष्य
ति अर्यात् आर्षीत् आर्ष्टी गॄ सेचने गरति जगार जगर्थ जगृव रिङ् ग्रियात् अगार्षीत् ए
३० ध्वृ हूर्छने स्रु गतौ सुस्रोथ सुस्रुव स्रूयात् णिश्रीति चङ् लघूपधगुणादंतरंगत्वादुवङ् असु
स्रुवत् षु प्रसवैश्वर्ययोः प्रसवोऽभ्यनुज्ञानं सुषोथ सुषविथ सुषुविव सोता स्तुसुधूञ्भ्यः परस्मै
पदेषु एभ्यः सिच इट् स्यात् परस्मैपदेषु असावीत् पूर्वोत्तराभ्यां जिघ्यां साहचर्यात् सुनोतेरेव ग्रहणमि
तिपक्षे असोषीत् श्रु श्रवणे श्रुवः शृ च श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च शपोपवादः श्नोर्ङि
त्वात् धातोर्गुणो न शृणोति शृणुतः हुश्नुवोः सार्वधातुके जुहोतेः श्नुप्रत्ययांतस्यानेकाचोऽसंयोगस्य च
संयोगपूर्वोवर्णस्य यण् स्यादजादौ सार्वधातुके परे उवङोऽपवादः शृण्वंति शृणोमि शृण्वः शृ
वः शृण्मः शृणुमः शुश्रोथ शुश्रुव शृणु शृणवानि श्रूयात् श्रूयात् अश्रौषीत् ध्रु स्थैर्ये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ तु॰ २९ ते षंजपरिषंगे देशसंजस्वञ्जां शपि रंजेश्च एषां शपि नलोपः सजते परिषजते अथियं ग्रथियंभि स्वंजी
नो लिटः कित्वं वेति व्याकरणांतरं देभतुः सस्वज इति भाष्योदाहरणादेकदेशानुमत्या इह प्याख्यायंते
सदेः परस्य लिटीति सूत्रे स्वंजेरुपसंख्यानं अतोभ्यासात्परस्य षत्वं नेति परिषस्वजे परिषस्वंजे सस्वजि
षे सस्वंजिषे स्वङ्क्तास्वंक्ष्यते स्वजेत स्वंक्षीष्ट प्रत्यषङ्क्त प्राक्सितादिति षत्वं परिनिविभ्यः सुसिवादीनां वि
29 वेति विकल्पः एतदर्थमेवोपसर्गात्सुनोतीत्येव सिद्धे स्तुस्वंजोः परिनिवीत्यत्र पुनरुपादानं पर्यषङ्क्त ह
दपुरीषोत्सर्गे हदते जहदे हत्ता हत्स्यते हदेत हत्सीष्ट अहत्त अथ परस्मैपदिनः जित्विदा अव्यक्ते शब्दे
स्कंदिर् गतिशोषणयोः चस्कंदिथ चस्कंथ स्कंत्ता स्कंत्स्यति नलोपः स्कद्यात् इरित्वादङ् वा अस्कदत् अ
स्कांत्सीत् अस्कांत्तां अस्कांत्सुः वेः स्कंदेरनिष्ठायां षत्वं वा स्यात् कृत्येवेदं अनिष्ठायामिति पर्युदासात् वि
विस्कंत्ता ५ ष्कंत्ता निष्ठायां तु विस्कन्नः परेश्च अस्मात्परस्य स्कंदेः सस्य षो वा स्यात् योगविभागादनिष्ठायामिति नसंब
ध्यते परिष्कंदति परिस्कंदति परिष्कन्नः परिस्कन्नः षत्वपक्षे णत्वं नच पदव्यवायः अयन्त धातु बहिरंगत्वात्
षत्वस्यासिद्धत्वं धातूपसर्गयोः कार्यमंतरंगमित्यभ्युपगमात् पूर्वं धातुरुपसर्गेण युज्यते ततः साधने
नेति भाष्यं पूर्वं साधनेनेति मतांतरे तु न णत्वं यभ मैथुने येभिथ ययब्ध यब्धा यप्स्यति अयाप्सीत् ।
णम प्रह्वत्वे शब्दे च नेमिथ ननंथ नंता अनंसीत् अनंसिष्टां गम्लृ सृप्लृ गतौ इषुगमियमां छः एषां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वेः स्कंदेरनिष्ठायामिति [illegible] स्कंदतीत्युदाहृतं
तन्नेति भावः = ६ [illegible] षत्वं भवत्येवेति भावः अत एवाह परिष्कंदतीति = ५

अदित अदिथाः अद्धिषि पैपेङ् गतौ प्यायते पाप्ये प्यैङ् वृद्धौ प्यायते पप्ये प्याता त्रैङ् पालने त्रायते
तत्रे पूङ् पवने पवनं पवित्रीकरणं पवते पुपुवे पविता मूङ् बंधने मवते डीङ् विहायसा गतौ विहा
यसा गतिराकाशगमनं डयते डिड्डयिता ॥ई॥ तॄ प्लवनतरणयोः प्लवनं नौकातरणं अन्तररूतोः अदंतस्य
धातो रेग स्येत्स्यात् इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन तरति अछत्स्तृतामितिगुणः तफलेत्येत्वे तेरतुः तेरुः
तृतो वा वृङ्वृञ्भ्यां अदंताच्चेति दीर्घो वा स्यात् न तु लिटि तरीता अलिटीति किं तेरिथ हलि चेति दीर्घः तीर्यात्
सिचि च परस्मैपदेषु अत्र वॄतः इटो दीर्घो न अतारिष्टां अथ पञ्चानुदात्तेतः गुप गोपने तिज निशाने मान पूजा
यां वध बंधने गुप्तिज् किद्भ्यः सन् मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य सूत्रद्वयोक्तेभ्यः सन् स्यात् माना
दीनामभ्यासेकारस्य दीर्घश्च गुपेर्निन्दायां तिजेः क्षमायां कितेर्व्याधिप्रतीकारे निग्रहणे अपनयने नाशने संशये
च मानेर्जिज्ञासायां वधेश्चित्तविकारे दानेरार्जवे शानेर्निशाने सन्नाद्यन्ता इति धातुत्वे सन्यङोः सन्नन्तस्यप्रङ
तस्य च प्रथमैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य अभ्यासकार्यं गुपिप्रभृतयः किञ्चिन्निंदाद्यर्थका एवानुदा
त्तेतो दाननशानौ च स्वरितेतौ एते नित्यसन्नन्ताः अर्थान्तरे त्वननुबंधकाश्चुरादयः अनुबंधस्य केवलेऽचरिता
र्थत्वात् सन्नन्तात् लङ् धातोरित्य विहितत्वात्सनोऽनार्धधातुकत्वं तेनेड् गुणेन जुगुप्सते जुगुप्सांचक्रे तिति
क्षते मीमांसते भष भावः चर्त्वं बीभत्सते रभ राभस्ये आरभते आरेभे रब्धा रप्स्यते डुलभष् प्राप्तौ लभ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अत्र प्यासजगे धातोः कर्मणि इति ... तपासंबध्यतेसाचव्यवस्थितविभाषा तेनेहस्य त्रद्वयेऽर्थविशेषो ... तित्रयेणसाक्षादुक्तोपि
वृत्तिकारादिभिरुपलक्षणं ... दिना=६

इत्यादिकश्चिद्दुदाजहार निवासे लुके तपत्निदानखंडने शानतेजने ४ ४ तिअयन्नुपात नाशयतेवा... अधावाकितर... भशंपवितत्तदेत स्वनयतिकश्चिदिति = ४

क्तः अक्रुक्षत् अक्रुक्षतां अक्रुक्षन् दह भस्मीकरणे देहिथ ददग्ध दग्धा धक्ष्यति अधाक्षीत् अदाग्धां
सि॰कौ॰ अधाक्षुः मिह सेचने मिमेहिथ मिमेहिव मेढा मेक्ष्यति अमिक्षत् अमिक्षन् कित निवासे रोगापन
तु॰ यनेच चिकित्सति संशये प्रायेण विपूर्वः विचिकित्सा तु संशय इत्यमरः अस्यानुदात्तत्वमाश्रित्य वि
३० चिकित्सते इलो वहत्वंता स्वरितेतः शीशंसतिदीदांसते शीशांसति शीशांसते अर्थविशेषेस
30 न् अन्यत्र दानयति शानयति डुपचष्पाके पचति पचते पेचिथ पपक्थ पेचे पक्ता पक्षीष्ट षच
समवाये सचति सचते सचिता सचिष्यति भज सेवायां बभाज भेजतुः भेजिथ बभक्थ भक्ता भक्ष्य
ति भक्ष्यते अभाक्षीत् अभक्त अभक्षातां अभक्षत रंज रागे नलोपः रजति रजते रज्यात् रंक्षीष्ट
३६ तु॰ अरांक्षीत् अरंक्त शप आक्रोशे आक्रोशो विरुद्धानुध्यानं शशाप शेपे शप्ता अशाप्सीत् अशप्त
त्विष दीप्तौ त्वेषति त्वेषते तित्विषे त्वेक्ष्यति त्वेक्ष्यते अत्विक्षत् त्विक्षीष्ट अत्विक्षातां अत्विक्षत
अत्विक्षातां यज देवपूजासंगतिकरणदानेषु यजति यजते लिट्यभ्यासस्योभयेषां वच्यादीनां
ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्यात् लिटि इयाज वचिस्वपियजादीनां किति वचिस्वप्योर्यजादी
नां च संप्रसारणं स्यात् किति पुनः प्रसंगविज्ञानाद्द्वित्वं ईजतुः ईजुः इयजिथ इयष्ठ ईजे यष्टा यक्ष्य एम॰
ति यक्ष्यते इज्यात् यक्षीष्ट अयाक्षीत् डुवप् बीजसंताने बीजसंतानं क्षेत्रे विकरणं गर्भाधानं च ३०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

छास्याच्छि तिपरे गच्छति जगाम जग्मतुः जग्मुः जगमिथ जगंथ गंता गमेरिट् परस्मैपदेषु गमेः पर
स्य सकारादेरार्धधातुकस्य इट् स्यात् गमिष्यति लृदित्वादङ् अनङी तिपर्ययरासात् नोपधालोपः अ
गमत् सर्पति ससर्प अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् उपदेशेऽनुदात्तोय ऋदुपधस्तस्य अम्
वा स्यात् झलादावकिति परे स्रप्ता सर्प्ता स्रप्स्यति सर्प्स्यति असृपत् यम उपरमे यच्छति येमिथ ययं
थ यंता अयंसीत् अयंसिष्टां अयंसिषुः तप संतापे तप्ता अताप्सीत् निसस्तपतावनासेवने षः स्या
आसेवने पौनःपुन्ये ततोऽन्यस्मिन् विषये निष्टपति त्यज हानौ तत्याजिथ तत्यक्थ त्यक्ता अत्याक्षीत्
षंज संगे दंशसंजेति नलोपः सजति सङ्क्ता दृशिर् प्रेक्षणे पश्यति विभाषा सृजिदृशोः आभ्यां थल
इड्वा स्यात् सृजिदृशोर्झल्यमकिति अनयोरमागमः स्यात् झलादावकिति ददर्शिथ ददर्ष्ठ द्रष्टा द्रक्ष्य
ति दृश्यात् इरित्वादङ्वा ऋदृशोऽङि गुणः ऋवर्णान्तानां दृशेश्च गुणः स्यादङि अदर्शत् अङभावे न
दृशेः ह्रशः ज्ञेः क्सोन अद्राक्षीत् देश दशने दशनं दंष्ट्राव्यापारः पृषोदरादित्वादनुनासिकलोपः अत
एव निपातनाद् द्वितीये तस्याप्यत्रैव तात्पर्यं अर्थनिर्देशस्याधुनिकत्वात् दंशसंजेति नलोपः दशति द
दंशिथ ददंष्ठ दंष्टा दङ्क्ष्यति दशेत् कृष विलेखने विलेखनमाकर्षणं क्रष्टा कर्ष्टा क्रक्ष्यति कर्क्ष्यति
स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः अक्राक्षीत् अक्राष्टां अकार्क्षीत् अकार्ष्टां अकार्क्षुः पक्षे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३१

श्रिरे श्याता श्रीयात् श्यासीष्ट अश्यासीत् अश्यास्त ह्वेञ् स्पर्धायां शब्दे च अभ्यस्तस्य च अभ्यस्तीभविष्य

तो ह्वेञः संप्रसारणं स्यात् जुहाव जुहुवतुः जुहुवुः जुहुविथ जुहोथ जुहुवे ह्वाता ह्वा

यात् ह्वासीष्ट लिपिसिचिह्वेश्च एभ्यश्च्लेरङ् स्यात् आत्मनेपदेषु अन्यतरस्यां आतो लोपः अह्वत् अह्व

तां अह्वन् अह्वत अह्वास्त ११०० वद अथ द्वौ परस्मैपदिनौ वद व्यक्तायां वाचि अदीत् वदति उवाद

ऊदतुः उवदिथ वदिता उद्यात् वद व्रजेति वृद्धिः अवादीत् टुओश्वि गतिवृद्ध्योः श्वयति विभाषा श्वेः

श्वयतेः संप्रसारणं वा स्यात् लिटि यङि च शुशाव शुशुवतुः शुशुवुः श्वयते लिट्यभ्यासलक्षणपति

षेधोवक्तव्यः तेन लिट्यभ्यासे तिसंप्रसारणं न शिश्वाय शिश्वियतुः शिश्वियुः श्वयिता श्वयेत् श्वयात् ज् श्वि

स्तंभ्विति अङ् वा श्वयतेः श्वयतेरिकारस्याकारः स्यादङि पररूपं अश्वत् अश्वतां अश्वन् वि

भाषा धेट्श्व्योरिति चङ् इयङ् अशिश्वियत् ह्म्यन्तेति न वृद्धिः अश्वयीत् अश्वयिषं श्वत् यजादयो

वृत्ताः भ्वादिराकृतिगणः तेन चुलुम्पतीत्यादि संग्रहः ॥ ४ ॥ इति भ्वादयः ॥ अथ तेरीयङ् अतिः

सौत्रो धातुस्तस्मात् ईयङ् स्यात् स्वार्थे जुगुप्सा यामयेषा तुरिति वद्ध्वः रूपाथ चेत्येके सनाद्यन्ता इति धा नाम:

तुत्वं अतीयते अतीयांचक्रे आर्धधातुकविवक्षायां आयादय आर्धधातुके वेति ईयङ् भावपक्षे श्वाक् २९

तेरिपरस्मैपदं अतनति आर्तिष्यति आर्तीत् अदभक्षणे द्वौ परस्मैपदिनौ अदि भक्षणे तिङ्कः शपः लुक्

त्विभावः ...

CC-0. Lal Bahadur Shastri University Delhi. Digitized by [illegible] Peetham

पत्रे २

अयं छेदनेऽपि केशान् वपति वपति उवाप ऊपे वप्ता उप्यात् वप्सीष्ट अवाप्सीत् वह प्रापणे उवा
ह उवहिथ सहिवहोरोदवर्णस्य ऊहे ऊहे वोढा वक्ष्यति वक्ष्यते अवाक्षीत् अवोढां अवाक्षुः।
अवोढ अवक्षातां अवक्षत अवोढाः अवोढ्वं वस निवासे परस्मैपदी वसति उवास शासिवसि
घसीनां च इण्कुभ्यां परस्य षत्वं स्यात् ऊषतुः ऊषुः उवसिथ उवस्थ वस्ता आर्धधातुके वत्स्यति संस्या४
उष्यात् अवात्सीत् अवात्तां वेञ् तन्तुसंताने वयति वयते वेञो वयिः वा स्यात् लिटि इकार उच्चारणा
र्थः उवाय ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च एषां किति ङिति च संप्र
सारणं स्यात् यकारस्य प्राप्ते लिटि वयो यः वयो यस्य संप्रसारणं न स्यात् लिटि ऊयतुः ऊयुः वस्य वा संप्र
हे त सारणं स्यात् किति वयो यस्य वो वा स्यात् किति लिटि ऊवतुः ऊवुः उवयिथ वयेस्तास्ता वभौ वास्य लिनिसमि
ह स्यानि वञ्चावेन् त्रित्वात्तङ् ऊये ऊवे वयादेशाभावे वेञः वेञो संप्रसारणं न स्यात् लिटि ववौ वव
तुः ववुः वविथ ववाथ ववे ववाते वविरे वाता ऊयात् वासीष्ट अवासीत् अवासिष्टां अवासि
षुः व्येञ् संवरणे व्ययति व्ययते नत्यो लिटि व्येञ आत्वं न स्यात् लिटि वृद्धिः परमपि हलादिः शेषं बा
धित्वा यस्य संप्रसारणं उभयेषां ग्रहणसामर्थ्यात् अन्यथा वच्यादीनां ग्रस्यादीनां चानुवृत्त्यैव सिद्धे
किं तेन विव्याय विव्यतुः विव्युः इडत्यर्तीति नित्यमिट् विव्ययिथ विव्याय विव्यय विव्ये विव्याते वि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. सिद्धत्वाद्धेर्नलुक् जहि हनानि हनाव हनाम अहन् अहतां अघ्नन् अहनं आर्द्धधातुके इत्यधिकृ
उ. त्य हनोवधलिङि लुङि च वधादेशोऽदन्तः आर्धधातुके इति विषयसप्तमी तेनार्धधातुकोपदेशकाले
३२. ऽकारान्तत्वादस्य लोपः वध्यात् वध्यास्तां आर्धधातुके किं विध्यादौ हन्यात् हंतेरित्तिणत्वं प्रहण्यात्।
अवधीत् अथ चत्वारः स्वरितेतः द्विष अप्रीतौ द्वेष्टि द्विष्टे द्वेष्टा द्वेक्ष्यति द्वेष्टु द्विष्यात् द्विड्ढि द्वेषा
णि द्वेषे द्वेषावहै अद्वेट् द्विषश्च लङो झेर्जुस् वा स्यात् अद्विषुः अद्विषन् अद्वेषं द्विषीत द्विक्षी
अस्तरणे दोहनं ६ ष्ट अद्विक्षत दुह प्रपूरणे दोग्धि दुग्धः धोक्षि दुग्धे धुक्षे धुग्ध्वे दोग्धु दुग्धि दोहानि धुक्ष्व दुग्धां धु
ग्ध्वं दोहै दोहावहै अधोक् अदोहं अदुग्ध अधुग्ध्वं अधुक्षत् अधुक्षत लुग्वा दुहेति लुक् प
उपधयोर्वृद्धिः ८ क्षे तथा सुधुग्ध्वं दिह उपचये प्रदेग्धि दिग्धे लिह आस्वादने लेढि लीढः लिहंति।
लेक्षि लीढे लिक्षे लीढ्वे लेढु लीढि लेहानि अलेट् अलिक्षत अलीढ अलिक्षावहि अलि
32 ह्वहि चक्षिङ् व्यक्तायां वाचि अयं दर्शनेपि इकारोनुदात्तः युजर्थः विचक्षणः प्रथमयन् नुमत्
न ओतेदिल्ल इति व्याख्यानात् ङकारस्तु अनुदात्तेत्व प्रयुक्तम् आत्मनेपदम् अनित्यमिति ज्ञापनार्थं
तेन स्फायुन्निमीलन् संधीत्यादि सिद्ध्यति चष्टे चक्षाते आर्धधातुके। चक्षिङः ख्याञ्। वा लिटि अत्र राम.
भाष्ये ख्शाञादिरयमादेशः असिद्धकांडे शस्य यो वेति स्थितं णित्वासदक्षं चख्यौ चख्ये चक्शौ च ३२
ओतेरदितः कृत्तु तिन्न्तिद्योगोः पदांते [illegible]
५७ गेवप्रपंचित=१ [illegible] सकृत्पुनितः=१ [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यात् अत्ति अत्तः अदंति लिट्यन्यतरस्यां अदो घस्लृ वा स्यात् लिटि जघास गमहनेत्युपधा
लोपः तस्य च विधिं प्रति स्थानिवद्भावनिषेधात् ह्रस्य चर्त्वे शासिवसीति षत्वं जक्षतुः जक्षुः जघस
त्थासावभावात्स्यालिनित्यमिट् जघसिथ आद आदतुः इडत्त्यर्तीति नित्यमिट् आदिथ अत्ता।
अत्स्यति हुझल्भ्यो हेर्धिः होर्झलंतेभ्यश्च हेर्धिः स्यात् अद्धि अत्तात् अदानि अदः सर्वेषां अदः प
रस्या हलः स्य सार्वधातुकस्याडागमः स्यात्सर्वमतेन आदत् आत्तां आदन् आदः आत्तं आत्त आ
दं आद्व आद्म अद्यात् अद्यातां अद्युः अद्यात् अद्यास्तां अद्यासुः लुङ्सनोर्घस्लृ अदो घस्लृ
स्यात् लुङि सनि च लृदित्वादङ् अघसत् हन हिंसागत्योः हन्ति अनुदात्तोपदेशवनति-
तनोत्यादीनामनुनासिकलोपो झलि क्ङिति। अनुनासिके ति लुप्तषष्ठीकं वनतीतरेषां विशेष
णं अनुनासिकान्तानामेषां वनतेश्च लोपः स्यात् झलादौ क्ङिति यमिरमिगमिनमिहनिमन्यतयो
नुदात्तोपदेशाः तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः हतः घ्नंति वमोर्वा उपसर्ग
स्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्यात् वमयोः परतः प्रहण्मि प्रहन्मि प्रहण्वः प्रहण्मः प्रहन्वः
प्रहन्मः हो हन्तेरिति कुत्वं जघान जघ्नतुः जघ्नुः अभ्यासाच्च अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् ज
घनिथ जघंथ हंता हनिष्यति हंतु हतात् घ्नंतु हंतेर्जः हौ परे आभीयत्वाज्जस्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनुदात्तोपदेशवनतीत्यत्र लिशि वनुते रमभिचारात् विशेषणं लिङ्गि भावः यत्तु भाष्याचार्य एवमनुनासिकलोपस्तु स्त्रं अतिमन्योमिह नरश्चमनजादीनामनंतस्यापि लोप
मसंगात् अत उदात्तोपदेशाद् इति अनुनासिकान्तात् विभावे तनोत्यादमतेर्गतेः आपिसार्वत्रः=४

सर्वधातुषु ... श्रीपि शिलास्तु रुस्तु शम्यमः सार्वधातुके छन्दसि ...

सि॰कौ॰ ता सविता असुवो स्तिङि इति गुणनिषेधः सुवे सविषीष्ट सोषीष्ट असविष्ट असोष्ट । शीङ् स्वप्ने शीङः
७॰ सार्वधातुके गुणः क्ङिति चेत्यस्यापवादः शेते शयाते । शीङो रुट् शीङः परस्य झादेशस्यातो रुडागमः
३३ स्यात् शेरते शेषे शेध्वे शये शेवहे शिश्ये शयिता अशेत शयीत अशयिष्ट अथ के त्यन्ताः परस्मै
पदिनः उङ् स्तुत्यभयपदी युमिश्रणे अमिश्रणे च उतो वृद्धिर्लुकि हलि लुग्विषये उकारस्य वृद्धिः पि
ति हलादौ सार्वधातुके न त्वभ्यस्तस्य यौति युतः युवंति युयाव यविता युयात् इह उतो वृद्धिर्न भाष्ये पि
33 च्चङिच्चङि च पिन्न इति व्याख्यानात् विशेषविहितेन ङित्वेन पित्वस्य बाधनात् यूयात् अयावीत् रु
शब्दे तुरुस्तुशम्यमः सार्वधातुके एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङः ईड्वा स्यात् नाभ्यस्तस्ये
त्यनुवृत्तिसंभवेऽपि न सार्वधातुके किं आशिषि रूयात् विध्यादौ तु रुयात् रुवीयात् अरावीत् ।
श्रो॰ अरविष्यत् तु इति सौत्रधातुः गतिवृद्धिहिंसासु अर्थं च लुग्विकरण इति स्मरंति । तवीति तौति तुवी
तः तुतः तोता तोष्यति णु स्तुतौ नौति नविता टु क्षु शब्दे क्षौति क्षविता क्ष्णु तेजने क्ष्णौति क्ष्णवि
ता ष्णु प्रस्रवणे स्नौति सुष्णाव स्नविता स्नुयात् स्नूयात् ऊर्णुञ् आच्छादने ऊर्णोतेर्विभाषा वृद्धि
र्वा स्यात् हलादौ पिति सार्वधातुके ऊर्णौति ऊर्णोति ऊर्णुतः ऊर्णुवंति ऊर्णुते ऊर्णुवाते ऊर्णुवते ऊ राम॰
र्णोतेराम्नेति वाच्यो न न्द्राः संयोगादयः अचः पराः संयोगादयो नदरा द्विर्न भवंति नुशब्दस्य द्वित्वं ३३
सार्वधातुके ग्रहणमपि दृष्टं स्यात् तिरो तिहतः स्ववीतः हलादेः किम् वतितिङः किस्म स्यादिति ६॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वंविचित्रवो
पं:५

चप ॥ रि८

कशे चयोद्वितीया इति तुन च त्वस्यासिद्धत्वात् चुचंहे व्यालाकशाता आस्यति व्यासते कशास्यते
अचह चहीत् व्यायात् व्येयात् कशायात् कशेयात् असयति व कि व्योतिव्याह् एभ्यो श्रेसह अ
व्यत् अव्यत् अकशासीत् अकशास्त वर्जने कशाज्ञ नेषः समचत्ति हे स्यादि अपयहचंता अ्रवु ई६४
२४ हात्तेत्तः ईरगतौ कंपने ईर्ते ईराचक्रे ईर्ता ईर्ते ईर्थ ईर्ध्वे ऐरिष्ट ईड स्तुतौ ईशः से ईड जनो ध्वे च ई
३५ पीजनानां सेध्वे शब्दयोः सार्वधातुकयोरिट् स्यात् योगविभागो वैचित्र्यार्थः ईडिषे ईडिध्वे एकदेश
विकृतस्यानन्यत्वात् ईडिष्व ईडिध्वं विकृतिग्रहणेन प्रकृतेरग्रहणात् ऐट्टं ईश ऐश्वर्ये ईशे ई
शिषे ईशिध्वे आस उपवेशने आस्ते दयायास श्व आसांचक्रे आस्व आध्व आसिष्ट आङः शा
सु इच्छायां आशास्ते आशासाते आङ्पूर्वत्वं प्रायिकं तेन नमो प्रशास्महे इति सिद्धं वस आच्छादने वाक६
वस्ते [illegible] वध्वे ववसे वसिता कसिगतिशासनयोः कंस्ते कंसाते कंसते अयमनिदित्त्येके कस्ते ता
लव्यांतो अनिदित् कष्टे कशाते कद्दे कड्ढे णिसि चुंबने निंस्ते दंत्यांतोयं आभरणकारस्तु लालव्यां
त इति बभ्राम णिजि शुद्धौ निङ्क्ते निंजिता शिजि अव्यक्ते शब्दे शिङ्क्ते पिजि वर्णे संपर्चन इत्येके उभ
३२ यत्रेत्यन्ये अवयवे इत्यपरे अव्यक्ते शब्दे इतीतरे पिङ्क्ते वृजी त्येके वृङ्क्ते वृजी वर्जने दंत्योष्ठादिः ईदि
त् वृङ्क्ते वृजाते वृङ्क्ते [illegible] संपर्चने पृङ्क्ते पृ[illegible] विमोचने सूते सुषुवे षे सो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ईश स ईड जनो ध्वे च इति सूत्रे से ध्वे इत्येतत् योरलुकरणं न विभक्तिकरूप निर्देशाः [illegible] द्वितीय [illegible] ईडि ध्वमिति तदा कारविलोपार्थमुपदर्श
पि यद्वर्जने यन्नाभाव्यं तथापि [illegible] इति [illegible] णिसि चुंबने [illegible] सानं [illegible] मिति [illegible]

34

सि॰कौ॰
३४

वेवक्ता वक्षति वक्षीतु वक्तात् ङिच्चपिन्नेति अपित्वादीणन इवाति इवे इयात उच्यात् अस्यति वक्तीति
अङ् वचउम् अङिपरे अवोचत् अवोचत अथ णस्सृताः परस्मैपदिनः इङ् त्वात्मनेपदी इणगतौ ए
ति इतः इणोयण अजादौप्रत्ययेपरे इयङोपवादः यंति इयाय दीर्घइणः किति इणोभ्यासस्यदीर्घः
स्यात्किति लिटि ईयतुः ईयुः इययिथ इयेथ एत् ऐतां आयन् इयात् ईयात् एतेलिङि उपसर्गात्पर
स्य इणो ह्रस्वः स्यात् आर्द्धधातुके किति ङिति निरियात् उभयत आश्रय एनांता दिवत् अभीयात्
अणः किं समेयात् समीयात् इतिप्रयोगस्तु भौवादिकस्य इणोगालुङि गातिस्थेति सिचोलुक् अगात्
अगातां अगुः इङ् अध्ययने नित्यमधिपूर्वः अधीते अधीयाते अधीयते गाङ्लिटि इङोगाङ्स्यात्
लिटि ह्रविस्यायां विवक्षितेवा अधिजगे अधिजगाते अधिजगिरे अध्येता अध्येष्यते अध्येयै गुणा
यादेशयोः कृतयोरुपसर्गस्ययण् पूर्वंधातुरुपसर्गेणेति दर्शने त्वंतरंगत्वाद्गुणात्पूर्वं सवर्णदीर्घः प्राप्तः
एरध्ययनेवृत्तमितिनिर्देशान्नभवति अध्यैत परत्वादियङ् तत आट् वृद्धिः अध्यैयातां अध्यैय
त अध्यैथि अध्यैवहि अधीयीत अधीयातां अधीयीध्वं अधीयीय अध्येषीष्ट विभाषालुङ्लृङोः
इङोगाङ्वास्यात् गांकुटादिभ्योऽञ्णिन्ङित् गाङादेशात्कुटादिभ्यश्चपरे अञ्णितः प्रत्ययाङितःस्युः
घुमास्थागापाजहातिसांहलि एषामात ईत्स्यात् हलादौ ङ्किति आर्द्धधातुके अध्यगीष्ट अध्यैष्ट अध्यगी

राम॰
३४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ण त्वस्यासिद्धत्वात् पूर्वत्रासिद्धीयमद्विर्वचन इति त्वनित्यं उभौ साभ्यासस्येति लिंगात् ऊर्णुनाव ऊ
र्णुनवतुः ऊर्णुनुवुः विभाषोर्णोः इडादिप्रत्ययो ङिद्वा स्यात् ऊर्णुनुविथ ऊर्णुनविथ ऊर्णुविता ऊर्णो
विता ऊर्णौतु ऊर्णोतु ऊर्णवानि ऊर्णवै गुणोपूर्वे ऊर्णोतेर्गुणः स्यात् पूर्वके हलादौ पिति सार्वधातु
के वृध्यपवादः और्णोत् और्णोः ऊर्णुयात् ऊर्णुयात् ऊर्णुयाः इहह्रस्वे न ङित्वपित्वे इति व्याख्याना
त् ऊर्णूयात् ऊर्णविषीष्ट ऊर्णुविषीष्ट और्णुवीत् और्णुविष्टां ऊर्णोतेर्विभाषा इडादौ परस्मैपदपरे
सिचि वृद्धिर्वा स्यात् पक्षे गुणः और्णावीत् और्णाविष्टां और्णाविषुः और्णवीत् और्णविष्टां :
और्णविषुः षुञ् अभिषवे सौति सोता षुप्रसवैश्वर्ययोः प्रसवोऽभ्यनुज्ञानं सोता असोषीत् तुः वृद्धे
तोता ष्टुञ् स्तुतौ स्तौति स्तवीति स्तुतः स्तुवीतः स्तुते स्तुवीते स्तुसुधूञ्भ्य इतीट् अस्तावीत् ।
मा क्ङित्सिवादिनिषत्वं अभ्यासेत्र सिवादीनां वाप्यय्येत्र पर्यस्तौत् ब्रूञ् व्यक्तायां वाचि ब्रुवः पंचा
नामादित आहो ब्रुवः ब्रुवो लटः परस्मैपदानामादितः पंचानां णलादयः पंच वा स्युर्ब्रुव आहादेशः
अकार उच्चारणार्थः आह आहतुः आहुः आहस्थः झलि परे चर्त्वं आत्थ आहथुः ब्रुव ईट्
ब्रुवः परस्य हलादेः पित ईट् स्यात् आस्थेत्यत्र स्थानिवद्भावात् प्राप्तोयं झलीति यत्वविधानान्न भव
ति ब्रवीति ब्रूतः ब्रुवंति ब्रूते आर्धधातुके ब्रुवो वचिः उवाच ऊचतुः ऊचुः उवचिथ उवक्थ ऊ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ परइत्यपरे व्राग्धि वचात् अवोचत् विदज्ञाने विदोलटोवा वेत्तेर्लटः परस्मैपदानां णलादयोवा स्युः वेद वि
उ॰ दतुः विदुः वेत्थ विदथुः विद वेद विद्व विद्म पक्षे वेत्ति वित्तः विदंति इत्यादि विवेद विविदतुः उषवि
३५ देत्याम् पक्षे विदेरकारांतनिपातनान्नलघूपधगुणः विदांचकार वेदिता विदांकुर्वंत्वित्यन्यतरस्याम्
वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडंतकरोत्यनुप्रयोगश्चवा निपात्यते पुरुषवचनेन विवक्षिते इतिश
तू५ ब्दा तनादिकृञ्भ्यउः तनादेः कृञश्च उ प्रत्ययः स्यात् शपोपवादः तनादित्वादेव सिद्धे कृञ्ग्रहणं गण
35 कार्यस्यानित्यत्वे लिंगं तेन न विश्वसेदविश्वस्तमित्यादि सिद्धं विदांकरोतु अतउत्सार्वधातुके उप्रत्यया
न्तकृञोऽकारस्य उत्स्यात् सार्वधातुके क्ङिति उदिति तपरकरणसामर्थ्यान्नगुणः विदांकुरुतात् उतश्च
त्तिर्हेर्लुक् आभीयत्वेन लुकोऽसिद्धत्वादुत्त्वं विदांकुरु विदांकरवाणि अवेत् अवित्ताम् सिजभ्यस्तेति
झेर्जुस् अविदुः दश्च धातोर्दस्य पदांतस्य सिपि रुः स्याद्वा अवेः अवेत् असभुवि अस्ति श्नसोरल्लो
स्मा४ पः श्नस्यास्तेश्चातो लोपः सार्वधातुके क्ङिति स्तः संति तासस्त्योरितिलोपः असि स्थः स्थ अस्मि स्वः
स्मः आर्धधातुक इत्यधिकृत्य अस्तेर्भूः बभूव भविता अस्तु स्तात् संतु घ्वसोरेद्धावभ्यासलोपश्च (
घोरस्तेश्च एत्वं स्याद्धौ परेऽभ्यासलोपश्च आभीयत्वेन एत्वस्य असिद्धत्वाद्धेर्धिः असोरिति अल्लोप राम
एधि। तङ्पक्षे एत्वं न परेण लईवाधात् सकृद्गतौ विप्रतिषेधे इतिन्यायात् स्तात् स्तं स्त असानि ३५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अपरस्याभावार्थकत्वात् ५

ष्यत अध्येष्यते इक् स्मरणे अयमधिपूर्वः अधीगर्थदयेशां कर्मणीति लिंगात् अन्यथा ह्यीगर्थस्यैव
ब्रूयात् इण्वदिक इति वक्तव्यं अधियेति अध्यगात् केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः त
राधवयोः न्मते [illegible] तथा च भट्टिः समीतयोरध्यैयन् इति वी गतिव्याप्तिप्रजनकांत्यसनखादनेषु प्रजनो गर्भग्रह
णं असनं क्षेपणं वेति वीतः वियति वेषि वेमि वीहि अवेत् अवीत् अवियन् अडागमे सत्यनेका
च्त्वाद्यणिति केचित् अव्यन् अत्र ईकारोऽपि धात्वंतरं प्रश्लिष्यते एति ईतः इयति ईयात् ऐषीत् या प्रा
पणे प्रापणमिह गतिः प्रणियाति यातः यांति लङः शाकटायनस्यैव आदेतात्स्यरस्य लङो जुस्
पायात् ७ वास्यात् अयुः अयान् यायात् यायास्तां वाति गंधनयोः गंधनं सूचनं भा दीप्तौ स्ना शौचे श्रा पाके
द्रा कुत्सायां गतौ प्सा भक्षणे पा रक्षणे पायास्तां अपासीत् रा दाने ला आदाने दाप् लवने इति चेद्रः
स्नो अदाः १ दाप् लवने प्रणिदाति प्रनिदाति दायासीत् ख्या प्रकथने अयं सार्वधातुकमात्रविषयः संस्थानत्वेन
मः ख्याञ् इति वार्तिके तद्भाष्ये चेह लिंगं संख्यानो जिकामूलीयः स्नेनेति खसाजादेशस्य खशादि
त्वप्रयोजनमित्यर्थः संपूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः प्रा पूरणे प्राति अकर्मकः ततोऽम
न्तत्र नकेऽदभट्टिषः उपसर्गवशेनार्थांतरे सकर्मकः उदरं पिपर्ति मातिसुष्टिना नेगदित्यत्र नास्य ग्रहणं प्र
णिमाति प्रणिमाति वच परिभाषणे वक्ति वक्तः अयमंतिपरो न प्रयुज्यते बहुवचनपर इत्यन्ये गि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayu Sharada Peetham

सुटोऽपि त्वान्नगुणादस्युकं तन्न जुसि गुणस्य निषेधापवादत्वात् भंक्ष्याव्याख्यानंतु लिंङि ष्वत्वादु पेदितं भाष्यारूढस्य स्पष्टस्यैव समाधानस्य लाभात्

सि॰ कौ॰ उ॰ ३६

ष्णाभावान्नषः सुषुष्वाप सुस्वप्न अस्वपीत् अस्वपत् स्वप्यात् सुप्यात् अस्वाप्सीत् श्वस प्राणने श्वसि
ति श्वसिता अश्वसीत् अश्वसत् श्वस्यात् श्वस्यास्तां ह्ययंतेति न वृद्धिः अश्वसीत् अन च अनिति आन
अनिता आनीत् आनत् अनितेः उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात् प्राणिति जक्ष भक्षह
सनयोः जक्षिति जक्षितः अदभ्यस्तात् झस्यात्स्यात् अन्तापवादः जक्षति सिजभ्यस्तविदिभ्यश्चेति जुस् अजक्षुः
36 अयमंतस्थादिरिति उज्वलदत्तो वंभ्राम रुदादयः पंचगताः जागृ निद्राक्षये जागर्त्ति जागृतः जाग्रति उ
षविदेत्याम्वा जागरांचकार जजागार जाग्रोऽविचिण्णल्ङित्सु जागर्तेर्गुणः स्यात् विचिण्णल्ङिच्चो
न्यस्मिन् वृद्धिविषये प्रतिषेधविषये च जजागरतुः अजागः अजागर्त्ता अभ्यस्त त्वाज्जुस् जुसि च
अजादौ जुसि इगंतस्य गुणः स्यात् अजागरुः अजादौ किं जागृयुः आशिषि च जागर्यात् जागर्यास्तां ।
जागर्यासुः लुङि अजागरीत् अजागृ ईत् इत्यत्र यणप्राप्तः तं सार्वधातुकगुणो बाधते तं सिचि वृद्धिः
तां जागर्त्तिगुणः तं कृते हलंतलक्षणप्राप्तानेटीति निषिद्धा ततो ऽतो हलादेरिति वृद्धिं वा धित्वा अतो
ल्रांतस्येति प्राप्ता ह्मन्तेति निषिद्धेन तदाहुः गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनं पुनर्वृद्धिर्निषेधो साम॰
तो यणपूर्वाः प्राप्तयो नवचेति दरिद्रा दुर्गतौ दरिद्राति इद्दरिद्रस्य दरिद्रातेरिकारः स्याद्धलादौ क्ङिति ३६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

असाव असाम अस्तिसिचः इति ईट् आसीत् असोरित्यल्लोपस्याभीयत्वेनासिद्धत्वादाट् आस्तां आसन् स्यात् भू
यात् अभूत् मिचोस्तेश्च विद्यमानत्वेन विशेषणादीएन उपसर्गप्रादुर्भ्यामस्तिर्यच्परः उपसर्गेणः प्रादुसश्च परस्या
स्तेः सस्यषः स्याद्यकारे अचि परे निष्यात् प्रादुःष्यात् निषंति प्रादुःषंति यच्परः किं अभिस्तः मृजूशुद्धौ
मृजेर्वृद्धिः मृजेरिको वृद्धिः स्यात् धातुप्रत्यये परे क्ङित्यजादौ वेष्यते वश्चेतिषः मार्ष्टि मृष्टः मृजंति मार्जं
ति ममार्ज ममार्जतुः ममृजतुः ममार्जिथ ममार्ष्ठ मार्जिता मार्ष्टा मृड्ढि अमार्ट् अमार्जं अमार्जीत् अमार्क्षी
त् रुदिर अश्रुविमोचने रुदादिभ्यः सार्वधातुके रुदस्वपश्वसप्रानजक्ष एभ्यो वलादेः सार्वधातुकस्येट् स्यात्
रोदिति रुदितः होपरत्वादिति धित्वेन रुदिहि रुदश्चपंचभ्यः हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्या
त् अड्गार्ग्यगालवयोः अरोदीत् अरोदत् अरुदितां अरुदन् अरोदीः अरोदः महृतिप्रत्ययविशेषा
पडिङ्भ्याः पेक्षाभ्यां मंतरंगत्वाद्यासुट् रुद्यात् अरुदत् अरोदीत् ञिष्वप् शये स्वपिति स्वपितः सुष्वाप सुषु
पतुः सुषुपु सुष्वपिथ सुष्वप्थ सुषिनिर्दुर्भ्यः सुपिसूतिसमाः एभ्यः सुष्यादेः सस्यषः स्यात् एवं धातुरूप
सर्गेणायुज्यंते किति लिटि परत्वात्संप्रसारणं षत्वे च कृते द्वित्वं पूर्वत्वासिद्धीयमद्विर्वचने सुषुषुपतु सुषु
षुपुः अकिति तु द्वित्वे अभ्यासस्यैव संप्रसारणं षत्वस्यासिद्धत्वात् पूर्वं हलादिः शेषः नित्यत्वाच्च ततः सुपि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible] चत्वारः परस्मैपदिनः [illegible]

सि॰कौ॰ उ॰ ३७

37

घकारे उवर्णे च परे इति लोपं बाधित्वा नित्यत्वाद्धेरत्वं दीध्यि दीधि वेवीटामिति गुणनिषेधः दीध्यांचक्रे वेवीङ्
वेति नात्तुल्ये वीगतीत्यनेन तुल्यं वीगतीत्यनेन तुल्यार्थे वर्तते इत्यर्थः अथ त्रयः परस्मैपदिनः षस सस्ति
स्वप्ने सस्ति सस्तः ससंति ससास सेसतुः सेसुः सस्तुः साधि सर्वत्रासिद्धमिति सलोपस्यासिद्धत्वाद्
तो हेरिति लुक् न असत् असस्तां असः असत् सस्यात् असासीत् असमीत् संति संतः संस्तंति व
हूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य स्कोरिति सलोपाभावात् संस्ति संस्त इत्येके वश कांतौ कांति
रिच्छा वष्टि उष्टः उवास ऊशतुः वशिता वष्टु उष्टात् उष्टं उड्ढि अवट् औष्टं औशन् अवशं उश्या
त् उश्यातां उश्यास्तां चर्करीतं च चर्करीतमिति यङ्लुगन्तमदादौ बोध्यं ह्नुङ् अपनये ह्नुते जुह्नुवे
ह्नुवीत ह्नोषीष्ट अह्नोष्ट ॥ इत्यदादयः ॥ ❀ ॥ हु दानादनयोः आदाने चेत्येके प्रीणनेऽपीति भा
ष्यं दानं चेह प्रक्षेपः स च वैधे आधारे हविष एवेति स्वभावाल्लभ्यते इतश्चत्वारः परस्मैपदिनः जुहो
त्यादिभ्यः श्लुः शपः श्लुः स्यात् श्लौ धातोर्द्वे स्तः जुहोति जुहुतः अदभ्यस्तादिति अत् हुश्नुवोः
सार्वधातुके इति यण् जुह्वति भी ह्री भृ हुवां श्लुवच्च एभ्यो लिट्याम् वा स्यात् आमि श्लाविव कार्यं च पत्र॰ ३७
जुहवांचकार जुहाव होता होष्यति जुहोतु जुहुतात् हुझल्भ्यो हेर्धिः जुहुधि आटि परत्वाद्गुणः जुहवा

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]
वर्णार्थस्य नाभावात् लिङ्गभिन्नपाठात् हरदत्तमाधवादिभिस्तु ... [illegible] ... विधानमिति
[illegible] दरिद्रसात् तस्मिन् प्रवृत्ते आमो दुर्वारत्वात् = ३ विवक्षित इति ... [illegible]
विकल्पस्तु न भवति परत्वात् श्नाभ्यस्तयोरित्यालोपे आकारान्तस्येवाभावात् ... [illegible]
नाशो ... [illegible] = ४

सार्वधातुके दरिद्रात्। श्नाभ्यस्तयोरातः। अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके। दरिद्रति। अनेकाच्त्वादाम्। दरिद्राञ्चकार। आत औ णल इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थं। अत एव ज्ञापकादाम्नेत्येके। ददरिद्रौ। ददरिद्रतुः इत्यादि। पक्षे णलि ददरिद्रेति तन्निर्मूलमेव। दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः। लुङि वा। सनि ण्वुलि ल्युटि च न। दरिद्रिता। अदरिद्रात्। अदरिद्रिताम्। अदरिद्रुः। दरिद्र्यात्। दरिद्र्यात्। अदरिद्रीत्। इट्सकौ। अदरिद्रासीत्। चकासृ दीप्तौ। चकास्ति। एउ ५
अभ्यस्तत्वात्। चकासति। चकासांचकार। धि चेति सलोपः। सिच एवेत्येके। चकाद्धि। चकाधीत्येव भाष्यं। तिप्यनस्तेः। पदान्तस्य सस्य दः स्यात् तिपि न त्वस्तेः। अचकात्। अचकाद्। अचकासुः। सिपि धातो रुर्वा। पदान्तस्य धातोः सस्य रुर्वा पक्षे दः। अचकाः। अचकात्। शासु अनुशिष्टौ। शास्ति। शास इदङ्हलोः। शास उपधाया इत् स्यात् अङि हलादौ क्ङिति च। शासिवसीति षः। शिष्टः। शासति। शशास। शशासतुः। शशासुः। शास्तु। शिष्टात्। शिष्टं। शासतु। शा हौ। शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। शिष्यात्। सर्त्तिशास्त्यङ्। अशिषत्। अशासिष्यत्। दीधीङ् दीप्तिदेवनयोः। एतदादयः पंच छान्दसाः। दीधीते। एरनेकाच इति यण्। दीध्याते। यीवर्णयोर्दीधीवेव्योः। एतयोरन्त्यस्य लोपः स्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

धेयं ... इति ह्रस्वमुदाहरति अनुना सिकस्यक्विझलो रिति दीर्घस्तु छान्दसत्वान्नेति भावः सति त्वविधानेरीदीर्घो भवत्येवेति बोध्यं=६

... स्यात् ओहाक् ... स्यानीवृत्तिं ना ... वचन सामर्थ्या दिति किं च सत्य ... णिस्थानिकत्वादिति नवरे यलोपस्वरवर्ज्यं द्विर्वचनादी नीनवक्तव्यानीतिवदता भाष्यकारेण सर्वलोपीनां अप्या ...

भ्या ४

सि॰कौ॰ ३॰ ३८ ओहाक् त्यागे परस्मैपदी जहाति जहातेश्च इत्स्यात् वा हलादौ क्ङिति सार्वधातुके पक्ष ईत्वं जहितः जहीतः जहति

जहौ जहातु जहितात् जहीतात् आ च हौ जहातेर्हौ परे आ स्याद्वा दिदीतौ जहाहि जहिहि जहीहि अजहा

त् अजहुः लोपो यि जहातेरालोपः स्याद्यादौ सार्वधातुके जह्यात् एर्लिङि हेयात् अहासीत् डुदाञ् दाने

38 प्रणिददाति दत्तः ददति ददौ दत्ते घ्वसोरेद्धावभ्यासलोपश्च देहि अददात् अदत्तां अददुः देयात् देया

त् अदात् अदातां अदुः अदित डुधाञ् धारणपोषणयोः दानेप्येके प्रणिदधाति दधस्तथोश्च द्विरु

क्तस्य झषन्तस्य धाञो बशो भष् स्यात्तथयोः स्ध्वोश्च परतः वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमा

धवौ वस्तुतस्तु पूर्वत्रासिद्धेन स्थानिवत् धत्तः दधति दधासि धत्थः धत्थ दध्वः धत्ते धत्से धेहि अधि

त अयत्रयः स्वरितेतः णिजिर् शौचपोषणयोः णिजां त्रयाणां गुणः श्लौ णिजविजविषामभ्यास

स्य गुणः स्याच्छ्लौ परतः नेनेक्ति नेनिक्तः निनेज नेक्ता नेक्ष्यति नेनेक्तु नेनिग्धि नाभ्यस्तस्याचि पि

ति सार्वधातुके लघूपधगुणो न स्यात् नेनिजानि अनेनेक् अनेनिक्तां अनेनिजुः नेनिज्यात् निज्या

त् अनिजत् अनैक्षीत् अनिक्त विवेजिथ अत्र विज इट् इति ङित्त्वं न ओविजी इत्यस्यैव तत्र ग्रहणा

त् णिजि विजी रूपादावपि विष्लृ व्याप्तौ वेवेष्टि वेविष्टे लृदित्वादङ् अविषत् तङि क्सः अजादौ राम॰

क्सस्याचीति अल्लोपः अविक्षत अविक्षातां अविक्षत अथार्गणान्ताः परस्मैपदिनः छांदसाश्च ३८

विजिर् पृथग्भावे वेवेक्ति वेविक्ते ३४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नि परत्वात् जुसिचेतिगुणः अजुहवुः जुहुयात् हूयात् अहौषीत् ञिभी भये बिभेति भियोन्यतरस्यां
इकारः स्याद्धलादौ क्ङिति सार्वधातुके बिभीतः बिभ्यति बिभयांचकार बिभाय भेता ह्रीलज्जायां जिह्रेति
जिह्रीतः जिह्रियति जिह्रयांचकार जिह्राय पॄ पालनपूरणयोः अर्त्तिपिपर्त्योश्च अभ्यासस्य इकारोंतादेशः
स्यात् श्लौ परे उदोष्ठ्यपूर्वस्य अंगावयवो ओष्ठ्यपूर्वो य ऋ[illegible]त् तदंतस्यांगस्य उत्स्यात् गुणवृद्धी परत्वादिमं
बाधेते पिपर्त्ति उत्वं रपरत्वं हलि चेति दीर्घः पिपूर्त्तः पिपुरति पपार किति लिटि ऋच्छत्यृतामिति गुणे
प्राप्ते शृदृप्रां ह्रस्वो वा एषां किति लिटि ह्रस्वो वा स्यात् पक्षे गुणः पप्रतुः पप्रुः पपरतुः पपरुः परिता
परीता अपिपः अपिपर्त्तां अपिपरुः पिपूर्यात् पूर्यात् अपारीत् अपारिष्टां ह्रस्वान्तोयमिति केचित्
पिपर्त्ति पिपृतः पिप्रति पिपृयात् आशिषि प्रियात् अपार्षीत् पाणिनीयमतेतु ह्रोदसौ पिपृतामि तं
त्यादौ ह्रस्वत्वे शरणे डुभृञ् धारणपोषणयोः भृञामित् भृञ् माङ् ओहाङ् एषां त्रयाणामभ्या
सस्य इत्स्यात् श्लौ बिभर्त्ति बिभृतः बिभ्रति बिभृध्वे भृञ्जवज्ञावाहित्वे त्वे बिभरामास बभार बभर्थ बभृव बिभृहि
बिभराणि अबिभः अबिभृतां अबिभरुः बिभृयात् भ्रियात् भृषीष्ट अभार्षीत् अभृत माङ् माने श
ब्दे च ई हल्यघोः श्नाभ्यस्तयोरातः ईत्स्यात् सार्वधातुके क्ङिति हलि न तु घोः मिमीते श्नाभ्यस्तयोरातः इत्या
लोपः मिमाते मिमते ममे मापयामास ओहाङ् गतौ जिहीते जिहाते जिहते जहे हाता हास्यते ओहा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

१ उभ्यम् द्वितः त्रिभतिमम चौ नास्तु दितं पचिल्लाभरथौ स्याघु स्या [illegible] हरति = ५ माङ माने [illegible] मिमीते [illegible] तिघु [illegible]
[illegible] धातुके इत्यधिका [illegible] [illegible]

कुषदाह्ददत्सीमृतात्‌ः स्फुरन्त्यानः तथा जुवद्यकान्तिकटकपयोधोव्यो मरुद्रः पठाते=२ त्रसी इदित्कारणं यस विभाषेत्यस्यानित्यत्व पनार्थेतेन धावितनिमेसा न छिद्येत्यादि सिद्धाति=२ उष्यविकसने श्रीखुंसात: अकर्मक: तया नम: पुष्प्यत्कोरकेणेति सिद्धो हर्ष: ला साधु: पुष्यात्यत्यपमात्‌ तिस्त्रत्म्य च पुष्पं संज्ञायां कन्‌ पुष्पकं=६ तिमष्टिमष्टि अन्ते केचित्तीमत्यापि पठंति त्रीडति त्रीड मारह उसप्रति इति कालिदास: त्रीडा द्विवाभ्यासगतेति विलिल्ये इति माघ: गौरेश्वलकार: त्रीडामंदा दे हीस्त्रयो त्रीडेत्यमर:=६

सि॰कौ॰ उ॰ ३९ केचिदिदेमंनपठंति सुसु अदने आदान इत्येके अदर्शन इत्यपरे सुस्यति सुमोस ससुनिरसने स्रस्यति सस्रास कसु करणदीप्ष्योः करणंकौटिल्यं चकास युष दाहे बुयोष सुषच न्‌ ती गात्रविक्षेपे नस्यति ननर्त सेसिचिकृत्‌चृत्‌छृ दृन्तृन: एभ्य: परस्य सिज्भिन्नस्य सादेरार्द्धधातुकस्येड्वा स्यात्‌ नर्तिष्यति नर्त्स्यति नर्तिष्यति नर्त्स्यति नर्तेत्‌ नृत्यात्‌ अनर्तीत्‌ त्रसी उद्वेगे वाभ्राशेति श्यन्वा त्रस्यति त्रसति वाजृभ्रमुत्रसामिति एत्वाभ्यासलोपौ त्रेसतुः तत्रसतुः कुथ पूतीभावे पुथ हिंसायां गुध परिवेष्टने क्षिप प्रेरणे क्षिप्यति क्षेप्ता पुष्प विकसने पुष्प्यति पुपुष्प तिम तिम ष्टिम ष्टीम आर्द्रीभावे तिम्यति स्तिम्यति स्तीम्यति व्रीड चोदने लज्जायां च व्रीड्यति इष गतौ इष्यति षह षुह चक्यर्थे चक्यर्थस्तृप्तिः सह्यति सुह्यति जृष्‌ झृष्‌ वयोहानौ जीर्यति जजरतुः ऋच्छत्यॄतामिति गुणः जेरतुः जरिता जरीता जीर्यत्‌ जीर्यात्‌ ज्रृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ऋदृशोऽङि गुणः अजरत्‌ अजारीत्‌ अजारिष्टां झीर्यति जझरतुः जझरुः अझरीत्‌ षूङ्‌ प्राणिप्रसवे सूयते सुषुवे स्वरति सूतीति विकल्पं बाधित्वा श्र्युकः किति इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट्‌ सुषुविषे सुषुविवहे सोता सविता दूङ्‌ परितापे दूयते दीङ्‌ क्षये दीयते दीङो युडचि क्ङिति दीङः परस्याजादेः क्ङित आर्द्धधातुकस्य युट्‌ स्यात्‌ वुग्युटावुवङ्यणोः सिद्धौ राम ३९

पतनिविभ्यश्च इतिषत्वंपरिष स्तीखसहे तौ द्विकल्प्यस्तुनास्य भवति सहेति शा च त्रनिर्देशादि सार सर्वे ... विकल्पे स्तथा च षत्वमपि माभूत्‌ तत्राकार ... र्थ इति चेदिद्धि कल्पेपि तथास्तु तस्मादुभयमस्तु मास्तु वाद्‌ जरतीयद्युक्त माकरग्रन्थस्तु सर्वे व्यत्रोदासीनात्तदिह तत्त्वमहद्भिर्निरोपिमितिन पुंसकेभा वेक: सुदितं तथा=६ स्वेशाचो ग्रन्थव्याचष्टारो वेदुकं सुषुविवहे सुषुवहे इत्यादि नत्वा तन्नामादिकमितिभाव:=२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

घृ क्षरणदीप्त्योः जिघर्त्ति इत्यादि विभाषा तेन भृञामित् बहुलं छंदसीति इत्वं भसमत्वकरणे अयं
स्तुवो अभिजिहर्त्तिहोमान् ऋ सृ गतौ बहुलं छंदसीत्येव सिद्धे अर्त्तिपिपर्त्योश्चेति इत्वविधानाद्
येभाषायामपि अभ्यासस्यासवर्णे इतीयङ् इयर्त्ति इयृतः इय्रति आर आरतुः उउत्यर्त्ति इति नित्यमि
ट् आरिथ अर्त्ता अरिष्यति इयराणि ऐयः ऐयृतां ऐयरुः इयृयात् अर्यात् आरत् समर्त्त भ
स भर्त्सनदीप्त्योः बभस्ति घसिभसोर्हलि चेति उपधालोपः झलो झलीति सलोपः बब्धः बप्सति
कि ज्ञाने चिकेति तुर त्वरणे तुतोर्त्ति तुतूर्त्तः तुतुरति धिष शब्दे दिधेष्टि दिधिष्टः धन धान्ये
दधंति दधंतः दधनति जन जनने जजंति जनसनखनां सञ्झलोः एषामाकारोंतादेशः स्यात् झला
दौ सनि क्ङिति च जजातः जज्ञति जजंसि जजान जजन्यात् जन्यात् जायात् गा स्तुतौ देवान् जि
गाति सुम्नयुः जिगीतः जिगति ॥ इति जुहोत्यादयः ॥ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुति
मोदमदस्वप्नकांतिगतिषु अष्टौ परस्मैपदिनः दिवादिभ्यः श्यन् शपोपवादः हलि चेति दीर्घः दी
व्यति दिदेव देविता देविष्यति दीव्यतु दीव्य अदीव्यत् दीव्येत् दीव्यात् अदेवीत् अदेविष्यत्
षिवु तंतुसंताने परिषीव्यति परिषिषेव न्यषेवीत् न्यसेवीत् ष्णिवु गतिशोषणयोः ष्णिवु निरसने

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परिषिषेवेति स्थादिष्वभ्यासेन चाभ्यासस्येति नियमेन ह प्रवर्त्तते तत्र प्राक्सितादित्यनुवृत्तेः अस्य च प्राक्सितीयत्वात् तेनाभ्यासस्य षत्वं न भवत्येव परस्तु आदेशप्रत्यययोरिति षत्वं = न्यषेवीदिति सिवादीनां वाड्व्यवायेपीति विकल्पः = १

...तरानतिप्रविष्टाद्यानिमककारादचइसमतमतत्रृत्र मन्त्रप्रयोगमुदाहरतिघृतद्यामेतिहि रिरापयाशी: संवितति ... प्रथमचरमभन्त्रयारपिवत्यमानप्राध्वेत्नोदाहर्त्तव्य:=४
रखघमेनगुरङ्गतिनच्छ्रपधवाठस्तुवुदादे=१

सि०कौ० गति त्वरणहिंसनयोः तूर्यते तुतूरे धूरी गूरी हिंसागत्योः धूर्यते दुधूरे गूर्यते जुगूरे घूरी जूरी हिंसावयोहा
उ० नयोः शूरी हिंसास्तंभनयोः चूरी दाहे तप ऐश्वर्ये वा अयं धातुरैश्वर्ये वा तङ् श्यनौ लभते अन्यदा तु शप् विक
ध० रणः परस्मैपदीत्यर्थः केचित्तु वाग्रहणं हन्तुधातोरावयवमिच्छंति तप्यते तेपे तप्ता तप्स्यते पतेति वसत्यासे
२४ नयाठंते घृतद्यामा नियुतः पत्यमानः वृतु वरणे वृत्यते ववृते वर्तिता वर्त्स्यते ततो वावृत्यमाना सा रामशालान्यवे
40 क्षतेति भट्टिः क्लिश उपतापे क्लिश्यते क्लेशिता अक्लेशिष्ट काशृ दीप्तौ काश्यते वाशृ शब्दे वाश्यते ववाशे
अथ पंच स्वरितेतः मृष तितिक्षायां मृष्यति मृष्यते ममर्ष ममृषे ईशुचिर् पूतीभावे पूतीभावः क्लेदः शुच्य
ति शुच्यते शुशोच शुशुचे अशुचत् अशोचीत् अशोचिष्ट णह बंधने नह्यति नह्यते ननाह नेनह
नेहिथ नेहे नद्धा नत्स्यति अनात्सीत् रंज रागे रज्यति रज्यते ररंज ररंजे शप आक्रोशे शप्यते अथैका
दशानुदात्तेतः पद गतौ पद्यते पेदे पत्ता पद्येत पत्सीष्ट चिण्ते पदः पद चिण् स्यात्तशब्दे परे अपपा
दि अपत्साताम् खिद दैन्ये खिद्यते चिखिदे खेत्ता अखित्त विद सत्तायां विद्यते वेत्ता बुध अवगमने बुध्य
ते बोद्धा भोत्स्यते भुत्सीष्ट अबोधि अबुद्ध अभुत्साताम् युध संप्रहारे युध्यते युयुधे योद्धा अयुद्ध कथं युयु राम०
ध्यतीति युधमिच्छतीति क्यच् अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति वा अनो रुध कामे अनुरुध्यते अ ध०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रमापिपरणवाधित्वान्नित्यत्वाददोषः ८=२ अस्त्रीमत इति विषयसप्तमी ... इति तत्र ... अर्थात् ... स्यात् ...
णो दातेस्याधो नेगदेति शात्वमपि न भवेदिति=३ डी इति डीनः डीनवान् स्वादिषु पाठसामर्थ्यान्निष्ठायामिण्न इति हि सम्यग्व्याख्यानादीदितश्चेति न त्वस्यासङ्गः डयितः शब्दस्तु भौवादिकस्येति निष्ठा शीङ् इत्य
योगविभागादधि किं स्वमितिसीरदेवादयः=३ मीञ् हिंसात्रेति अत एवाकर्मकत्वमिति भावः मीञ् क्र्यादेः डमिति तिङ् स्यात् स्वादेः मी गतौ चुरादौ=४ रीङ् रियेरेता=५ लीङ् ... इति सार्वधातुके यगिति विभि
ङ्दतो ध्यादिद्वीवरलोइतिअपेक्षो=५ प्रीङ् प्रीताप्रीङ् तर्पणेप्त्वादेश्चुरादौ=६ षो अभिष्यति उपसर्गात्सुनोतीति षत्वे=८ अभिससौ ... स्यादित्वेवाभ्यासस्य षत्वमिति नियमाद्भ्यासस्य षत्वं न ना

वव्रश्चो दिदीये मीनातिमिनोतिदीङां ल्यपि च एषामात्वं स्यात् ल्यपि च चकारादशित्येज्निमित्ते दा
ता दास्यते अदास्त अदास्थाः डीङ् विहायसा गतौ डीयते धीङ् आधारे धीयते दिध्ये धेता धेष्यते मीङ् हिं
सायां हिंसात्र प्राणवियोगः मीयते रीङ् श्रवणे रीयते लीङ् श्लेषणे विभाषा लीयतेः लीयतेरिति यका निर्देशो न
ली४ तु श्यना लीङो ऽ आत्वं स्यादेज्विषये ल्यपि च लेता लाता लेष्यते लास्यते एज्विषये किं लीयते लिल्ये व्रीङ् वृणोत्य
र्थे व्रीयते विव्रिये स्वादय ओदितः लस्फलेत्विति निष्ठा नत्वं पीङ् पाने पीयते माङ् माने मायते ममे ईङ् गतौ ईय
ते अयांचक्रे प्रीङ् प्रीतौ गतौ च सकर्मकः प्रीयते पिप्रिये अथ परस्मैपदिनश्चत्वारः शो तनूकरणे ओतः श्यनि
ओतः लोपः स्यात् श्यनि श्यति श्यतः श्यन्ति शशौ शशतुः शाता शास्यति विभाषा घ्राधेट्शाच्छासः इति सिचो वा लु
क् लुगभावे यमरमनमातां सक् अशात् अशाताम् अशुः अशासीत् अशासिष्टां छो छेदने छ्यति षो अन्तकर्मणि
स्यति ससौ अभिष्यति अभ्यष्यत् अभिससौ दो अवखण्डने द्यति ददौ प्रणिदाता देयात् अदात् ॥ अ
थात्मनेपदिनः पञ्चदश जनी प्रादुर्भावे ज्ञाजनोर्जा अनयोर्जादेशः स्याच्छिति जायते जज्ञे जज्ञिरे जनि
ता जनिष्यते दीपजनेति वा चिण् जनिवध्योश्च अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च अजनि
अजनिष्ट दीपी दीप्तौ दीप्यते दिदीपे अदीपि अदीपिष्ट पूरी आप्यायने पूर्यते अपूरि अपूरिष्ट तूरी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्लिक्षत्कन्यां देवदत्तः आलिंगनएवेति किं समश्लिषज्जतुकाष्ठं अङ् प्रत्यासत्ताविहाश्लिषिः कर्मणि आ
लिंगने सिजेव न तु क्सः एकवचने चिण् आश्लेषि आश्लिक्षातां आश्लिक्षत आश्लिक्षथाः आश्लिढ्ढ्वं शक वि
भाषितो मर्षणे विभाषितइत्युभयपदीत्यर्थः शक्यति शक्यते हरिं द्रष्टुं भक्तः शशाक शेकिथ शशक्थ शेके
शक्ष्यति शक्ष्यते अशकत् अशक्त सेट्कोयमित्येके तन्मते नानिट्कारिकासु लृदित्पठितः शकिता शकि
ष्यति ष्विदा गात्रप्रक्षरणे घर्मस्रुतावित्यर्थः अयंञिदितिन्यासकाराद्याः नेति हरदत्तादयः स्विद्यति सिष्वे
द सिष्वेदिथ स्वेत्ता अस्विदत् क्रुधक्रोधे क्रोद्धा क्रोत्स्यति क्षुधबुभुक्षायां क्षोद्धा कर्ण इति संपदादि
क्विबंतात्सारकादित्वादितच् इति माधवः वस्तुतस्तु वसति क्षुधोरितीट् वक्ष्यते शुधशौचे शुध्यति शुशोध
शोद्धा षिधु संराद्धौ ऊदित्पाठः प्रामादिकः सिध्यति सेद्धा सेत्स्यति असिधत् रधहिंसासंराध्योः रध्यति र
रंधजभोरचीति नुम् ररंध ररंधतुः रधादिभ्यश्च वलाद्यार्धधातुकस्य वेट् स्यात् ररंधिथ ररद्ध ररंधिव रे
ध्व नेट्यलिटि रधेः लिड्वर्जे इटि रधेर्नुम् न स्यात् रधिता रद्धा रधिष्यति रत्स्यति अङि नुम् अनिदितामिति न
लोपः अरधत् णश अदर्शने नश्यति ननाश नेशतुः नेशिथ मस्जिनशोर्झलि नुम् स्यात् ननंष्ठ नेशिव
नेश्व नेशिम नशिता नंष्टा नशिष्यति नङ्क्ष्यति नश्येत् नश्यात् अनशत् प्रणश्यति नशेः षांतस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णप्राणेने अण्यते प्राणी अणिता अनेतिदंत्यांतोयमित्येके मनज्ञाने मन्यते मेने मंता युजसमाधौ स
माधिश्चित्तवृत्तिनिरोधः अकर्मकः युज्यते योक्ता सृजविसर्गे अकर्मकः संसृज्यते ससृजे रुहणं मु
भिन्ने ससृजिषे सृष्टा स्रक्ष्यते लिङ्सिचाविति कित्वान्न गुणो नाप्यम् सृजीदृ असृक्षातां लिङ्गेणं
ताः परस्मैपदिनः गणसूत्रं राधोकर्मकाद्वृद्धावेव एवकारो भिन्नक्रमः राधोकर्मकादेव श्यन् उदाहरणमाह
वृद्धाविति यन्मह्यमपराध्यति इत्सतीत्यर्थः विराध्यंतेत्त्वमेनकः दुःखं राध्यस्योदनः सिध्यतीत्यर्थः कुला
पराध्यति देवं पर्यालोचयतीत्यर्थः दैवस्य धात्वर्थेंतर्भावाज्जीवत्यादिवदकर्मकत्वं राध रराधतुः रराधि
थ राधो हिंसायामिति एत्वाभ्यासलोपाविहिन हिंसार्थस्य सकर्मकतया देवादिकत्वायोगात् राद्धा रात्स्य
ति अयं स्वादिष्वपुरादिश्च व्यधताडने ग्रहिज्येति संप्रसारणं विध्यति विव्याध विविधथ विव्यधतुः विव्यद्ध विव्यधि
थ व्यद्धा व्यत्स्यति विध्येत् विध्यात् अव्यात्सीत् पुषपुष्टौ पुष्यति पुपोष पुपोषिथ पोष्टा पोक्ष्यति पुष्या
दीत्यङ् अपुषत् शुषशोषणे अशुषत् तुषप्रीतौ दुषवैकृत्ये श्लिष आलिंगने श्लिष्यति शिश्लेष श्लेष्टा
श्लेक्ष्यति श्लिषः अस्मात्परस्यानिटः क्सः स्यात् अपवादो न तु चिणः अरस्मात्परवादन्यायात् आ
लिंगने श्लिषः क्स आलिंगन एव क्सो नान्यत्र योगविभागसामर्थ्यात् ... पुष्यादित्वस्याप्ययं विषयः अ

अस्मीभावे श्लिषपति श्लेष्टा श्लिष्ट आलिंगितः अभ्य ३ ... २४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनिटः क्सः अनुदात्तोपधकर्मवादिक कस्य सेद्रृतिदर्शितिपश्चेतिशत्गुपधा
तिस्मानंतरं श्लिषाश्लि ... तत्र एकयोगत्वेन ...

सि॰ कौ॰ उ॰ ४२

42

अभ्रमत् शेषं भ्वादिवत् क्षमूष् सहने क्षाम्यति चक्षम चक्षमिथ चक्षंथ चक्षमिव चक्षण्व चक्षमिम चक्षण्म क्ष
मिता क्षंता अयं न षित् भ्वादिस्तु षित् अक्षमत् क्षाम्यते क्षान्तिः क्षमूषः क्षमतेः क्षमाः क्लमु ग्लानौ क्ला
म्यति ष्ठीवक्लम्वाचमां ष्ठिवुक्लम्वित्येव दीर्घसिद्धे शमादिपाठो घिनुणर्थः अक्लमत् मदी हर्षे माद्यति
अमदत् शमादयोऽष्टौ गताः असु क्षेपणे अस्यति आस आसिता अस्यतेस्थुक् अङि परे आस्थत्।
अस पुषादित्वादङि सिद्धे अस्यति वक्तीति वचनं तङर्थं तङ्तूपसर्गादस्यत्यूह्योरिति वक्ष्यते पर्या
स्यत यसु प्रयत्ने यसोऽनुपसर्गात् संयसश्च श्यन्वा स्यात् यस्यति यसति संयस्यति संयसति अनुप
सर्गात् किं प्रयस्यति जसु मोक्षणे जस्यति तसु उपक्षये दसु च तस्यति अतसत् दस्यति अदसत् वसु स्त
म्भे वस्यति ववास ववसतुः न शसददेति निषेधः वशादिरयमिति मतेन वेसुः व्युष विभागे अयं दाहे पठितः अ
र्थभेदेन त्वङर्थं पुनः पठ्यते अव्युषत् ओप्यादिरित्यालोच्य व्युस इत्यन्ये अवकारः पुस् इत्यपरे प्लुष दा
हे अप्लुषत् पूर्वे पाठः स्मिजर्थ इत्याहुः तत्र भ्वादिपाठेन गतार्थमिति सुवचं विस प्रेरणे विस्यति अवि
सत् कुस संश्लेषणे अकुसत् बुस उत्सर्गे मुस खण्डने मसी परिणामे परिणामो विकारः समी इत्येके लुट
विलोडने उच समवाये उच्यति उवोच ऊचतुः मा भवानुचत् भृशु भ्रंशु अधःपतने बभ्रंश अभ्र रामः ४२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णत्वं न स्यात् प्रनेष्टा अं॰ तयहलो झलपूर्वं घतिपत्त्यर्थं प्रनङ्क्ष्यति तृप प्रीणने प्रीणनं तृप्तिस्तर्पणं
च नाग्निस्तृप्यति काष्ठानां पितृ नतार्पी दृत्रुभयच्च दर्शनात् ततर्पिथ ततर्प्थ ततृपथ तर्पिता
तर्प्ता त्रप्ता तृपम्रपस्पृशेति सिज्वा अतर्पीत् अत्राप्सीत् अतार्प्सीत् अतृपत् दृप हर्षमोहनयोः
मोहनं गर्वः दृप्यतीत्यादि रधादित्वादिमो वेट् कावमर्थमनुदात्तता द्रुह जिघांसायां वा द्रुहेति वाघः पक्षे
ढः दुद्रोग्ध दुद्रोढ दुद्रोहिथ द्रोहिता द्रोढा द्रोग्धा द्रोहिष्यति ध्रोक्ष्यति ढत्वघत्वयोस्तुल्यं रूपं अद्रुह
त् मुह वैचित्ये वैचित्यमविवेकः मुह्यति मुमोहिथ मुमोग्ध मुमोढ मोहिता मोग्धा मोढा मोहिष्यति मो
क्ष्यति अमुहत् ष्णुह उद्गिरणे स्नुह्यति सुष्णोह सुष्णोहिथ सुष्णोग्ध सुष्णोढ सुष्णुहिव सुष्णुह्व स्नोहि
ता स्नोग्धा स्नोढा स्नोहिष्यति स्नोक्ष्यति अस्नुहत् ष्णिह प्रीतौ स्निह्यति सिष्णेह वृत् रधादयः समा
प्ताश्चत्वर्थः उषादयस्तु आगणान्तादिति सिद्धान्तः शमु उपशमे शमामष्टानां दीर्घः श्यनि शमादीनामि
त्यर्थः प्रणिशाम्यति शेमुः शेमिथ शमिता अशमत् तमु काङ्क्षायां ताम्यति तमिता अतमत् दमु उप
शमे उपशमेति एयं तस्य तेन सकर्मकोऽयं न तु शमिवदकर्मकः अदमत् श्रमु तपसि खेदे च श्राम्यति अ
श्रमत् भ्रमु अनवस्थाने वा भ्राशेति श्यन्वा तत्र कृते शमामष्टानामिति दीर्घः भ्राम्यति लुङि अभ्रमत् ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. षुञ्॥ सुनोति सुनुतः हुश्नुवोरिति यण् सुन्वंति सुन्वः सुनुवः सुन्वहे सुनुवहे सुषाव सुषुवे सो
उ. ता सुनुवानि सुनवै सुनुयात् सूयात् स्तुसुधूञ्भ्य इतीट् असावीत् असोष्ट अभिषुणोति अभ्यषुणो
४३ त् अभिसुषाव सुनोतेः स्यसनोः स्यसनि च परे सुञः षो न स्यात् विसोष्यति षिञ् बंधने सिनोति वि
सिनोति सिषाय सिष्ये सेता [illegible] शिञ् निशाने तालव्यादिः श्याता डुमिञ् प्रक्षेपणे मीनातिमिनोति
दीङां ल्यपि चेत्यात्वं ममौ ममिथ ममाथ मिम्ये माता मियात् मासीष्ट अमासीत् अमासिष्टां अमास्त
चिञ् चयने प्रणिचिनोति विभाषा चेः अभ्यासात्परस्य चिञः कुत्वं वा स्यात् सनि लिटि च प्रणिचिकाय
43 चिचाय चिच्ये चिके अचैषीत् अचेष्ट स्तृञ् आच्छादने स्तृणोति स्तृणुते गुणोर्तीति गुणः स्तर्या
त् ऋतश्च संयोगादेः ऋदंतात् संयोगादेश्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि स्तरिषीष्ट स्तृषीष्ट अ
स्तरिष्ट अस्तृत कृञ् हिंसायां कृणोति कृणुते चकार चकर्थ चक्रे क्रियात् कृषीष्ट अकार्षीत् अ
कृत वृञ् वरणे वभूर्थाततंथ जगृभ्म ववर्थेति निगमे एषां वेदे इडभावो निपात्यते तेन भाषायां थलीट्
ववरिथ ववृव ववृवहे वरिता वरीता लिङ्सिचोरात्मनेपदेषु वृङ्वृञ्भ्यां ऋदंताच्च परयोर्लिङ्सि
चोरिड्वा स्यात् तङि न लिङि वृतो लिङि इटो दीर्घो न स्यात् वरिषीष्ट वृषीष्ट अवारीत् अवरीष्ट अवृ सा.
त धुञ् कंपने धुनोति धुनुते अधौषीत् अधोष्यत दीर्घान्तोऽप्ययं धूनोति धूनुते स्वरति सूतीति वे ४३

दश्च वभूथविज्ञातमुतंथतश्चावभूथयेनाश्चरित [illegible] मित्यादि [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शत् अनिदितामिति नलोपः भ्रश्यति अभ्रशत् वृश वरणे वृश्यति अवृशत् कृश तनूकरणे कृश्य
ति ञितृषा पिपासायां हृष तुष्टौ रुष ल्लडो भौवादिकाद्विशेषः रुष रिष हिंसायां तीषसहेति वेट् रोषि
ता रोष्टा रेषिता रेष्टा डिप क्षेपे कुप क्रोधे गुप व्याकुलत्वे युप रुप लुप विमोहने युप्यति रुप्यति लु
प्यति लोपिता लुप्यति सेट्कः अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात् लुभ गार्ध्ये
गार्ध्यमाकाङ्क्षा तीषसहेति वेट् लोभिता लोब्धा लोभिष्यति लुभ्येत् लुभ्यात् अलुभत् भ दरवल्ल ११५
न त्वा ह्लोभतो त्यपीत्याहुः क्षुभ संचलने क्षुभ्यति णभ तुभ हिंसायां क्षुभिनभितुभयो द्युतादौ क्र्यादौ
च पठ्यन्ते तेषां द्युतादित्वाद्ङ् सिद्धः क्र्यादित्वात्श्ना सिद्ध एव इह पाठस्तु श्यनर्थः क्लिदू आर्द्रीभा
वे क्लिद्यति चिक्लेदिय चिक्लेत्थ चिक्लिदिव चिक्लिद्व क्लेदिता क्लेत्ता ञिमिदा स्नेहने मिदेर्गुणः इत्यंत्र
कृशाकाराद्यमत्यये मेद्यति अमिदत् द्युतादिपाठादेव अमिदत् अमेदिष्टेति सिद्धे इह पाठोऽमेदीदिति
माभूदिति द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तु चिलः ञिक्ष्विदा स्नेहनमोचनयोः ऋधु वृद्धौ आन
र्ध आर्धत् गृधु अभिकाङ्क्षायां अगृधत् वृत् पुषादिर्दिवाद्यन्तर्गणः वृत्तः केचित्तु पुषादिसमाप्त्यर्थमे
व वृत्करणं दिवादिस्तु भ्वादिवदाकृतिगणः तेन न ह्री यते मृग्यतीत्यादि सिद्धमित्याहुः ॥ इति दि
वादयः ॥ षुञ् अभिषवे अभिषवः पीडनं स्नानं सुरासंधानं च नत्रस्नाने अकर्मकः स्वादि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ४४

दंभिस्वजीनां लिटः कित्वं वेति व्याकरणांतरं उदाहृत्या श्रीयते इत्युक्तं अनिदितामिति नलोपः तस्याभीय
त्वादसिद्धत्वेन हल्त्वाभ्यासलोपयोरप्राप्तौ देभेश्च एत्वाभ्यासलोपौ चवक्तव्यौ देभतुः ददंभतुः इदं कि
त्वं पिदपि द्विषयकमिति सुधाकरादयः तन्मते तिपुसिपमिपस्तु देभ देभिथ देभेति रूपांतरं वोध्यं।
अपि द्विषयमित्यासकारादिमतेतु ददंभ ददंभिथ ददंभेत्येव दम्भात् ऋधुहृशो तपप्रीणने इत्येके
५५ स्नुम्रादित्वा णत्वेन तृप्नोति छंदसि आगणं ताद्धिकारोयं अहव्याप्तौ अह्नोति दघघातनेपा
लनेच दघ्नोति चमुभक्षणे चम्नोति रिक्षिचिरिजिरिदाशाद्हिंसायां रिणोति क्षिणोति अयंभाषायां
मपीत्येके नलप्रापः शस्त्रमतो क्षिणोति ऋक्षीत्येके वाजादिरित्यन्ये ऋक्षिणोति चिरिणोति जिरि
णोति दाश्नोति दृणोति सन्त ३२ ॥ इति स्वादयः ॥ तुदव्यथने इतः षट् स्वरितेतः तुदादिभ्यः शः तु
दति तुतुदे तुतोद तुतो दिथ तोत्ता अतौत्सीत अतुत्त णुदप्रेरणे नुदति नुदते नुनोद नुनुदे नो
त्ता दिशअतिसर्जने अतिसर्जनं दानं देष्टा दिक्षीष्ट अदिक्षत् भ्रस्जपाके ग्रहिज्येति संप्रसारणं
स सस्य श्चुत्वेन शः शस्य जश्त्वेन जः भृज्जति भृज्जते भ्रस्जोरोपधयोरमन्यतरस्याम् भ्रस्जोरेफस्यो एम॰ ४४
पधायाश्च स्थाने रमागमो वा स्यादार्धधातुके परे मित्वादंत्यादचः परः स्थानषष्ठी निर्देशाद्रोप

मकारोच्चारणसामर्थ्याद्वा अचः परो भवति [illegible] निर्देशः [illegible] लुकिवधादेश वदयमपि
[illegible] स्थान षष्ठीतिस्यानेहिश
[illegible]
[illegible]

वादिवादुपन्यस्तमिहैव तु चितमकर्मत्वेव दिवादित्वमिति राधोऽकर्मकत्वादित्यत्र निर्णीतत्वादिति भावः=१ ... प्राप्तिरेव हन्तास्ति न थापितापधिकस्यापि कुत्वं भवतीति ... मार्थमिदं तेन निप्राप्य विषतीति सिद्धम्=२ षघोहिंसायामिति स

दु दुधविथ दुधोथ कितिलिटि स्युक इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट् दुधुविव स्तु
सुधूञ्भ्य इति नित्यमिट् अधावीत् अधविष्ट अधोष्ट अथ परस्मैपदिनः टुदु उपतापे दुनोति हि
गतौ वृद्धौ च हिनुमीना उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णत्वं स्यात् प्रहिणोति हेरचङि अ
भ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यात् न तु चङि जिघाय पृ प्रीतौ पृणोति पपार स्पृ प्रीतिपालनयोः प्रीति
चलनयोरित्यन्ये चलनं जीवनमिति स्वामी स्पृणोति पस्पार स्मृ इत्येके स्मृणोति पृणोत्यादयस्त्रयोपि
छांदसाः इत्याहुः आप्लृ व्याप्तौ आप्नुवंति आप्नुवः आप्ना आप्नुहि लृदित्वादङ् आपत् शक्लृ श
क्तौ अशकत् राध साध संसिद्धौ राध्नोति राधो हिंसायां एत्वाभ्यासलोपौ स्तः कितिलिटि सेटि थलि च अ
परेधतुः रेधुः रेधिथ साध संसिद्धौ साध्नोति ससाध असात्सीत् असाद्धां अथ च वातुदात्तेतो अशू व्याप्तौ सं
घाते च अश्नुते अश्नोतेश्च दीर्घाभ्यासावर्णात्परस्य नुट् स्यात् आनशे अशिता अष्टा अशिष्य
ते अक्ष्यते अश्नुवीत अशीष्ट आशिषीष्ट आशिष्ट आष्ट आशिषातां आक्षातां ष्टिघ आस्कंदने स्तिघ्नुते ति
ष्टिघे स्तेघिता अथागणान्ताः परस्मैपदिनः तिक तिग च आस्कंदने तिक्नोति तिग्नोति षघ हिंसायां घु १
सघ्नोति ञिधृषा प्रागल्भ्ये धृष्णोति दधर्ष धर्षिता दंभु दंभने दंभनं दंभः दभ्नोति ददंभ ग्रथि ग्रंथि

श्लेन धृष्णोति प्रागल्भ्ये सलधक् ... नाविधानादन्यत्रापि पदान्तविषये कुत्वं=२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तासिभ्रमति धुनेद श्रवत्तेतेत्थ्र हरदत्तमाधवादिग्रंथेषु स्पष्टं यत्तु प्राचा प्रक्रिया दीक्षितो दिग्विजयादौ नो द्वितीयो द्वितीयान्तः दावाप्रै ८
ऽि त्वं स्वी कृत्यो दाहृतं तन्मा करविरो भाष्ये यत्तु वदंति काम तंत्रेष्वपि: कुपादिषु पठितत्वात्सि कुपादित्वमनेन घासि निषेधमात्रमनेन क्रियते लाघवात् एवं च विधेयभेदाभावेके वाप्रसंग तस्मान्माधवादि ग्रन्थस्वा सङ्गत इ
वेदं यत्तव्यं काम तंत्रे कुपादिषु पाठे पि पाणिनीये तदभाव स्पष्ट एव तत्पाचकयंति पदनुवादेन वार्तिक वृत्तेता स्वा वाऽप्राप्त कुपादित्वं विधीयते इति हरदत्तो नि त्तदनुवादिनो माधवो नि स्थानि वीथे वृत्ता समये स
सत्तु दुरुद्धर इत्युक्तमेव तस्मा यथा करमेव गृहीतु मुचितं न त्ववीवीनेषु पद्म पातो युक्त इति दिक् उ॰ उच्छि उच्छे विवासे पुमोभ्या दिगरोच्याख्यातो इह पाठ उच्छती उच्छेती त्यत्रेनुमि व कृत्यार्थः पूर्वपाठस्तु स्वरार्थः तयाहि

सि॰कौ॰ उ॰ ४५ रादित्वमनसीतितु नेह प्रवर्त्तते अनसीति पर्युदासेन रूपमात्र विषयत्वात् उछि उंछे उंछति उछी विवासे उ
छति ऋछ गतीन्द्रिय प्रलयमूर्त्तिभावेषु ऋच्छत्यृता मितिगुणः द्विहल ग्रहणस्य अनेकहल उपलक्षणत्वान्नुट् आन
छे आनछतुः ऋच्छिता मिछ उत्क्लेशे उत्क्लेशः पीडा मिछति मिछ अमिच्छीत् जर्ज चर्च झर्झ परिभाषणभ
र्त्सनयोः त्वच संवरणे तत्वाच ऋच स्तुतौ आनर्च उब्ज आर्जवे उज्झ उत्सर्गे लुभ विमोहने विमोहनमाकुलीक
45 रणं लुभति लोभिता लोब्धा लोभिष्यति रिफ कत्थन युद्ध निंदा हिंसा दानेषु रिफति रिरेफ रिह सेके शिशं नवि
यामति भी रिंहति तृप तृम्फ तृप्तौ आद्यः प्रथमांतः द्वितीयांता विस्पष्टे तृपति ततर्प तर्पिता स्वशम्नयोति सि
ज्विकल्पः पौषादिकस्यैव अडुपवादत्वात् तेनात्र निरंसिच अतर्पीत् तृम्फति शस्यहित्वा दनिदितामिति
वा५ नलोपे शेतृम्फादीनां नुम् वाच्यः आदिशब्दः प्रकारे तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः तृम्फति ततृम्फ तृ
फ्यात् तुप तुम्प तुफ तुम्फ हिंसायां तुपति तुम्पति तुफति तुम्फति दृप दृम्फ उत्क्लेशे प्रथमः प्रथमांतो द्वितीयांतः द्वितीयो ४
अर्थोपि द्वितीयान्तो इत्येके दृपति दृम्फति ऋफ ऋम्फ हिंसायां ऋफति आनर्फ ऋम्फति ऋम्फांचकार गुफ गुम्फ ग्रंथे गुफ
ति जुगोफ गुम्फति जुगुम्फ उभ उम्भ पूरणे उभति उवोभ उम्भति उम्भांचकार शुभ शुम्भ शोभार्थे शुभति शु राम॰
इ भीमसेन १ म्भति चृती हिंसा ग्रंथनयोः चर्तिता सेसिचीति वेट् चर्तिष्यति चर्त्स्यति अचर्तीत् विध विधाने विधति ४५
तृ४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्विप्रतिषेधेनेति नित्यत्वादित्यपि सुवचम् शब्दान्तरस्य प्राप्नुवन्विधिरनित्य इति ... कृतत्वात् ... विज इट् ... इत्यस्य सूत्रस्य ... अनुवर्तते तेन ङादि ...
न तु तेनैकवचनमेव तथा हि सति विजिता ... ओविजी भयचलनयोरित्ययमेव ... तेन तु प्रत्ययभावार्थ इति ... तस्यानिट्वादिति हरदत्तादयः न चक्रादिनियमादिट् संभवत्येवेति वाच्यम् ... तेन ... तथा ... दितिने ...
... विवेजिथेति थलीट् संभवात् तत्र च पित्त्वेन कित्त्वाभावात् न च सर्वस्मिन्नेव ... कथंचित् ... नन्वेतस्यादेरिति वाच्यम् ... उद्विजितेत्युदाहरणम् ...
विरोधापत्तेः तस्मादिह तु यादिरूपो ... जुहोत्यादेश्च ... व्याख्यानमेव ... इति व्याख्यानं ... लत्वाच्च ... स्वयं ... संभवतीति ... वृत्तिकारे ... दिनामुव

धयोर्निर्देशात् बभर्ज बभर्जतुः बभर्जिथ बभर्ष्ठ बभर्ज रमभावे बभ्रज्ज बभ्रज्जतुः बभ्रज्जिथ स्कोरि
ति सलोपः व्रश्चेति षः बभ्रष्ठ बभ्रज्जे भर्ष्टा भ्रष्टा भ्रक्ष्यति भर्क्ष्यति क्ङिति रमागममबाधित्वा संप्रसारणं
पूर्वविप्रतिषेधेन भृज्ज्यात् भृज्ज्यास्तां भर्क्षीष्ट भ्रक्षीष्ट अभार्क्षीत् अभ्राक्षीत् अभ्रष्ट क्षिप प्रेरणे
क्षिपति क्षिपते क्षेप्ता अक्षैप्सीत् अक्षिप्त कृष विलेखने कृषति कृषते क्रष्टा कर्ष्टा कृष्यात् कृक्षी
ष्ट स्पृशमृशकृषेति सिज्वा पक्षे क्सः सिचि अम्वा अक्राक्षीत् अकार्क्षीत् अकृक्षत् तङि लिङ्
सिचाविति कित्त्वादम्न अकृष्ट अकृक्षातां अकृक्षंत ऋषी गतौ परस्मैपदी ऋषति आनर्ष जुषी
प्रीतिसेवनयोः आत्मनेपदिनश्चत्वारः जुषते ओविजी भयचलनयोः प्रायेणायमुत्पूर्वः उद्विजते उ
द्विविजे विज इट् विजेः परस्येडादिप्रत्ययो ङिद्वत् उद्विजिता उद्विजिष्यते ओलजी ओलस्जी व्रीडने ल
जते लेजे लज्जते ललज्जे अथ परस्मैपदिनः ओव्रश्चू छेदने ग्रहिज्या वृश्चति वव्रश्च वव्रश्चतुः
वव्रश्चिथ वव्रष्ठ लिट्यभ्यासस्येति संप्रसारणं रेफस्य ऋकारः उरत् न स्याच्चः परस्मिन्निति स्थानिवद्भा
वान्न संप्रसारणे इति वस्योत्वं न व्रश्चिता व्रष्टा व्रश्चिष्यति व्रक्ष्यति वृश्च्यात् अव्रश्चीत् अव्राक्षीत्
व्यच व्याजीकरणे विचति विव्याच विविचतुः व्यचिता व्यचिष्यति विच्यात् अव्याचीत् मंचेः कु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

...तुमर्थेस्तु गणपाठः २
पूलवमेप रिपूत्वाखिलो दयइति भागवतं ... इति श्रीधरोक्तिस्तु एतद्भाष्यदर्शनप्रयुक्तत्वादुपेक्षणीयेति भावः ६ मरुङित्वंस्वरार्थं तथा हि ... तत्र लसार्वधातुकानुदात्तत्वे कृते धातु
तः सिज्लोपस्य स्वरं वेत्त्वा सिङ् तु नङित्वसामर्थ्यादेवेत्यन्यत्र विस्तरः ११

सि॰को॰ उ॰ ४६

त्वा त्रुट्यति त्रुटति तुत्रोट त्रुटिता तुट कलहकर्मणि तुटति तुतोट तुटिता चुट छुट छेदने जुड बंधने
कड मदे लुठ संश्लेषणे कुड घनत्वे घनत्वं सांद्रता चकड कुडिता कुड बाल्ये पुड उत्सर्गे घुट प्रतिघाते तुड
तोडने तोडनं भेदः थुड स्थुड संवरणे थुडति तुथोड पुस्फोड खुड छुड इत्येके स्फुर स्फुल संचलने स्फुर स्फुर
णे स्फुल संचलने इत्येके स्फुरति स्फुलति निर्निविभ्यः षत्वं वा स्यात् निष्फुरति निस्फुरति स्फर इत्यकारोपधं
केचित्पठंति पस्फार स्फुड चुड व्रुड संवरणे क्रुड भृड निमज्जने इत्येके गुरी उद्यमने अनुदात्तेत् गुरते
५६ जुगुरे गुरिता लक्ष्यत्वेन दीर्घो नः णू स्तुत गुणोदयः इत्यश्चत्वारः परस्मैपदिनः नुवति अनुवीत् धू वि
धूनने धुवति गु पुरीषोत्सर्गे जुगुविथ जुगुथ गुता गुष्यति अगुषीत् कुटादित्वात् अगुतां अगुषुः
ध्रु गतिस्थैर्ययोः ध्रुवति पाठांतरं आद्यस्य ध्रुवतीत्यादि गुवतिवत् द्वितीयस्तु सेट् दुध्रुविथ ध्रुविता ध्रु
विष्यति अध्रुवीत् अध्रुवीत् अध्रुविष्टां कुङ् शब्दे दीर्घांत इति कैयटादयः कुविता अकुविष्ट ह्रस्वांत इ
ति न्यासकारादयः कुता अकुत वृत्कुटादयो वृत्ताः पृङ् व्यायामे प्रायेणायं व्याङ्पूर्वः रिङ् इयङ् व्याप्रि
यते व्यापप्रे व्यापप्राते व्यापप्रिरे व्यापरिष्यते व्यापृत व्यापृषातां मृङ् प्राणत्यागे म्रियते लुङ्लिङोश्च
लुङ्लिङोः शित श्च प्रकृतिभूतान्मृङः तङ् नान्यत्र ङित्वं स्वरार्थं म्रियते ममार ममर्थ मम्रिव मर्तासि म राम॰ ४६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

करोते करोतेरेवेतिप्रसिद्धत्वात्प्रयोगो शब्दस्यानेकार्थ
ग्र्यर्थकरणादिविशेषविस्तरोवाग्र्यादयोन गृह्यंते
रतिरपिमित्यर्थः=४

वेधिता जुड गतौ तवर्गपंचमांतमेके जुडति मुरुतो जुनेति मृडसुखने मृडति मर्डिता पृडच पृणप्रीण
ने पृणाति पपर्ण वृणच वृणति मृणहिंसायां तुणकौटिल्ये तुतोण पुणकर्मणि शुभे पुणति मुण प्रति
ज्ञाने कुणशब्दोपकरणयोः शुनगतौ द्रुणहिंसागतिकौटिल्येषु घुणघूर्णभ्रमणे षुरऐश्वर्यदीप्त्योः सुर
ति सुषोर आशिषिसूर्यात् कुरशब्दे कुरति कूर्यात् अत्र नभकुर्छुरामितिनिषेधो न करोतेरेवग्रहणादि
लेखने छेदने– त्याहु खुरछेदने मुरसंवेष्टने क्षुरविलेखने घुरभीमार्थशब्दयोः पुरअग्रगमने वृहउद्यमने दंत्योष्ठ्या
दिः पवर्गीयादिरित्यन्ये तृहस्तृहतृंहू हिंसार्थाः तृहति ततर्ह स्तृहति तस्तर्ह तर्हिता तर्ढा स्तर्हिता।
र्ढा स्तर्ढा अतृंहीत् अतार्क्षीत् आस्तो [illegible] इषइच्छायां यगमीतिछः इच्छति एषिता एष्टा [illegible] एषिष्यति
इष्यात् ऐषीत् मिषस्पर्धायां मिषति किलश्वैत्यक्रीडनयोः तिलस्नेहे चिलवसने चलविलसने इलस्वप्न
क्षेपणयोः विलसंवरणे दंत्योष्ठ्यादिः बिलभेदने ओष्ठ्यादिः णिलगहने हिलभावकरणे शिलषिलउंछे
मिलसंश्लेषणे लिखअक्षरविन्यासे लिलेख कुटकौटिल्ये गाङ्कुटादिभ्य इति ङित्वं चुकुटिथ चुको
ट चकुट कुटिता पुटसंश्लेषणे कुचसंकोचने गुजशब्दे गुडरक्षायां डिपक्षेपे छुरछेदने नभकुर्छुरा
मितिन दीर्घः छुर्यात् स्फुटविकसने स्फुटति मुटआक्षेपमर्दनयोः त्रुटछेदने वाभ्राशेति श्य

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

पाठस्यकेवलेचरितार्थत्वादापप्रत्ययान्नाच्छेवेवतेनविच्छायन्तीतिनित्यस्वनुम्=१

सि॰कौ॰ उ॰ ४७ स्पृश संस्पर्शने स्पृशा स्प्रक्ष्यति स्पर्क्ष्यति अस्प्राक्षीत् अस्पार्क्षीत् अस्पृक्षत् विच्छँ गतौ गुपूधूपेत्याय॰
आईधातुकेवा विच्छायति विच्छायांचकार विविच्छ विशप्रवेशने विशति वेष्टा मृशआमर्षने आमर्शनंस्प
र्शः अम्राक्षीत् अमार्क्षीत् अमृक्षत् णुदप्रेरणे कर्त्रभिप्रायेपि फलेपरस्मैपदार्थः पुनःपाठः षद्लृविशरण
गत्यवसादनेषु सीदतीत्यादिभौवादिकवत् इहपाठोनुम्विकल्पार्थः सीदन्ती सीदंती ज्वलादौपाठस्तुणार्थः
सादः स्वरार्थश्च शव ... नुदात्तः शस्तूदात्तः शाद्लृशातने स्वरार्थ एव पुनःपाठः शातातुनास्तिशदेःशि
67 तः आत्मनेपदोक्तेः अथषट्स्वरितेतः मिलसंगमे मिलसंश्लेषे इतिपठितस्यपुनःपाठः कर्त्रभिप्रायेतङर्थं ४।७।९
मिलति मिलते मिमेल मिमिले मुच्लृमोक्षणे शेमुचादीनांनुम्स्यात् मुंचति मुंचते मोक्ता मुच्यात् मुक्षीष्ट
अमुचत् अमुक्त अमुक्षाताम् लुप्लृछेदने लुंपति अलुपत् अलुप्त विद्लृलाभे विंदति विंदते विवेद वि
विदे व्याघ्रभूत्यादिमतेतुसेट्कोयंवेदिताभाष्यादिमतेत्वनिट्कः वेत्ता॰ परिवेत्तापरिस्त्रवर्जने ज्येष्ठंपरित्यज्य
दारादीनग्नींश्चलब्धवानित्यर्थः तन्न्तचौ लिपउपदेहे उपदेहोवृद्धिः लिंपति लिंपते लेप्ता लिपिसिचो
त्यङ् तङितुवा अलिपत् अलिपत अलिप्त॰ षिचँक्षरणे सिंचति सिंचते असिचत् असिचत अभि
क्त अभिषिंचति अभ्यसिंचत् अभिषिषेच अथत्रयःपरस्मैपदिनः कृतीछेदने कृंतति चकर्त्त कर्त्ति राम॰ ४७

अविदितसंपद्विषयत्वमादिकं फलाभावात्=२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रद्धीप्सायां स्वामिनः देशकालितो साक्षात् ... यावत् सत्करोति निमित्तं ततो बहुल सर्वचक्रं ... प्रसिद्ध पाठेपि निर्दिष्टं ... कमितिपाठस्तु सुगमएव ॥ ८

रिष्यति मर्षीष्ट अमृत अप्यसमपरस्मैपदिनः ॥ रिपिगतो अंतरंगत्वादियङ् रियति पियति रेता
पियारणे क्षिनिवासगत्योः षूप्रेरणे सुवति सविता कॄ विक्षेपे किरति किरतः चकार चकरतुः करि
ता करीता कीर्यात् अकारीत् किरतौलवने उपात्किरतेः सुडागमः स्याच्छेदे उपास्किरति अडभ्या
भ्यासव्यवायेपि सुट्कात्पूर्व इतिवक्तव्यं उपाचिकरत् उपचस्कार हिंसायामते श्च उपास्तते चाकिरतेः सुट्
प्रति ५ स्यात् हिंसायां उपस्किरति किरति गॄ निगरणे अचि विभाषा गिरतेः रेफस्य लत्वं स्याद्जादौ गिरति गिलति वा ५
गरीता ६ जगार जगाल जगरिथ जगलिथ गरिता गलिता गलीता दृङ् आदरे आद्रियते आद्रियेते आदद्रे आ
दद्रिषे आदर्ता आदरिष्यते आदृषीष्ट आदृत आदृषातां अदृषत धृङ् अवस्थाने ध्रियते अप्यप
रस्मैपदिनः षोडशः प्रच्छज्ञीप्सायां पृच्छति पप्रच्छ पप्रच्छतुः पप्रच्छिथ पप्रष्ठ प्रष्टा प्रक्ष्यति अप्राक्षी
त् वृत् किरादयो वृत्ताः सृज विसर्गे विभाषा सृजिदृशोः ससर्जिथ सस्रष्ठ स्रक्ष्यति सृजिदृशोर्झल्यम
कितो समागमः सृजेत् सृज्यात् अस्राक्षीत् टुमस्जो शुद्धौ मज्जति मस्जिनशोर्झलीति नुम् मस्जे
रंत्यात्पूर्वो नुम् वाच्यः संयोगादिलोपः ममज्ज ममज्जिथ मंक्ता मङ्क्ष्यति अमाङ्क्षीत् अमाङ्क्तां
अमाङ्क्षुः रुजो भंगे रोक्ष्यति अरौक्षीत् अरौक्तां भुजो कौटिल्ये रुजिवत् छुपति लिशगतौ अलिक्षत

CC-0. Lal Bahadur Shastri Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. उ. ५८

न्द् जिइंधी दीप्तौ अयआत्मनिपदिनः श्नान्नलोपः श्नमः परस्य नस्य लोपः स्यात् श्नसोरल्लोपः इंधे इन्त्से इं
धिता इनधे ऐंध ऐंधाः खिद दैन्ये खिंत्ते खेत्ता विद विचारणे विंत्ते वेत्ता अथपरस्मैपदिनः शिष्लृ वि
शेषणे शिनष्टि शिंष्टः शिंषंति शिशेषिथ शेष्टा शेक्ष्यति हेर्धिः झस्त्वं ष्टुत्वं झरोझरीति वा डलोपः अ
नुस्वारपरसवर्णौ शिंढि शिंणड्ढि शिनषाणि अशिनट् लृदित्वादङ् अशिषत् पिष्लृ संचूर्णने पि
षिवत् पिनष्टि भंजो आमर्दने भनक्ति बभंजिथ बभंक्थ भुज पालनाभ्यवहारयोः भुनक्ति भोक्ता भो
४८ क्ष्यति अभुनक् तृह हिसि हिंसायां तृणह इम् तृह श्नमिकृते इमागमः स्यात् हलादौ पिति तृणेढि तृं
ढः ततर्ह तर्हिता अतृणेट् हिनस्ति जिहिंस हिंसि उंदी क्लेदने उनत्ति उंत्तः उंदंति उंदांचकार औ
नत् औंत्तां औंदन् औनत् औनः औनदं अंजू व्यक्तिम्रक्षणकांतिगतिषु अनक्ति अङ्क्तः अंजंति
आनंज आनंजिथ आनङ्क्थ अङ्क्ता अंजिता अङ्ग्धि अनजानि आनक् अंजेः सिचि अंजेः
सिचो नित्यमिट् स्यात् आंजीत् तंचू संकोचने तनक्ति तङ्क्ता तंचिता तंचिष्यति तङ्क्ष्यति ओवि
जी भयचलनयोः विनक्ति विङ्क्तः विज इडिति ङित्वं विविजिथ विजिता अविनक् अविजीत् वृजी व राम
र्जने वृणक्ति वर्जिता पृची संपर्के पृणक्ति पपर्च ॥० इति रुधादयः ॥ अथ सप्त स्वरितेतः तनु विस्ता ५८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दीपनायामपीति नत्त्वेभिः पितरोधामपि शास्त्रिसुदीदी स्पर्धावगते: स्पष्टत्वात् तथैवाभियुक्तै र्व्याख्यातत्वाच्चेति भावः=२ रुधादिभ्यः श्नम् धति श्नमोपि [illegible] आगमत्वेपि प्रत्ययसंज्ञा न विरुध्यते तेन तत्र तं तु प्रत्ययादि [illegible]
त्रो शकारोच्चारणं तु श्नान्नलोपः इत्यत्र विशेषणार्थं ॥३

ता कर्त्तिष्यति कर्त्स्यति अकर्त्तीत् खिद परिघाते खिंदति चिखेद खेत्ता अयं दैन्ये रुधादौ दिवादौ च पिश
अवयवे पिंशति पेशिता अयं दीपनायामपि त्वष्टारूपाणि पिंशतु छे ॥ इति मुचादयस्तुदादयश्च
॥ रुधिर आवरणे नवस्वरितेतः इरितश्च रुधादिभ्यः श्नम् शपोपवादः मित्वादन्त्यादचः परः नित्य
त्वाद्गुणं बाधते रुणद्धि श्नसोरल्लोपः णत्वस्यासिद्धत्वादनुस्वारे परसवर्णः तस्यासिद्धत्वात् णत्वं न
नपदान्तेति सूत्रेण अनुस्वारपरसवर्णयोरल्लोपेन स्थानिवत्त्वं [illegible] रुंधे ति रुंधे [illegible] रोद्धा रोत्स्यति
रुणद्धु रुंधात् रुंधि रुणधानि रुंधां रुणधै अरुणत् अरुणः अरुणधं [illegible] अरुधत् अरौत्सीत्
अरुद्ध भिदिर् विदारणे भिनत्ति भिंत्ते भेत्ता भेत्स्यति अभिनत् अभिनः अभिनदं अभिदत् अभैत्सीत् ।
अभित्त छिदिर् द्वैधीकरणे अछिनत् अछैत्सीत् अछित्त रिचिर् विरेचने रिणक्ति रिरिचे रेक्ता अरिण
क् अरिचत् अरैक्षीत् अरिक्त विचिर् पृथग्भावे विनक्ति विंक्ते क्षुदिर् संपेषणे क्षुणत्ति क्षोत्ता अ
क्षुदत् अक्षौत्सीत् अक्षुत्त युजिर् योगे योक्ता उछृदिर् दीप्तिदेवनयोः छृणत्ति चछर्द सेसिचीति
वेट् चछृदिषे चछृत्से छर्दिता छर्दिष्यति छर्त्स्यति अछृदत् अछर्दीत् अछर्दिष्ट उतृदिर् हिं
सानादरयोः तृणत्ति इत्यादि छृणत्तिवत् कर्तावहने परस्मैपदी कृणत्ति आर्धधातुके तो दादिवत्
उच्छृदिर् उकारः क्त्वायामिड्विकल्पार्थः छृ [illegible] छर्दित्वा=३

CC-0. In Public Domain. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ उ॰ धर्

49

इष्टसदकर्त्ता करिष्यति येच कृञ्ज उलोपः स्यात् यासो प्रत्यये परे कुर्यात् आशिषि क्रियात् कृषीष्ट अकार्षी
त् तनादिभ्य इति लुको भावः ह्रस्वादंगादिति सिचो लोपः अकृत अकृथाः संपरिभ्यां करोतौ भूषणे समवा
येच संपरिपूर्वस्य करोतेः सुट् स्यात् भूषणे संघे चार्थे संस्करोति अलंकरोतीत्यर्थः संस्कुर्वंति संघीभवंती
त्यर्थः संपूर्वस्य क्वचिदभूषणेपि सुट् संस्कृतं भक्षा इति ज्ञापकात् परिनिविभ्य इति षः परिष्करोति सिवादी
नां वा पर्यस्कार्षीत् पर्यषार्षीत् उपात्प्रतियत्नवैकृतवाक्याध्याहारे षुच उपात्कृञः सुट् स्यादेष्वर्थेषु च
त्यागुणकयोरर्थयोः प्रतियत्नो गुणाधानं विकृतमेव वैकृतं विकारः वाक्याध्याहारः आकांक्षितैकदेश
पूरणं उपस्कृता कन्या अलंकृतेत्यर्थः उपस्कृतं भुंक्ते विकृतमित्यर्थः उपस्कृतं ब्रूते वाक्याध्याहारेण
ब्रूते इत्यर्थः सुट्कात्पूर्वः अड्भ्यासव्यवायेपि इत्युक्तं संचस्कार कात्पूर्व इत्यादि भाष्ये प्रत्याख्यातं तथा
हि पूर्वं धातुरुपसर्गेण युज्यते अंतरंगत्वात् सुट् ततो द्वित्वं एवं ऋतश्च संयोगादेर्गुणः संचस्करतुः
शरत्प्रभृतसूत्रे ऋतो भारद्वाजस्येति सूत्रे च कृञो सुट् इति वक्तव्यं तेन ससुट्कात्सरस्य इट् संचस्करिथ
संचस्करिव संचस्करिम गुणोर्त्तीति सूत्रे निसंछन्दसीति सूत्रान्नित्यमनुवर्त्तते नित्यं यः संयोगादिस्त
स्येत्यर्थः सुटि गुणो न संस्क्रियात् ऋतश्च संयोगादेरिति लिङ् सिचो नेट् एकाच उपदेश इति सूत्रा

राम॰ धर्

अगुणनामाध्याहारः समुदितार्थ इत्यर्थः १ घोटकस्य
कतमैगुणाधानकरोतीत्यर्थः ६४

रे तनादिभ्य उः तनोति तन्वः तनुवः तनुते ततान तनिता तनिष्यति तेने अतनीत् अतानीत्
तनादिभ्यस्तथासोः तनादिभ्यः सिचो लुग्वा स्यात्तथासोः थासा साहचर्यादेकवचनं तशब्दो गृह्यते ते
नेह न पूयमतनिष्ट अनुदात्तोपदेशेत्यनुनासिकलोपः तङि अतत अतनिष्ट अतथाः अतनिष्ठाः
षणु दाने सनोति सनुते ये विभाषा सायात् सन्यात् जनसने सात्वा असात असनिष्ट असाथाः अस २४
निष्ठाः क्षणु हिंसायां क्षणोति क्षणुते ह्म्यन्तेति न वृद्धिः अक्षणीत् अक्षत अक्षणिष्ट अक्षथाः अक्ष
णिष्ठाः क्षिणु च उप्रत्ययनिमित्तो लघूपधगुणः संज्ञापूर्वको विधिरनित्य इति न भवति इत्यात्रेयः
भवत्येवेत्यन्ये क्षिणोति क्षेणोति क्षेणिता अक्षेणीत् अक्षित अक्षेणिष्ट ऋणु गतौ ऋणोति अर्णो
ति ऋणुतः अर्णोति आनर्ण आनृणे अर्णिता सि आर्णीत् आर्त्त आर्णिष्ट आर्थाः आर्णिष्ठाः
तृणु अदने तृणोति तर्णोति तृणुते तर्णुते घृणु दीप्तौ जघर्ण जघृणे अथ वावुतातेतो वनु याच
ने वनुते ववने चान्द्रमतेऽपरस्मैपदी वनोति ववान मनु अवबोधने डुकृञ् करणे करोति अत उ
त्सार्वधातुके कुरुते पराँ नभकुर्छुरामिति न दीर्घः कुर्वन्ति नित्यं करोतेः प्रत्ययोकारस्य नित्यं लोपः स्या
त् म्वोः परयोः कुर्वः चकर्थ चकृव कर्ता करिष्यति ये च कृञ उलोपः स्यात् [illegible] कुर्यात् [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सन्नशानज्ञावार्थश्चासम्वारः सार्वभ्यःश्नानज्झास्त्रौतुरवयस्तभ्नोः हौ तुदा ह्ल तद्यपिमचोन्येथस्यास्तुरां माचा हलःश्न इतिसूत्रस्य ग्रहणावुपन्यासात् अन्यत्रापयामोपस्थिताच्चं भुभ्ननीन्तुवेस्तनावत्तद्दूरगमानायोग
याप्पनाकरत्वादुपेक्ष्यं तथाचमाधवेनस्तभानेत्युदाहृतं=१

सि॰कौ॰ स्यात् विष्कभ्नोति विष्कभ्नाति स्कुभ्नोति स्कुभ्नाति हलः श्नः शानज्झौ हलः परस्य श्नः शानजादेशः स्याद्धौ
उ॰ परे स्तभान स्कुभान पक्षे स्तम्भुहीत्यादि युञ् बन्धने युनाति युनीते योता क्नूञ् शब्दे क्नुनाति क्नुनीते क्नविता
५० द्रूञ् हिंसायां द्रुणाति द्रुणीते पूञ् पवने प्वादीनां ह्रस्वः शितिपरे पुनाति पुनीते पविता लूञ् छेदने लु
नाति लुनीते स्तॄञ् आच्छादने स्तृणाति स्तृणीते तस्तार तस्तरतुः स्तरिता स्तरीता स्तृणीयात् स्तृणीत
50 आशिषि स्तीर्यात् लिङ्सिचोरिति वेट् न लिङि वॄत इटो लिङि दीर्घो न स्तरिषीष्ट उश्चेति कित्त्वं स्तीर्षीष्ट
सिचि च परस्मैपदे इति न दीर्घः अस्तारीत् अस्तारिष्टां अस्तरिष्ट अस्तरीष्ट अस्तीर्ष्ट कॄञ् हिंसा
यां कृणाति कृणीते चकार चकरे वॄञ् वरणे वृणाति वृणीते ववार ववरे वरिता वरीता आशिषि उ
दोष्ठ्यपूर्वस्य वूर्यात् वरिषीष्ट वूर्षीष्ट अवारीत् अवारिष्टां अवरिष्ट अवरीष्ट अवूर्ष्ट धूञ् कंपने
धुनाति धुनीते दुधविथ दुधोथ दुधुविव धोता धविता स्तुसुधूञ्भ्य इतीट् अधावीत् अधविष्ट अ
धोष्ट अथ प्वादयः तारः परस्मैपदिनः शॄ हिंसायां शॄदॄप्रां ह्रस्वो वेति ह्रस्वः पक्षे यण् अन्यदा ऋच्छत्यॄ
तामिति गुणः शश्रतुः शशरतुः ऋरुकः कितीति निषेधस्य क्रादिनियमेन बाधः शशरिव शरिता श राम॰
रीता शृणीहि शीर्यात् अशारिष्टां पॄ पालनपूरणयोः पप्रतुः पपरतुः आशिषि पूर्यात् वॄ वरणे भरणे ५०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपदेश इत्यनुवर्त्य उपदेशेयः संयोगादिरिति व्याख्यानात् संस्कृषीष्ट समस्कृत समस्कृषातां समस्कृषत॥
॥०॥ इति तनादयः ॥ डुक्रीञ् द्रव्यविनिमये क्र्यादिभ्यः श्ना क्रीणाति ई हल्यघोरितीत्वं क्रीणितः ई त्वा
त्पूर्वं नेरंतादेशः परत्वान्नित्यत्वादंतरंगत्वाच्च एवं झस्याऽभावः ततः श्नाभ्यस्तयोरात इत्यालोपः क्रीणंति
क्रीणीते क्रीणाते क्रीणते चिक्राय चिक्रियतुः चिक्रयिथ चिक्रेथ चिक्रियिव चिक्रियिषे क्रेता क्रे
ष्यति क्रीणीयात् क्रीयात् क्रेषीष्ट अक्रैषीत् अक्रेष्ट प्रीञ् तर्पणे कांतौ च कांतिः कामना प्रीणाति
प्रीणीते श्रीञ् पाके मीञ् हिंसायां हिनुमीना प्रमीणाति प्रमीणीतः मीनाति मिनोति इत्यज्विषये आ
त्व ममौ मिम्यतुः ममिथ ममाथ मिम्ये माता मास्यति मीस्यति मीयात् मासीष्ट अमासीत् अमास्त षिञ् बं
धने सिनाति सिनीते सिषाय सिष्ये सेता स्कुञ् आप्रवणे स्तंभुस्तुंभुस्कंभुस्कुंभु स्कुञ्श्च चात् श्ना
स्कुनोति स्कुनुते स्कुनाति स्कुनीते चुस्काव चुस्कुवे स्कोता अस्कौषीत् अस्कोष्ट स्तंभ्वादयश्चत्वारः सौ
त्राः सर्वे रोधनार्था इत्येके माधवस्तु प्रथमतृतीयौ स्तंभार्थौ द्वितीयो निष्कोषणार्थः चतुर्थो धारणार्थ
इत्याह सर्वे परस्मैपदिनः नलोपः विष्टभ्नोति विष्टभ्नाति अवष्टभ्नोति अवष्टभ्नाति अवतष्टंभ उ
स्तंभिवित्यङ्वा व्यष्टभत् व्यस्तंभीत् स्कुभ्नोति स्कुभ्नाति वेः स्कभ्नातेर्नित्यं वेः परस्य स्कभ्नातेः सस्य षः

स्तंभुस्तुंभुनकारोपधाः विष्टभ्नो निइति स्तभेरिति षः = ४ वेः स्कभ्नोतेर्नित्यमिति विष्कभ्नोतीति पतुञ्जाचोक्तं स्कभ्नातेरित्युक्तेः स्कभ्नोतेर्नित्यं न वा सामान्यतः क्वमि विभाषा इत्याहि स्क
भ्नोतेरित्यत्र पठितुं रूपं विवादितं तर्हि विस्कभ्नातीत्यादावपि तस्मात् ग्रंथधातुमात्रे विवादितं तर्हि अविशिष्टग्रन्थे त्वयि विरोधपि तस्मिन् भवितव्यमेव षत्वं न उदाहृतं तत्रापि
पत्वमाधवादिभिरिति दिक् = २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ दर्भे अर्थभेदात् अयं पुनः पाठः रूपं तु तत् कुथ संश्लेषणे संक्लेश इत्येके कुथ्नाति चुकोथ कुन्थेति दुर्गः चु
उ॰ कोथ मृद क्षोदे मृद्नाति मृड च अयं सुखेऽपि मृड्नाति गुध रोषे गुध्नाति कुष निष्कर्षे कुष्णाति कोषिता
५२ निरः कुषः निरः परात् कुषो वलादेरार्धधातुकस्येड्वा स्यात् निष्कोषिता निष्कोष्टा निरकोषीत् निरकुक्षत् क्षु
भ संचलने क्षुभ्नादिषु च क्षुभ्नाति क्षुभ्नीतः क्षोभिता णभ तुभ हिंसायां नभ्नाति तुभ्नाति नभते तोभते
शपि५ इति नभ्यति तुभ्यति इति श्यनि क्लिशू विबाधने ष्वादित्वेति क्षुब्धस्वान्तेति निषेधः क्लिश्नाति क्लेशिता क्लेष्टा अ
क्लेशीत् अक्लिक्षत् अश भोजने अश्नाति आश उध्रस उञ्छे उकार इत् ध्रस्नाति उकारो धात्ववयव
51 इत्येके उध्रसांचकार इष आभीक्ष्ण्ये पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यं इष्णाति एषिता तीषसहेत्यत्र
हिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेः ग्रहणं न तु इष्यतीष्णात्योरित्याहुः वस्तुतस्तु इष्णा
तेरपि इड्विकल्प उचितः तथा च वार्त्तिकं इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेध इति विष विप्रयोगे विष्णा
ति वेष्टा प्लुष प्लुष स्नेहनसेवनपूरणेषु पुष्णाति प्लुष्णाति पुष पुष्टौ पोषिता पोष्टा मुष स्तेये मोषि
ता खच भूतप्रादुर्भावे भूतप्रादुर्भावो ऽतिक्रान्तोत्पत्तिः खच्ञाति वान्तोय इत्येके छोः शूडनुनासिके राम॰
च सतुक्कस्य छस्य वस्य च क्रमात् शऊठ् एतौ आदेशौ स्तोऽनुनासिके क्वौ झलादौ क्ङिति च खौनाति च ५२
खाव खविता शानचः परत्वाद् ऊठि कृते हलन्तत्वाभावात् शानच् खौनीहि हिठ च हेठ त्वं हिठ्णाति य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्याण्णन एषिता एष्टा ५

इत्येके भृ भर्त्सने भरणेऽप्येके मृ हिंसायां मृणाति ममार दृ विदारणे ददरतुः ददरुः जॄ वयोहानौ जॄ
इत्येके धॄ इत्यन्ये धृ धारणे नॄ नये कॄ हिंसायां ॠ गतौ ॠणाति अरांचकार अरिता अरीता आ
र्णीत् ईर्यात् आरीत् आरिष्टां गॄ शब्दे ज्या वयोहानौ ग्रहिज्या हलः अंगावयवाद्धलः परं यत्संप्रसार
णं तदंतांगस्य दीर्घः स्यात् इति दीर्घे कृते प्वादीनां ह्रस्वः जिनाति जिज्यौ जिज्यतुः री गतिरेषणयोः रेषणं
वृकशब्दः ली श्लेषणे विभाषा लीयतेः इति सिज्विषये आत्वं वा ललौ लिलाय लाता लेता ल्वी वरणे ल्वि
नाति ल्वी गतौ ल्वादयो वृत्ताः प्वादयोपीत्येके व्री वरणे भ्री भये भरण इत्येके क्षीष् हिंसायां एषां त्रयाणां
२ ह्रस्वः केषांचिन्मते लुन् ज्ञा अवबोधने ज्ञाजनोर्जा जानाति दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः बंध बंधने
बध्नाति बबंधिथ बबंध बंद्धा भंत्स्यति बधान अभांत्सीत् प्रवृत्ता सिद्धमिति भषभावात्स्वेऽलि
सिज्लोपः प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वा
त् अबांद्धां आभान्त्सु वृङ् संभक्तौ वृणीते ववृषे ववृढ्वे वरिता वरीता अवरिष्ट अवरीष्ट अवृत
श्रथ विमोहनप्रतिहर्षयोः इतः परस्मैपदिनः श्रथ श्नाति श्रथ ग्रंथेत्यस्मादिना कित्वपक्षे एत्वाभ्यासलो
पाव श्रथ नैकल्यौ इति हरदत्तादयः श्रेथतुः श्रेथुः इदं कित्वं पितामपीति सुधाकरमते श्रेथिथ असिन्न्
पि पक्षे णलि शश्राथ उत्तमे णलि शश्रथ शश्राथ इति माधवः तत्र मूलं मृग्यं मंथ विलोडने अथ ग्रंथ
वेकव्यावितितंत्रौ तरोकौ ह्याप्याश्रयणीयावित्यर्थः संयुक्तहल्सत्वात् ग्रंथे रादेशादि त्वादसोत्तौ वचनं=२

सु

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

ओकारोऽदित्येके इति भ्वादिसमानप्रत्ययानिष्टायां रूपे विवदन्ते : अनुबन्धवत्तानिडित्येके लण्डू
अनुबन्धवलादिड्व्यवधानेऽपि न त्वमित्यन्ये तन्मते लण्डिन :=१ ट्टरो तवीति
भट्टदीनामतं भाष्येनोपन्यस्तं न त्विदं तोदत संधातु पाठकृता पाति निनाविति ध्येवोदात्तानुदात्ता
पाठनून हि अकारान्तो सिद्धः इति तेन परिभाषितये नेत्यतस्याशयः कल्पत अतएव कदि कल्पड्

सि॰कौ॰ उ॰ ५२ मिंदयति मिंदति ओलडि उत्क्षेपणे ओलंडयति ओलंडति ओकारोऽदित्येके लंडयति लंडति उकारोदिर
यमित्यन्ये जल अपवारणे लज इत्येके पीड अवगाहने पीडयति भ्राजभासभाषदीपजीवमीलपीडामन्य
तरस्यां एषामुपधाया ह्रस्वो वा स्यात् चङ्परे णौ अपीपिडत् अपिपीडत् नट अवस्यंदने अवस्यंदनं ना
ट्यं श्रथ प्रयत्ने प्रस्थाने इत्येके बध संयमने बाधयति बंधे तिचांद्राः पॄ पूरणे दीर्घोच्चारणे लिंचः पाल्यिकत्वे
लिंगं तेङ्विसेट्कृत्वा य एवं च पृणाति पिपर्ति भ्यां परि तेत्यादि सिद्धावपि परति परत इत्यादि सिद्धिः फल पा
रयति परति ऊर्ज बलप्राणनयोः पक्ष परिग्रहे वर्ण वर्णक्रियाविस्तारगुणवचनेष्वित्येके वर्णयति
52
नान्ये मितो ह्रस्वविति वक्ष्यमाणत्वान्नास्य मित्त्वं अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशां एषामभ्यासस्याकारो
ऽतादेशः स्यात् चङ्परे णौ इत्वापवादः अपप्रथत् पृथ प्रक्षेपे पर्थयति ऊ ऋत् उपधाया ऋवर्णस्य स्थाने
ऋत् स्यात् वा चङ्परे णौ इररामपवादः अपीपृथत् अपपर्थत् पथ इत्येके पाथयति षंब संबंध
ने संबयति अससंबत् शंब च अशशंबत् साब इत्येके भक्ष अदने कुट्ट छेदनभर्त्सनयोः पूरण इत्ये
चूर्णः चुट्ट अनादरे ३ के कुट्टयति पुट्ट चुट्ट अल्पीभावे अट्ट षुट्ट अनादरे अट्टयति अयं दोपधः भूतस्यासिद्धत्वान्नंद्राः
ति निषेधः आट्टिटत् लुंठ स्तेये लुंठयति लुंठतीति तु भौवादिकस्य शठ श्वठ असंस्कारगत्योः श्व
ठि इत्येके तुजि पिजि हिंसाबलादाननिकेतनेषु तुंजयति पिंजयति इदित्करणात्तुंजति पिंजति तु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लुंठिस्ते पदृति २

[illegible] ...प्रसारणं... नित्यमिति... इत्यस्यानित्यत्वात्... इति... एवं प्रत्ययः =७

ग्रह उपादाने स्वरितेत् ग्रहिज्या गृह्णाति गृह्णीते ग्रहोऽलिटि दीर्घः एकाचो ग्रहे विहितस्येटो दीर्घः स्यान्न तु लिटि ग्रहीता लिटि तु जग्रहिथ गृह्यात् ग्रहीषीष्ट ह्म्यन्तेति न वृद्धिः अग्रहीत् अग्रहीष्टां अग्रहीष्ट अग्रहीषातां अग्रहीषत ॥०॥ इति क्र्यादयः चुर स्तेये सत्याप पाश रूप वीणा तूल श्लोक सेना लोम त्वच वर्म वर्ण चूर्ण चुरादिभ्यो णिच् एभ्यो णिच् स्यात् चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थे इत्येव सिद्धे तेषामिह ग्रहणं प्रपंचार्थं चुरादिभ्यस्तु स्वार्थे पुगन्तेति गुणः सनाद्यन्ता इति धातुत्वं तिप् शबादि गुणायादेशौ चोरयति णिचश्च णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले चोरयते चोरयामास चोरयिता चोर्यात् चोरयिषीष्ट णिश्रीति चङ् णौ चङीति ह्रस्वः द्वित्वहलादिः शेषः दीर्घो लघोरित्यभ्यासस्य दीर्घः अचूचुरत् अचूचुरत चिति स्मृत्यां चिंतयति अचिचिंतत् चिंतेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिंगं तेन चिंतात् चिंत्यते इत्यादौ नलोपो न चिंतति चिंतेत् एतच्च ज्ञापकं सामान्यापेक्षमित्येके अत एव हलि त्यत्र वृत्तिकृता जगणतुः जगणुरित्युदाहृतत्वात् विशेषापेक्षमित्यपरे अत एव आधृषाद्वेत्यस्य न वैयर्थ्यं यत्रि संकोचे यंत्रयति यंत्रेति पठितव्ये इदित्करणात् यंत्रतीति माधवेनोक्तं तंत्रिं एवं कुद्रि तंत्रि मंत्रिष् स्फुडि परिहासे स्फुंडयति इदित्करणात् स्फुंडति स्फुटीति पाठांतरं स्फुंटयति स्फुंटति लक्ष दर्शनांकनयोः कुद्रि अनृतभाषणे कुंद्रयति लड उपसेवायां लाडयति मिदि स्नेहने।

इति कृतेति... नित्यत्वं... इति सामान्याकारेणाभिधानात् इति बोध्यं =४ ... मिति ... [illegible]

ता... मित्या... [illegible]

[illegible margin notes]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कथाशेषत्वमाण॰ स्यतु अदंतत्वेनाप्नो॰ दिर्घसन्वद्भावेन अचहल १

सि॰ कौ॰ उ॰ ५३

तुभोजनानां पिवेष्टना यमयति चंदं परिवेष्टनइत्यर्थः चहपरिकल्कने चहयति अचीचहत् चपुइत्येके च
पयति रहत्यागे इत्येके अरीरहत् कथादेस्तु अररहत् वलप्राणने वलयति चिञ् चयने चिंस्फुरोर्णौ आ
त्वं वास्यात् अति ह्री ब्ली री क्नूयी क्ष्माय्यातां पुङ्णौ एषांपुक्स्यात् णौ चपयति चयपति त्रिकरणसामर्थ्याद्
स्माणिज्विकल्पः चपते प्रणिचपति प्रनिचयति नान्येमितोऽहेतौ अहेतौ स्वार्थे णिचित्तपाद्भिर्योन्येमि
तोनस्युः तेनशमादीनाममित्त्वमयुक्तमित्वंच घट्टचलने मुस्तसंघाते खट्टसंवरणे षट्टस्फिट्टचुविहिंसायां
स्तसंघाते पुणेत्येके पूर्णोयमेव पुंसअभिवर्धने टकिबंधने टंकयति टंकति धूसकांतिकरणे घसयति दं
त्योतः मूर्धन्यांतइत्यैं तालव्यांतइत्यपरे कीस्ववर्णे चूर्णसंकोचने पूजपूजायां अर्कस्तवने तपने इत्येके सुठ
आलस्ये शुठिशोषणे शुंठयति शुंठति जुडप्रेरणे गजमार्जशब्दार्थौ गाजयति मार्जयति मर्चच मर्चयति घृ
प्रस्रवणे स्रावणइत्येके पचिविस्तारवचने पंचयति पंचते इतिव्यक्तार्थस्पर्शापिगतं तिजनिशाने तेजयति
कृतसंशब्दे उपधयाश्च धातोरुपधायाऋतस्य ऋतइत्स्यात् रपरत्वं उपधायांचेति दीर्घः कीर्तयति उर्क्रत
अचीकृतत् अचिकीर्तत् वर्धछेदनपूरणयोः कुविछादने कुंवयति कुंवति कुमि इत्येके लुवितु विमर्द
शने अर्दनइत्येके दयव्यक्तायां वाचि लूपेत्येके चुटिछेदने इलप्रेरणे एलयति ऐलिलत् म्रक्षम्लेछम्ले
लेछ अव्यक्तायांवाचि भ्रसम्लद अदने ब्रूसवर्हहिंसायां पिटिसंघाते रुषरोषे रुटइत्येके डिपक्षेपे ष
केचिदिहगर्जगर्दशब्देगर्धअभिकांक्षायामिति पठंति गुदपूर्दनिकेतनेजसिरक्षणामोक्षणे इति केचित्संजसयति॰ सातिइड स्तु
नौजस हिंसायां ४१

रामः ५३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अपिजेति केचित् लजिलुजि इत्येके पिस गतौ पेसयति पेसतीति प्रापिगतं पांत्व सामप्रयोगे सान्त्व
वल्क परिभाषणे ष्णिह स्नेहने स्फिट इत्येके स्मिट अनादरे अषोपदेशत्वान्नत्वं: असिस्मिटत् ष्मिङ् अनादरे इत्ये
के ङित्वस्यावयवेऽचरितार्थत्वा णिजंतात्तङ् स्माययते श्लिष श्लेषणे पथि गतौ पंथयति पंथति पिच्छ कुट्टने छ
दि संवरणे छंदयति छंदति श्रण दाने प्रायेणायं विपूर्वः विश्राणयति तड आघाते ताडयति खड खडि कडि भेदने खा
डयति खंडयति खंडति कंडयति कंडति कुडि रक्षणे गुडि वेष्टने रक्षणे इत्येके कुठि इत्यन्ये [illegible] अवकुंठय
ति गुठि इत्यपरे लुडि खंडने वटि विभाजने चडि इत्येके मडि भूषायां हर्षे च भडि कल्याणे छर्द वमने पुस्त बुस्त आद
रानादरयोः चुद संचोदने नक्क धक्क नाशने लोपदेशलक्षणे पर्युदस्तोयं प्रनक्कयति चक्क चुक्क व्यथने लक्षणो ५७
चकर्मणि तल प्रतिष्ठायां तुल उन्माने तोलयति अततुलत् कथं तुलयति तुलना इत्यादि अतुलोपमाभ्यामिति नि
पातनादटं तस्य तुला शब्दस्य सिद्धो नतो णिच् दुल उत्क्षेपे पुल महत्वे चुल समुच्छ्राये मूल रोहणे कल विल
क्षेपे बिल भेदे तिल स्नेहने चल भृतौ पाल रक्षणे लुष हिंसायां शुल्व माने शूर्प च चुट छेदने मुट संचूर्णने प
डि पसि नाशने पंडयति पंडति पंसयति पंसति व्रज मार्गसंस्कारगत्योः शुल्क अतिस्पर्शने चपि गत्यां चंपय
ति चंपति क्षपि क्षांत्यां क्षंपयति क्षंपति छजि कृच्छ्रजीवने स्वर्ग गत्यां स्वभ्रं च ज्ञप मिच्च अयं ज्ञाने ज्ञापने च
वर्तते मितां ह्रस्वः मितामुपधाया ह्रस्वः स्यात् णौ परे ज्ञपयति यम च परिवेषणे चान्मित् परिवेषणमिह वेष्टनं न

अयं ज्ञाने इति प्रतिपद [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जसु ताडने जासयति जसति पाश बंधने पाशयति ४

कारा:स्वभावादयमेकनेत्रवचनः=२ कारणादीनामिति तच्च हेतुमत्येव स्यते=२ विशब्दनाये ८ स्मादनंतरानिष्ठाना सीति बघेनेति भावः=३ स्वामी तुष्टिरित्यापयोग इतिपठित्वा नस्ति मूर्धन्यांतं केचित्पठंतीत्याह=४ यतनिकारोपस्कारयोरिति मीतु निकारस्थाने निराकारेति पठित्वा निराकारः परिभव इति व्याख्यात् क्रिया नि घटेच पत्रे प्रयेनिराकरे यात ये स्कृत्वा विति निलोपे धान्यधनयोः प्रतिदाने चरा निर्यातयति प्रतिददातीत्यर्थः=१

सिको॰ ३ ५४ चर्च अध्ययने बुक्क भाषणे शब्द उपसर्गादाविष्कारे च चाज्ञावणे प्रतिपादयति प्रतिश्रुतमाविष्करोतीत्यर्थः

अनुपसर्गाच्च आविष्कारे इत्येव शब्दयति कण निमीलने काणयति णौ च ड्युपधाया ह्रस्वः काणादीनां

वेति विकल्प्यते अचीकणत् अचकाणत् जभि नाशने जंभयति जंभति [illegible] सूद क्षरणे सूदयति।

५४ अम रोगे आमयति नान्ये मित इति निषेधः अमगत्यादिषु पठितः तस्माद्धेतुमण्णौ आमयति न कम्यमिच

मामिति मित्त्व निषेधः चट स्फुट भेदने विकासे शशयोः स्फुट विस्फोटने इत्युक्तं घट संघाते घाटयति हंत्यर्थाश्च ति ५

नवगणणामुक्ता अपि हेत्यर्थाः स्वार्थे णिचं लभंत इत्यर्थः दिवु मर्दने उदित्वाद्देवितीत्यपि अर्जे प्रतियत्ने अयं

अर्थांतरेपि दृश्य मर्जयति घुषिर् विशब्दने इति स्त्रे अविशब्दने इति निषेधाद्धिंगाद निलोस्याणिच् घुषिर वि

घोषयति ६ शब्दने घोषयति इरित्वादङ् वा अघुषत् अघोषीत् एष्यत्स्वसु अजूघुषत् आङः क्रंद सातत्ये भौवादिकः

क्रंद धातुराह्वानाद्यर्थे उक्तः स एवोऽघोषयति लस शिल्पयोगे तसि भूष अलंकारे अवतंसयति भूष

यति अर्ह पूजायां ज्ञा नियोगे आज्ञापयति भज विश्राणने श्रथु प्रसर्हने अशशार्थत् अशश्रथत् यत

निकारोपस्कारयोः रकलग आस्वादने रघ इत्येके रगेत्यन्ये अंचु विशेषणे अंचयति उदित्वमिड् विक

ल्पार्थं अत एव विभाषितो णिच् अंचति एवं श्रधुज सुप्रभृतीनामपि बोध्यं लिगि चित्रीकरणे लिं सम॰ ५४

गयति मुद संसर्गे मोदयति सक्तून् घृतेन त्रस धारणे ग्रहणे इत्येके वारणे इत्यन्ये उध्रस उंछे उका

ङ्पूर्वो णिचं लभते सातत्ये आक्रंदयति अन्ये तु आङ्पूर्वो घुषिः क्रंद सातत्ये इत्याहुः ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पसमुच्छ्राये आकुस्मादात्मनेपदिनः कुस्मनाम्नोवेतिवक्ष्यते तमभिव्याप्ये त्यर्थः अकर्तृगामिफलार्थ
मिदं चित संचेतने चेतयते अचीचितत दृशि दंशने दंशयते अददंशत इदित्वाणि जभावे दंशति।
आकुस्मीयमात्मनेपदं णिजसंनियोगेनैवेति व्याख्यातारः नलोपे संजिघ्राहच्चर्यात् ण्यादेरेवग्रहणं दसि
दर्शनदंशनयोः दंसयते दंसति दसेत्यप्येके उपदिपसंघाते तत्रिकुटुंबधारणे तेत्रयते चांद्रस्तु धातुद्वय
मिति मत्वा कुटुंबयते उदाहरति मंत्रि गुप्तपरिभाषणे स्पश ग्रहणसंश्लेषणयोः तर्ज भर्त्स तर्जने व
स्त गंध अर्दने बस्तयते गंधयते विष्क हिंसायां हिष्क इत्येके निष्क परिमाणे लल ईप्सायां कूण संकोचने तू
ण पूरणे भ्रूण आशाविशंकयोः शठ श्लाघायां यक्ष पूजायां स्यम वितर्के गूर उद्यमने शम लक्ष आलोच
ने नान्येमित इति मित्वनिषेधः शामयते लक्षयते कुत्स अवक्षेपणे त्रुट छेदने कुट इत्येके गल स्रवणे भ
ल आभंडने कूट आप्रदाने अवसादने इत्येके कुट्ट प्रतापने वंचु प्रलंभने वृष शक्तिबंधने शक्तिबंधनं प्र
जननसामर्थ्यं शक्तिसंबंधश्च वंचयते मद तृप्तियोगे दिवु परिकूजने गृ विज्ञाने गारयते विद चेत
नाख्यान निवासेषु वेदयते सत्तायां विद्यते ज्ञाने वेत्ति विंते विचारणे विंदते देवः विंदति प्राप्नोत्यर्थः।
५८ लुक् श्रयशे विद् क्रमात् १ मन स्तंभे मानयते कुजु गुप्सायां यावयते कुस्मनाम्नो वा कुस्मेति धातुः कु
त्सितस्मयते वर्तते कुस्मयते अचुकुस्मत् अथवा कुस्मेति प्रातिपदिकं ततो धात्वर्थे णिच् इति आकुस्मीयाः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वंचु प्रलंभने वंचयते क्वायामिदित्कल्याणार्थो हुदिकरणामिति जनित्यः वञ्चति वञ्चिता ऊदित्वमिति केचित्तन्मते
५९१

अयक्तस्वप्नदर्शनमित्युक्तिः अयोक्तीदितुक्तं तदस्यानिन्दादयुक्तमितिप्रामाणिकाः दूरिशो अधारिकसिविभवरसेमयंदेविशिद्धेनिवेधः=१ अनिष्टास्यकल्पतिरेकेतिरः=

सि॰कौ॰ धु॰ ५५ ति वर्जति वृञ् आवरणे वारयति वरति वरते वरिता वरीता जॄ वयोहानौ जारयति जरति जरीता ज्रिच
ज्रापयति ज्रयति ज्रेता रिच वियोजनसंपर्चनयोः रेचयति रेचति रेक्ता शिष असर्वोपयोगे शेषयति
शेषति शेष्टा अशिलत् अयं विपूर्वो तिशये लपदाहे लापयति लपति लप्ता तप तप्ता संदीपने इत्येके
तर्पयति तर्पति तर्पिता छृदी संदीपने छर्दयति छर्दिता छर्दिष्यति से सिचीति विकल्पेन साहचर्यात्
तदीयादिक स्येवग्रहणात् चुप छप तप इप संदीपन इत्येके छर्पयति दृभी भये दर्भयति दर्भति दृभसंदर्भे
अयं तुदादौ ईदित् श्रथ मोक्षणे हिंसायामित्येके मीगतौ मापयति मयति मेता ग्रंथ बंधने ग्रंथयति शी
क आमर्षणे चीकच अर्द हिंसायां अर्दयति स्वरितेत् अर्दति अर्दते हिसि हिंसायां हिंसयति हिंस
ति हिनस्ति इति आमिगते अर्दं रजायाम् आङः सद पद्यर्थे आसादयति आसीदति पाघ्राध्मेति सी
दादेशः आसत्ता आसात्सीत् धृशो चरूमीणिधुं धिता अशुंधीत् असुधिष्ट छद अपवारणे स्वरि
तेत् जुष परितर्कणे परितर्कणे ऊहो हिंसा च परितर्पण इत्यन्ये परितर्पणे परितृप्तिक्रिया जोषयति
जोषति प्रीतिसेवनयोः जुषते तुदादौ धूञ् कंपने णाविल्यधिकस्य धूञ् प्रीणनो नुग्वक्तव्यः धूनयति ध
वति धवते केचित्तु धूञ् प्रीणने इति पठित्वा प्रीणाति साहचर्यात् धूनोतेरेवनुकमाहुः धावयति राम॰ ५५
अयं स्वादौ क्र्यादौ तुदादौ स्वादौ ह्रस्वश्च लघाचक विरहस्य धूनोति चंपक वनानि धुनोत्यशोकं च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

माघे

कै१

रोधात्ववयवयय इत्यें नेत्यन्ये भासयति उभासयति मुचप्रमोचने प्रमोदनेच वसस्नेहछेदापहरणेषु
चर संशये च्युसहने हसनेचेत्येके च्यावयति च्युसेत्येके च्योसयति भुवोऽवकल्कने अवकल्कनं मि
श्रीकरणमित्येके चिंतनमित्यन्ये भावयति कृपेश्च कल्पयति आस्वदः सकर्मकात् स्वदिमभिव्याप्यसं
भवत् कर्मभ्य एव णिच् ग्रसग्रहणे ग्रासयति फल पुष्पधारणे पोषयस्याभरणं दलविदारणे दालयति
जि५ पटष टलुटतुमिजिपिजिलुजिभिघिजसिपिसिकुसिदशिकुशिघटघटिवृदिवहेचहृगुपधूपविछची जिस५
लोक६ वयत्यलोक एटकुपतके रतुवधभाषार्थाः पाटयति पोटयति लाटयति तुंजयति तुंजति एवंपरेषां
घाटयति घंटयति नाग्लोपि णास्वदितां णिच्यग्लोपिनः शास्त्र ऋदितां च उपधाया ह्रस्वो न स्याच्चङ्प
रेणौ अलुलोकत् वर्त्तयति वर्धयति उदित्वाद्वर्त्तति वर्धति रुटलजि अजिदसिभ्रशिशीकनटक्षटि हा१
जुचिरघिलघिअहिरहिमहिच लडितडनलच पूरीआप्यायने ईदित्वं निष्ठायामिणिषेधाय अत
एव णिज्वा पूरयति पूरति रुजहिंसायां ष्वदआस्वादने स्वादइत्येके असिषदत् दीर्घसत्त्वषोपदेश
त्वादसिस्वदत् आधृषाद्वा इत ऊर्ध्वं विभाषित णिचः धृषधातुमभिव्याप्य युजपृच संयमने योजयति
योजति अयौजीत् पर्चयति पर्चति पर्चिता अपर्चीत् अर्च पूजायां मर्ह मर्षणे सातयति सएवायं
नागः सहति कलभेभ्यः परिभवं ईरदेप लीङ्द्रवीकरणे लाययति लयति लेता वृजीवर्जने वर्जय
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सादस्त्येकेइति असिम्नतेपूर्वेणापि आस्वादः सकर्मकादितिदीर्घःपाठोवोध्यः दीर्घस्यत्विति इदमेवदीर्घपाठस्यफलं ह्रस्वपाठे पुधा रूपाआस्वादयतीत्यादिरूपाणां तुल्यत्वात्
६ सिस्वादयिषतीतिरूपं तुल्यमेवतः स्विदिसहीनाचेतिसत्वेणास्याहीणाः परस्यसकारोनतत्वमितिवस्यमाशात्वात=४ ...

कलसंख्याने इति कलयति कलत इति तु प्रायिगलन्तं तो हनुमत्सो कालयति = २
समसाने प्रयोगे इति सामय तिधाले तेंगतार्थत्व भ्रमंवाचर्हायितु मुदाहारिति
असमासमिति = ६ पल्पूलेति नास्य पल्पूलनेन वातः पल्पूलयेपुरितितेतिरीया
णसेक्तापल्पूले शोधनं द्रव्यमिति तज्ञाध्य = ८

द्वितीये धातयति अपीपतत् पथ अनुपसर्गाद् ज्ञानादिन्ये वपथयति २

सि.को. गे अररहत् स्तनगदी देवशब्दे स्तनयति गदयति अजगदत् पत गतौ वा वाणिजेतः वादन्ता इत्येके
उ. पा. आद्ये पतयति पतति पतीं चकार अपतीत् स्वर आक्षेपे स्वरयति रच प्रतियत्ने रचयति कलसंख्याने
५६ गतौ च चह परिकल्कने परिकल्कनं दंभः शाठ्यं च मह पूजायां महयति महतीति तु प्रायिगलं सार कृप श्र
थ दौर्बल्ये सारयति कृपयति श्रथयति स्पृह ईप्सायां भाम क्रोधे अबभामत् सूच पैशुन्ये सूचयति अ
56 योपदेशत्वान्न षः असुसूचत् खेट भक्षणे तृतीयान्त इत्येके खोट इत्यन्ये क्षोट क्षेपे गोम उपलेपने अ
जुगोमत् कुमार क्रीडायां अचुकुमारत् शील उपधारणे उपधारणमभ्यासः साम सान्त्वप्रयोगे अससाम
त् साम सान्त्वने इत्यतीतस्य असीषमत् वेल कालोपदेशे वेलयति काल इति पृथग्धातुरित्येके का
लयति पल्पूल लवन पवनयोः वात सुखसेवनयोः प्रीतिसेवनयोरित्येके वातयति अववातत् गवेषमा
र्गणे अजगवेषत् वास उपसेवायाम् निवास आच्छादने भाज पृथक्कर्मणि सभाज प्रीतिदर्शनयोः।
प्रीतिसेवनयोरित्येके सभाजयति ऊन परिहाणे ऊनयति ओः पुयण्ज्यपरे इति सूत्रे पयोरिति वक्तव्येऽव
र्गप्रत्याहारजकारग्रहणं लिंगम् णौ चि अच देशो न स्यात् द्वित्वे कर्तव्ये इति यत्र द्वित्वावभ्यासोत्तरख
ण्डस्य आद्यो च प्रकृतिर्यायां परिनिष्ठितरूपेवावर्णो लभ्यते तत्रैवायं निषेधो ज्ञापकस्य सजातीयापेक्षत्वा राम
त् तेनाचिकीर्तत् इति सिद्धं प्रकृते तु न शब्दस्य द्वित्वं तत उत्तरखण्डे अल्लोपः औननत् मा भवान् ऊ ५६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

...मुखमनेक्षिते एवं ... तृतीयाः १९

तेथुनाति धुवति स्फुटित्याति मुक्तं वायुर्विधूनयति चंपककुसुमरेणून् पत्कानने धुवति चंदनमंजरीश्च प्री
ञ् तर्पणे प्रीणयति प्रज् प्रीणो रिति ह्रस्वत्वोक्तपाठेन प्रापयति प्रयति अयत्ययसंदर्भे आप्लृ लंभने आप
यति आपति आ प्ला आपत् स्वरितेदयमित्येके आपते तनु श्रद्धोपकरणयोः उपसर्गाच्च दैर्घ्ये तानयति
वितानयति तनति वितनति चन श्रद्धोपहननयोरित्येके चानयति चनति वद संदेशवचने वादयति स्वरि ने४
तेत् वदति वदते अनुदात्तेदित्येके ववदतुः ववदिथ वद्यात् वच परिभाषणे वाचयति वचति वक्ता अ ववदेथ
वोचीत् मान पूजायां मानयति मानति मानिता विचारणे भौवादिको नित्यसन्नंतः स्तंभे मानयतिः श्या
कुस्मीपः मन्यते इति दिवादौ मनुते इति तनादौ आत्मनेपदी भावयते भवते णिच्संनियोगे नैवात्म
के६ नेपदमित्येके भवति गर्ह निंदायां मार्ग अन्वेषणे कठि शोके उत्कण्ठीयमुत्कं ठायां उत्कंठत इत्यात्मनेप
दिषु गतः मृजूष् शौचालंकारयोः मार्जयति मार्जति मार्जिता मार्ष्टा मर्ष तितिक्षायां स्वरितेत् मर्षयति म
र्षति मृषते मृष्यति मृष्यत इति दिवादौ सेचने घापि मर्षति धृष प्रसहने धर्षयति धर्षति इत्याधृषीयाः
अथादंताः कथ वाक्यप्रबंधे अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः कथयति अल्लोपित्वान्न दीर्घसन्वद्भा
वौ अचकथत् वर ईप्सायां वरयति वारयति इति लुगते गण संख्याने गणयति ईच्च गणः गणयते र
श्यासस्य ईत्त्वाच्च चङ्परे णौ वा दत्त् अजगणत् अजीगणत् शठ श्वठ सम्यग्अवभाषणे पट वट ग्रंथे रहसा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अथादंता इति ... स्यमात्मनेपदं ... लोपे ... अनुनासिका ... तस्यार्थः ... तुस्तन्त्रमेत दितितन्न धातुपा
ठे अनुपलब्धेः ... वर्णानां ... विधानार्थमिति ... उपलभ्यते ... सूत्रं ... ३ ष तो १

सि.कौ. उष्ये स्वविवक्षितः तेनातिक्रामति अश्वेनातिक्रामति अश्वयति हस्तिनातिक्रामति हस्तयति धातुरू
उ. पत्वं णिचः प्रकृतिधातुरूपं प्रतिपद्यते चशब्दोनुक्तसमुच्चयार्थः तथाच वार्त्तिकं आख्यानात्कृतस्तदा
५७ चष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति कंसवधमाचष्टे कंसं घातयति इह कंसं हन इ
स४ इति स्थिते हनस्तोचिं ण्लोः कृन्ते सकारेणान्तादेशः स्यात् ण्यमस्य त्वजेजिति णितिचपरे नन्वत्रांग
संज्ञा धातुसंज्ञाच कंसविधि हस्वभाष्णा तत्र स्यात् द्वित्वयोर्दोषः किञ्चकुत्वनत्वे न स्यातां धातोः स्व
57 रूप ग्रहणे तत्प्रत्यये कार्यविज्ञानात् सत्यम् प्रकृतिवच्चेति चकारो भिन्नक्रमः कारकं चचात्कार्यंहे
तुमण्णीचः प्रकृते हन्यादेः हेतुमण्णो माहशंकास्यं धात्वावनेतभ्भूतं द्वितीयांतेयाहशेचयकारं
कुत्वनत्वादि तद्विहापीत्यर्थः कंसमजीघतत् कर्त्तृकरणे धात्वर्थे कर्त्तृसीपारार्थी प्रकरणेनतुवन्तु
रादिमात्रमित्यर्थः असिनाहन्ति असयति अक्षकदर्शने णिचं लभंते चित्रयति असस्समायाने वट
विभाजने लजप्रकाशने वटि लजि इत्येके वटयति लजयति अरजेषु पाठबलादंतत्वे वृध्धि रिस
द्ये वंटापयति लंजापयति शाकटायनस्तुकथादीनां सर्वेषामुकमाह तन्मतेकथापयति गणाप
यति इत्यादि त्रिअसंपर्के संयामपुरे अनुदात्तेत् अकारप्रश्लेषात् अससंग्रामत स्तोमश्लाघायां राम
अतुस्तोमत् छिद्रकर्णभेदे नइत्यन्ये करणतिं धात्वंतरमित्यन्ये अंधदृष्ट्युपघाते उपसंहारमित्यन्ये। ५७
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham
चित्रविचित्रकरणे आलखकरणे इत्यर्थः कदाचिद्दर्शने चित्रेत्ययमप्रदर्शने:

नेत्। ध्वन शब्दे। अदध्वनत्। कूट परितापे परिदाह इत्यन्ये। संकेत ग्राम कुण गुण चामन्त्रणे। चात् कूटोपि संकेतयति। [illegible] पाठान्तरं केत श्रवणे मन्त्रणे च। केतयति निकेतयति। कुण गुण चामन्त्रणे च कारात्केत कूण संकोचने इति। स्तेन चौर्ये। अतिस्तेनत्। आगर्वादात्मनेपदिनः। पद गतौ। पदयते। अपपदत। गृह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते। मृग्यतीति तु कण्ड्वादिः। कुह विस्मापने। शूर वीर विक्रान्तौ। शूरयते। वीरयते। स्थूल परिबृंहणे। स्थूलयते। अतुस्थूलत। अर्थ उपयाच्ञायां। अर्थयति। आर्तथत। सत्र संतानक्रियायां। अससत्रत। अनेकाच्त्वान्न षोपदेशः। सिसत्रयिषते। गर्व माने। गर्वयते। अजगर्वत। सामर्थ्याणिज्विकल्पः। धातोरन्तो हन्तोल्लिङ्भ्यां फलम् एवमग्रेपि इत्यागर्वीयाः। सूत्र वेष्टने। सूत्रयति। असुसूत्रत्। मूत्र प्रस्रवणे। मूत्रयति। रूक्ष पारुष्ये। पार तीर कर्मसमाप्तौ। अपपारत्। अतितीरत्। पुट संसर्गे। पुटयति। धेक दर्शने इत्येके। अधिधेकत्। कत्र शैथिल्ये। कत्रयति। कर्त्रेत्यप्येके। कर्त्रयति।

प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थे णिच् स्यात्। इष्ठे यथा प्रातिपदिकस्य पुंवद्भाव भावटिलोपविन्मतुल्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः। पटुमाचष्टे पटयति। परत्वाद् वृद्धौ सत्यां टिलोपः। अपीपटत्। णौ चङीति सूत्रे भाष्ये तु वृद्धेर्लोपो बलीयानिति। स्थितम्। अपपटत्। तत्करोति तदाचष्टे प्रपञ्चः कर्त्वाचष्टे इति यावत् [illegible] मात्रे णिज् यथः ल

स्य रविरोधे परत्वाद्वृद्धिरितिसुत्व्यः ... वृद्धेर्लोपो बलीयानिति तु आद्विवादमात्रमिति ... भाष्य ... [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दिशुध्यात्वर्थे इत्येव सिद्धम् । णिजन्तादेव वकुलक्षणनात्मनेपदमस्तु मास्तु प्रच्छभावसड्डेति णिङ्विधिः सिद्धश
ब्दो ग्रंथात्तेम ह्लार्थः ॥ ० ॥ इति चुरादयः ॥ तत्प्रयोजको हेतुश्च कर्तुः प्रयोजको हेतुसंज्ञः स्यात् कर्तृ
संज्ञश्च हेतुमति च प्रयोजकव्यापारे प्रेरणार्थे णिच् वाच्ये धातोर्णिच् स्यात् भवन्तं प्रेरयति भावयति णिच
श्चेति कर्तृगे फले आत्मनेपदम् भावयते भावयाम्बभूव ओः पुयण्ज्यपरे सनि परे यदङ्गं तदवयवस्या
भ्यासोकारस्येत्वं स्यात् पवर्गयण्जकारेषु अवर्णपरेषु परतः अबीभवत् अपीपवत् मूङ् अमीमवत् अरीरवत्
अयीयवत् अलीलवत् अजीजवत् स्रवति शृणोति द्रवति प्रवति प्लवति च्यवतीनां वा एषामभ्यासोकारस्ये
त्वं वा स्यात् सनि अवर्णपरे धात्वक्षरे असिस्रवत् असुस्रवत् नाग्लोपीति ह्रस्वनिषेधः अशशासत् अडु
ढौकत् अचीचकासत् मतान्तरेलू अचचकासत् अग्लोपीति तु सुधातु प्रकरणे उक्तः हरिष्यते एयन्ताण्णे
च पूर्वं प्रतिषेधापवादत्वाद्वृद्धिं बाधित्वा णिलोपः चोरयति णौ चङ्युपधाया ह्रस्वः दीर्घो लघोः न्वाग्लोपि
त्वान्न ह्रस्वयो रप्यसंभवः एयाँ ह्रति निर्देशात् अचूचुरत् णौ च संश्चङोः सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं
वा स्यात् संप्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात् संप्रसारणम् पूर्वरूपम् अशूशवत् अलघुत्वान्न दी
र्घः अशिश्वयत् स्तम्भुसिबुसहां चङि उपसर्गस्थान्निमित्तादेषां सस्य षो न स्याच्चङि अवातस्तम्भत् प
र्यसीषिवत् न्यसीषहत् आटिटत् आशिशत् बहिरङ्गोप्युपधाह्रस्वो द्वित्वात्प्रागेव औणिः औः दित्करणं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दादोउ दित्करणाल्लिङ्गादिति यदि पूर्वस्य द्विर्वचनं स्यात्तदा णिणादस्याटि
लोपे न्तुपधा ह्रस्वस्याप्राप्तेस्तत्प्रतिषेधार्थं स्यात् दित्करणं व्यर्थं

ओंदधत् दण्डदण्ड निपातने ओंअंकपदे लक्षणे च ओंचकत् ओंअंगच ओंलगत् सुखदुःखतत् क्रियायाम्
रस ओंआस्वादनस्नेहनयोः व्ययवित्तसमुत्करणे ओंअवव्ययत् रूपरूपक्रियायाम् रूपसंदर्शनं करणं वा
रूपक्रिया छेद द्वैधीकरणे ओंअचिच्छेदत् छद अपवारणे श्लोके छदयति लाभप्रेरणे व्रणगात्रविचूर्ण-
ने वर्णवर्णक्रियाविस्तारगुणवचनेषु वर्णक्रिया वर्णकरणं सुवर्णं वर्णयति कथां वर्णयति विस्तरेणा-
भीत्यर्थः हरिं वर्णयति स्तौतीत्यर्थः। बहुलमेतन्निदर्शनम् ओंअटंलधातुनिदर्शनमित्यर्थः वाहुलका-
दन्येपि बोध्याः तद्यथा पर्णहरितभावे ओंअपपर्णत् विष्कदर्शने क्षिपप्रेरणे वसनिवासे तुत्थआवरणे
एवमादोलयति प्रेंखोलयति विडम्बयति अवधीरयति इत्यादि अन्ये तु दशगणीपाठो बहुलमि-
त्याहुः तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः। अपरे तु नवगणीपठितेभ्योऽपि क्वचित् स्वा-
र्थे णिच् रामो राज्यमचीकरदिति यथेत्याहुः चुरादिभ्यः एव बहुलं स्वार्थे णिच् इत्यर्थे इत्यन्ये सर्वे प-
क्षाः प्राचां ग्रन्थे स्थिताः णिङङ्गान्निरसने णिङ् स्यात् हस्तौ निरस्यति हस्तयते पादयते श्वेताश्वा-
श्वतरगालोडिताह्वरकाणाम् अश्वतरेतकलोपश्च श्वेताश्वादीनां चतुर्णां मश्वादयो लुप्यन्ते णिङ् च
धात्वर्थे श्वेताश्वमाचष्टे तेनातिक्रामति श्वेतयते अश्वतरमाचष्टे अश्वयते गालोडितं वाचां विम-
र्शः तत्करोति गालोडयते आह्वरयते केचित्तु णिचमेवानुवर्त्तयन्ति तन्मते परस्मैपदमपि पुच्छ-
भंगवाचिनः प्रातिपदिकान्निरसने ५ वार

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिघ्रतवा अजिघ्रपत् अजिघ्रपत् अचीकृतत् अचकीर्तत् अचीकृतत् १

क्ष्मा २

सि॰कौ॰ उ॰ पू॰ यति स्मापयति स्थापयति ति ष्ठतेरित् उपधाया इदादेशस्यात् तच्च ङ्परे णौ अतिष्ठिपत् अववर्तत्

अमीमृजत् अममार्जत् पातेर्णौ लुग्वक्तव्यः युकोपवादः पालयति वो विधूनने जुक् वातेर्जुक् नुकाव

न्यतरस्यां स्नेहविपातने लीयते लाते श्चानुकलुकावागमौ लीवा णौ स्नेहद्रवे विलीनयति विलापयति

विलाययति विलालयति विलापयति वा प्रलम्भ ली ई इति ईकारप्रश्लेषादात्वपक्षे नुक् न स्नेहद्रवे कि

म् लोहं विलापयति विलापयति प्रलम्भनाभिभवपूजासु लियो नित्यमात्वमपीति वाच्यम् लियः सं

५७ मानन शालीनीकरणयोः प्रलीङ्लीयो णर्यन्तयोरात्मनेपदं स्यादकर्तृगे क्रियाफले प्रजाभिभवयोः प्रल

भनेत्वार्थे जटाभिर्लापयते पूजामधिगच्छतीत्यर्थः श्येनो वर्तिकामुल्लापयते अभिभवतीत्यर्थः वा

लमुल्लापयते वञ्चयतीत्यर्थः विभेतेर्हेतुभये विभेतेरेच आत्वं वा स्यात् प्रयोजकाद्भयं चेत् भीस्म्योर्हेतु

भये आभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ स्वेभय ग्रहणं धात्वर्थोपलक्षणं मुण्डोभापयते भियो हे

तुभये षुक् भी ई इतीकारः प्रश्लिष्यते ईकारान्तस्य भियः षुक् स्याण्णौ हेतुभये जटिलो भीषयते नित्यं स्म

यते स्मायतेः स्मयते रेवं नित्यमात्वं स्याण्णौ हेतोः स्मये जटिलो विस्मापयते हेतोश्चेद्भयस्मया विस्मते

नैह कुञ्चिकयेन भाययति विस्मापयति कथं तर्हि विस्मापयन्विस्मितमात्मवृत्तौ इति मनुष्यवाचे तिक

रणादेव हितत्रसमयः अन्यथा शानजपि स्यात् सत्यम् विस्मापयन् इत्येवपाठ इसं प्रदायिकाः यद्वा म

रा॰ पू॰

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ति २

ह्लिंगात् मा भवानिदिधत् एजादावेयेतो विधानान्न वृद्धिः मा भवानेदिधत् नन्द्रा इति नदराणां न द्वित्वम्।
औंदिदत् आड्डिडत् आर्चिचत् उब्ज आर्जवे उपदेशे दोपधः भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपा-
तनाद्धस्य बः सचीतरङ्को पि द्वित्वविषये नन्द्राः इति निषेधात् जि शब्दस्य द्वित्वं ततः प्रवर्तते ततस्ततः प्राक् द-
कारोच्चारणसामर्थ्यात् औब्जिजत् अजादेरित्येव नेह अदिद्युतत् रभेराब्लिटोः रभेर्नुम् स्यादचि न तु श-
ब्लिटोः लभेश्च अररम्भत् अललम्भत् देरचङीति सूत्रे चङ्ग्रहणं त्ते न कृतं अजीदृपत् अससद्त्वरप्र-
थम्रदस्तृस्पशाम् अससमरत् अददरत् नपरत्वसामर्थ्याद् अत्र लघोर्न दीर्घः विभाषा वेष्टिचेष्ट्योः अभ्या-
सस्य अत्वं वा स्याच्चङ्परे णौ अववेष्टत् अविवेष्टत् अचचेष्टत् अचिचेष्टत् भ्राजभासेत्यादिना वो-
पधाह्रस्वः अबिभ्रजत् अबभ्राजत् काण्यादीनां वेति वक्तव्यं एयन्ताः कण रण भण श्रण लुप हेठः का-
ण्यादयः षड्भाष्ये उक्ताः ह्वा पिबाणिलोटिलो पयश्चत्वारः धिकाम्यासे चाणिलोटि अन्यत्र श्वयंश-
दश अचीकणत् अचकाणत् स्वापेश्चङि ण्यन्तस्य स्वापेश्चङि संप्रसारणं स्यात् असूषुपत् शाच्छा-
णेपवादः३ साह्वाव्यावेपां युक् णौ परे शाययति छाययति ह्वः संप्रसारणं सन्यङ्परे चङ्परे च णौ ह्वयतेः संप्रसारणं
स्यात् अजूहवत् अजुहावत् लोपः पिबतेरीच्चाभ्यासस्य पिबतेरुपधाया लोपः स्यादभ्यासस्येत्त्वा-
देशश्च चङ्परे णौ अपीप्यत् अर्तिह्रीतिपुक् अर्पयति ह्रेपयति ज्ञपयति रेपयति क्नोपयति क्नोप

Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ पेकाच इति वार्थः आद्येषकारस्य द्वित्वं वारयितुमिदम् द्वितीयेत्वं ज्वादेर्द्वितीयस्येत्यस्यापवादस्तयासन्नन्ते प्रव
उ॰ र्तेते ऐर्ष्यियत् ऐर्षिष्यत् द्वितीयव्याख्यायां णिजन्ताल्लुङि परे षकार एवाभ्यासे श्रूयते हलादिः शेषाद्द्वित्वं तु द्विती
६० यस्यैव तृतीयाभावेन प्रकृतवार्त्तिकाप्रवृत्तेः निमित्तप्रेषणं धातोर्हेतुमल्लोप्यस्तुडेनन्तुल्योर्थः तेन प्रार्थ्यं यु तिशय
नोत्थितं प्रियाइत्यादि सिद्धमेवं सकर्मकेषु सर्वेषु ऊह्यम् ॥ ० ॥ इति ण्यन्तप्रक्रिया ॥ धातोः कर्मणः समान
कर्तृकादिच्छायां वा इषिकर्मणः इषिणैककर्तृकाद्धातोः सन् प्रत्ययो वा स्यादिच्छायाम् धातोर्विधेरिंदृसन
60 आर्धधातुकत्वम् इट् द्वित्वं सन्यतः पठितुमिच्छति पिपठिषति कर्मणः किम् गमनेनेच्छतीति करणान्मा
भूत् समानकर्तृकात् किम् शिष्याः पठन्तु इति इच्छति गुरुः वा ग्रहणात् पक्षे वाक्यमपि लुङ्सनोर्घस्लृ ए
काच उपदेशा इति नेट् सस्य तत्वम् अत्तुमिच्छति जिघत्सति ईर्ष्यते स्तृतीयस्येति ष्यि सनो द्वित्वम् ईर्ष्यि
यिषति ईर्ष्यिषिषति रुदविद मुष ग्रहि स्वपि प्रच्छः संश्च एभ्यः संश्च स्यात् का चकितो स्तः रुरुदिषति विवि
ग्र४ दिषति मुमुषिषति सनि ग्रह गुहोश्च ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात् ग्रहिज्येति संप्रसारणम् सनः
षत्वस्यासिद्धत्वाज्झषभावः जिघृक्षति सुषुप्सति किरश्च पञ्चभ्यः कृ गृ दृङ् धृङ् प्रच्छ एभ्यः सन इटस्या
त् पिपृच्छिषति चिकरिषति जिगरिषति जिगलिषति अञ्जेसदीधीनेङः दिदरिषते दिधरिषते कथमु रामः
द्दिधीर्षुरिति भौवादिकयोर्धृङ् धृञोरिति गृहाण इको झल् इगन्ताज्झलादिः सन् कित्स्यात् बुभूषति ६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जापयति३

नुप्यैयम् स्फायोवः स्फावयति। शादेरगतौतः शदेर्णौ तोन्तादेशः स्यान्न तु गतौ। शातयति गतौ तु गाः
शादयति गोविंदः गमयतीत्यर्थः रुहः पोन्यतरस्याम् णौ रोपयति रोहयति क्रीङ्जीनां णौ एषामेच आत्वं
स्यात् णौ। क्रापयति अध्यापयति णौ च संश्चङोः सन्परे चङ्परे वा णौ इङो गाङ् वा स्यात् अध्यजीगपत् अध्या
पिपत् सिध्यतेरपारलौकिके ऐहलौकिकेर्थे विद्यमानस्य सिध्यतेरेच आत्वं स्यात् णौ। अन्नं साधयति निष्पाद
यतीत्यर्थः अपारलौकिके किम् तापसः सिध्यति तत्त्वं निश्चिनोति तं प्रेरयति सेधयति तापसं तपः प्रजने वी
यतेः अस्येच आत्वं वा णौ प्रजनेर्थे वापयति वाययति वा गाः पुरोवातः गर्भं ग्राहयतीत्यर्थः ऊदुपधा
या गोहः गूहयति दोषो णौ दुष इति सुवचम् दुष्यतेरुपधाया ऊत्स्यात् णौ दूषयति वा चित्त विरागे चित्तविरागो
प्रीतता चित्तं दूषयति दोषयति वा कामः मितां ह्रस्वः भ्वादौ चुरादौ च मित उक्ताः घटयति जनीजृष् जनयति
जरणार्थे स्तु जारयति रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः मृगरमणमाखेटकम् रजयति मृगान् मृगेति किम्
रञ्जयति भक्तिणः रमणादन्यत्र तु रञ्जयति मृगान् तएदानेन चुरादिषु ज्ञपादिश्चित् चिस्फुरोर्णौ इति वा
त्वम् चपयति चापयति इत्युक्तं चिनोतेस्तु चापयति चाययति स्फारयति स्फोरयति अपस्फुरत् उभौ सा
भ्यासस्य साभ्यासस्य अनितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति प्राणिणत् णौ गमिरबोधने इ
णो गमिस्यात् णौ गमयति बोधने तु प्रत्याययति ईर्ष्यतेस्तृतीयस्येति वाच्यम् ततो यव्यंजनस्य तु तो

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarayu Sharada Peetham

सि॰कौ॰ त्सुमिच्छति ईर्त्सति अर्दितुमिच्छति रपरत्वम् चर्त्वम् ईर्त्सति अर्दिदिषति बिभ्रज्जिषति बिभर्जिषति बिभ्र
उ॰ ६१ क्षति बिभर्क्षति दम्भ इच्च दम्भेरच इत्यादीच्च सादौ सनि अभ्यासलोपः हलन्ताच्चेत्यत्र हलग्रहणं जातिपर
न॰३ मित्युक्तं तेन सः कित्वान्नलोपः धिप्सति धीप्सति दिदम्भिषति शिश्रयिषति शिश्रीषति उदोष्ठ्यपूर्वस्य
सुस्वूर्षति सिस्वरिषति युयूषति यियविषति ऊर्णुनूषति ऊर्णुनुविषति ऊर्णुनविषति नचपरत्वा हुणा
वादेशयोः कृतयोः सतो रभ्यासे उकारो न श्रूयेतेति वाच्यम् द्विर्वचनेचीति सूत्रेण द्वित्वे कर्त्तव्ये स्थानिरूपा
61 तिदेशात् आदेशनिषेधाद्धानचसन्नंतस्य द्वित्वं प्रतिकार्यित्वान्निमित्तत्वाकमिति वाच्यम् कार्यमनुभ पर्द
वन्हि कार्यीति मित्तलयानाश्रीयते न त्वन नुभवन्नपिन चेह सन् द्वित्वमनुभवति बुभूर्षति बिभरिषति
ज्ञपि: घगन्तो मित्संज्ञकः पकारान्तश्चौरादिकश्च इडभावे इको झलि तिकित्वान्न गुणः अज्झनेति दीर्घः
परत्वा णिलोपेन बाध्यते आप्ज्ञप्यृधामीत् ज्ञीप्सति जिज्ञपयिषति अमितस्तु जिज्ञापयिषति जनसने
त्यात्वं सिषासति सिसनिषति तनिपतिदरिद्राति भ्यः सनो वेड्वाच्यः तनोतेर्विभाषा अस्योपधायादी
र्घो वा स्याज्झलादौ सनि तितांसति तितंसति तितनिषति आशंकायां सन्वक्तव्यः श्वा मुमुर्षति कूलं
ति २ पिपतिषति सनिमीमा घुरभलभशकपतपदामच इस् एषामच इस्स्यात्सादौ सनि अभ्यासलोपः रम॰ ६१
स्को रितिसलोपः पिप्सति दिदरिद्रिषति दिदरिद्रासति डुमिञ् मीञ् आभ्यां सन्कृतदीर्घस्यापि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दीङ्दातुमिच्छति दिदीषते ए ज्विषत्वाभावान्मीनातिमिनोतीत्यात्वंन अत एव सनिमीमेतिसूत्रेमाधातो:
रप्यकर्मीग्रहणंका तेम् हलान्ताच्च इकसमीपाद्धल: परोझलादिसन्कित्स्यात् गुहजुघुक्षति विभित्सति इ
क: किम् यियक्षते झल् किम् विवर्द्धिषते हलग्रहणं जातिपरं तदृतितृक्षति तितृक्षिषति अज्झनगमांसनि
अजन्तानांहन्तेरजादेशगमेश्चदीर्घ: स्याज्झलादौ सनि सन्लिङोर्डे: जिगीषति विभाषाचे: चिकीषति चि
चीषति जिघांसति सनिच इणोगमि: स्यात्सनितु बोधने जिगमिषति बोधनेतु प्रतीषिषति इणवदिक:
३७ अधिजिगमिषति कर्मणितङ्परस्मैपदेष्विण्वक्तेनेट् झलादौसनिदीर्घ: जिगांस्यते इलोव्युपधाद्धला
देस्संश्च उ श्च इ श्च वीत - पूर्वयस्यतस्माद्धलादिरलन्तात्परोऽत्कासनौसेट्वाकितौस्त: द्युतिस्वाध्यो: सम्प्र
सारणं दिद्युतिषते द्विद्योतिषते रुरुचिषते रुरोचिषते लिलिखिषति लिलेखिषति रल: किम् दिदे
विषति व्युपधात् किम् विवर्तिषते हलादे: किम् एषिषिषति इह निस्यमपिकित्वंगुणेनवाध्यते उपधाका
र्ये हि कित्वात्यवलम् अत एव ओर्णोतेर्णुहित्करणस्यसामान्यापेक्षज्ञापकत्वात् सनोवंतरृभज्ञदंभुश्रिस्वृयुर्णु
भरज्ञपिस नाम् इवंतेभ्यश्चाधातुभ्यश्चसन इड्वास्यात् इडभावेहलन्ताच्चेतिकित्वम् छ्वोरिति
वस्य ऊठ् यण् द्वित्वम् घुषति दिदेविषति स्तौति एयोरितिवक्ष्यमाणनियमान्नषः आप्ज्ञप्ध्यामी
त् एषामचईत्सादौसनिअत्रलोपोऽभ्यासस्य सनिमीमेत्यारभ्यपडुक्तेतत्राभ्यासस्यलोपस्स्यात् आ
सुस्यूषति सिसेविषति २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कारस्येत्त्वम् पुस्फारयिषति पुस्फोरयिषति चुस्नावयिषति ओः पुयण्ज्यपरे पिपावयिषति बिभावयि
षति दिद्रावयिषति लिलावयिषति जिजावयिषति पुयण्णीति किम् नुनावयिषति अपरे किम् बुभूषति स्र
वतीतीत्वं वा सिस्रावयिषति सुस्रावयिषति इत्यादि अपर इत्येव शुश्रूषते स्तौतिण्योरेव षण्यभ्यासात् ।
अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात् षभूते सति नान्यस्य तुष्टूषति सुप्तिस्वाप्यो रित्युत्वं सुषा
पयिषति सिषाधयिषति स्तौतीति ण्यन्तयोः किम् सिसिक्षति उपसर्गात्तु स्यादि सुभ्यासेन चाभ्यासस्येति
षत्वम् प्रतिषिषिक्षति षणि किम् तिष्ठासति सुषुप्सति अभ्यासाद्वित्युक्तेर्नेह निषेधः इणप्रतीषिषति उ
क्त अधीषिषति सः स्विदि स्वदिसहीनां च अभ्यासेणः परस्य ण्यन्तानामेषां सस्य स एव न षः षणि परे
सिस्वेदयिषति सिस्वादयिषति सिसाहयिषति स्यादिष्वेवाभ्यासस्येति नियमान्नेह अभिसुसूषति शै
षिकान्मतुवर्थीयाच्छैषिको मतुवर्थिकः सरूपः प्रत्ययो नेष्टः सन्नन्तान सनिष्यते १ शैषिकाच्छैषिको
यः सरूपः प्रत्ययः स न तेन शालीयभव इति वाक्यमेव न तु छान्ताच्छः सरूपः किम् अहिच्छत्रेभवः
आहिच्छत्रे भव आहिच्छत्रीयः अणन्ताच्छः तथा मतुवर्थीयात्सरूपस्तन धनवानस्यास्तीति इह मतु
बन्तान्मतुन्न विरूपस्तु स्यादेव दण्डिमती शाला सरूप इत्यनुषज्यते अर्थद्वारा साहृश्यं न स्यादेस्तेन
इच्छा सनन्तात्सन स्वार्थसनन्तात्तु स्यादेव जुगुप्सिषते मीमांसिषते ॥ ० ॥ इति सन्प्रक्रिया ॥ १

62

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ल्तर

दोदाणः दित्सति देङ् दित्सते
दानः दित्सति दित्सते धेट् १

नोत्तेरप्यिमीत्यविशेषादिस् सस्सीतिसः मित्सति मित्सते मामाने मित्सति माङ्मेङोः मित्सते धित्स
ति रिप्सति लिप्सते पा शिक्षति शकमर्षणेइति दिवादिः स्वरितेत् शिक्षति शिक्षते पित्सते राधो
हिंसायां सनीस्याच्यः रित्सति हिंसायां किम् आरिरात्सति मुचोकर्मकस्यगुणोवा मोक्षो सनि अभ्या
सलोपः मोक्षते मुमुक्षते वावत्सः स्वयमेव अकर्मकस्यकिं मुमुक्षति वत्सं रुलः तरह्य श्वतुम्भ्यःवि
वत्सति तडितृविवर्तिषते सेऽसिचीतिवेट् निनर्तिषति इटसनिवा वृङ् वृञ्भ्याम् दन्ताच्च सनइ
ट्तास्यात् तितरिषति तितरीषति तितीर्षति विवरिषते विवरीषते वुवूर्षते वुवूर्षति स्मिपूङरञ्ज्वशां
सनि स्मिपूङ् ऋ अञ्ज् अश् एभ्यः सन इट्स्यात् सिस्मयिषते पिपविषते अरिरिषति इहरिस्य
श्य द्वित्वम् उस इतिसनोऽवयवः कार्यभागिति कार्यिणो निमित्तत्वायोगात् द्विर्वचनेचीति नस्त्र
वते अजिजिषते अशिशिषति उभौसाभ्यासस्य प्राणिणिषति उच्छेस्तुक् उत्तम् पूर्वत्रासिद्धीयम
द्विर्वचनइति च्छाभ्यां सहितस्येटोद्वित्वम् हलादिःशेषः उच्चिच्छिषति निमित्तापायेनैमित्तिकस्या
प्यपाय इतित्वनित्यम् …रितिसतुग्रहणंज्ञापकात् पस्पति प्रत्यापत्तिवचनाद्वा णौच संश्चङोरि
ति स्वाभ्यामिडोगाङ् स्वयतेः संप्रसारणं च्चवा अधिजिगापयिषति अध्यापिपयिषति श्वि श्वापयि
षति शुशावयिषति णौ संप्रसारणम् जुहावयिषति णौ द्वित्वात्प्रागेव आदेशो नेस्तत्त्वात् दुकार

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ६२

63

नेनानुस्वारो लक्ष्यते स च पदान्तवद्वाच्यः वा पदान्तस्येति मध्यास्यात् उत्परस्यातः चरफलोरस्यासात्परस्यात
उत्स्यान्न यङ्लुकोः हलि चेति दीर्घः चंचूर्यीते चञ्चूर्यते पंफुल्यते जपजभदहदशभञ्जपशां च एषा
मभ्यासस्य नुक् स्याद्यङ्लुकोः गर्हितं जपति जंजप्यते ग्रो यङि गिरतेरेफस्य लत्वं स्याद्यङि गर्हितं गि
लिति जेगिल्यते घुमास्थेतीत्वं गुणः देदीयते पेपीयते मेमीयते विभाषाश्वेः शोशूयते शेश्वीयते य
ङि च सास्मर्यते रीङृतः चेक्रीयते सुट् सञ्चेस्क्रीयते सिचो यङि सिचस्सस्य षो न स्याद्यङि निसेसि
च्यते न कवतेर्यङि कवतेरभ्यासस्य चुत्वं न स्याद्यङि कोकूयते कौतिकुवत्योस्तु चोकूयते नीग्वंचुस्रंसु
ध्वंसुभ्रंसुकसपतपदस्कन्दाम् एषामभ्यासस्य नीगागमः स्यात् यङ्लुकोः अकित इत्युक्तेर्न दीर्घः
नलोपः वनीवच्यते सनीस्रस्यते इत्यादि नुगतोऽनुनासिकान्तस्य अनुनासिकान्तस्याङ्गस्य योऽभ्यासो
ऽदन्तस्तस्य नुक् स्यात् नुकानुस्वारो लक्ष्यते इत्यत्र नम् यंयम्यते यंयम्यते तपरत्वसामर्थ्याद्भूतश्चे
६४ दीर्घस्यापि न भाम्यते वाभाम्यते ये विभाषा जाजायते जंजन्यते हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः ।
जेघ्नीयते हिंसायां किं जंघन्यते रीगृदुपधस्य च ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्लु
कोः वरीवृत्यते क्षुभ्नादित्वान्न णः नरीनृत्यते जरीगृह्यते उभयत्र लत्वं चलीक्लृप्यते रीगृत्वद् इ राम॰
ति वक्तव्यं वरीवृश्च्यते परीपृच्छ्यते स्वपिस्यमिव्येञां यङि संप्रसारणं स्यात् सोषुप्यते सेसिम्य ६२

तर

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यङ् पौनःपुन्यं भृशार्थं च क्रियासमभिहारः तस्मिन् द्योत्ये यङ् स्यात् गुणो

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्लुकोः अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च सनाद्यन्ता
ति धातुत्वाल्लडादयः ङिदन्तत्वादात्मनेपदम् पुनः पुनरतिशयेन वा भवति बोभूयते बोभूयाञ्चक्रे
स्यात् अबोभूयिष्ट धातोः किम् आर्द्धधातुकत्वं यथा स्यात् तेन भुवो वुग्लुङ्लिटोरित्यादि एकाचः किम् पुनः पुन
र्जागर्ति हलादेः किम् भृशमीक्षते भृशं शोभते रोचते इत्यत्र यङ् इति भाष्यम् पौनःपुन्ये तु स्यादेव रोरु य४
च्यते शोशुभ्यते सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः आद्यास्त्रयः चुरादयोऽदन्ताः सोसू
क ६ च्यते सोसूत्र्यते मोमूत्र्यते अनेकाच्त्वेनाप्राप्ते वचनम् यस्य हलः यस्येति संघातग्रहणम्
हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके आदेः परस्य अतो लोपः सोसूचाञ्चक्रे सोसूचिता सो
सूत्रिता दीर्घोऽकितः अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च अटाट्यते यङि च अर्तेः संयो
गादेश्च ऋतो गुणः स्याद्यङि यकारपरस्य रेफस्य न द्वित्वनिषेधः अरार्यते इति भाष्योदाहरणात् अ
रारिता अशाश्यते ऊर्णोनूयते वेभिद्यते अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः वेभिदिता नित्यं कौ
टिल्ये गतौ गत्यर्थात् कौटिल्ये एव यङ् स्यान्न तु क्रियासमभिहारे कुटिलं व्रजति वाव्रज्यते लुपसदचरज
पजभदहदशगॄभ्यो भावगर्हायाम् एभ्यो धात्वर्थगर्हायाम् एभ्यो धात्वर्थगर्हायामेव यङ् स्यात्
गर्हितं लुपति लोलुप्यते सासद्यते चरफलोश्च अनयोरभ्यासस्यात उक् स्यात् यङ्लुकोः नुगितः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ६४

वुः बोभूयात् बोभूयास्ताम् बोभूयासुः बोभूयात् बोभूयास्तां बोभूयासुः गातिस्थेति सिचो लुक् यङो वेति ईट्
पक्षे गुणं बाधित्वा नित्यत्वाद्वुक् अबोभूवीत् अबोभोत् अबोभूतां अभ्यस्ताश्रयो जुस् नित्यत्वाद्वुक्
अबोभूवुः अबोभविष्यत् इत्यादि पास्पर्धीति पास्पर्द्धि पास्पर्द्धः पास्पर्द्धति पास्पर्धीषि पास्पर्त्सि रुरु
त्वयोर्हिर्द्धिः पास्पर्द्धि अपास्पर्धीत् अपास्पर्त् अपास्पर्द् सिपि दश्चेति रुत्वपक्षे रोरि अपास्पाः जाग

64 द्धि जाघात्सि अजाघात् सिपि रुत्वपक्षे अजाघाः नाथ्ना नाति नानात्तः दध दादधः दाधत्सि अ दादधि ६
दधत् अदादधाम् अदादध्युः अदाधः अदाधत् अदादाधीत् अदादधीत् चोस्कुन्दीति चोस्कुन्ति
अचोस्कुन्दीत् अचोस्कुन् अचोस्कुन्ताम् अचोस्कुन्तुः मोमुदीति नाभ्यस्तेति गुणनिषेधः मोमोत्ति
मोमोदांचकार मोमोदिता अमोमुदीत् अमोमोत् अमोमुत्ताम् अमोमुदुः अमोमुदीः अमोमोः अ
मोमोत् लुङि गुणः अमोमोदीत् चोकूर्त्ति चोकूर्दीति लङ्तिपि अचोकूर्त् सिपपक्षे अचोकूः अ
चोकूर्दुः अजोगुः वनीवंचीति वनीवक्ति वनीवक्तः वनीवचति अवनीवञ्चीत् अवनीवन् जंगमी
ति जंगेति अनुदात्तोपदेश इति अनुनासिकलोपः जंगतः जंगमति मोश्चेति जंगन्मि जंगन्वः ए राम॰
कारग्रहणे तत्वान्न इण्निषेधः जंगमिता अनुनासिकलोपस्याभीयत्वेनासिद्धत्वान्न हेर्लुक् जं ६४
गहि मोनोधातोः अजंगन् अनुबंधनिर्देशान्न ह्वेरङ् स्यतेति न वृद्धिः अजंगमीत् अजंगमि

क्र२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ते बेभीयते नवणः यङि वावश्यते चायः की चेकीयते ईघ्राध्मोः जेघ्रीयते देध्मीयते अयङ् यि
क्ङिति शीङो यङादेशस्याद्यादौ क्ङिति परे शाशय्यते अभ्यासस्य ह्रस्वः ततो गुणः डोढौक्यते तो
त्रौक्यते ॥०॥ इति यङन्तप्रक्रिया ॥ यङोऽचि च यङोऽच्प्रत्यये लुक् स्याच्चकारात्तं विनापि बहुलं लु
क् स्यात् अनैमित्तिकोयमन्तरङ्गत्वादादौ भवति ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वम् अभ्यासकार्यं
धातुत्वाल्लडादयः शेषात्कर्तरि परस्मैपदम् अनुदात्तङित आत्मनेपदं इति तु न ङित्वस्य प्रत्ययाप्र
त्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः यत्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत् अत
एव सुदृषत्प्रासाद इत्यत्र त्वसंतस्येति दीर्घो न भेपि स्पर्धशीङोर्नुदात्तेत्त्वं इत्यत्र वेधनिर्देशात् तत्र
चक्षिङः पाठेति निषेधात् अत ङितस्तेभ्योपि न अनुदात्तङित एव श्यन्नोर्दयोपिन ग न निर्देशात् रो६
किन्तु शब्देव चर्करीतं चेत्यदादौ पाठाच्छपो लुक् यङो वा यङन्तात्परस्य हलादेः पितः सार्वधातुकस्ये
ड्वा भूसुवोस्तिङि गुणनिषेधो यङ्लुकि भाषायां न बोभूतु तेतिक्ते इति छन्दसि निपातनात् अत एव यङ्लु
कि भाषायामपि सिद्धान्ने च यङ्लुकि अप्राप्त एव गुणाभावो निपात्यतामिति वाच्यम् प्रकृतिग्रहणे यङ्लु
गन्तस्यापि ग्रहणात् द्विःप्रयोगो द्विर्वचनमिति सिद्धान्तात् बोभवीति बोभोति बोभूतः बोभुवति
बोभुवांचकार बोभविष्यति बोभवीतु बोभूताम् अबोभवीत् अबोभोत् अबोभूताम् अबोभवुः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बोभूः २

ङितस्तेभ्योपिन अनुदात्तङितः ७४

हार

सि॰कौ॰ उ॰ ६५ 65

न् अजागरिषम् अजागरिष्यत् लुकालुप्ते प्रत्ययलक्षणत्वाभावात् स्वपिस्यमीस्युत्वम् न रुदादिभ्य इति गुण
निर्दिष्टत्वादिण् न सास्वपीति सास्वप्ति सास्वप्तः सास्वपति असास्वपीत् असास्वप् सास्वप्यात् आ
शिषि तु वचिस्वपीत्युत्वम् सासुप्यात् असास्वापीत् असास्वपीत् रुग्रिकौ च लुकि ऋदुपधस्य धा
तोऽभ्यासस्य रुक् रिक् रीगेते आगमाः स्युर्यङ्लुकि ऋतश्च ऋदन्तस्य धातोरपि तथा वर्वृतीति वरिवृ
तीति वरिवृतीति वर्वर्त्ति वरिवर्त्ति वर्वृतः वर्वृतति ३ वर्वर्तामास ३ गणनिर्दिष्टत्वान्न वृद्भ्य इति न व
र्त्स्यति ३ वर्वृतीतु ३ अवर्वृतीत् ३ अवर्वर्त् ३ सिपि दश्चेति रुत्वपक्षे रोरि अवर्वाः ३ गणनिर्दि
ष्टत्वादङ् न अवर्वर्तीत् ३ चर्करीति ३ चर्कर्त्ति चर्कृतः ३ चर्कृति ३ चर्करांचकार ३ चर्करिता अ
चर्करीत् ३ अचर्कः ३ चर्कृयात् आशिषि रिङ् चर्क्रियात् अचर्करीत् ३ ऋतश्चेति तपरत्वान्ने
ह कॄ विक्षेपे चाकरीति चाकर्त्ति तातरीति तातर्त्ति तातीर्तः तातिरति तातीर्हि तातराणि अतातरीत् अ
तातः अतातीर्ताम् अतातरुः अतातारीत् अतातारिष्टाम् इत्यादि अर्तेर्यङ्लुकि द्वित्वे ऽभ्यासस्यो
रदत्वं रपरत्वम् हलादिः शेषः रुक्रिग्रीकोऽस्तु अभ्यासस्यासवर्णे इतीयङ् अरर्त्ति अरियर्त्ति २ अ
ररीति अरियरीति अर्ऋतः अरिऋतः रिक्त्वं यण् रुक्को रोरीति लोपः न च तस्मिन्कर्त्तव्ये यणः स्था राम॰ ६५
निवत्वम् पूर्वत्रासिद्धे तन्निषेधात् आरति अरियति अररांचकार अरियरांचकार अररिता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३१ षे हन्तेर्यङ्कुं अभ्यासाच्चेति कुत्वं यद्यपि होहन्तेरित्यतो हन्तेरित्यनुवर्त्यं विहितं तथापि यङ्लुकि भ
वत्येवेति न्यासकारः श्तिपा शपेति निषेधस्त्वनित्यः गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भावः
जंघनीति जंघंति जंघतः जंघनिता श्तिपा निर्देशान्नाडेन जंघदि अजंघनीत् अजंघन् जंघन्या
त् आशिषि तु वध्यात् अवधीत् अवधिषाम इत्यादि वधादेशस्य द्वित्वं न भवति स्थानिवद्भावेनानभ्या
सस्येति निषेधात् न हि समानाधिकरणं धातोर्विशेषणम् वहुव्रीहिर्बलात् आङ्पूर्वात् आङो यमह
न इत्यात्मनेपदम् आजंघते इत्यादि उत स्वस्येति लपरत्वान्न गुणः हलि चेति दीर्घस्तु स्यादेव तस्या सि
द्धत्वेन निवर्त्यायोगात् चंचर्ती चंचुरीति चंचूर्त्तः चंचुरति अचंचः चंखनीति चंखनति जनसनेत्या
म६ त्वम् चंखातः गमहनेत्युपधालोपः चंखति चंखाहि अचंखनीत् अचखन् अचंखाताम् अचंखुः
ये विभाषा चंखायात् चंखन्यात् अचंखनीत् अचंखानीत् उतो वृद्धिरित्यत्र नाभ्यस्तस्येत्यनुवृत्ते
रुतो वृद्धिर्न योयोति योयवीति अयोयवीत् अयोयोत् योयुयात् आशिषि दीर्घः योयूयात् अयो
यावीत् नोनवीति नोनोति जाहाति जाहेति ईहल्यघोः जाहीतः इहेजहाते श्न आ च हौ लोपो यी
युतास्था एर्लिङि इत्येते पंचापि न भवन्ति श्तिपा निर्देशात् जाहति जाहासि जाहेषि जाहीथः जा
हीहि अजाहेत् अजाहात् अजाहीताम् अजाहुः अजाहीयात् आशिषि जाहायात् अजाहासी

चंखानि चंखातः

अयं भावः पकारो … का चु यङ् लुकि … न कुत्रापि … गुणो यङ्लुको रित्यभ्यासस्य … द्वित्वं … निषेधानां क्वचिद्यङ्लुक्प्रवृत्तिं ज्ञापयति … चप्रयुज्यते … जंघनादि स्यादि = २

सि॰कौ॰ उ॰ ६६ माधवादिसंमतंच मस्मवन्यने अयंयान्तलुहभीवी लेवृदेहदेवनेइत्यादयोवान्तः हयगतौ जाहयीति जाहति
जाहतः जाहयति जाहयीषि जाहसि वलिलोपेयजादेर्दीर्घः जाहामि जाहावः जाहामः हर्यगतिकांत्योः
जाहर्यीति जाहर्ति जाहर्त्तः जाहर्यति लोटि जाहर्हि अजाहः अजाहर्त्ताम् अजाहर्युः मव्वबंधने ज्व
रत्वरस्त्रि अविमवामुपधायाश्च ज्वरादीनामुपधावकारयोरूठ्स्यात् क्वौझलादावनुनासिकादौच प्रत्यये
अनकि तीतिनानुवर्तते अवतेस्तुनिओतुरितिदर्शनात् अनुनासिकग्रहणंचानुवर्तते अवतेर्मन् प्र
66 त्ययेतस्यटिलोपे ओमितिदर्शनात् ईडभावे ऊटिपितिगुणः मामोति मामवीति मामूतः मामवति मामव
ति मामोषि मामवीषि मामवीमि मामोमि मामावः मामूमः मामवीतु मामोतु मामुतात् मामूहि मामवानि
अमामवीत् अमामोत् अमामवीः अमामोः अमामवम् अमामाव अमामूम लुवीदित्तायां नोतुवी
ति राल्लोपः रेफात्परयोश्छ्वोर्लोपः स्यात्क्वौझलादौ अनुनासिकादौचप्रत्यये इतिवलोपः लघूपधगुणः
नधातुलोपआर्द्धधातुके धात्वंशलोपनिमित्ते आर्द्धधातुकेपरे इकोगुणवृद्धीनस्तः इतिनेह निषेधःति
वादीनामनार्द्धधातुकत्वात् तोतोर्त्ति इह लिचेतिदीर्घः तोतूर्त्तः तोतूर्वति तोत्यो र्त्ति दोरोर्त्ति मूर्छा राम॰
मोमोर्त्ति मोमूर्त्तः मोमूर्छतीत्यादि आर्द्धधातुकइतिविषयसप्तमी तेनयङि विवक्षिते अजेर्वी वे ६६
वीयते अस्ययङ्लुग्यास्ति लुकापहारेविषयत्वासंभवेनवीभावाप्रवृत्तेः ॥०॥ इतियङ्लुगन्तप्रक्रि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आरियरिता आररिष्यति आरियरिष्यति आरर्त्तु आरियर्त्तु आररीत् आरियरीत् आरर्त्तात् आरि-
तात् आरः आरियः आररीत् आरियरीत् आरर्त्ताम् आरियर्त्ताम् आररुः आरियरुः आरः।
आरियः आररीः आरियरीः आरर्त्यात् आरियर्त्यात् लिङि. तिपानिर्देशात् गुणो न रिङ् रलोपः
दीर्घः आरियात् आरिरियात् रियात् आरारीत् आरियारीत् आररिष्यत् आरियरिष्यत् गृहू
ग्रहणे जेगृहीति ३ जेगर्ढि ३ जगृढः ३ जगृहति ३ अजर्गृहीत् अजर्घट् ३ ग्रह [illegible] तु जाग्रही
जाग्रहिति सादेः ङित्निमित्तं संप्रसारणं तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः जाग्रहः जाग्रहति जा
ग्रहीमि जाग्रह्मि लुटि जाग्रहिता ग्रहोऽलिटि दीर्घस्तु न तत्रैकाच इत्यनुवृत्तेः माधवस्तु दीर्घमाह तत् ति७
भाष्यादिविरुद्धम् गृध जर्गृधीति ३ जर्गर्द्धि ३ जर्गृद्धः जर्गृधति जर्गृधीमि ३ जर्घर्त्सि अजर्गृधीत्
ई उभावे गुणः हलङ्यादिलोपः भष्भावः जश्त्वचर्त्वे अजर्घर्त् अजर्गृधाम् सिपि दश्चेति रुत्वपक्षे
अजर्घाः ३ अजर्गृधीत् ३ अजर्गर्धिष्टाम् पाप्रच्छीति पाप्रष्टि न सादेः ग्रहिज्येति संप्रसारणं न भवति ग४
पितपानिर्देशात् छ्वोः शूडिति षः व्रश्चेति षः पाप्रष्टः पाप्रच्छति पाप्रच्मि पाप्रच्छ्वः पाप्रश्मः यका
रवकारान्तानां तु ऊठ्भाविनां यङ्लुकि नास्ति छ्वोरिति सूत्रे भाष्ये ध्वनितम् कैयटेन स्पष्टीकृतम् इ
दं च छ्वोरिति यत्त्वोठ्विषयकम् ज्वरत्वरेत्यूठ्भाविनो [illegible] विप्रश्नो स्तु यङ्लुगस्त्येवेति न्याय्यम्
ति२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सान्तस्यतु कर्तृवाचकस्य लोपो वास्यात् ...
पदेवाकाम्‍ ६

सि॰ कौ॰ उ॰ ६७

णस्यस्तुक्‌ः सर्वप्रातिपदिकाम्यो काम्यच्‌ लालसायां सुगस्कौ दधिस्यति दध्यस्यति बालः मधुस्यति मध्वस्य
ति काम्यच्च उक्तविषये काम्यच्च स्यात् पुत्रमात्मन इच्छति पुत्रकाम्यति पुत्रकाम्यांचकार पुत्रकाम्यिता ६६
यस्य हल इति लोपो न अनर्थकत्वात् यस्येति संघातग्रहणमित्युक्तम् यशस्काम्यति सर्पिष्काम्यति मान्ताव्य
येभ्यो प्यस्याद्देवकिम् काम्यति स्वःकाम्यति उपमानादाचारे उपमानात्कर्मणः सुबन्तादाचारेर्थे क्यच्‌ स्यात्
67
पुत्रमिवाचरति पुत्रीयति छात्रम् विष्णूयति द्विजं अधिकरणाच्चेति वक्तव्यम् प्रासादीयति कुट्याम् भिक्षुः
कुटीयति प्रासादे कर्तुः क्यङ् सलोपश्च उपमानात्कर्तुः सुबन्तादाचारेर्थे क्यङ्‌ वा स्यात् सान्तस्य लोपस्तु
क्यङ् सं नियोगशिष्टः सच व्यवस्थितः ओजसोप्सरसो नित्यमितरेषां विभाषया हंस इवाचरति हंसायते ।
ओजस्शब्दो वृत्तिविषये तद्वति ओजायते अप्सरायते यशायते यशस्यते विद्वायते विद्वस्यते त्वद्यते
मद्यते अनेकार्थत्वे आचरते गुरूयते सपत्नीवाचरति सपत्नायते सपत्नीयते सपत्नीयते युवति
पूर्वा ३ रिव युवायते पट्वीमृद्व्यो निव पट्वी मृद्व्यते नकोपधायाः पाचिकायते आचारेवगल्भक्लीवहोडेभ्यः क्विं
पवा यह णात् क्यङपि अवगल्भते क्लीवते होडते अतएवोदाहृते काच अम् एतद्धातिकारंभसाम
र्थ्याद् नचावगल्भत इत्यादि सिद्धि स्तत्फलं केवलानामाचारेऽपि वृत्ति संभवात् धातूनामनेकार्थत्वा
त् अवगल्भांचक्रे क्लीवांचक्रे होडांचक्रे वार्त्तिके अवेत्युपसर्गविशिष्टपाठात् केवलादुपसर्गान्तर
राम॰ ६७

तुपृष्ठाद्यति अस्माद्यते क्यङ् मानिनश्च कुमारीवाचरतिकुमारायते ... हरिणीवाचरतीति हरिणायते गुर्वी ५४
... नाकि पूंसलियोगेनानुदात्तत्वानु ... नासिकत्वं अत्र क्यङ् ... २

Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

पस्पर्द्धेति=४

या ॥ सुप आत्मनः क्यच् इषिकर्मण एषितुः संबंधिनः सुबंतादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात् धात्वव
यवत्वात्सुपो लुक् क्यचि च अस्येत्यात् आत्मनः पुत्रमिच्छति पुत्रीयति वान्तोयिप्रत्यये गव्यति नाव्य
ति लोपः शाकल्यस्येति तु न अपदान्तत्वात् तथा हि नः क्ये क्यचि क्यङि च नान्तमेव पदं नान्यत् सन्निपात
परिभाषया क्यचो यस्य लोपो न गव्याञ्चकार गव्यिता नाव्याञ्चकार नाव्यिता नलोपः राजीयति प्रत्ययोत्तरप
दयोश्च त्वद्यति मद्यति एकार्थयोरित्येव युष्मद्यति अस्मद्यति हलि च गीर्यति पूर्यति धातोरित्येव नेह
दिवमिच्छति दिव्यति इदमुरमिच्छति उर्यति इतिमाधवेनोक्तं प्रत्ययलक्षणं तद्विंत्यम् धुर्गिरोः साम्यात्
दीव्यतीति दीर्घ प्राचः मामाद्विकृएव अदस्यति रोङ्क्तः कवीयति क्यच्योश्चेति प्रत्ययमकारस्य लोपः गार्गी
यति वात्स्यति अकृत्सार्वधातुकयोर्दीर्घः कवीयति समिधीयति क्यस्य विभाषा हलः परयो क्यच् क्यङोर्लोपो वा
स्यादार्धधातुके आदेः परस्य अलो लोपः तस्य स्थानिवत्वाल्लघूपगुणो न समिधिता समिध्यिता मान्तप्र
कृतिकसुबन्तादव्ययाच्च क्यन्न किमिच्छति इदमिच्छति स्वरिच्छति अशनायोदन्यधनाया बुभुक्षापि
पासागर्धेषु क्यजन्ता निपात्यन्ते अशनायति उदन्यति धनायति बुभुक्षादौ किम् अशनीयति उद
कीयति धनीयति अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि एषां क्यचि असुगागमः स्यात् अश्ववृष
यो मैथुनेच्छायां अश्वस्यति वडवा वृषस्यति गौः क्षीरलवणयोर्लालसायां क्षीरस्यति बालः लव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ६८ ति पंथा इवाचरतीयं पथीनति अमुष्णीत तिष्ठोरिवाचरतीति देवतीति माधवः अत्र ऊठि घवतीत्युचितं क
इवकति चकौ इति हरदत्तः माधवस्तु एयलोपाविति वचनात् ऊलिट् द्विर्वाधित्वांतो लोपात् ककइति रूपमा
ह स्वइवस्वति सस्वौ सस्व यतुस्वामास स्वाच्चकारेतितदनाकारमेव भृशादिभ्यो भुव्यच्चेर्लोपश्च हलः अ
न भृतद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात् लन्ता नामेषां लोपश्च अभृशो भृशो भवति भृशाय ६४
ते अच्चेरितिपर्युदासबलात् अभूततद्भाव इति लभ्यम् तेनेह न क्व दिवा भृशा भवंति येरात्रौ भृशा न स्युः रा
त्रय स्ते दिवाऽभवन्तीत्यर्थः सुमनसः अस्य सलोपः सुमनायते चुरादौ संग्राम युद्धे इति पठ्यते तत्र संग्रामे
ति धातुपदं कृतस्मात्तत्करोतीति णिच् सिद्धः तत्सन्नियोगेनात्मनेपदमासज्यते युद्धे योपं ग्राम शब्द इत्यत्रे
पि सामर्थ्यात् संग्राम शब्दे लब्धे विशिष्य पाठो ज्ञापयति उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये
चिकीर्षिते पृथक्क्रियते तेन मनस् शब्दात् प्रागट् स्वमनायत उन्मनायते उदमनायत एवं च अवागल्भ
त अवागल्भिष्ट इत्यादावप्यवेत्यस्य पृथक्करणं बोध्यम् ज्ञापकं च सजातीयविषयम् तेन यत्रोपसर्गस्वरू कं ४
पे सकलं श्रूयते न त्वादेशेनापहृतं तत्रैव पृथक्कृतिः एवं च आऊढः ओढः सइवाचरति ओढायित्वा अत्र राम॰
उन्मनाय्य अवगल्भ्येति वत् ल्यप् ज्ञापकस्याविशेषविषयत्वे बाधकं वार्तिकं तद्भाष्यं च प्रमाणम् तथाहि ६८
उस्योमाङ्क्ष्वाटः प्रतिषेधः उसि ओमाङोश्च परयोराटः पररूपं नेत्यर्थः उस्रामिच्छत् औस्रीयत औ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विशिष्टाश्चकाङ्क्षेवेतिमाधवादयः लङ्क्षेति तच्चिन्त्यम् सर्वप्रातिपदिकेभ्यः पूर्ववार्त्तिकं तु अनुवर्ध्यास्य किं तावत्कृत्य
गार्थम् तत्र क्विब्लुप्यते प्रातिपदिकग्रहणादिह सुप इति न संबध्यते तेन पदकार्यं न कृष्ण इवाचर
ति कृष्णति अतो गुण इति पापासे पररूपम् अ इवाचरति अति अतः अन्ति प्रत्ययग्रहणमप
नीय अनेकाच इत्युक्तेराम् न औ अतुः उः द्वित्वं अतो गुणे प्राप्ते अत आदेरिति दीर्घ णल् औ वृद्धिः
अतु सादिषु तु आतो लोप इटि चेत्यालोपः मालेवाचरति मालाति लिंगविशिष्टपरिभाषया एकादेश
स्य पूर्वान्तत्वेन ग्रहणाद् ह्रस्वः माला चकार लङि अमालात् अत्र हल्ङ्याब्भ्यो दीर्घादिति लोपो न ङ्यासाहचर्या
दायोऽपि सोरेव लोपविधानात् इट् सकौ अमालासीत् कविरिवकवयति आशीर्लिङि कवीयात् सि
चि वृद्धिरित्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नाम धातोर्न वृद्धिरिति कैयटादयः ।
अकवयीत् माधवस्तु नामधातोरपि वृद्धिमिच्छति अकावयीत् विरिवाचरति वयति विवाय विव्य
तुः अवयीत् अवायीत् श्रीरिव श्रयति शिश्राय शिश्रियतुः पितेव पितरति आशिषि रिङि पित्रि
यात् भूरिव भवति अत्र गातिस्थेति भुवो वुगिति भवतेरिति च न भवति अभिव्यक्तत्वेन धातुपाठस्थस्यै
व तत्र ग्रहणात् अभावीत् बुभाव उरिव उवति णिश्रीति चङः अद्रावीत् अनुनासिकस्य क्विझलोः क्ङि
ति अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ क्ङिति इदमिवाचरति इदामति राजेवाचरति राजान

च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ९७

णाविष्ठवत् आदेशो नेति ऊठ् न यत्तावृक्तम् प्रकृत्यैकाच् वृद्धिपुकौ स्वापयति त्वां मां वा आचष्टे त्वापयति मापयति मप
यन्तस्य त्वमौ परत्वात् पूर्वं नित्यत्वाट्टिलोपः वृद्धिपुकौ त्वादयति मादयति इति तु युक्तम् अन्तरंगत्वात् परत्वे कृते प्र
कृत्यैकाच् इति प्रकृतिभावात् न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यम् भाष्यस्य प्रेष्ठाद्युदाहरणविशेषस्य
न्यथासिद्धिपरत्वात् युवां आवां वा युष्मयति अस्मयति श्वानमाचष्टे शावयति नस्तद्धित इति लोपः प्रकृतिभावस्तु नयेन
नाप्राप्तिन्यायेन टेरित्यस्यैव बाधको हि सः भत्वात् संप्रसारणं अन्ये तु नस्तद्धित इति नेह प्रवर्तते दृश्यते इष्ठनिमित्तस्यादृष्टत्वात् अहिष्ठ
69 इत्यादौ परत्वाट्टेरित्यस्यैव प्रवृत्तेः तेन शुनयतीति रूपमाहुः विद्वांसमाचष्टे विद्वयति अंगवृत्तपरिभाषया संप्रसारणं ने
ष्यते संप्रसारणे हूढावावादेशौ च विहावयति इत्यन्ये नित्यत्वाट्टिलोपात् प्राक् संप्रसारणं अन्तरंगत्वात् पूर्वरूपं टिलोपः वि
दुषयतीत्यपरे उदंचमाचष्टे उदीचयति उदेचिचत् प्रत्यंचं प्रतीचयति प्रत्यचिचत् इकोसवर्णे इति प्रकृतिभावपक्षे प्र
ति अचिचत् सम्यंचं माचष्टे समीचयति सम्यचिचत् समि अचिचत् तिर्यंचमाचष्टे तिरायंयति अंचेष्टिलोपे
नापहारेऽपि बहिरंगत्वेनासिद्धत्वात्तिरसस्तिरिः असिद्धवदत्रेति चिणो लुक् इति न्यायेन प्रथमं टिलोपो सिद्धः अतः
पुनष्टिलोपेन अंगवृत्तपरिभाषया वा चडि अग्लोपित्वादुपधाह्रस्वो न अतितिरायत् सध्र्यंचमाचष्टे सध्रायय
ति असमध्रायत् विष्वद्र्यंचमाचष्टे विष्वद्रापयति अविविष्वद्रापत् देवद्र्यंचमाचष्टे अदिदेवद्रात् अदद्र्यंचं णम॰ ९७
अ ददद्रायत् अमुमुयंचम् अमुमुद्र्यापयति चङि आमुमुद्र्यापत् अदमुयंचं अदमुयापयति आद

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्तयति तत्संके शाइत्येके जनीमता। केषांइत्यन्ये पापामित्यपरे मुण्डादयः सत्यापेत्यत्रैव पठितुं युक्ताः प्राति
पदिकाद्धात्वर्थे इत्येव सिद्धे केषांचिज्जुहृणं साधेहेभ्यो णिजर्थम् मुण्डयति माणवकम् मिश्रयस्यन्नं श्लक्ष्ण
यति वस्त्रम् लवणयति व्यञ्जनमिति हलकलयोरत्वार्थम् समस्य आगमार्थं केषांचित्तु प्रपंचार्थम् सत्यंव
दत्या चष्टे वा सत्यापयति अर्थवेदयोरप्यापुग्वक्तव्यः। अर्थापयति वेदापयति पाशं विमुंचति विपाशयति
रूपं पश्यति रूपयति वीणयोपगायति उपवीणयति तूलेनानुकुष्णाति अनुतूलयति तूलाग्रं तूलेनानुघ
ट्टयतीत्यर्थः श्लोकैरुपस्तौति उपश्लोकयति सेनयाभियाति अभिषेणयति उपसर्गात्सुनोतीति षः अभ्य
षेणयत् प्राक्सितादिति षः अभिषिषेणयिषति स्थादिष्वभ्यासेन चेति षः लोमान्यनुमार्ष्टि अनुलोमयति त्वच
वाग्यत्र ६ संवरणे पश्चात् गृह्णाति त्वचयति वर्मणा संनह्यति संवर्मयति वर्णं गृह्णाति वर्णयति चूर्णैरवध्वंसते अवचूर्ण पि७
यति इष्टवदित्यतिदेशात्पुंवद्भावादयः एनीमाचष्टे एतयति दरदमाचष्टे दारदयति पृथुम् प्रथयति स्रुकोसत्या
एवं वा विलोपः अपिप्रथत् अपप्रथत् मृदुम् म्रदयति अमिम्रदत् अमम्रदत् भृशां कृशां दृढां भ्रशयति ।
क्रशयति द्रढयति अबभ्रशत् अचकृशत् अदद्रढत् परिवृढयति पर्यवव्रढत् ऊढिमाख्यत् औजि
ढत् इत्यादीनामसिद्धत्वात् ढ इति शब्दस्य द्वित्वम् एवं चासिद्धीयमद्वित्वे इति त्वनित्यमित्युक्तम् ढिरित्यस्य द्वित्वम् स्य
मते औढिढत् ऊढमाख्यत् औजढत् औडढत् ओः पुयण्जीति वर्गप्रत्याहारजग्रहो लिंगम् द्वित्वे कार्ये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ ति सुखं दुःखं चानुभवतीत्यर्थः सपर सभायां अरर आरं कर्मणि भिषज् चिकित्सायां भिष्णज् उपसेवायाम् इषुध

उ॰ शरधारणे चरण वरण गतौ चुरण चौर्ये तुरण त्वरायां भुरण धारणपोषणयोः गद्गद वाक्स्खलने एला केला खेला

७०। ला॰२ विलासे इलेत्यन्ये लेखा स्खलने च अदन्तोयमित्येके लेखायति लिट अल्पकुत्सनयोः लियति लाट् जीवने हृणीङ् रो

षणे लज्जायां च महीङ् पूजायां महीयते पूजां लभत इत्यर्थः रेखा श्लाघासादनयोः द्रवस् परितापपरिचरणयोः ति

70 रस् अन्तर्धौ अगद नीरोगत्वे उरस् बलार्थः उरस्यति बलवान् भवतीत्यर्थः तरण गतौ पयस् प्रसृतौ संभूयस् प्रभू

तभावे अम्बर संवर सम्भरणे आकृतिगणोऽयम् ॥ इति कण्ड्वादयः ॥ कण्डूयतेः सन् सन्यङोरिति प्रथमैकाचो

ती॰ द्वित्वे प्राप्ते कण्ड्वादेस्तृतीयस्येति वाच्यं कण्डूयियिषति कृञन्तात्सन् पर्येषणे नामधातुषु आद्यानां त्रयाणामन्यतमस्य

पु॰२ द्वित्वमित्यर्थः अजादेस्त्वाद्येतरस्य पुत्रीयियिषति पुतित्रीयिषति पुत्रीयियिषति अशीशीयिषति अश्वीयियिषति

नदराणां संयुक्तानां अचः परस्यैव द्वित्वनिषेधः इन्द्रीयतेः सन्द्रीयाद्यिशब्दयोरन्यतरस्य द्वित्वं इंदिद्रीयिषति इन्द्री

यियिषति चिचन्द्रीयिषति चेदिद्रीयिषति चेद्रीयियिषति प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति पिप्रापयिष

ति प्रापयियिषति उरू विवारयिषति वारिरयिषति वारयियिषति वाहंसिसाधयिषतीत्यादि रूपत्रयं यत्वेतु नास्ति राम॰ ७०

भावा२ आदेशावयवत्वाद्द्वित्वाभावः यङ् सन् णप्तान्तात्सन् बोभूयियिषति यङ् णिच् सन्नन्तात् णिच् बोभूययिषयति ॥ इति

प्रथमाह्ला॥ अनुदात्तङित आत्मनेपदं आस्ते शेते भावकर्मणोः बभूवे अनुबभूवे कर्तरि कर्मव्यतिहारे क्रियाविनि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रमुञ्चायत् भुवं भावयति अबीभवत् भुवम् अबुभुवत् श्रियं अशिश्रयत् गाम् गावयति अजूगवत् रा
यं अरीरयत् नावम् अनूनवत् स्वश्च स्वौ स्वाः स्वपूत् स्वः अव्ययानां भमात्रे टिलोपः स्वयति असिस्वत् बहून्।
भावयति बहयतीत्यन्ये स्रग्विणं स्रजयति संज्ञापूर्वकत्वान्न वृद्धिः श्रीमंतौ श्रीमंतं वा अशिश्रयत् पयस्विनीम्
पयसयति इह टिलोपेन तदपवादस्य लुकः प्रवृत्तत्वात् स्थूलम् स्थवयति दूरम् दवयति कथं तर्हि दूरयत्यवन
ते पयस्वतीतिइह मतति अवयति वा दूरात् अंकुर्वतीत्यर्थः युवानं यवयति कनयति युवाल्पयोरिति वा कन् अन्ति
कं नेदयति वाढं साधयति प्रशस्यम् प्रशस्ययति इह श्रज्योन उपसर्गस्य पृथक्कृते रूम् ज्यापयति वर्षय
ति प्रियं प्रापयति स्थिरं स्थापयति स्फिरं स्फापयति उरुं वारयति बाहुलकाद् गुणदयम् वरयति बहुलं बंहय
ति गुरुं गरयति तृप्रं त्रपयति दीर्घं द्राघयति वृंदारकं वृंदयति ॥०॥ इति नामधातुप्रक्रिया ॥ कंड्वादिभ्यो
यक् एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे धातुभ्यः किम् प्रातिपदिकेभ्यो मा भूत् द्विधा हि कंड्वादयः धातवः प्रातिपदिका
नि च कंडूञ् गात्रविघर्षणे कंडूयति कंडूयते मन्तुञ् अपराधे रोष इत्येके मन्तूयति मन्तूयते वेद्वल्गुत्वमाह व
ल्गुश्च भावे स्वप्ने च दीप्तावित्येके लेयूति लोयूति लेटिता लोटिता लेला दीप्तौ इरस् इरज् इरञ् ईर्ष्यायां इरस्यति
इरज्यति हलि चेति दीर्घः ईर्यति ईर्यते उषस प्रभातीभावे वेद धौर्त्ये स्वप्ने च मेधा आशुग्रहणे च मेधायति कु
षुभ क्षेपे कुषुभ्यति मगध परिवेष्टने नीचदास्ये इत्यन्ये तन्तस पम्पस दुःखे सुख दुःख तत्क्रियायाम् सुख्यति दुःख्य
पूजामाधुर्ययोः वल्गूयति असुङ् पंको असु असू इत्येके यति असूयति असूयते लेट् लोट् धौर्त्ये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayu Sharada Peetham

सि.कौ. उ. ७१

कारः पैतृकमश्वा अनुहरन्ते मातृकं गावः पितुर्मातुश्चागतं प्रकारमिति तत्प्रकारं परिशीलयन्तीत्यर्थः ताच्छील्ये किम् मातु
रनुहरति किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम् हर्षादयो विषयाः तत्र हर्षो विक्षेपस्य कारणं उत्तरे फले अपाच्च
तुष्पाच्छकुनिष्वालेखने अपात्किरतेः सुट् स्यात् सुडपि हर्षादिष्वेव तत्रवः अपस्किरते वृषो हृष्टः कुक्कुटो भक्षार्थी श्वा
आश्रयार्थी च हर्षादिष्विति किम् अपकिरति कुसुमम् इह तङ्सुटौ न हर्षादिमात्रविवक्षायां यद्यपि तङ्मात्रं तत्रापि
७१ सुडभावे नेष्यते इत्याहुः गजोपकिरति आङि नुप्रच्छ्योः आपृच्छते शप उपालम्भे आक्रोशार्थात्स्वरितेतो ऽकर्त्रभिप्रायेऽ अनु. तेथ
पि फले शपः परस्मैपदे आत्मनेपदं वक्तव्यमित्यर्थः कृष्णाय शपते समवप्रविभ्यः स्थः संतिष्ठते स्थाघ्वोरिच्च सम
स्थित समस्थिषातां समस्थिषत अवतिष्ठते प्रतिष्ठते आङः प्रतिज्ञायामुपसंख्यानं शब्दं नित्यमातिष्ठते नित्यत्वे
न प्रतिजानीते इत्यर्थः प्रकाशनस्थेयाख्ययोश्च गोपी कृष्णाय तिष्ठते स्वाशयं प्रकाशयतीत्यर्थः संशय्य कर्णादिषु
तिष्ठते यः कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थः उदोनूर्ध्वकर्मणि मुक्तावुत्तिष्ठते अनूर्ध्वेति किम् आसनादुत्तिष्ठ
ति ईहायामेव नेह ग्रामाच्छतमुत्तिष्ठति उपान्मंत्रकरणे आग्नेय्याग्नीध्रमुपतिष्ठते मंत्रकरणे किम् भर्तारमुपति
ष्ठति यौवनेन उपाद्देवपूजासंगतिकरणमित्रीकरणपथिष्विति वाच्यम् आदित्यमुपतिष्ठते कथं तर्हि स्तुत्यं स्तु
स्थ २ तिभिरर्थ्याभिरुपतस्थे सरस्वतीति देवतात्वारोपात् नृपस्य देवतात्वाद्वा गंगायमुनामुपतिष्ठते उपश्लिष्य राम. ७१
तीत्यर्थः रथिकानुपतिष्ठते मित्रीकरोतीत्यर्थः पंथाः स्रुघ्नमुपतिष्ठते प्राप्नोतीत्यर्थः वा लिप्सायामिति वक्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मये द्योत्ये कर्तर्यात्मनेपदं स्यात् व्यतिलुनीते अन्यस्य योग्यं लवनं करोतीत्यर्थः श्नसोरल्लोपः व्यतिस्ते व्यतिषाते व्य
तिषते तासस्त्योर्लोपः व्यतिसे धि च व्यतिध्वे व्यतिहे व्यत्यसै व्यत्यहृत व्यतिषीत व्यतिएते २ व्यतिभाते ३ व्यति
षभे न गतिहिंसार्थेभ्यः व्यतिगच्छन्ति व्यतिघ्नन्ति प्रतिषेधे हसादीनामुपसंख्यानं हसादयो हसप्रकाराः शब्दक्रियाः।
व्यतिहसन्ति व्यतिजल्पन्ति हरतेरप्रतिषेधः संप्रहरन्ते राजानः इतरेतरान्योन्योपपदाच्च परस्परोपपदाच्चेति वक्त
व्यम् इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनन्ति नेर्विशः परिव्यवेभ्यः क्रियः अकर्त्रभिप्रायार्थमिदम् परिक्रीणी निविशते ५
ते अवक्रीणीते विपराभ्यां जेः विजयते आङो दोऽनास्यविहरणे आङ्पूर्वाद्ददातेर्मुखविकासनादन्यत्रार्थे वर्तमाना
दात्मनेपदं स्यात् विद्यामादत्ते अनास्यविहरणे किं मुखं व्याददाति आस्यग्रहणमविवक्षितम् विपादिकां व्याददाति पा
दस्फोटो विपादिका नदीकूलं व्याददाति पराङ्गकर्मकान्न निषेधः व्याददते पिपीलिकाः पतङ्गस्य मुखं क्रीडोऽनुसंपरि
भ्यश्च चादाङः अनुक्रीडते संक्रीडते परिक्रीडते आक्रीडते अनोः कर्मप्रवचनीयान्न उपसर्गेण समासाहचर्यात् मा
णवकमनुक्रीडति तेन सहेत्यर्थः तृतीयार्थे इत्यनोः कर्मप्रवचनीयत्वम् समोऽकूजने कूजने तु संक्रीडति चक्रम् आ
गमेः क्षमायां संपन्नस्येदं ग्रहणम् आगमयस्व तावत् मा त्वरिष्ठा इत्यर्थः शिक्षेर्जिज्ञासायां धनुषि शिक्षते धनुर्वि
षये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः आशिषि नाथः आशिष्येवेति नियमार्थं वार्त्तिकमित्युक्तम् सर्पिषो नाथते स
र्पिर्मे भूयात् इत्याशास्ते इत्यर्थः कथं नाथसे किमु पतिं न भूभृतामिति नाथसे इति पाठात् हरतेर्गतताच्छील्ये गतं प्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्तिशास्त्यर्तीयङ् २

सि.कौ. णाविति सूत्रेण मा समरत मा समस्वातां मा समस्वतेति समार्त समार्षातां समार्षतेति च स्यादेः यत्तेतु मा समरत मा समरेताम् मा
३. समरन्तेति च समारत समारेताम् समारन्तेति संशृणुते संपश्यति अकर्मकादित्येव अतएव रहीसीति पुरापि संशृणुम
७२ हे इति मुरारिप्रयोगः सामादिकइत्यादि अध्याहारोवा इति कयपड्जः इति अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां क
म ४ र्मकत्वेति चेत् शृणधातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया १ वहति भा
रं नदी वहति स्यन्दत इत्यर्थः जीवति नृत्यति प्रसिद्धेर्यथा मेघो वर्षति कर्मणोऽविवक्षातो यथा हितान्नयः संशृणुते स किं
72 प्रभुः उपसर्गादस्यत्यूह्योर्वेति वाच्यम् अकर्मकादित्येव विहत्तं वंधं निरस्यति निरस्यते समूहति समूहते उपसर्गादृत्व ऋ द
तेः यावोकृति वक्षसमुद्यात् अग्निसमुत्यति समुपविमोकः निरुद्धते स्पर्धायामाङः कृष्णश्चाणूरमाह्वयते स्पर्धायां। ७५
किम् पुत्रमाह्वयति गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः गंधनं हिंसा उत्कुरुते सूचयती
त्यर्थः सूचनं हिंसाणां वियोगानुकूलत्वाद्धिंसैव अवक्षेपणं भर्त्सनं स्येनोवर्तिकामुदाकुरुते भर्त्सयतेइत्यर्थः हरिमुपकुरु
ते सेवते इत्यर्थः परदारान्प्रकुरुते तेषु सहसा प्रवर्त्तत इत्यर्थः एधोदकस्योपस्कुरुते गुणमाधत्ते गाथाः प्रकुरुते प्रकथ
यतीत्यर्थः शतं प्रकुरुते धर्मार्थं विनियुङ्क्ते एषु किं कटं करोति अधेः प्रसहने प्रसहनं क्षमा अभिभवश्च षह मर्षणे ताम.
अभिभवे चेति पाठात् शत्रुमधिकुरुते क्षमत इत्यर्थः अभिभवतीति वा वेः शब्दकर्मणः स्वरान्विकुरुते उच्चारयतीत्य ७२
र्थः शब्दकर्मणः किम् चित्तं विकरोति कामः अकर्मकाच्च वेः कृञ इत्येव छात्रा विकुर्वंति विकारं लभन्ते संमाननोत्सं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मम्भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा लिप्सयोपगच्छतीत्यर्थः अकर्मकाच्च उपतिष्ठते सकर्मकादात्मनेप
दं स्यात् भोजनकाले उपतिष्ठन्ते सन्निहिता भवन्तीत्यर्थः उद्विभ्यां तपः अकर्मकादित्येव उत्तपते वितपते दीप्यत इत्य ॥२
र्थः स्वांगकर्मकाच्चेति वक्तव्यम् स्वमंगं स्वांगं न तु अद्रवमिति पारिभाषिकम् उत्तपते वितपते पाणिम् नेह सुवर्णं
मुत्तपति संतापयति विलापयति वेत्यर्थः चैत्रो मैत्रस्य पाणिमुत्तपति संतापयतीत्यर्थः आङो यमहनः आयच्छ
ते आहते अकर्मकात्स्वांगकर्मकादित्येव नेह परस्य शिरस्माहन्ति कथं तर्हि आजघ्ने विषमलोचनस्य वक्ष इति भा
रविः आहध्वं मां रघूत्तममिति भट्टिश्च प्रमाद एवेति भागवृत्तिः प्राप्येत्यध्याहारो वा ल्यब्लोपे पञ्चमीति तुल्यव
त्वेनैव वक्तव्यावगतिर्यत्र तद्विषयकं भेत्तुमित्यादि तुमुन्नन्ताध्याहारो वास्तु समीयमेत्येति वा आत्मनेपदेष्वन्यतर
स्याम् हनो वधादेशो वा लुङि आवधिष्ट आवधिषाताम् हनः सिच् कित्स्यात् अनुनासिकलोपः आहत आहसा
ताम् आहसत यमो गन्धने सिच् कित्स्यात् गंधनं सूचनं परदोषाविष्करणं उदायत गंधने किम् उदायंस्त पाद
म् आकृष्टवानित्यर्थः समो गम्यृच्छिभ्याम् अकर्मकाभ्यामित्येव संगच्छते वा गमः गमः परो झलादि लिङ् सिचौ वि
तौ वा स्तः संगसीष्ट समगत समगंस्त समृच्छिष्यते अकर्मकाभ्यां किं ग्रामं संगच्छति विदिप्रच्छिस्वरतीनामुपसं
ख्यानं वेत्तेरेव ग्रहणं संवित्ते संविदाते वेत्तेर्विभाषा वेत्तेः परस्य झस्य रुडागमः स्याद्वा संविद्रते
संविदते संपृच्छते संस्वरते अर्त्तिश्रुदृशिभ्यश्चेति वक्तव्यम् अर्त्तीति द्वयोर्ग्रहणं अङ् विधौ तु इयर्तेरेव ग्रह

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प१

सि.कौ. तीत्यर्थः अनुपसर्गाद्वा क्रामति क्रमते अप्राप्तविभाषेयं सत्यादौ नुनित्यमेव अपन्हवे ज्ञः शतमपजानीते अपलपती ५१
३.
७३ त्यर्थः अकर्मकाच्च सर्पिषो जानीते सर्पिषोपायेन प्रवर्तत इत्यर्थः संप्रतिभ्यामनाध्याने शतं संजानीते अवेक्षत इ
त्यर्थः शतं प्रतिजानीते अंगीकरोतीत्यर्थः अनाध्यान इति योगो विभज्यते तत्सामर्थ्याद्कर्मकाच्चेति प्राप्तिरपि
वार्यते मातरं मातुर्वा संजानाति कर्मणः शेषत्वविवक्षायां षष्ठी भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु व
73 दः उपसंभाषोपमंत्रणे धातोर्वाच्ये इतरे प्रयोगोपाधयः शास्त्रे वदते भासमानो ब्रवीतीत्यर्थः उपसंभाषे उपसांत्वनं
भृत्यानुपवदते सांत्वयतीत्यर्थः ज्ञाने शास्त्रे वदते यत्ने क्षेत्रे वदते विमतौ क्षेत्रे विवदंते उपमंत्रणमुपच्छंदनं उ
यो ७ पवदते भार्यं यत इत्यर्थः व्यक्तवाचां समुच्चारणे मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात् संप्रवदंते ब्रा।
ह्मणा नेह संप्रवदंति तिरश्चाः अनोरकर्मकात् व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात् अनुवद
ते कठः कलापस्य अकर्मकात्किम् उक्तमनुवदति व्यक्तवाचां किम् अनुवदति वीणा विभाषा विप्रलापे विरुद्धो
क्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात् विप्रवदन्ते विप्रवदन्ति वा वैद्याः अवाद्ग्रः अवगिरते गृणातिस्तु।
अवश्यं न प्रयुज्यत एवेति भाष्यम् समः प्रतिज्ञाने शब्दं नित्यं संगिरते प्रतिजानीते इत्यर्थः प्रतिज्ञाने किं संगिर
ति ग्रासम् उदश्चरः सकर्मकात् धर्ममुच्चरते उल्लंघ्य गच्छतीत्यर्थः सकर्मकात्किम् बाष्पमुच्चरति उपरिष्टाद्गच्छ रामः ७३
तीत्यर्थः समस्तृतीयायुक्तात् रथेन संचरते दाणश्च सा चेच्चतुर्थ्यर्थे संप्रदाने तृतीयायुक्तादुक्तं स्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जेन१

उत्क्षिपतीत्यर्थः माणवमुपनयति ॥ नियः कर्तृस्थकर्मणि १

जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ सम्मानोत्संजनज्ञानविगणनव्ययाः नयतेर्वाच्याः ३ रेतु प्रयोगोपाध
यः नयाहि शास्त्रे नयते शास्त्रं स्याद्वादिनः शिष्येभ्यः प्रापयतीत्यर्थः तेन च संमाननं फलितं उत्संजने दण्डमुन्नयते
विधिना आत्मसमीपं प्रापयति उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते ज्ञाने तत्त्वं नयते निश्चि
नोतीत्यर्थः कर्मकरानुपनयते भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः विगणनं ऋणादेर्निर्यातनम् करं विनयते राज्ञे देयं
भागं परिशोधयतीत्यर्थः शतं विनयते धर्मार्थं विनियुंक्ते इत्यर्थः कर्तृस्थे चाशरीरे कर्मणि ॥ परात्मनेपदं प्राप्तं तच्छ
रीरावयवभिन्न एव स्यात् सूत्रे शरीरशब्देन तदवयवो लक्ष्यते क्रोधं विनयते अपगमयतीत्यर्थः तत्फलस्य चित्तप्र
सादस्य कर्तृगत्वात् स्वरितञित इत्येव सिद्धे नियमार्थमिदम् तेनेह न गडुं विनयति कथं तर्हि विगणय्य नयन्ति पौरुष
मिति कर्तृगामित्वाविवक्षायां भविष्यति वृत्तिसर्गतायनेषु क्रमः ॥ वृत्तिरप्रतिबंधः ऋचि क्रमतेऽस्य बुद्धिः न प्रतिहन्य
त इत्यर्थः सर्ग उत्साहः अध्ययनाय क्रमते उत्सहते क्रमन्तेऽस्मिन् शास्त्राणि स्फीतानि भवन्तीत्यर्थः उपपराभ्या
म् वृत्त्यादिषु आभ्यामेव क्रमेर्नान्यपसर्गान्तरात् उपक्रमते पराक्रमते नेह संक्रामति आङ उद्गमने ॥ आक्रम
ते सूर्यः उदयते इत्यर्थः ज्योतिरुद्गमने इति वाच्यम् नेह आक्रमति धूमो हर्म्यतलात् वेः पादविहरणे ॥ साधु विक्रमते
वाजी पादविहरणे किम् विक्रामति संधिः स्फुटतीत्यर्थः प्रोपाभ्यां समर्थाभ्यां ॥ समर्थौ तुल्यार्थौ एकं धात्वादित्वात्त
रूपं प्रारंभ अनयोस्तुल्यार्थता प्रक्रमते उपक्रमते समर्थाभ्यां किम् प्रक्रामति गच्छतीत्यर्थः उपक्रामति आगच्छ

मै १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ [illegible] नोच्छ्रुतां णौ यत्कर्मकारकं स चेण्णौ कर्ता स्यात् नत्वाध्याने णिच्प्रेति सिद्धे ः कर्त्रभिप्रायार्थे
उ॰ मिदं कर्त्रभिप्रायेतु विभाषो पदे नेति विकल्पे ण्यन्तकर्मकादिति परस्मैपदे च प्राप्ते पूर्वं प्रतिषेधे नेदमेव विध्यते कर्तृस्यभा
७४ वकाः कर्तृस्यक्रियाश्रयो दाहरणं तथाहि पश्यन्ति भवं भक्ताः चाक्षुषज्ञानविषयं कुर्वन्ति इत्यर्थः प्रेरणांशस्यागेपश्य
ति भवः विषयो भवतीत्यर्थः ततो हेतुमणिच् दर्शयन्ति भवं भक्ताः पश्यन्ति इत्यर्थः पुनर्णिजन्तस्याविवक्षायां दृश्यते भ
वः इह प्रथमतृतीययोरवस्थयोर्द्वितीयचतुर्थ्यौ स्वतुल्यार्थः तत्र तृतीयकक्षायां न तङ् क्रियासामान्यणौ कर्मकारकस्य
तं॰६ णौ कर्तृत्वाभावात् चतुर्थ्यां तु तङ् द्वितीयामादाय क्रियासाम्यात् प्रथमायां च कर्मणो भवस्येह कर्तृत्वाच्च एवमारोहय
74 ते हस्तीत्यप्युदाहरणम् आरोहन्ति हस्तिनं हस्तिपकाः न्युग्भावयन्तीत्यर्थः तत्र आरोहन्ति हस्ती न्यग्भवतीत्य
र्थः ततो णिच् आरोहन्ति आरोह न्तीत्यर्थः तत्र आरोहन्ते न्यग्भवतीत्यर्थः पुनश्च प्रयन्त्यारोह न्तीति प्रथम य॰६
कक्षा प्राग्वत् ततः कर्मण एव हेतुत्वारोपात् णिच् दर्शयन्ति भवः आरोहयति हस्ती पश्यन्त आरोहतश्च प्रेरयतीत्य
र्थः ततो णिः ष्यन्तस्मकत्तिभ्यां चोपात्तयोर्द्वयोरपि प्रे षणयोस्त्यागे दर्शयते आरोहयते इत्युदाहरणम् अर्थः प्रा
ग्वत् अस्मिन्पक्षे द्वितीयकक्षायां न तङ् समानक्रियात्वाभावात् णिजर्थस्याधिक्यात् अनाध्याने किम् स्मरति वनगुल्मं
कोकिलः स्मरयति वनगुल्मः उत्कण्ठापूर्वकस्मर्तृतो विषयो भवतीत्यर्थः भीस्म्योर्हेतुभये व्याख्यातम् गृधिवञ्च्यो राम॰
प्रलम्भने प्रतारणेऽर्थे वर्तमानाभ्यां प्राग्वत् माणवकं गर्धयते वञ्चयते प्रलम्भने किम् श्वानं गर्धयति आमि ७४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कातन्त्रकः २ न तृतीयायाश्चेच्चतुर्थ्यर्थे दास्यासंप्रयच्छते पूर्वसूत्रे समम् इति षष्ठीति तेन सूत्रद्वयमिदं सावधियते प्रवर्त्तते रथेन समुदा
चरते दास्या संप्रयच्छते उपाद्यमः स्वकरणे स्वकरणं स्वीकारः भार्यामुपयच्छते विभाषोपयमने यमः सिच किद्वा
त् विवाहे रामः सीतामुपायत उपायंस्त वा उदवोढेत्यर्थः गन्धनाद्गीरुपयमनेन तु पूर्ववत् प्रतिषेधान्नित्यं कित्त्वम् ज्ञाश्रु
स्मृदृशां सनः सन्नन्तानामेषां प्राग्वत् धर्मं जिज्ञासते शुश्रूषते सुस्मूर्षते दिदृक्षते नानोर्ज्ञः प्रत्यमनुजिज्ञासति पूर्व
सूत्रस्यैवायं निषेधः अनन्तरस्येति न्यायात् तेनेह न सर्पिषोऽनुजिज्ञासते सर्पिषा प्रवर्तितुमिच्छतीत्यर्थः पूर्ववत्सन
इति लङ् अकर्मकाच्चेति केवलाद्विधानात् प्रत्याङ्भ्यां श्रुवः आभ्यां सन्नन्ताच्छ्रुवः उक्तं न स्यात् प्रतिशुश्रूषति आ
शुश्रूषति कर्मप्रवचनीयात् स्यादेव देवदत्तं प्रति शुश्रूषते शदेः शितः म्रियतेर्लुङ्लिङोश्च स्यात्स्यातम् पूर्ववत्स
नः सनः पूर्वो यो धातुस्तेन तुल्यं सनेत्यादपि आत्मनेपदं स्यात् एदिधिषते शिशयिषते निविविक्षते पूर्ववत्किम् बु
वर्त्यैपू भूषति शदेरित्यादि सूत्रद्वये सनो नेत्यनुवाक्यभेदेन व्याख्येयं तेनेह न शिशत्सति मुमूर्षति आम्प्रत्ययवत्कृञोऽनु
प्रयोगस्य एधांचक्रे प्राप्याभ्यां युजेरयज्ञपात्रेषु प्रयुङ्क्ते स्वराद्यन्तोपसर्गादिति वाच्यम् उद्युङ्क्ते नियुङ्क्ते अयज्ञपा
त्रेषु किम् द्वैधं चित्पात्राणि प्रयुनक्ति समः क्ष्णुवः संक्ष्णुते शस्त्रम् भुजोऽनवने ओदनं भुङ्क्ते अभ्यवहरतीत्यर्थः
बुभुजे पृथिवीपालः पृथिवीमेवकेवलाम् वृद्धो जनो दुःखशतानि भुङ्क्ते इहोपभोगो भुजेरर्थः अनवने किम् महीं भु
नक्ति णेरणौ यत्कर्म णौ चेत्स [illegible] कर्त्ताऽनाध्याने एतस्मादात्मनेपदं स्यात् अणौ या क्रिया सैव चेत् ण्यन्ते [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. उ. ७५

र्त्ता न तु कर्मकर्त्तीति व्याख्येयम् अभिप्रत्यतिभ्यः क्षिपः क्षिप प्रेरणे स्वरितेत् अभिक्षिपति अतिक्षिपति प्रतिक्षिपति प्रा
द्वहः प्रवहति परेर्मृषः परिमृष्यति योजादिकमपरिमृषति इह परेरिति योगं विभज्य वहेरपीति केचित् व्याङ्परिभ्यो रमः
विरमति उपाच्च यज्ञदत्तमुपरमति उपरमयतीत्यर्थः अन्तर्भावितण्यर्थोऽयम् विभाषाऽकर्मकात् उपाद्रमते रकर्मकात्प
रस्मैपदं वा उपरमति उपरमते वा निवर्त्तत इत्यर्थः बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः एभ्यो ण्यन्तेभ्यः परस्मैपदं वा स्या
त् णिचश्चेत्यस्यापवादः बोधयति पद्मम् योधयति काष्ठानि नाशयति दुःखम् जनयति सुखम् अध्यापयति प्रावय
प६ ति प्रापयतीत्यर्थः द्रावयति विलापयतीत्यर्थः स्रावयति स्यन्दयतीत्यर्थः निगरणचलनार्थेभ्यश्च निगारयति आ
75 शयति भोजयति चलयति कम्पयति अदेः प्रतिषेधः आदयते देवदत्तेन गतिबुद्धीति कर्मत्वमादिखाद्योर्न प्रतिषेधः ति७
निगरणचलनेति सूत्रेण प्राप्ते वायं निषेधः शेषादित्य कर्त्रभिप्राये परस्मैपदं स्यादेव आदयत्यन्नं बटुना अणाव
कर्मकाच्चित्तवत्कर्तृकात् ण्यन्तात्परस्मैपदं स्यात् शेते कृष्णः शाययति गोपी न पादम्याङ्यमाङ्यसपरिमुहरुचिनृ
तिवदवसः एभ्यो ण्यन्तेभ्यः परस्मैपदं न स्यात् पिबतिर्निगरणार्थः अपरे चित्तवत्कर्तृकाऽकर्मकाः नृतिश्चलनार्थो
ऽनेन सूत्रद्वयेन प्राप्तिः पाययते दमयते आयामयते परिमोहयते रोचयते नर्त्तयते वादयते वासयते धेट उपसंख्या
नम् धापयेते शिशुमेकं समीची अकर्त्रभिप्राये शेषादिति परस्मैपदं स्यादेव वत्सान् पाययति दमयनीकमलीयता राम ७५
म्दम् अभिसंवासयति वाक्यषः लोहितायति लोहितायते द्युद्भ्यो लुङि अद्युतत् अद्योतिष्ट वृद्भ्यः स्यसनोः वर्त्स्य

आयासयति २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कोंत्तान्नस्योत्पादयतीत्यर्थः अहिंवन्ह्वयति वर्जयतीत्यर्थः लियः सम्मानन शालीनीकरणयोश्च वाल्यात्ते मिथ्योप
पदात्कृञोभ्यासे णौ रित्येव पदं मिथ्याकारयते स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः मिथ्योपपदात्किं [illegible] पदं सुष्ठुकार
यति अभ्यासे किम् सकृत्पदं मिथ्याकारयति अभ्यासे किम् सकृत्पदं मिथ्याकारयति स्वरितञितः कर्त्रभिप्राये क्रिया
फले यजते सुनुते कर्त्रभिप्राये किं ऋत्विजो यजन्ति सुन्वन्ति अपाद्वदः न्यायमपवदते कर्त्रभिप्राय इत्येव अपवदति ।
णिचश्च कारयते समुदाङ्भ्यो यमोऽग्रन्थे अग्रन्थ इति छेदः व्रीहीन्संयच्छते भारमुद्यच्छते वस्त्रमायच्छते अग्रन्थे
किम् उद्यच्छति वेदं अधिगन्तुमुद्यमं करोतीत्यर्थः कर्त्रभिप्राय इत्येव अनुपसर्गा[illegible] गां जानीते अनुपसर्गात्किम् ज्ञः
स्वर्गं लोकं न प्रजानाति कथं तर्हि भट्टिः इत्यन्वयः पूर्वमवालुलोचे ततोनुजज्ञे गमनं सुतस्येति कर्मणि लिट् नृपेणेति
विपरिणामः विभाषोपपदेन प्रतीयमाने स्वरितञित्यादि पञ्चसूत्र्यां यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रि
याफलस्य कर्तृगामित्वे द्योतिते वा स्यात् स्वं यज्ञं यजति यजते वा स्वं कटं करोति कुरुते स्वं पुत्रमपवदति अपवदते
वा स्वं यज्ञं कारयति कारयते वा स्वं व्रीहिं संयच्छति संयच्छते वा स्वां गां जानीते वा ॥ इत्यात्मनेपदम् ॥ शेषात्कर्तरि जानाति ४
परस्मैपदम् आत्ति अनुपराभ्यां कृञः कर्तृगेपि फले गंधनादौ च परस्मैपदार्थमिदं अनुकरोति पराकरोति कर्तरीत्ये
व भावकर्मणोर्माभूत् न चैवमपि कर्मकर्तरि प्रसङ्गः कार्यातिदेशे पक्षस्य मुख्यत्वात् तत्र कर्मवत्कर्मणेति आत्मने
पदेन परेणास्य बाधात् शास्त्रातिदेशपक्षेनुकर्तरि कर्मत्वतः शेषादित्यत्र अकर्तृग्रहणद्वयमनुवर्त्य कर्त्रैव यत्क

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. उ. ७९

पत्वेनासिद्धत्वात्सिलोपः पक्षे भाविता भावयिष्यते भाव्यतां अभाव्यत भाव्येत भाविषीष्ट भाविषीष्ट ।
अभावि अभाविषातां बुभूष्यते बुभूषांचक्रे बुभूषिता बुभूषिष्यते बोभूयते यङ्लुगंतात्तु बोभूयते बोभवांचक्रे बोभवि
ता बोभाविता अकर्मकत्वाद्भावेतिदीर्घः स्तूयते स्विस्तुः तुष्टुवे स्ताविता स्तोता स्ताविष्यते स्तोष्यते अस्तावि अस्ताविषातां
अस्तोषातां गुणोर्तीति गुणः अर्यते स्मर्यते सस्मरे परत्वान्नित्यत्वाच्च गुणे रपरे कृतेऽजन्तत्वाभावेपुदेशग्रहणाद्धि
एवं इट् आरिता आर्ता स्मारिता स्मर्ता गुणोर्तीति संयोगादेर्गुणः संस्क्रियते अनिदितामि
तिनलोपः स्रस्यते इदितस्तु नंद्यते संप्रसारणं इज्यते अयङ्यिक्ङिति शय्यते तनोतेर्यकि आकारोन्तादेशो वा स्यात् तायते
वि७ तन्यते येविभाषा जायते जन्यते तपोनुतापे च न यक् चिण् च कर्मकर्तरि ये नुतापे च अन्वतप्त पापेन पापं कर्तृ तेन अभ्या
76 हतमित्यर्थः कर्मणि लुङ् यदा पापेन संतापकत्वं अशोचि युष्मास्थेतीत्वं दीयते धीयते आदेच उपदेशेऽशितीति ऋ मेथा
रयादिसंज्ञकशकारादौ निषेधः एश आदिशित्वाभावात्तस्मिन्नात्वम् जग्ले आतोयुक् चिण्कृतोः आदन्तानां युगा
गमः स्यादिचिण्णिडासीति कृतिच दायिता दाता दायिषीष्ट अदायि अदायिषातां अदिषातां अधायिषातां अधिषातां अ
ग्लायि अग्लायिषाताम् अग्लासातां हन्यते अचिणलोरित्युक्ते हनस्तोच होर्हन्तेरितिकुत्वम् घानिता हंता घानिष्य राम. ७९
ते हनिष्यते आशिलिङि वधादेशस्यापवादत्वेऽभावः आर्धधातुके सीयुडीति विशेषविहितत्वात् घानिषीष्ट प
क्षे वधिषीष्ट अघानि अघानिषातां अहसातां पक्षे वधादेशः अवधि अवधिषातां अघानिष्यत अहनिष्यत न

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ते वर्तिष्यते विवर्त्स्यति विवर्तिष्यते स्तुविचक्लृपः कल्प्स्यति कल्पितासे कल्प्स्यति कल्पिष्यते कल्प्स्यते विक्लृ
प्स्यति विकल्पिष्यते चिक्लृप्स्यते ॥७॥ इति परस्मैपदव्यवस्था ॥ अथ भावकर्मणोर्लकारादयः भावो कर्मणोरिति तङ् सार्वधा
तुर्येयक् धातोर्यक् स्यात् यस्माद्भावकर्मणोर्वाचिनि सार्वधातुके परे भावो भावना उत्पादना क्रिया सा च धातुत्वेन सकलधा
तुवाच्या भावार्थकलकारेणानूद्यते युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् प्रथमपुरुषः तिङ्वाच्यभावनाया अस सा २ लिङ्सङ्ख्यानिङ्सत्वं नाङ्किसत्वं
त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किं त्वेकवचनमेव तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात् अनभिहिते कर्त
त्वयां ६ रि तृतीया मया त्वया अन्यैश्च भूयते बभूवे सा सिञ्चोयुट् तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् उपदे
शे योऽच् तदन्तानां हनादीनां च चिण्वाग्भावो वा स्यात् स्यसिच्सीयुट्तासिषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च अय
मिड् चिण्वद्भावसन्नियोगशिष्टत्वात् तदभावे न इडार्धधातुके इत्यनेन कृते सीयुटो विशेषणं नेतरेषामव्यभिचारात्
चिण्वद्भावाद्वृद्धिः भाविता भविता भाविष्यते भविष्यते भूयताम् अभूयत भूयेत भाविषीष्ट भविषीष्ट चिण्भावक
ए४ र्मणोः चिण् स्याद्भावकर्मवाचिनि तशब्दे परे अभावि अभाविष्यत अभविष्यत तिङोऽकृत्वात्कर्मणि न द्वितीया अ
नुभूयते आनन्दश्चैत्रेण त्वया मया च अनुभूयेते अनुभूयन्ते त्वमनुभूयसे अहमनुभूये अन्वभावि अन्वभाविषाताम्
णिलोपः भाव्यते भावयाञ्चक्रे भावयाम्बभूवे भावयामासे इहनशब्दस्य णिशि इट् णत्वे च कृते इह णोतीति इत्वेन तासिसा
स्यचयोः अस्तेरपि ख्यातिहे इत्यादौ सार्वधातुके एवणतिहत्वमप्रवृत्तेरित्याङ्कः भाविता [illegible] चिण्वदिट् आभो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ७७

नेमुनिना नोदात्तोपदेशस्य मान्तस्यानाचमेः उपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च अशमि उदात्तोपदेशस्येति किम्
अगामि मान्तस्य किं अवादि अनाचमेः किम् आचामि अनाचमिकमिवमीनामिति वक्तव्यम् चिणि आयादयः इति णि
ङभावपक्षे अकामि णिचोरभावे अवामि वधिर्हलन्तः जनिवध्योरिति न वृद्धिः अवधि जाग्रोविचिण्णल्ङित्
सु गुणः अजागारि भंजेश्च चिणि नलोपो वा स्यात् अभाजि अभंजि विभाषा चिण्णमुलोः लभेर्नुम् वा स्यात् अलं
भि अलाभि व्यवस्थितविकल्पत्वात् प्रादेर्नित्यं नुम् प्रालंभि द्विकर्मणां तु गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः गौर्दुह्यते पयः अजा ग्रामं नीयते।
ह्रियते कृष्यते उह्यते वा बोध्यते माणवकं धर्मः माणवको धर्ममिति वा देवदत्तो ग्रामं गम्यते अकर्मकाणां कालादिक
र्मणां कर्मणि भावे च लकार इष्यते मासो मासं वा आस्यते देवदत्तेन णिजंतात्तु प्रयोज्ये प्रत्ययः मासमास्यते माणव
कः॥ इति भावकर्मप्रक्रिया॥ ०॥ यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि
कर्तृसंज्ञां लभंते स्वव्यापारे स्वतंत्रत्वात् तेन पूर्वं करणत्वादिसत्वेपि संप्रति कर्तृत्वात्कर्तरि लकारः साध्वसिश्छिन
त्ति काष्ठानि पचन्ति स्थाली पचति कर्मणस्तु कर्तृत्वविवक्षायां प्राक् सकर्मका अपि प्रायेणाकर्मकाः तेभ्यो भावे कर्त
रि च लकारः पच्यते ओदनेन भिद्यते काष्ठेन कर्तरि तु कर्मवत्कर्मणा तुल्यक्रियः कर्मस्थया क्रियया तुल्यक्रियः राम॰ ७७
कर्ता कर्मवत्स्यात् कार्यातिदेशोयं तेन यगात्मनेपदचिण्चिण्वदिटः स्युः कर्तुरभिहितत्वात्प्रथमा पच्यते ओ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चस्मादिषु चि एवं दित्यनि देशात् वधादेशः स्यादिति वा साम् अंगस्येत्यधिकारादंगस्यैवातिदेशात् । गृह्यते चिण्वदिडो
नदीर्घत्वं पक्षे तस्य वलादिलक्षणस्येवेटो ग्रहोलिटी त्यनेन दीर्घविधानात् ग्राहिता ग्रहीता ग्राहिष्यते ग्राहिषीष्ट ग्रही
षीष्ट अग्राहि अग्राहिषातां अग्रहीषाताम् । दृश्यते अदर्शि अदर्शिषातां सिचः कित्वाद् मन अदृक्षाताम् । गिमिति ले
डि ध्वमि च लुङाशिषोः गतम् तथाहि चिण्वदिडो दीर्घोनेत्युक्तम् अगाहिध्वम् द्वितीये तु ढ इति ढ्लोपे इति दीर्घः अगाढ्वम् अ
गाढ्वम् एषां त्रयाणां लत्वं ढत्वं द्वित्वं त्रयं चेति पंचवैकल्पिकानि इत्येवं भवति लिङ्सिचाविति विकल्पादिड भावे उ
श्चेति कित्वम् ढत्वं रपरत्वं हलि चेति दीर्घः ढ्रलोपः षीढ्वमिति नित्यं ढत्वं अगोढ्वम् ढवमानां द्वित्वविकल्पे अष्टौ इत्येष
सवत्या सह संकलने उक्तामेवेति ढ्रहदीर्घ चिण्वदिड् लत्वं ढत्वं द्वित्वं त्रिकं तथा ढत्वरूपाणां विकल्पेन चतुर्भिरधिकम्
तम् । देतुमत्यन्तात् कर्मणिलः यक् णिलोपः शम्यते मोहोमृ कुर्वेन चि मुलोदीर्घो मतरस्याम् चिण्येतमुलपरे च णो सदे
मितामुपधायादीर्घो वा स्यात् पक्षे तो मिता ह्रस्व एव तु न विकल्पितः एवं ता णौ ह्रस्व विकल्पासिद्धः दीर्घविधो हि णि
चोलोपो न स्थानिवदिति दीर्घः सिद्धाति ह्रस्वविधौ तु स्यान्निवत्वं डुवारं भाष्येतु पूर्वत्रासिद्धेन स्थानिवदित्युक्तं र्व
चन सव णौ नुस्वारदीर्घ जश्त्वः पत्या रव्या नाः एतावितिजातिपरोनिर्देशः दीर्घस्य हृणौ मास्त्विति तन्वाशयः शामिता पा अनन्त देवं ३
मिता शमयिता शामिष्यते शामिष्यते शमयिते अशामि अशमि यङन्तात् णिच शंशम्यते शंशमिता शं मि शार
ता शंशमयिता यङलुगन्तात् सिद्धाये वं भाष्यमतेतु यङन्तात् णौ तिद्धि एवं दिदीर्घो नास्तीति विशेषः एयन्तत्वाभावे शाम्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अवकिरते हस्ती४

सि॰कौ॰ नियुज्यो। स्यंस्तु अनयोः सकर्मकयोः कर्त्तावद्बहुलं कर्मवत् यगपवादस्य शपन्वाच्य इत्यर्थः सृजेः श्रद्धोपपन्ने कर्त्तर्ये
उ॰ वेति वाच्यम् सृज्यते स्रजं भक्तः श्रद्धया निष्पादयतीत्यर्थः असर्जि युज्यते ब्रह्मचारी योगं भू षाकर्मकिरादिसनां चा
७८ न्यत्रात्मनेपदात् भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः अलंकुरुते
कन्या अलमकृत अवकिष्ट गिरते अगीष्ट आद्रियते आदृत किरादयस्तुदाद्यन्तर्गणाः चिकीर्षते कटः अचि
कीर्षिष्ट इच्छायाः कर्तृस्थत्वेपि करोतिक्रियापेक्षमिह कर्मस्थक्रियात्वम् नैस्येथे अस्माद्रुधः स्निणन अवा
78 रुद्ध गौः कर्मकर्त्तरीत्येव अवारोधि गौर्गोपेन तपस्तपः कर्मकस्यैव कर्मवत्स्यात् विधर्ययमिदम् एवकारस्तु अपराव
ति हन्त्यनुसारिणः तप्यते तपस्तापसः अर्जयतीत्यर्थः तपोनुतापे चेति चिण्निषेधात्सिच् अतप्त तपः क
र्मकस्यैवेति किम् उत्तपति सुवर्णं सुवर्णकारः न दुहस्नुनमां यक्चिणौ प्रस्नुते प्रास्नाविष्ट प्रास्नोष्ट नमते दण्डः
अनंस्त अन्तर्भावितण्यर्थानामिति यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं कारयते अचीक
रत उच्छ्रयते दंडः उदशिश्रियत चिण्वदिट् तु स्यादेव कारिष्यते ब्रूते कथा अवोचत भारद्वाजीयाः पठ
न्ति णिश्रन्थिग्रन्थिब्रूञामात्मनेपदाकर्मकाणामुपसंख्यानम् उत्पुच्छमुत्पुच्छयते गौः अन्तर्भावितण्य
र्थतायां पुत्पुच्छयते गोपुत्रः कर्मकर्तृत्वविवक्षायामुत्पुच्छयते गौः उदपुपुच्छत यक्चिणोः प्रतिषेधात् उत्पुच्छ राम॰
यतैश्रन्थिग्रन्थ्योः राधसीयत्वाण्णिजभावपक्षे ग्रहणम् श्रन्थति ग्रन्थं श्रन्थति मेखलां देवदत्तः श्रन्थते स्वयं ७८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दनः भिद्यते काष्ठम् स्वयमेवेति अभेदे ननु भावे लकारे कर्तुस्तृतीया स्यात् अस्मादतिदेशात् इति चेन्न लकारवाच्य एव
कर्ता कर्मवत् लिङ्याशिष्यङ् इति लकारकाल इत्यनुवृत्तेः भावप्रत्यये च कर्तुर्लकारेणानुपस्थितेः अत एव कृत्यक्तख
लर्थाः कर्मकर्तरि न भवन्ति किंतु भाव एव भेत्तव्यं कुसूलेन ननु पचिभिद्योः कर्मस्थक्रियात्वाविशेषात् द्विधाभवनं च भेदत्व
नीकर्तृस्थानत्वात् तुल्यमिदं कर्मकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः कर्मणे
ति किं करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिश्छिनत्ति स्थाली पचतीत्यादौ मा भूत् किं च कर्तृस्थक्रियेभ्यो मा भूत् गच्छति ग्रामः
आरोहति हस्ती अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पक्वेषु तंडु
लेषु यथा वा छिन्नेषु काष्ठेषु तत्र कर्मस्थक्रियात्वं तत्र तु न हि पक्वापक्वतंडुलेष्विव गतागतग्रामेषु वैलक्षण्यमुप
भ्यते करोतिरुत्पादनार्थः उत्पत्तिश्च कर्मस्था तेन क्रियते घटः इत्यादि यत्नार्थत्वेन तु नैतत्सिध्येत् ज्ञानेच्छादिवत्
यत्नस्य कर्तृस्थत्वात् एतेनानुव्यवसीयमाने इति व्याख्यातम् कर्तृस्थत्वेन यगभावात् प्रत्युक्तेनिरस्ते आलोपे च रूप
सिद्धेः तादृशोल्पादावपंचानन्तरनत्वात्तनेपदमत्र सकर्मकाणां प्रतिषेधो वक्तव्यः अन्योन्यं स्पृशतः अजा ग्रामं नय
फ३ ति दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम् नैतदुक्तम् नमो यक् चिणौ एषां कर्मकर्तरि यक् चिणौ न स्तः दुहं रनेनय
कएव निषेधः चिण्णत्तु विकल्पेनेष्यते श्चावलुक् गोः पयो दुग्धे औषधेः कर्मकर्तरि अजनि [illegible] स्विण्णवास्यात् सकर्मक
तोरितरपादेशे अकृत उदेहरेष्व अदोहि पक्षे क्सः लुग्वेति पक्षे लुक् अदुग्ध अधुक्षत उदु वरः फलं पच्यते स

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham.

सि.कौ. उ. ७९

वीति । ननौ पृष्टप्रतिवचने । अनद्यतने परोक्षे इति निवृत्तं भूते लट् स्यात् । अकार्षीः किं ननु करोमि भोः । नन्वोर्विभाषा । अकार्षीः
किं न करोमि नाकार्षं अहं नु करोमि अहं न्वकार्षं पुरि लुङ् चास्मे । अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्तते पुराशब्दयोगे भू
तानद्यतने विभाषा लुङ् चा लृट् न तु स्मयोगे पच्छेयथा ग्रामे वसन्तीह पुरा छात्राः अवात्सुः अवसन् ऊषुर्वा अस्मे किं य
79 जति स्म पुरा भविष्यतीत्यनुवर्तमाने यावत्पुरानिपातयोर्लट् यावद्भुङ्क्ते पुरा भुङ्क्ते निपातावेतौ निश्चयं द्योतयतः निपातयोः
किं यावद्दास्यते तावद्भोक्ष्यते करणभूतया पुरा यास्यति विभाषा कदाकर्ह्योः भविष्यति लट् स्यात् कदा कर्हि वा भुङ्क्ते भोक्ष्य
ते भोक्ता वा किंवृत्ते लिप्सायाम् भविष्यति लड्वा स्यात् कं कतरं कतमं वा भोजयसि भोजयिष्यसि भोजयितासि वा लिप्सा
याः किम् कः पाटलिपुत्रं गमिष्यति लिप्स्यमानसिद्धौ च लिप्स्यमानान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड्वा
स्यात् योऽन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा लोडर्थलक्षणे च लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे
वर्तमानाद्धातोर्भविष्यति लट् स्याद्वा कृष्णश्चेद्भुङ्क्ते गाश्चारय पक्षे लृट्लुटौ लिङ् चोर्ध्वमौहूर्तिके ऊर्ध्वं मुहूर्ताद्भव ऊर्ध्व
मौहूर्तिकः निपातनात्समासोत्तरपदवृद्धिश्च ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्षणे च विद्यमानाद्धातोर्लिङ् लट्
वा स्तः मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा अथ त्वं छन्दोऽधीष्व वर्तमानसा
मीप्ये वर्तमानवद्वा समीपमेव सामीप्यं स्वार्थे ष्यञ् वर्तमाने लडित्यारभ्य उणादयो बहुलमिति यावद्येनोपाधिना राम.
उक्तास्तेन सर्वे वर्तमानसमीपे भूते भविष्यति च वा स्युः कदागतोऽसि अयमागच्छामि अयमागमं कदागमिष्यसि । ७९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

थः अयं पिह स्मयते अस्मयं पिह कैयादिकयोस्तु अप्नीते गप्नीते स्वयमेव विकुर्वते सैंधवाः वल्गंतीत्यर्थः
वेः शब्दकर्मणो कर्मकाच्चेति तङ् अंतर्भावितण्यर्थस्य पुनः प्रेषणा त्यागो विकुर्वते सैंधवाः अकारिह अका
रिषातां अकारिषत अकृत अकृषातां अकृषत कुषिरंजोः प्राचां श्यन् परस्मैपदं च अनयोः कर्मकर्तरि
नयक् किंतु श्यन् परस्मैपदं च आत्मनेपदापवादः कुष्यति कुष्यते पादः रज्यति रज्यते वस्त्रं एतद्विषये स
मास्य प्रवृत्तिः कोपि धीह रंजीष्ट ॥०॥ इति कर्मकर्तृप्रक्रिया ॥०॥ अभिज्ञावचने लृट् स्मृति बोधिन्युपपदे भू
तानद्यतने धातोर्लृट् स्यात् लङोपवादः स्मरसि कृष्ण गोकुले वत्स्यामः एवं बुध्यसे चेतयसे इत्यादियोगेपि तेषामपि प्रकरणादिव
शेन स्मृतौ वृत्तिसंभवात् नयदि यद्योगे उक्तेन स्यात् अभिजानासि कृष्ण यद्वने अभुंज्महि विभाषा साकांक्षे उक्तविषये लृट्
वा स्यात् लक्ष्यलक्षणाभावेन साकांक्षश्चेत्प्रात्वर्थः स्मरसि कृष्ण वने वत्स्यामः तत्र गाश्चारयिष्यामः वासोलसं वा चारयाल
परत्वा ५ स्म पक्षे लङ् यच्छब्दयोगेपि नयदीति बाधित्वात् विकल्पः परोक्षे लिट् चकार उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्ये सुप्तो
हं किल विललाप बङ् जगाद पुरस्तात् सम्मत्ता किलाहं अत्यन्तापह्नवे लिड् वक्तव्यः कलिंगेष्ववात्सीः नाहं कलिंगान् ज
ये३ गाम हशश्वतोर्लङ् च अनयोरुपपदयोः लिड्विषये लङ् लिटौ स्तः अगच्छत् किं जगाम किं अनासन्नेनुतकं जघान किं
लट् स्मे ... लङ् स्यात् लिट् इतिहाकरोच्चकार वा शश्वदकरोच्चकार वा प्रश्ने चासन्नकाले प्रष्टव्यः प्रश्नः आसन्नका
ले पृच्छमाने लिड्विषये लिटौ अपवादः यजति स्म युधिष्ठिरः अपरोक्षे च भूतानद्यतने लट् स्यात् स्मयोगे एवं स्म पिता ब्र
लङ्लिटौ स्तः अगच्छत् किं जगाम किं अनासन्ने तु कंसं जघान लट्स्मे १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰
८०

च पूर्वसूत्रं संपूर्णमनुवर्त्तते वोताप्योः वा आ उताप्योरिति छेदः उताप्योरित्यतः प्राक् भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते
पूर्वसूत्रं तु उताप्योरित्यादौ प्रवर्त्तते इति विवेकः गर्हायां लडपिजात्वोः आभ्यां योगे लट् स्यात् कालत्रये गर्हायां लुङादीनपर
त्वादयं बाधते अपि जायां त्यजसि जातु गणिकामाधत्से गर्हितमेतत् विभाषा कथमि लिङ् च गर्हायामित्येव कालत्रये लि
ङ् चाल्लट् कथं धर्मं त्यजेस्त्यजसि वा पक्षे कालत्रये लकारः अत्र भविष्यति नित्यं लृङ् भूते वा कथं नाम तत्र भवान् धर्मं त्य
जेत् किंवृत्ते लिङ्लृटौ गर्हायामित्येव विभाषा तु नानुवर्त्तते कः कतरः कतमो वा हरिं निंदेत् लृङ् प्राग्वत् अनवक्लृप्त्यमर्ष
80 योरकिंवृत्तेऽपि गर्हायामिति निवृत्तं अनवक्लृप्तिरसंभावना अमर्षोऽक्षमा न संभावयामि न मर्षये वा हरिं निंदेत् निंदिष्यति वा लृ भवान् दे
ङ् प्राग्वत् किंकिलास्त्यर्थेषु लृट् अनवक्लृप्त्यमर्षयोरिति गर्हायां चेति यावदनुवर्त्तते किंकिलेति समुदायः क्रोधद्योतकः उ
पपदे अस्त्यर्थाः अस्ति भवति विद्यतयः लिङोऽपवादः न श्रद्दधे न मर्षये न वा किं किल त्वं शूद्रान्नं भोक्ष्यसे अस्ति भवति विद्य
ते वा शूद्रीं गमिष्यसि अत्र लृङ् न जातुयदोर्लिङ् यदायद्योरुपसंख्यानं लटोऽपवादः जातु यत् यदा यदि त्वादृशो वा हरिं निंदे
त् नावकल्पयामि न मर्षयामि लृङ् प्राग्वत् यच्चयत्रयोः यच्च यत्र वा त्वमेवं कुर्या न श्रद्दधे न मर्षयामि गर्हायां च अनव
क्लृप्त्यमर्षयोरिति निवृत्तं यच्चयत्रयोर्योगे गर्हायां लिङ् स्यात् यच्च यत्र वा त्वं शूद्रं याजयेः अन्याय्यमेतत् चित्रीकरणे
च यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत् शेषे लृडयदौ यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् राम॰
स्यात् आश्चर्यं गंधो नाम हरिं द्रक्ष्यति अयदौ किं आश्चर्यं यदि सोऽधीयीत उताप्योः समर्थयोर्लिङ् बाढमित्यर्थे अनयो ८०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ऽधीयीय आशंसे ५

एष गच्छामि गमिष्यामि वा । आशंसायां भूतवच्च । वर्त्तमानसामीप्य इति नानुवर्त्तते भविष्यति काले भूतवत् चकाराद्वर्त्तमानव
च्च प्रत्यया वा स्युः । आशंसायां देवश्चेद्वर्षीद्वर्षति वर्षिष्यति वा धान्यमवाप्स्म वपामः वप्स्यामो वा सामान्यातिदेशो वि
शेषानतिदेशः तेन लङ्लिटौ न । क्षिप्रवचने लृट् । क्षिप्रपर्याये उपपदे पूर्वविषये लृट् स्यात् वृष्टिश्चेत्क्षिप्रमाशुत्व
अध्या ४ रितं वा यास्यति शीघ्रं वप्स्यामः । नेति वक्तव्ये लृड्ग्रहणं लुडोऽपि विषये यथा स्यात् श्वः शीघ्रं वप्स्यामः । आशंसावचने लिङ् ।
आशंसावाचिन्युपपदे भविष्यति लिङ् स्यात् अभूतवत् गुरुश्चेदुपेयादाशंसे क्षिप्रमधीयीय नानद्यतनवत् क्रियाप्रबन्धसामीप्य
योः । क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न । यावज्जीवमन्नमदात् दास्यति वा सामीप्ये तुल्यजातीयेनाव्यवधानं येयं पौर्ण
मासी अतिक्रान्ता तस्यामग्नीनाधित सोमेनायष्ट येयममावास्या आगामिनी तस्यामग्नीनाधास्यते सोमेन यक्ष्यते भविष्य
ति मर्यादावचनेऽवरस्मिन् भविष्यति काले मर्यादोक्तौ अवरस्मिन्विभागेऽनद्यतनवन्न योऽयमध्वा गन्तव्य आपाटलिपुत्रा
त्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून्पास्यामः कालविभागे [illegible] चानहोरात्राणां एवं सूत्रं सर्वमनुवर्त्तते अहोरात्र
संधिविभागे प्रतिषेधार्थमिदम् योगविभाग उत्तरार्थः योऽयं संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अ व४
ध्येष्यामहे अनहोरात्राणां किं योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे परस्मिन्विभाषा अवर
स्मिन्वर्जं एवं सूत्रद्वयमनुवर्त्तते अमासविभागेयं योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्याम
हे अध्येतास्महे लिङ्निमित्ते लृङ् क्रियातिपत्तौ भविष्यतीत्येव सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् भूते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ मौहूर्त्तिके प्रैषादयोनुवर्त्तन्ते मुहूर्त्तादूर्ध्वं यजेत यजताम् यष्टव्यम् स्मे लोट् पूर्वसूत्रस्य विषये लिङ्कृत्यानां चापवादः
उ॰ ऊर्ध्वं मुहूर्त्तात् यजतां स्म अधीष्टे च स्मे उपपदे अधीष्टे लोट् स्यात् त्वं स्म अध्यापय लिङ् यदि यच्छब्दे उपपदे कालसमय
८१ वेलासु लिङ् स्यात् कालः समयो वेला वा यद्भुञ्जीत भवान् अर्हे कृत्यतृचश्च आशिषि लिङ्लोटौ वदेः शकि लिङ् च प्रा
क्तौ लिङ् स्याच्चात् कृत्याः भोः त्वं वदेः माङि लुङ् माकार्षीः कथं माभवतु माभविष्यतीति नायं माङ् किन्तु माशब्दः धातुसंबं
धे प्रत्ययाः धात्वर्थानां संबंधे यत्र काले प्रत्यया उक्तास्ततोन्यत्रापि स्युः तिङन्तवाच्यक्रियायाः प्राधान्यात् तदनुरोधे
81 न गुणभूतक्रिया वाचिभ्यः प्रत्ययाः वसन् ददर्शाभूते लट् स्मृतीतवा सकर्तृकर्तृको दर्शनमर्थः सोमयाज्यस्य पुत्रो भ
विता सोमेन यक्ष्यमाणोयः पुत्रस्तत्कर्तृकं भवनमर्थः क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः पौनःपुन्ये भृ
शार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तः तिङामपवादः तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ च
तध्वमोर्विषये हिस्वौ वा स्तः पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते हिस्वविधानसामर्थ्यात् तेन सकलपुरुषवचनविष
ये परस्मैपदिभ्यो हिः कर्त्तरि आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु समुच्चयेन्यतरस्याम् अनेकक्रियासमुच्चये द्योत्ये
माशुक्तं वा स्यात् यथाविध्यनुप्रयोगः पूर्वस्मिन् आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः समुच्चये सामान्यव
चनस्य समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्यात् अनुप्रयोगाद्यथायथं लङादयस्तिवादयश्च ततः संख्या राम॰
कालयोः पुरुषविशेषार्थस्य च अभिव्यक्तिः क्रियासमभिहारे द्वे वाच्ये याहि याहीति याति पुनःपुनरतिशयेन वा या ८१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्तुत्यार्थता उत स्मापि वा हन्यात् अयं हरिः समर्थयोः किं उत दंडः पतिष्यति अपि धास्यति द्वारं प्रश्नः प्रच्छन्नं च गम्यते उतः
प्रभृति लिङ् निमित्ते क्रियातिपत्तौ भूतेऽपि नित्यो लृङ् काम प्रवेदने ऽकच्चिति स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्या
न्नत्र कच्चिति कामो मे भुंजीत भवान् अकच्चितीति किं कच्चि[illegible]ज्जीवति संभावने ऽलमिति चेत् सिद्धाप्रयोगे अलमर्थो ऽत्र प्रो
क्तः संभावनमिति अलमिति च प्रथमयास्तस्याच्च विपरिणाम्यते संभावने ऽर्थे लिङ् स्यात् तच्चेत् संभावनमलमिति अल
मि[illegible] सिद्धाप्रयोगे सति अपि गिरिं शिरसा भिंद्यात् सिद्धाप्रयोगे किं अलं कृष्णो हस्तिनं हनिष्यति विभाषा धातौ संभावनव
चने ऽयदि पूर्वसूत्रमनुवर्त्तते संभावनेऽर्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यान्न तु यच्छब्दे पूर्वेण नित्ये प्राप्ते वचनम् संभाव
यामि भुंजीत भो क्ष्यते वा भवान् अयदि किं न संभावयामि यद्भुंजीथास्त्वं हेतुहेतुमतोर्लिङ् वा स्यात् कृष्णं नमेच्चेत्सुखं याया
९६ त् कृष्णं नस्यति चेत्सुखं यास्यति भविष्यत्येवेष्यते नेह हन्तीति पलायते इच्छार्थेषु लिङ्लोटौ इच्छामि भुंजीत भुंक्तां वा भवा
न् एवं कामये प्रार्थये इत्यादि प्रयोगे विबोध्यम् काम प्रवेदन इति वक्तव्यम् नेह इच्छन् करोति लिङ् च समानकर्त्तृकेषु
उपपदेषु लिङ् स्यात् भुंजीयेतीच्छति इच्छार्थेभ्यो विभाषा वर्त्तमाने लिङ् स्यात् पक्षे लट् इच्छेत् इच्छति कामयेत का
मयते विधिनिमंत्रणेति लिङ् विधौ यजेत निमंत्रणे इह भुंजीत भवान् आमंत्रणे इहासीत अधीष्टे पुत्रमध्यापयेद्भवान्
संप्रश्ने किं भो वेदमधीयीय उत तर्कम् प्रार्थने भोजनं लभेय एवं लोट् प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च प्रैषो वि
धिः अतिसर्गः कामचारानुज्ञा भवता यष्टव्यम् भवान् यजताम् चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थम् लिङ् चोर्ध्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ एधितव्यं एधनीयं त्वया भावे औत्सर्गिकमेकवचनं क्लीबत्वं च चेतव्यश्चयनीयो वा धर्मस्त्वया वसेस्तव्यत्कर्तरि णिच्च वसती
उ॰ तिवास्तव्यः केलिमर उपसंख्यानं पचेलिमा माषाः पक्तव्याः भिदेलिमाः सरलाः भेत्तव्याः कर्मणि प्रत्ययः वृत्तिकारस्तु कर्म
८२ कर्तरि चायमिष्यते इत्याह तद्भाष्यविरुद्धं कृत्यचः उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्
प्रयाणीयं अचः किं प्रमग्नः निर्विण्णस्योपसंख्यानं अचः परत्वाभावात् नकारेण व्यवधानाद्वा मा भूदिति वचनं परस्य ण
त्वे पूर्वस्यासिद्धत्वं निर्विण्णः णेर्विभाषा उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्स्थस्य नस्य णो वा स्यात्
९२ प्रयापणीयं प्रयापनीयं विहितविशेषणं किं प्रकाश्यवधाने यथा स्यात् प्रयाप्यमाणं पश्य णत्वे तु उर उपसर्गत्वं
नेत्युक्तं उर्याणं उर्यापनं हलश्चेजुपधात् हलादेरिजुपधात्कृत्स्थस्याचः परस्य णो वा स्यात् प्रकोपणीयं प्रकोपनीयं
हलः किं प्रोहणीयं इजुपधात्किम् प्रवपणीयं इजादेः सनुमः सनुमश्चेद्भवति इजादेर्हलन्ताद्विहितो यः कृत्स्थस्य
स्यैव प्रेङ्खणीयं इजादेः किं प्रमङ्गनीयं नुम्ग्रहणं अनुस्वारोपलक्षणार्थं अट्कुप्वाङिति सूत्रेऽप्येवं
तेनेह न प्रेन्वनं इह तु स्यादेव प्रोम्भणं वा निंसनिक्षनिन्दां एषां नस्य णो वा स्यात् कृति परे प्रणिंसितव्यं प्रनिंसितव्यं नभा
भूपूकमिगमिप्यायीवेपां एभ्यः कृत्स्थस्य नस्य णो न प्रभानीयं प्रभवनीयं पूञ एवेह ग्रहणमिष्यते पूङस्तु प्रपवणीयः राम॰
सोमः ण्यन्तभादीनामुपसंख्यानं प्रभापनीयं क्षुभ्नादिः शस्ययोर्वेत्यस्य णत्वप्रकरणे पठितत्वात् यत्वस्मात् सिद्धत्वेन यत्ना ८२
व्यवधानान्न णत्वं प्रख्यानीयं कृत्यल्युटो बहुलं स्नात्यनेन स्नानीयं चूर्णं दीयतेऽस्मै दानीयो विप्रः अचो यत् अजं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नं सातस्यार्थे: एककर्तृकं वर्तमानं यातीत्यस्य इति शब्दस्त्वभेदान्वयेनात्यर्थं ग्राहयति एवं यातः याति यासि याथः याथ प
या२ से यात यातेति पूर्वं याथ याहि यासीत्यमीत् यास्यतिवा अधीष्वाधीष्वेत्यधीते वं विषये पक्षे अधीध्वमधीध्वमिति
पूर्वमधीध्वे समुच्चये सक्तून् पिबथा नाः खादेत्यभ्यवहरति अन्नं भुंक्ष्व दाधिकमास्वादस्वेत्यभ्यवहरते तथ्वमोसक्तू पि
बते खादतेत्यभ्यवहरथ भुङ्ध्वम् आस्वादध्वमित्यभ्यवहरध्वे पक्षे हिस्वो अत्र समुच्चयमानविशेषाणामनुप्रयोगार्थे
न सामान्येनान्वयः पक्षे सक्तून्पिबति धानाः खादति अन्नं भुङ्क्ते दाधिकमास्वादते एतेन पुरीमवस्कंद लुनीहि नंदनं
मुषाणरत्नानि हराम रांगनाः विगृह्य चक्रेन मुनिद्विषावलीयं इत्यमस्यास्य महानि पोदिवः ॥१॥ इति व्याख्यातम् ॥
अवस्कन्दनलवनादि रूपभूतानयतनपरीक्षाएककर्तृकास्वास्य क्रियेत्युर्यात् इह पुनः प्रनुष्यस्कन्देत्यादिरर्थ इति तु
व्याख्यानं भूमण्डलकमेव द्वितीयस्तु क्रियासमभिहार इत्यस्याः उक्तेः लोडन्तस्य द्वित्वापत्तेश्च पुरीमवस्कन्देत्यादि
मध्यमपुरुषैकवचनमित्यपि केषांचिद्भ्रम एव पुरुषवचनसंज्ञेतु इह नेत्युक्तत्वात् ॥ इति लकारार्थप्रक्रिया ॥०
॥ इति श्रीमद्भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां तिङन्तप्रक्रिया समाप्ता ॥ ॥०॥ श्रीमहागणाधिपतये नमः ७४
धातोः आतृतीयसमाप्तेरधिकारोयं तत्रोपपदं सप्तमीस्थं कृदतिङ् वासरूपोऽस्त्रियां परिभाषेयं अस्मिन्धात्वधिकारे
ऽसरूपोपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना कर्त्तव्याः अधिकारोयं एवुल्तृचौ भावे कर्त्तरि कृत् इति
प्राप्ते तयोरेव कृत्यक्तखलर्थाः एतेभावकर्मणोरेव स्युः तव्यत्तव्यानीयरः धातोरेते प्रत्ययाः स्युः तकाररेफौ स्वरार्थौ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कृत्यप्रत्ययाः कर्तरि स्यात२

सि॰कौ॰ उ॰ ८३ स्योवा अनयोः किं आर्यो ब्राह्मणः प्राप्तव्य इत्यर्थः उपसर्याकाल्या प्रजने गर्भग्रहणे प्राप्तकाला चेदित्यर्थः उपसर्या गौः
गर्भाधानार्थं वृषभेणोपगंतुं योग्येत्यर्थः प्रजने काल्येति किं उपसार्या काशी प्राप्तव्येत्यर्थः अजर्यं संगतं नञ्पूर्वात् जीर्यतेः
कर्त्तरि यत् संगतं चेद्विशेष्यं न जीर्यतीति इत्यर्थः तेन संगतमार्यं रामाजर्यं कुरुष्व तं इति भट्टिः मृगे रजर्यं जरसोपदिष्टमदेहबं
धाय पुनर्बबंधे पुत्रानु संगतमिति विशेष्यमध्याहार्यं संगतं किं अजरिता कंबलः भावेतु संगतकर्त्तकेपि एवंदेव अजार्यं सं
गतेन वदः सुपि क्यप् च उत्तरसूत्रादिह भावइत्यानुवर्त्यते वदेर्भावे क्यप् स्याद्यत् अनुपसर्गे सुप्युपपदे ब्रह्मोद्यं ब्रह्मव
द्यं ब्रह्मवेदस्तस्य वदनमित्यर्थः कर्मणि प्रत्यया वित्येके उपसर्गे तु एवं देव अनुवाद्यं अपवाद्यं भुवो भावे क्यप् ब्रह्मणो भावो
ब्रह्मभूयं सूपीत्येव भव्यं अनुपसर्ग इत्येव प्रभव्यं हनस्त च अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप् स्यात्तकारश्चांतादेशः ब्रह्म
णो हननं ब्रह्महत्या स्त्रीत्वं लोकात् एतिस्तुशास्वृदृजुषः क्यप् एभ्यः क्यप् स्यात् हृस्वस्य पिति कृति तुक् इत्यः स्तुत्यः शास
इदङ्हलोः शिष्यः वृ इति वृञो ग्रहणं न वृङः वृत्यः वृङस्तु वार्या ऋत्विजः आदृत्यः जुष्यः पुनः क्यब्ग्रहणं परस्यापि एव
तो बाधनार्थं अवश्यस्तुत्यः शंसिदुहिगुहिभ्यो वेति काशिका शस्यं शंस्यं दुह्यं दोह्यं गुह्यं गोह्यं प्रशस्यस्य श्रः ईडवं
दशंसदुहां ण्यत इति सूत्रस्य वृत्तौ ईड्यः सिद्ध इत्यनयोस्तु मूलं मृग्यं आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानं आज्यं घृतमिति
हलचादिषु बाहुलकात् करणे क्यप् अनिदितामिति नलोपः आज्यं ॠदुपधाच्चाक्लृपिचृतेः क्यप् वृत् वृत्यं वृध् वृध्यं कृ राम॰ ८३
पिचृत्योस्तु कल्प्यं चर्त्यं तपरकरणं किं कृत् कीर्त्यं अनित्यता च्युरादयः इति णिजभावे एवं तत् णिजंतात्तु यदेव ईचेवितनः

83

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ताद्धातोर्यत्स्यात् चेयं जेयं अजन्तलक्षणं शक्यमकर्तुं योगविभागो ह्येवं तव्यदादिष्वयतोपि प्रसक्तत्वात् ईयति प्रतिषेधश्चा
तर्हेतस्य गुणः देयं ग्लेयं तकिशसिचतियतिजनिभ्यो यद्वाच्यः तक्यं शस्यं चत्यं यत्यं जन्यं जनेर्यद्विधिः स्वरार्थः एयता
पि च प्रसिद्धेः न च वृद्धिप्रसंगः जनिवध्योश्चेति निषेधात् हनो वा यद्वधश्च वक्तव्यः वध्यः पक्षे वक्ष्यमाणेन ण्यत् घात्यः पोरे
अदुपधात् यत् स्यात् ण्यतोपवादः शप्यं लभ्यं नानुबंधकृतमसारूप्यं अतो न ण्यत् तव्यादयस्तु स्युरेव आङो यि आङः
परस्य लभेर्नुमस्याद्यादौ प्रत्यये विवक्षिते नुमि कृते उपधत्वाभावात् ण्यदेव आलभ्यो गौः उपात्प्रशंसायां उपलभ्यः सा
धुः स्तुतौ किं उपलब्धुं शक्य उपलभ्यः शकिसहोश्च शक्यं सह्यं गदमदचरयमश्चानुपसर्गे गद्यं मद्यं चर्यं यम्यं चरेरा
ङि चागुरौ आचर्यो देशः गन्तव्य इत्यर्थः अगुरौ किं आचार्यो गुरुः यमेर्नियमार्थं सोपसर्गान्माभूदिति प्रयाम्यं निर्वास्या
देव तेन न तत्र भवेद्धि नियम्यमिति वार्त्तिकप्रयोगात् एतेनानियम्यस्य नायुक्तिः त्वयानियम्यानन्तुदिवाचत्त्वेषु स्यादिवा
ख्यातं नियमेसाधुरितिवा अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु वदेर्नञ्युपपदे वदः सुपीति यत् क्यपोः प्राप्तयोः
यदेव सोपि गर्ह्यायामेव उभयार्थे निपातनं अवद्यं पापं गर्ह्य इति किं अनुद्यं गुरुनाम तद्धि न गर्ह्यं वचनानर्हं च आत्मनाम
गुरोर्नाम नामाति कृपणस्य च श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोरिति स्मृतेः १ पण्या गौः व्यवहर्त्तव्येत्यर्थः
पाण्यमन्यत् स्तुत्यर्हमित्यर्थः अनिरोधोऽप्रतिबन्धः तस्मिन्विषये वृङो यत् शतेन वर्या कन्या वार्यान्या वह्यं करणं
वहेस्त्वनेन वह्यं शकटं करणे किं वाह्यं वोढव्यं अर्यः स्वामिवैश्ययोः ऋगतौ अस्माद्यत् ण्यतोपवादः अर्यः स्वामी वै

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३२२९

सि॰ कौ॰ नखरुष्य इत्यर्थः रूहसमीकरणार्थं स्थूलकाष्ठं स्नुतनुविपर्यं वनेयं जेयंच भस्त्रिस्यां यदे स्कंदति इतिवक्तव्यं प्रतियत्नं

उ॰ अपियहं लोकेतुप्रतिग्राहं अपिग्राहं वशात् वैराग्यात्पाय स्योपच अवग्रहं प्रग्राहं पदं अस्वैरिपरातंत्रं ग्रहकाः शुका

७४ पंजरादिबंधनेनपरतंत्रीकृता इत्यर्थः वाह्यायां ग्राम ग्रहणसेना ग्रामबहिर्भूता इत्यर्थः स्त्रीनिर्देशात्पुंनपुंसकयोर्न पुंरोह्भवः

पक्ष्याः दिग्गादिश्वायत् आर्य गृह्यते आर्यगृह्यः तत्पक्षाश्रित इत्यर्थः विभाषाकृवृषोः कृत्यः वा स्यात् कृत्यं वृष्यं पक्षे ऋहलो

ण्यत् अवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् स्यात् कार्यं वर्ष्यं योग्यंच पत्रे पत्रेवाहने युग्यो गौः योग्यमन्यत् अत्र काप्रकुत्वं च निपा

८४ त्यते अमावस्यदन्यतरस्याम् अमोपपदाद्वसेरधिकरणे ण्यत् वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते अमा सह वसतोस्यां चन्द्रार्कौ

इत्यमावास्या अमावस्या ऋहलोर्ण्यत् चजोःकुघिण्ण्यतोः कुत्वं पाक्यं पाणिः ऋजेर्ण्यत् वाच्यः ऋदुपधलक्षणस्य क्यपोपवादः

पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः समवपूर्वाच्च समवसर्ग्या नक्वादेः क्वादेर्धातोश्चजोः कुत्वं न गर्ज्यं वार्त्तिककार

स्तु चजोः कुघिण्ण्यतोः इति सूत्रे निष्ठायामनिट इतिपूरयित्वा न क्वादेरित्यादि प्रत्याचख्यौ तेन अर्जितर्जिप्रभृतीनां न कुत्वं निष्ठायां से

ट्त्वात् गुज्ञुग्लुचुप्रभृतीनां क्वादित्वेपि कुत्वं स्यादेव सूत्रमते यद्यपि विपरीतं प्राप्तं तथापि यथोत्तरं मुनीनां प्रामाण्यं ।

अजिव्रज्योश्च न कुत्वं हल्श्चेति घञ् समाजः परिव्राजः भुजन्युब्जौ पाण्युपतापयोः एतयोरेतौ निपात्येते भुज्यते अने साम॰

हलश्चेति घञ् २ नेति भुजः पाणिः न्युब्जन्त्यस्मिन्निति न्युब्जः उपतापो रोगः पाण्युपतापयोः किं भोगः समुद्गः प्रयाजानुयाजौ यज्ञाङ्गे एतौ ७४

निपात्येते यज्ञाङ्गे पंचप्रयाजाः त्रयोनुयाजाः यज्ञाङ्गे किं प्रयागः वंचेर्गतौ कुत्वं न वंच्यं गतौ किं वंक्यं काष्ठं कुटिलीकृ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेर पुरु तेर

धोत्वप्र आक्रूणः टेयं इचेति कृत्यः सुपठः भृञोऽसंज्ञायां भृत्याः कर्मकराः भर्तव्या इत्यर्थः क्रियाशब्दोयं नतु संज्ञा समश्च ब
हुलं संभृत्याः संभार्याः असंज्ञायामेव विकल्पार्थमिदं वार्त्तिकं असंज्ञायां किम् भार्या नाम क्षत्रियाः अथ कथं भार्या वधूरिति
इह हि संज्ञायां समजेति क्यपा भाव्यं संज्ञापर्युदासस्तु पुंसि चरितार्थः सत्यं विभर्त्तेः भृञ इति दीर्घोपात्तात् डुभृञादेर्वा ण्यत् कानुभृञने
रेव तदनुबंध इति परिभाषया मृजेर्विभाषा मृजेः क्यब्वा स्यात् पक्षे ण्यत् मृज्यः चजोः कु घिण्ण्यतोः चजोः कुत्वं स्या
त् घिति ण्यति च परे मृजेर्वृद्धिः मार्ग्यः न्यंक्वादीनां च कुत्वं स्यात् न्यंकुः नावं चेति ल्युप्रत्ययः राजसूयसूर्यमृषोद्यरुच्यकु
प्यकृष्टपच्याव्यथ्याः एते सप्त क्यबंता निपात्यंते राज्ञा सोतव्यो अभिषवद्वारा निष्पादयितव्यो वा लतात्मकः सोमो राज्ञा
सः सूयते कंडूयते ऽत्र वाधिकरणे क्यप् निपातनाद्दीर्घः राजसूयः राजसूयं अर्द्धर्चादिः सरत्याकाशे सूर्यः कर्तरि क्यप् निपात
नादुत्वं यद्वा षू प्रेरणे तुदादिः सुवति कर्मणि लोकं प्रेरयति क्यपो रुट् मृषोपपदाद्वदेः कर्मणि नित्यं क्यप् मृषोद्यं विपोद्यं नि
पोपु उज्झ्य सौदर्यं गुणा मृषोद्याः रोचते रुच्यः गुपेरादेः कत्वं च संज्ञायां सुवर्णरजतभिन्नं धनं कुप्यं गोप्यमन्यत् कृष्टे
स्वयमेव पच्यंते कृष्टपच्याः कर्मकर्त्तरि शुद्धे तु कर्मणि कृष्टपाक्याः न व्यथते अव्यथ्यः भिद्योद्ध्यौ नदे भिदेरुज्झेश्च क्यप् उज्झे छ्व४
र्धत्वं च भिनत्ति कूलं भिद्यः उज्झत्युदकमुद्ध्यः नदे किं भेत्ता उज्झिता पुष्यसिध्यौ नक्षत्रे अधिकरणे क्यप् निपात्यते पुष्यं
त्यस्मिन्नर्था इति पुष्यः सिध्यंत्यस्मिन्नर्था इति सिध्यः विपूयविनीयजित्या मुंजकल्कहलिषु पूञ्नीञ्जिभ्यः क्यप् वि
पूयो मुंजः रज्वादिकरणाय शोधयितव्य इत्यर्थः विनीयः कल्कः पिष्ट औषधविशेष इत्यर्थः पापमिति वा जित्यो हलिः वले

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुपचेयं ३

सि.कौ. उ. ८५ चेति यत्। पीयते अनया सामिधेनीति पाय्या ऋक्। क्रतौ कुंडपाय्यसंचाय्यौ। कुंडेन पीयतेऽस्मिन्सोमः कुंडपाय्यः क्रतुः।
संचीयतेऽसौ संचाय्यः यज्ञः। अग्नौ परिचाय्योपचाय्यसमूह्याः। अग्निधारणार्थस्थलविशेषे एते साधवः। अन्यत्र तु प
रिचेयं संचाय्यं चित्याग्निचित्ये च। चीयतेऽसौ चित्योऽग्निः। अग्नेश्चयनमग्निचित्या। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च
त्वया गंतव्यं गमनीयं गम्यं वा इह लोटा बाधा माभूदिति पुनः कृत्यविधिः स्त्र्यधिकारादूर्ध्वं वासविधिः क्वचिन्नेति ज्ञापय
ति तेन क्तल्युट्तुमुन्खलर्थेषु नेति सिद्धं। अर्हे कृत्यतृचश्च। स्तोतुमर्हः स्तुत्यः स्तुतिकर्म स्तोता स्तुतिकर्ता लिङा बाधा
८५ माभूदिति कृत्यतृचोर्विधिः। भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा। एते कृत्यान्ताः कर्तरि वा निपात्यंते पक्षे
तयोरेवेति सकर्मकात्कर्मणि अकर्मकाच्च भावे ज्ञेयाः। भवतीति भव्यः भव्यमनेन वा गायतीति गेयः साम्नामयं गे
यं साम। अनेन वा इत्यादि। शकि लिङ् च। चात्कृत्याः। वोढुं शक्यो वोढव्यः वहनीयो वाह्यः लिङा बाधा माभूदिति
कृत्योक्तिः लाघवादनेनैव ज्ञापनसंभवे मेवाति सूचे कृत्याश्चेति सृजज्ये अर्हे कृत्यतृचोर्ग्रहणं च ॥ इति
कृत्यप्रक्रिया॥ ण्वुल्तृचौ धातोरेतौ स्तः कर्तरि कृदिति कर्त्रर्थे। वुरनाको कारकः कर्ता वोढुमर्हो वोढा का
रिका कर्त्री गाङ् कुटादिभ्योऽञ्णिन्ङित्। कुटिता अञ्णित्विति किं ङित्त्वं कोटकः विज इट् विजिता हनस्तोऽचिण्णलोः घा
तकः आतो युक् दायकः नोदात्तोपदेशस्येति न वृद्धिः शमकः दमकः अनिट्स्तु नियामकः जनिवध्योश्च जन ८५
कः वधहिंसायां वधकः रधिजभोरचि रंधकः जंभकः नेड्वशि कृति रधेः रधिता रद्धा मस्जिनशोर्झलीति नुम् मङ्क्ता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वमित्यर्थः ओक उचः के। उचेर्गुणः कुत्वं निपात्यते के परे ओकः शकुन्तपक्षी उयुपपत्स्तालंकः घञन्तादिदं ओतोदात्त
मिदं ण्यत आवश्यके कुत्वं न आवश्यपाक्यं यजयाचरुचप्रवचर्चश्च ण्यति कुत्वं न याज्यं याच्यं रोच्यं प्रवाच्यं ग्रंथवि
शेषः अर्च अर्च्यं ऋदुपधत्वेपि अत एव ज्ञापकात् ण्यत् त्यजेश्च त्याज्यं त्यजि पूजोश्चेति काशिका तत्र शजेर्ग्रहणं
चिंत्यं भाष्यानुक्तत्वात् ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति भाष्यं वचोऽशब्दसंज्ञायां वाच्यं शब्दसंज्ञायां तु वाक्यं प्रयोज्य
नियोज्यौ शक्यार्थे प्रयोक्तुं शक्यः प्रयोज्यः नियोज्यो भृत्यः भोज्यं भक्ष्ये भोग्यमन्यत् ण्यत्प्रकरणे लपिदभिभ्यां चेति व
क्तव्यं लाप्यं दभिर्धातुषु पठितोपि वार्तिकवलात्स्वीकार्यः दाभ्यः ओरावश्यके उवर्णान्तात् ण्यत् स्यात् आवश्य
भावे द्योत्ये लाव्यं पाव्यं आसुयुवपिरपिलपित्रपिचमश्च ण्यत् सुञ् आसाव्यं युमिश्रणे याव्यं वाप्यं राप्यं लाप्यं त्रा
प्यं आचाम्यं आनाय्योऽनित्ये आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते दक्षिणाग्निविशेष एवेदं सुहिगार्हपत्या
दानीयते अनित्यश्च सततमप्रज्वलनात् आनेयोऽन्यः घटादिः वैश्यकुलादेरानीतो दक्षिणाग्निश्च प्रणाय्योऽसंमतौ
संमतिः प्रीतिविषयीभवने कर्मव्यापारः तथा भोगेष्वादरोपि संमतिः प्रणाय्यश्चोरः प्रीत्यनर्हः इत्यर्थः प्रणाय्योऽन्ते
वासी विरक्त इत्यर्थः प्रणेयोऽन्यः पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु मीयते अनेन पाय्यं
मानं ण्यत् धात्वादेः पत्वं च आतो युक् इति युक् सम्यक् नीयते होमार्थं अग्निं प्रतीति सान्नाय्यं हविर्विशेषः ण्यदायादे
शः समो दीर्घश्च निपात्यते निचीयते अस्मिन्धान्यादिकमिति निकाय्यो निवासः अधिकरणे ण्यत् आय् धात्वादेः कुत्वं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ ८६

इड्निषेधः । चेक्रियः । नेन्यः । लोलुवः । पोपुवः । मरीमृजः । चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यं । आगमस्यदी
र्घत्वसामर्थ्यादभ्यासह्रस्वो हलादिशेषश्च न । चराचरः । चलाचलः । पतापतः । वदावदः । हन्तेर्घत्वं च । घत्वमभ्यासस्य उत्वं स्यात् । अभ्या
साच्चेति कुत्वं । घनाघनः । पाटेर्णिलुक् चोक् दीर्घश्चाभ्यासस्य । पाटूपटः । पक्षे चरः चलः । पतः । वदः । हनः । पाटः । रात्रेः कृतीति वा नु
म् । रात्रीचरः । रात्रिचरः । इगुपधज्ञाप्रीकिरः कः । एभ्यः कः स्यात् । क्षिपः । लिखः । बुधः । कृशः । ज्ञः । प्रीणातीति प्रियः । किरतीति किरः ।
वासरूपविधिना ण्वुल्तृचावपि । क्षेपकः । क्षेप्ता । आतश्चोपसर्गे कः स्यात् । श्याद्व्यधेति णस्यापवादः । सुग्लः । प्रज्ञः । पाघ्राध्माधेट्
96 दृशः शः । पिबतीति पिबः । जिघ्रः । धमः । धयः । धया कन्या । धेटष्टित्वात्तन्त्रे धयीति त्वणीवङीप् प्राप्तः स्वपोऽन्यत्र नेष्यत इति ह
रदत्तः । पश्यतीति पश्यः । घ्रः संज्ञायां न व्याघ्रादिभिरिति निर्देशात् । अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्य
श्च शः स्यात् । लिम्पः । विन्दः । कर्त्तरि शप् । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखार्थः सौत्रो हेतुमण्ण्यन्तः । सातयः । वा स
रूपन्यायेन क्विपि स्यात् परमात्मा सात्वेनो भक्ताः । षह मर्षणे चुरादिः हेतुमण्ण्यन्तो वा । साहयः । अनुपसर्गात् किं । प्रलिपः । नौ लि
म्पेर्वाच्यः । निलिम्पा देवाः । गवादिषु विन्देः संज्ञायां । गोविन्दः । अरविन्दः । ददातिदधात्योर्विभाषा शः स्यात् । शपः । श्नाभ्यस्तयोरातः ।
ददः । दधः । पक्षे वक्ष्यमाणो णः । अनुपसर्गादित्येव । प्रदः । प्रधः । ज्वलितिकसन्तेभ्यो णः । इति शब्दः आद्यर्थः । ज्वलादिभ्यः कसन्ते । राम॰
भ्यो णः स्यात् वा पक्षे अच् । ज्वालः । ज्वलः । चालः । चलः । अनुपसर्गादित्येव । उज्ज्वलः । तनोतेरुपसंख्यानं । इह अनुपसर्गादिति वि ८६
भाषेति च न संबध्यते । अवतनोति इत्यवतानः । श्योधास्नुसंस्रूणामवसावहालिहश्लिषश्वसश्च । श्येङ्प्रभृतिभ्यो नित्यं णः स्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेष्टा नर्पिता रंभेरभन्नलिटोः रंभकः रब्धा लभेश्च लंभकः लब्धा लीप सह एषिता एष्टा सहिता सोढा दरिद्रातेरा
लोपः दरिद्रिता ण्वुलिनदरिद्रायकः कृतमल्युट् इत्येव सूत्रमस्तु यत्रविहितास्ततोन्यत्रापि स्युरित्यर्थात् एवं च बहुलग्रह
णं योगविभागेन कृत्कात्रस्य अर्थस्य वहाराथं पादाभ्यां ह्रियते पादहारकः कर्मणि [illegible] ल् क्रमेः कर्त्र्यात्मनेपदविषया रवु३
त्कृत इति निषेधो वाच्यः प्रक्रंता क्रमितेति किं प्रक्रमितव्यं आत्मनेपदेति किं संक्रमिता अनन्यभावविषयशब्दः तदन्यावि
षयत्वे सति तद्विषयत्वमनन्यभावः तेनानुपसर्गादेति विकल्पाहेस्यन निषेधः क्रमिता तदर्हत्वमेव तद्विषयत्वं तेनत्रो
तेत्यपि केचित् गमेरिडित्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयति सजिगमिषिता एतेन भ्यः स्वतुर्भ्यः विवृत्सिताय
ऊँनारण्वुल् अल्लोपस्य स्थानिवत्वान्न वृद्धिः पापचकः यङ्लुगंतात्तु पापाचकः नंदिग्रहिपचादिभ्यो ल्युणिन्यचः नंद्यादे
ल्युः ग्रहादेर्णिनिः पचादेरच् नंदयतीति नंदनः जनमर्दयतीति जनार्दनः मधुसूदनः विशेषयतीति विभीषणः।
लवणः नंद्यादिगणे निपातनात् णत्वं ग्राही स्थायी मंत्री वि [illegible] यी युग्भावो निपातनात् विषयी इहणत्वमपि परिभावी प श५
रिभवी पाक्षिको युग्भावो निपात्यते पचादिराकृतिगणः शिवशमरिष्टस्य करे कर्मणि घटोऽठच् इति सूत्रयोः करोते घेटे
श्व अच्प्रयोगात् अचप्रत्यये परे यङ्लुक् विधानाच्च केषांचित् पाठस्तु अस्तु वेधा संजनार्थः केषांचित् प्रपंचार्थः केषांचि
द्बाधकबाधनार्थः पचतीति पचः नदट् चोरट् देवट् इत्यादयष्टितः नदी चोरी देवी दीव्यतेरिगुपधेति कः प्राप्तः।
जारभरा श्वपचा अनयोः कर्मण्युपपदे प्राप्तः न्यङ्क्वादिषु पाठात् श्वपाकोपि पचेश्चिचेति लुक् नथातुलोपइतिगुण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰
८७

87

प्रतीक्षावक्तुरसमा कथं तर्हि गंगाधरभूधरादयः कर्मणः शेषत्वविवक्षायां भविष्यंति कोशामश्व आतः स्यात् कापवादः स्व
र्गं ह्वायः तंतुवायः धान्यमायः आतोऽनुपसर्गे कः आदंतात् धातोरनुपसर्गात् कर्मण्युपपदे कः स्यात् णोपवादः आतो लोप
इटि च गोदः पार्ष्णित्रं अनुपसर्गे किं गोसंदायः कविधौ सर्वत्र संप्रसारणिभ्यो डः ब्रह्मजिनाति ब्रह्मज्यः सर्वत्र ग्रहणात् सोप
सर्गे आह्वः सुपि स्थः सुपीति योगो विभज्यते सुप्युपपदे आदंतात् कः स्यात् द्वाभ्यां पिबतीति द्विपः समस्थः विषम
स्थः ततः स्थः सुपि तिष्ठतेः कः स्यात् आरंभसामर्थ्याद्भावे आखूनामुत्थानं आखूत्थः प्रष्ठोऽग्रगामिनि प्रतिष्ठत इति प्र
ष्ठो गौः अग्रतो गच्छतीत्यर्थः अग्र इति किं प्रस्थः अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंक्वंगुमंजिपुंजिपरमेबर्हिर्दि
व्यग्निभ्यस्स्थः स्थ इति कृत्प्रत्ययांतस्यानुकरणं षष्ठ्यर्थे प्रथमा एभ्यः स्थस्य सस्य षः द्विष्ठः त्रिष्ठः इत ऊर्ध्वं कर्मणि सुपी
त्यस्य संबंधः तुंदशोकयोः परिमृजापनुदोः तुंदशोकयोः कर्मणोरुपपदयोः आभ्यां कः स्यात् आलस्यसुखाहरणयोः
रिति वक्तव्यं तुंदं परिमृज्य शेते इति तुंदपरिमृजोऽलसः शोकापनुदः सुखस्य आहर्ता आलस्यादन्यत्र तुंदपरिमार्ज एव पश्च
संसारासारत्वोपदेशेन शोकमपनुदति स शोकापनोदः कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं मूलानि विभुजति
मूलविभुजो रथः आकृतिगणोऽयं महीध्रः कुध्रः गिलतीति गिलः प्रे दाज्ञः दाञ्ज्ञाभ्यां प्रोपसृष्टात्कर्मण्युप
पदे कः स्यात् अणोऽपवादः सर्वप्रदः पथिप्रज्ञः अनुपसर्ग इत्युक्तेः आदन्यस्मिन्नसति न कः गोसंप्रदायः समि ख्यः राम॰
गोसंख्यः गापोष्टक् अनुपसृष्टाभ्यां आभ्यां टक् स्यात् कर्मण्युपपदे सामगः सामगी उपसर्गे तु सामसंगायः पि ८७

...त्राकर्मकेषु सुपी
...त्यस्य संबंधः ८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्र पेयेऽ वे पयते स्थादंतत्वान्मिश्रे पृथग्ग्रहणं उपसर्गैकं वाधितुं अवश्यायः प्रतिश्यायः आत् दायः धायः स्नुगतो आङ्पूर्वः सं
पूर्वश्च आस्रावः संस्रावः अत्यायः अवसायः अवहारः लेहः श्लेषः श्वासः इणो रंजुपसर्गे णः स्यात् इनोतीति दावः नीसा
हचर्यात् सानुबंधात् इणोतेरेवणः ववतेस्तुपचाद्यच् द्रवः नयति इति नायः उपसर्गे तु प्रद्रवः प्रणायः विभाषाग्रहः गोवा पतेश्च
र व्यवस्थित विभाषेयं तेन जलचरे ग्राहः ज्योतिर्विग्रहः भवतेश्च इति काशिका भवो देवः संसारश्च भावाः पदार्थाः भाष्यकार
मतेतु भाष्यार्थाच्च णादिर्णपंता द्वचभावः गेहे कः गेहे कर्तरि ग्रहेः कः स्यात् गृह्णाति धान्यादिकमिति गृहं तात्स्थ्याद्गृहाः दाराः
शिल्पिनि ष्वुन् क्रियाकौशलं शिल्पं तद्वति कर्तरि ष्वुन् स्यात् नृतिखनिरंजिभ्य एव नर्त्तकः नर्त्तकी खनकः खनकी आसि अवेनैव
रंजेर्नलोपो वाच्यः रजकः रजकी भाष्यमतेतु नृतिखनिभ्यामेव रंजेस्तु कुन् शिल्पिविसंज्ञयोरिति कुन् टाप् रजिका पुंयोगेतु
रजकी गस्थकन् गायतेस्थकन् स्यात् शिल्पिनि कर्त्तरि गाथकः ण्युट् च गायनः हित्वा गायनी हश्च व्रीहिकालयोः हाकः
हाङ्श्च ण्युट् स्यात् व्रीहौ काले च कर्तरि जहात्युदकमिति हायनो व्रीहिः जहाति भावानिति हायनो वर्षं जिहीते प्राप्नोति वा
प्रुसृल्वः समभिहारे वुन् समभिहारग्रहणेन साधुकारित्वं लक्ष्यते प्रवकः सरकः लवकः आशिषि च आशीर्विषयार्थहे
तेर्धातोर्वुन् स्यात् कर्त्तरि जीवतात् जीवकः नंदतात् नंदकः आशीः प्रयोक्तृधर्मः आशासितुः पित्रादेरियमुक्तिः कर्मण्य
ण् कर्मण्युपपदे धातोरण्प्रत्ययः स्यात् उपपदसमासः कुंभं करोतीति कुंभकारः आदित्यं पश्यतीत्यादावनभिधानान्न शीलि
कामिभक्ष्याचरिभ्यो णः अणोपवादार्थं वार्त्तिकं मांसशीला मांसकामा मांसभक्षा कल्याणाचारा ईक्षिक्षमिभ्यांच सुख

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नि। बाहुलकात् इति हरदत्तः॥ पूर्वे कर्त्तरि॥ कर्तृवाचिनि पूर्वशब्दे उपपदे सर्त्तेष्टः स्यात् पूर्वः सरतीति पूर्वसरः कर्त्तरि किं
पूर्वं देशं सरतीति पूर्वसारः॥ कृञो हेतुताच्छील्यानुलोम्येषु॥ एषु द्योत्येषु करोतेष्टः॥ अतः कृकमीतिसः यशस्करी वि
द्या॥ श्राद्धकरः वचनकरः॥ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्या
जंघाबाह्वहर्यत्तद्धनुररुष्षु॥ एषु कृञष्टः स्यात् अहेत्वाद्यर्थमपि दिवा करोतीति दिवाकरः विभाकरः निशाकरः कस्कादि
त्वात्सः भास्करः बहुकरः बहुशब्दस्य वैपुल्यार्थे संख्यापेक्षया पृथग्ग्रहणं लिपिलिबिशब्दौ पर्यायौ संख्या एककरः द्वि
९९ करः कस्कादित्वादहस्करः नित्यं समासेनुत्तरपदस्थस्येति षत्वं धनुष्करः अरुष्करः किंयत्तद्बहुषु कृञोऽज्विधानमिति वार्त्ति
के किंकरा यत्करा तत्करा हेत्वादौ टं बाधित्वा परत्वादच् पुंयोगे ङीष् किंकरी॥ कर्मणि भृतौ॥ कर्मशब्दे उपपदे करोतेष्टः
स्यात् कर्मकरो भृतकः कर्मकारोन्यः॥ न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु॥ एषु कृञष्टो न हेत्वादिषु प्राप्तः प्रति
षिध्यते शब्दकार इत्यादि॥ स्तम्बशकृतोरिन्॥ व्रीहिवत्सयोरिति वक्तव्यं स्तम्बकरिर्व्रीहिः शकृत्करिर्वत्सः व्रीहिवत्सयोरिति
किं स्तम्बकारः शकृत्कारः॥ हरतेर्दृतिनाथयोः पशौ॥ दृतिनाथयोरुपपदयोरिन् स्यात् पशौ कर्त्तरि दृतिं हरतीति दृतिहरिः
नाथहरिः नासारज्जुं हरतीति नाथहरिः पशौ किं दृतिहारः नाथहारः॥ फलेग्रहिरात्मम्भरिश्च॥ फलानि गृह्णातीति फलेग्रहिः॥
उपपदस्यैदन्तत्वं ग्रहेरिन् प्रत्ययश्च निपात्यते आत्मानं बिभर्त्तीति आत्मम्भरिः आत्मनो मुमागमः भृञ इन् चात्कु। राम॰ ८८
क्षिंभरिः चाद्वा अस्तु आत्मोदरकुक्षिष्विति पठेतुः ज्योत्स्नाकरंभमुदरंभय श्लोको राः अतिमुरारिः॥ एजेः खश्॥ एजन्तादेजेः ख

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वते। सुरापी श्रीधोरिति वाच्यं सुरापी शिधुपी अन्यत्र सीरपा ब्राह्मणी सुरां पाति रक्षतीति सुरापा हरतेरनुद्यमनेऽच् अं-
शहरः अनुद्यमने किं भारहारः। शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानं शक्तिग्रहः लाङ्गल-
ग्रहः सूत्रे च धार्यर्थे सूत्रग्रहः प्रस्तु सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव सूत्रग्राहः वयसि च उद्यमनार्थं
सूत्रं कवचहरः कुमारः आङि ताच्छील्ये पुष्पाण्याहरति तच्छीलः पुष्पाहरः ताच्छील्ये किं भारहारः अर्हः अर्ह-
तेरच् स्यात् कर्मण्युपपदे णोपवादः पूजार्हा ब्राह्मणी स्तम्बकर्णयो रमिजपोः हस्तिसूचकयोरिति वक्तव्यं स्तम्बेरमते स्त-
म्बेरमो हस्ती तत्पुरुषे कृतीति हलदन्तादिति वाऽलुक् कर्णेजपः सूचकः शमि धातोः संज्ञायां शम्भवः शंवदः पुनर्धी शंकरः ६

धकविषये पिपर
धेमित्यर्थः =१

श्च हेताबाधक बाधनार्थं शम्भोर्हेत्वादिषु शोभामूत् शंकरा नाम परिव्राजिका तच्छीला अधिकरणे शेतेः खे शेते ख-
शयः पार्श्वादिषूपसंख्यानं पार्श्वाभ्यां शेते पार्श्वशयः दृष्टशयः उदरेण शेते उदरशयः उत्तानादिषु कर्तृषु उत्तानः शे-
ते उत्तानशयः अवमूर्धशयः अवनतो मूर्धा यस्य स अवमूर्धा अधोमुखः शेते इत्यर्थः गिरौ डश्छन्दसि गिरौ शेते गिरि-
शः कथं गिरिशमुपचचार प्रत्यहं सा सुकेशीति कालिदासः गिरिरस्यास्ति इति विग्रहे लोमादित्वात् शः चरेष्टः अधि-
करणे उपपदे कुरुचरः कुरुचरी भिक्षासेनादायेषु च भिक्षां चरति भिक्षाचरः सेनाचरः आदायेति ल्यबन्तं आदाय-
चरः कथं मेलस्थितां सहचरीमिति पचादिषु चरट् इति निपातनात् पुरोऽग्रतोऽग्रेषु सर्तेः पुरःसरः अग्रतःसरः अ-
ग्रेसरः अग्रेण अग्रे वा सरतीत्यग्रेसरः सूत्रे अग्रे इति एदन्तत्वमपि निपात्यते कथं पूर्वं तदग्यसारगर्वितभुजस्यारेमि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰ द॰

ष्पतन्न पाणयो ध्मायंते सि न्निति पाणिंधमोध्वा अंधकाराद्यावृत इत्यर्थः तत्र हि सर्पाद्यपनोदनाय पाणी ध्मायेते प्रि
यवशे वदः ॥ मितंगमो हस्ती विहायसो विहच इति वाच्यं खच्च डिद्वा वाच्यः विहंगमो विहंगः भुजंगमः भुजंगः द्विष
त्परयोस्तापेः खच् स्यात् खचि ह्रस्वः खच्परे णावुपधाया ह्रस्वः स्यात् द्विषंतपः वा तापयति द्विषंतपः परंतपः षष्ठ
षष्ठीग्रहणं लिंगविशिष्टपरिभाषा अनित्या तेनेह न द्विषतीं तापयतीति द्विषतीतापः वाचि यमो व्रते वाचि शब्दे उ
पपदे यमेः खच् स्यात् व्रते गम्ये वाचंयमपुरंदरौ च वाक्पुरोः रमंतत्वं च निपात्यते वाचंयमो मौनव्रती व्रते किं अप
काकादिना वाचं यच्छतीति वाग्यामः पूः सर्वयोर्दारिसहोः पुरं दारयतीति पुरंदरः सर्वंसहः मञ्जिग्रहणं असंज्ञार्थं भ
गे च दारेरिति काशिका बाहुलकादन्यस्मिन्नपि साधुः भगं दारयतीति भगंदरः सर्वकूलाभ्रकरीषेषु कषः सर्वंकषः
खलः कूलंकषा नदी अभ्रंकषो वायुः करीषंकषा वात्या मेघर्तिभयेषु कृञः मेघंकरः ऋतिंकरः भयंकरः भयश
ब्देन तदंतविधिः अभयंकरः क्षेमप्रियमद्रेऽण् च एभ्यः कृञोऽण् स्यात् खच् च क्षेमंकरः क्षेमकारः मद्रंकरो मद्रका प्रियंकारः प्रियंकरः
र इति वा च्छेण ग्रहणं हेत्वादिषु तो माभूदिति कथं तर्हि अल्पारंभाः क्षेमकरा इति कर्मणि भृतः पोषत्वविवक्षायां पचाद्यच्
आशिते भुवः करणभावयोः आशितशब्दे उपपदे भवतेः खच् आशितो भवत्यनेन आशितंभवः ओदनः आशितस्य भवनं
आशितंभवं संज्ञायां भृतवृजिधारिसहितपिदमः विश्वं बिभर्तीति विश्वंभरः विश्वंभरा रथंतरं साम इहरथे
न तरतीति अग्न्यादिमात्रेण तत्र वयवाद्यारोहणमः पतिंवरा कन्या शत्रुंजयो हस्ती युगंधरः पर्वतः शत्रुंसहः शत्रुं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्प३ तो१

स्र अरुर्द्विषदजंतस्य मुम् अरुषो द्विषदजंतस्य मुमागमः स्यात् खिदंते उत्तरपदे न त्वव्ययस्य शित्वाच्छवादयः ज
नेरणजयतीति जनमेजयः वातशुनीतिलशर्द्धेषु अजधेट्तुदजहातिभ्यः खश् उपसंख्यानं वातमजा मृगाः खित्यनव्यय
स्य खिदंते पूर्वपदस्य ह्रस्वः स्यात् ततो मुम् शुनिंधयः तिलंतुदः शर्द्धंजहा माषा। शर्द्धो पानशब्दः तं जहातीति विग्र
हः जहातेरंतर्भावितण्यर्थः नासिकास्तनयोर्ध्माधेटोः अत्र वार्त्तिकं स्तने धेटो नासिकायां ध्मश्चेति वक्तव्यं स्तनंधय
ति इति स्तनंधयः धेटष्टित्वात् स्तनंधयी नासिकंधमः नासिकंधमः नाडीमुष्ट्योश्च एतयोः कर्मणोरुपपदयोर्ध्माधेटोः
एवं यथासंख्यं नेष्यते नाडिंधमः नाडिंधयः मुष्टिंधयः मुष्टिंधमः घटीखारीखरीषूपसंख्यानं घटिंधमः घटिंधयः इ
त्यादि खारी परिमाणविशेषः खरी गर्दभी उदि कूले रुजिवहोः उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्या
त् कूलमुद्रुजतीति कूलमुद्रुजः कूलमुद्वहः वहाभ्रे लिहः वहः स्कंधः तं लेढीति वहंलिहो गौः अदादित्वाच्छपो लुक् ख
शो ङित्वान्न गुणः अभ्रंलिहो वायुः परिमाणे पचः प्रस्थंपचा स्थाली खारिंपचः कटाहः मितनखे च मितंपचा ब्राह्म
णी नखंपचा यवागूः पचिरत्र तापवाची विध्वरुषोस्तुदः विधुंतुदः मुमि कृते संयोगांतलोपः अरुंतुदः असूर्ये
ललाटयोर्दृशितपोः असूर्यमित्यसमर्थसमासः दृशिना नञः संबंधात् सूर्यं न पश्यंतीति असूर्यंपश्या राजदा
राः ललाटंतपः सूर्यः उग्रंपश्येरंमदपाणिंधमाश्च एते निपात्यंते उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश्
प्र उग्रं पश्यतीत्युग्रंपश्यः इरा उदकं तेन माद्यतीति दीप्यते अविधनत्वादिति इरंमदो मेघज्योतिः इह निपातनात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रवि॰ ८

सि॰कौ॰ णीघातः ताडघातः राजघ उपसंख्यानम् राजानं हंतिराजघः आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थे घञ्चो कृञः
३॰ करणे ख्युन् एषु च्व्यर्थेषु च्व्यंतेषु कर्मसूपपदेषु कृञः ख्युन्स्यात् अनाढ्य आढ्यं कुर्वंत्यनेन आढ्यंकरणं अच्वौ किं आ
९० ढ्यीकुर्वंत्यनेन इहशतिषेध सामर्थ्यात् ल्युडपिनेति काशिका भाष्यमतेतु ल्युडप्यादेव अच्वावितिउत्तरार्थम् कर्तरिभु
वः खिष्णुच् खुकञौ आढ्यादिषु च्व्यर्थेषु च्व्यंतेषु भवतेरेतौस्तः अनाढ्यः आढ्यो भवति आढ्यंभविष्णुः आढ्यंभावुकः ।
स्पृशोनुदके क्विन् घृतस्पृक् कर्मणीति निवृत्तं मंत्रेणस्पृशतीति मंत्रस्पृक् ऋत्विग्दधृक् व्याख्यातं त्यदादिषु दृशोना
स६ लोचने कञ्च मानान्ययोश्चेति वक्तव्यं सदृक् सदृशः अन्यादृक् अन्यादृशः कोपि वाच्यः तादृक्षः सदृक्षः अन्या
दृक्षः सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेपिक्विप् एभ्यःक्विप्स्यात् उपसर्गेसत्यसतिचसुप्युपपदे छि॰ २॰
प्रभू॰ ८ द्युसत् उपनिषत् अंडसूः मित्रद्विट् मित्रध्रुक् प्रधुक् गोधुक् अश्वयुक् प्रयुक् वेदवित् निविदित्यादि अग्रग्रामाभ्यां मधुकृ
नयतेर्णोवाच्यः अग्रणीः ग्रामणीः भजोण्विः सुप्युपपदे भजोण्विःस्यात् अंशभाक् प्रभाक् अदोनन्ने विट्स्यात्
९० आममत्ति आमात् सस्यात् अनन्ने किं अन्नादः क्रव्ये च अदेर्विट्स्यात् पूर्वेणसिद्धेवचनमण्वाधनार्थमिदं ।
क्रव्यात् आममांसभक्षकः कथंतर्हि क्रव्यादो स्रपआसुरइति पक्वमांसशब्देउपपदेऽण् उपपदस्यक्रव्यादेशः
पृषोदरादित्वात् दुहःकप् घश्च कामदुघा अन्येभ्योपिदृश्यते छंदसीति निवृत्तं मनिन्क्वनिप्वनिप्विच एतेप्रत्यया राम॰ ९०
धातोःस्युः नेड्वशिकृति वशादेः कृतइण्नस्यात् सुशर्मा प्रातरित्वा विड्वनोरनुनासिकस्यात् अनुनासिकस्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मणीचाप

नपः अरिंदमः दमिः शामनायां तेनसकर्मकः इत्युक्तं मतांतरेतु अंतर्भावितण्यर्थोत्र दमिः गमश्च सुतंगमः अंतात्यं
तोध्वदूरपारसर्वानंतेषुडः संज्ञायामिति निवृत्तं गमेर्डः डित्वसामर्थ्यादभस्यापि टेर्लोप अंतंगच्छतीत्यंतगः इत्यादि।
सर्वत्रपन्नयोरुपसंख्यानं सर्वत्रगः पन्नंपतितंगच्छतीति पन्नगः पन्नमिति पद्यतेः क्तांतं क्रियाविशेषणं उरसोलोपश्च
उरसागच्छतीत्युरगः सुदुरोरधिकरणे सुखेनगच्छंतियत्र सुगः दुर्गः अन्यत्रापिदृश्यत इतिवक्तव्यं ग्रामगः डेच विहायसो
विहादेशोवक्तव्यः विहगः आशिषि हनः शत्रुंवध्याच्छत्रुहः आशिषि किं शत्रुघातः दारावाहनोणंतस्य चटः सं
ज्ञायां दारुणा वा आङ्पूर्वो हंते रणं टश्चांतादेशः दार्वाघाटः चारौवा चार्वाघाटः चार्वाघातः कर्मणिसमिच कर्मण्यु
पपदे संपूर्वाद्धंते रुक्तोवेस्यर्थः वर्णान्संहंतीति वर्णसंघाटः वर्णसंघातः पदसंघाटः पदसंघातः अपेक्लेशतमसोः अ
पपूर्वाद्धंतेर्डः स्यात् अनाशीरर्थमिदं क्लेशापहः पुत्रः तमोपहः सूर्यः कुमारशीर्षयोर्णिनिः कुमारघाती शिरसः शी
र्षभावो निपात्यते शीर्षघाती लक्षणेजायापत्योष्टक् हंतेष्टक्स्यात् लक्षणवति कर्तरि जायाघ्नोना पतिघ्नीस्त्री अम
नुष्यकर्तृकेच जायाघ्नस्तिलकालकः पतिघ्नीपाणिरेखा पित्तघ्नंघृतं अमनुष्ये किं आखुघातः शूद्रः अत्र कथंबल ५४
भद्रः प्रलंबघ्नः शत्रुघ्नः कृतघ्न इत्यादि मूलविभुजादित्वात्सिद्धं चौरघातो नगरघातो हस्तीति बाहुलकाद्धति श
क्तौ हस्तिकपाटयोः हंतेष्टक्स्याच्छक्तौ द्योत्यायां मनुष्यकर्तृकार्थमिदं हस्तिघ्नो ना कपाटघ्नश्चौरः कवाटेति
तिपाठांतरं पाणिघताडघौ शिल्पिनि हंतेष्टक् टिलोपो घत्वंच निपात्यते पाणिताडयोरुपपदयोः शिल्पिनि किं पा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यार्थ्ये सञ्ज्ञायांच सूत्रं कर्तरि किं अपूपानि भक्षयति माषान् उपमाने किं उष्ट्रःक्रोशति व्रते णिनिः स्थण्डिलशायी व
र्जुलभाषी ह्राये पौनःपुन्ये शीले सुप्युपदे णिनिः क्षीरपायिणः उशीनराः मनः सुपि मन्यते णिनिः दर्शनीयमानी आत्ममा
ने खश्च स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश्च स्यात् चात्सि णिनिः पंडितं आत्मानं मन्यते पंडितंमन्यः पंडितमानी खि
त्यनव्ययस्य कालिंमन्या अनव्ययस्य किं दिवामन्या इचेकाचोम्प्रत्ययवच्च इजंतादेकाचोम् स्यात्स च स्वाद्यम्बवत् खिदंते
परे श्योतोम् एतसोः गांमन्यः वामन्यः स्त्रियंमन्यः स्त्रीमन्यः नरंमन्यः भुवंमन्यः श्रियमात्मानंमन्यते श्रियंमन्यं कुलं मा
म्पकारवच्चनात् श्रीशब्दस्य ह्रस्वः मुममोरभावश्च भूते अधिकारोयं वर्तमाने लडिति यावत् करणे यजः करणे उप
पदे भूतार्थो यजेर्णिनिः स्यात् कर्त्तरि सोमेनेष्टवान् सोमयाजी अग्निष्टोमयाजी कर्मणि हनः पितृव्यघाती कर्मणि से
नत्सदे चेति यावद्धि क्रियते ब्रह्मभ्रूणवृत्रेषु क्विप् एषु कर्मसूपपदेषु हंतेर्भूते क्विप् स्यात् ब्रह्महा भ्रूणहा वृत्रहा ।
क्विप् चेत्येव सिद्धे नियमार्थमिदं ब्रह्मादिष्वेव हंतेरेव भूतएव क्विबेवेति चतुर्विधोत्र नियम इति काशिका ब्रह्मा
दिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यं सुकर्मपापमंत्रपुण्येषु कृञः सुकर्मादिषु च कृञः क्विप् स्यात् त्रिविधोत्र
नियमः कर्मत्वे नान्यत्र कृञ एवेति नियमान्मंत्रमधीतवान् मंत्राध्यायः अत्र क्विप्न भूतएवेति नियमान्मं
त्रं करोति करिष्यति वेति विवक्षायां न क्विप् स्वादिष्वेवेति नियमाभावादस्मिन्नुपपदे क्विप् शास्त्रकृत् भाष्यकृत् सोमे सुञः
सोमसुत् एवमुत्तरसूत्रेपि अग्नौ चेः अग्निचित् कर्मण्यग्न्याख्यायां कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप् स्या
चतुर्विधोत्र नियम इति काशिका

91

राम॰
८१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्मात् क्षिणायत इति विजावा श्रेणा अवावा विचरोह रोह मृगाणां किम्च अयमपि रूप्यते मत्स्य द्विषेति नव सैव
मपंच उत्वासत्व परीध्यत वाह्मट अंतः पदांतस्यानित्ते नेस्य णत्वं स्यात् उपसर्गस्यानिमित्तात्परस्येति हेमाण इ
त्यास इति लीत्वं भिद्याणि शास्ति मित्रघी: आशास: क्वौ उपधाया इत्वं वाच्यं आशी इत्वोत्वेगी: घ्र: द्युस्मान् चन् क्विषु च
एषु छादेर्ह्रस्व: स्यात् तनु छत् अनुनासिकस्येति दीर्घ: मोनो धातो: प्रशान् प्रतान् छ्वो रिति ऊठ् च लघ: ज्वरत्वरेत्यू
ठ् जू: जुरौ जुर: तू: तुरौ तुर: स्त्रू: ऊ: वृद्धि: जनान् वनोतीति जनौ जनावौ जनाव: म्रू: मुवौ मुव: मुम्रू: सुम्वौ सुम्व: रा
लोप: मुर्छा मू: मुरौ मुर: धुर्वी धू: धुरौ धुर: गम: क्वौ अनुनासिकलोप: स्यात् अंगगत् गमादीनामिति वक्तव्यं परि
तत् संयत् सुनेत् ऊङ् च गमादीनामिति वक्तव्यं लोपश्च अग्रेभ्रू: अग्रेगू: स्य: क: च चात् क्विप् शोस्य: शस्या पानि
धातोरित्यचं वाधितं सूत्रं सुप्यजातौ णिनिस्ताच्छील्ये अजात्यर्थे सुपि धातोर्णिनि: स्यात् ताच्छील्ये द्योत्ये उष्णभोजी
शीतभोजी अजातौ किं ब्राह्मणानामंत्रयिता ताच्छील्ये किं उष्णं भुंक्ते कदाचित् इह वृत्तिकारेणोपसर्गभिन्नं सुपिणि ९५
निरिति व्याख्याय उत्प्रतिभ्यामाङि सर्तेरुपसंख्यानमिति पठितं हरदत्तमाधवादिभिश्च तदेवानुसृतं एतच्च भाष्यविरोधाद
पेक्ष्यं प्रसिद्धश्चोपसर्गे णिनि: प्रवभ्रवोपजीविनो अनुयायिवर्ग: पलायमानो यामविसारि प्रवृत्त: नवेच नीया: प्रभवेत्
जीविभिरित्यादि साधुकारिण्युपसंख्यानं ब्रह्मणि वद: अताच्छील्यार्थं वार्त्तिकद्वयं साधुकारी ब्रह्मवादी कर्त्तर्युपमा
ने णिनि: स्यात् उपपदार्थकर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानं उष्ट्र इव क्रोशति उष्ट्रक्रोशी ध्वाङ्क्षरावी अताच्छी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यात्२

नृ२

सि.को. निष्ठातस्य नें ण्णः ग्लानः ल्वादिभ्यः एव विंशतेर्ल्वादिभ्यः प्राग्वत् लूनः ग्रहिज्या जीनः इग्वोदीर्घश्च इगतो ह्रस्वः ३३३
कृ.ल. पतापे इत्यपंतु न मृस्यते सानुबंधकत्वात् मडुतया इतयेति माघः ग्लनः पञ्चोविनाशे पूनीयवाविनष्टा इत्यर्थः पूतमन्यत् सिनोते
९२ र्गासे कर्मकर्त्तृकेति किं मितो ग्रामो देवदत्तेन ओदितश्च प्राग्वत् भुग्नः उच्छ्वोः उच्छूनं ओहाकत्यहीनः स्वाद्यः ओदितः
सूक्तः सूनः सूनवान् ओदित्वामर्थ्येडीङः पाठसामर्थ्यान्नेह उड्डीनः द्रवमूर्त्तिस्पर्शयोः श्यः द्रवस्य मूर्त्तौ काठिन्ये स्पर्शेचार्थे
श्यैङः संप्रसारणं निष्ठायां श्यो स्पर्शे पपेङो निष्ठातस्य नः स्यादस्पर्शे ध्वे हलइति दीर्घः शीनं घृतं अस्पर्शे किं शीनं जलं
द्रवमूर्त्तिस्पर्शयोः किं संश्यानो वृश्चिकः शीतात् संकुचितइत्यर्थः प्रतेश्च प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायां प्रतिशी
92 नः विभाषाभ्यवपूर्वस्य श्यः संप्रसारणं वा स्यात् अभिश्यानं घृतं अभिशीनं अवश्यानोऽवशीनो वृश्चिकः अस्थितविभाषेयं ते नो७
नेह न समवश्यानः अंचोनपादाने अंचो निष्ठातस्य नः स्यात् न त्वपादाने यस्यविभाषा यस्य क्वचिद्विभाषया इड्विहितस्य
तो निष्ठाया इण्न स्यात् उदित्तो वेति क्त्वायां वेट्त्वादिह नेट् समक्तौ अनपादाने किं उदक्तमुदकं कूपात् न त्वस्यासिद्धत्वात्
श्चेति षत्वे प्राप्ते निपातनं षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः स्कन्दः स्कन्दवान् परिस्कन्दः प्राच्यभरतेषु एवेति मूर्धे
न्यो भावो निपात्यते परिस्कन्दः प्राच्येति किं परिस्कन्दः परिस्कन्दः प्रतिस्तब्धनिस्तब्धौ च अत्र षत्वं न स्यात् दिवो
विजिगीषायां दिवो निष्ठातस्य नः स्याद विजिगीषायां द्यूनः विजिगीषायां तु द्यूतं निर्वाणोवाते अवाते इति पदच्छेदः निः सम.
वो वातेनिष्ठातस्य नत्वं स्याद्वातश्चेत्कर्त्ता न निर्वाणोग्निर्मुनिर्वा वाते तु निर्वातो वातः शुषः कः निष्ठातस्य इत्येव शुष्कः तर
पचोवः इति विकल्पः सभेरिति षत्वे प्रा॰ से ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रे अग्न्याधारस्थलविशेषस्याख्यायां श्येनचित् श्येनचित् कर्मणीनिर्विक्रियः कर्मण्युपपदे विपूर्वात् क्रीणातेरिनिः
स्यात् कुत्सितग्रहणं कर्तव्यं सोमविक्रयी घृतविक्रयी दृशो क्वनिप् कर्मणि भूत एव पारं दृष्टवान् पारदृश्वा राजनि युधि
कृञः क्वनिप् युधिरन्तर्भावितण्यर्थः राजानं योधितवान् राजयुध्वा राजकृत्वा सहे च कर्मणीति निवृत्तं सहयुध्वा सह
कृत्वा सप्तम्यां जनेर्डः सरसिजं मन्दुरायां जातो मन्दुरजः आप्नोतीति फलः पंचम्यामजातौ जातिशब्दवर्जिते पंचम्यन्ते उपप
दे जनेर्डः संस्कारजः अदृष्टजः उपसर्गे च संज्ञायां प्रजा स्यात् संततौ जने अनौ कर्मणि अनुपूर्वाज्जनेः कर्मण्युपपदे
डः स्यात् पुमांसमनुरुध्य जाता पुमनुजा अन्येष्वपि दृश्यते अन्येष्वप्युपपदेषु जनेर्डः स्यात् अजः द्विजः ब्राह्मणजः अ
पिशब्दः सर्वोपाधिव्यभिचारार्थः तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित् परितः खाता परिखा क्तक्तवतू निष्ठा एतौ नि
ष्ठासंज्ञौ स्तः निष्ठा भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् तयोरेवेति भावकर्मणोः क्तः कर्तरि कृदिति कर्तरि क्तः वतुः उकारो इतो
स्नातं मया स्तुतस्त्वया विष्णुः विष्णुर्विश्वं कृतवान् निष्ठायामण्यदर्थे ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दी
र्घः स्यात् क्षियो दीर्घात् दीर्घात् क्षियो निष्ठातस्य नः स्यात् क्षीणवान् भावकर्मणोस्तु क्षितकामो मया श्युकः किति श्वि
तः श्वितवान् भूतः भूतवान् स्तुतः उर्णोतेर्णुवद्भावो वक्तव्यः तेन एकाच्त्वान्नेट् उर्णुतः नुतः नूतः रदाभ्यां निष्ठातो
नः पूर्वस्य च दः रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात् निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च पूर्णः ऋतन्तरपरः ह्रीमायां २
णत्वे पीर्णः बहिरङ्गत्वेन रसिद्धत्वान्नेह कृतस्य कीर्तिर्भिन्नः छिन्नः संयोगादेरातो धातोर्यण्वतः

हृतवान्२

Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰कृ॰
ए३

हने लुभः क्त्वानिष्ठयोरिड्वा स्यात् विमोहनार्थे लुभितः गार्ध्ये तु लुब्धः क्लिशः क्त्वानिष्ठयोः इड्वा स्यात् क्लिश उपतापे निर्यासे
क्लिशू विबाधने अस्मात्क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः क्लिशितः क्लिष्टः पूङश्च पूङः क्त्वानिष्ठयोरि
ड्वा स्यात् पूङः क्त्वा च पूङः क्त्वा निष्ठा च सेट् किन्न स्यात् पवितः पूतः क्त्वाग्रहणं उत्तरार्थं नोपधादित्यत्र हि क्त्वैव संबध्य
ते निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः एभ्यः सेट् निष्ठा किन्न स्यात् शयितः शयितवान् अनुबन्धनिर्देशो यङ्लुङ्निवृ
त्त्यर्थः शेश्यितः शेश्यितवान् आदिकर्मणि निष्ठा वक्तव्या आदिकर्मणि क्तः कर्तरि च आदिकर्मणि यः क्तः स कर्तरि स्या
त् चाद्भावकर्मणोः विभाषा भावादिकर्मणोः भावे आदिकर्मणि च आदितो निष्ठाया इड्वा स्यात् प्रस्वेदितश्चैत्रः प्र
स्वेदितं तेन ञिष्विदेति स्वादिरन्तग्रस्तते ञीङ्गि साहचर्यात् ष्विदा इत्येतस्य स्विदितश्रेषु ञिमिदा ञिक्ष्विदा ञिधृषा
शीच प्रमेदितः प्रमेदितवान् प्रक्ष्वेदितः प्रक्ष्वेदितवान् प्रधर्षितः प्रधर्षितवान् प्रधर्षितं तेन सेट् किं प्रस्विन्नः प्रस्विन्न तं६
ते नेत्यादि मृषस्तितिक्षायां सेट् निष्ठा किन्न स्यात् मर्षितः मर्षितवान् क्षमायां किं अपमृषितं वाक्यं अविस्पष्टमित्यर्थः
उदुपधाद्भावादिकर्मणोरन्यतरस्याम् उदुपधात्परा भावादिकर्मणोः सेट् निष्ठा किद्वा स्यात् द्युतितं द्योतितं मुदितं मोदि
तं साधुनाम द्युतितः प्रद्योतितः प्रमुदितः प्रमोदितः साधुः उदुपधात्किं विदितं भावेत्यादि किं रुचितं कार्षापणं सेट्
किं कुष्टं शब्दविकरणेभ्य एवेष्यते नेह गुध्यतेर्गुधितं निष्ठायां सेटि णेर्लोपः स्यात् भावितः भावितवान् श्वीदित इ राम॰ ए३
लिनेडागमसंप्रसारणं शूनः दीप्तः गुप्तः स्नुतः वनुः तनुः वनः तनः पतेः सनिवेट् क्त्वादिडभावे प्राप्ते द्वितीयाश्रितेति

९३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पचोवः पक्वः क्षायो मः स्त्यः प्रपूर्वस्य स्त्यः संप्रसारणं स्यान्निष्ठायां प्रस्त्योन्यतरस्यां निष्ठातस्य मो वा स्यात् प्रस्तीमः प्र
स्तीतः प्राति स्त्यानः अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः निफला फुल्लः निष्ठातस्य लत्वं निपात्यते क्तवत्वेकदेशस्यापी
दं निपातनमिष्यते फुल्लवान् क्षीवादिषु तु क्तप्रत्ययस्येव तलोपः तस्यासिद्धत्वात् आप्त इडभावश्च निपात्यते क्षीवो मत्तः कृ
शस्तनुः उल्लाघो नीरोगः अनुपसर्गात्किं आदितश्च आकारेतो निष्ठाया इण्न स्यात् ञिफला विशरणे उत्फुल्लः ताद्वि
ति प्रफुल्लः प्रक्षीवितः प्रकृशितः प्रोल्लाघितः कथं तर्हि लोकव्युत्पन्नमतः प्रफुल्लमिति फुल्ल विकसने पचाद्यच् फल्लतेर्
संफुल्लयो फुल्लतादिनिष्ठायां उत्फुल्लसंफुल्लयोरुपसंख्यानं नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्यां एभ्यो निष्ठातस्य नो वा स्यात् नुन्नः नुत्तः वि
द विचारणे रौधादिक एव गृह्यते उंदिना श्रेण साहचर्यात् विन्नः वित्तः वेत्तेस्तु विदितः विद्यतेर्विन्नः उंदी श्वीदितो नि
ष्ठायां श्रूयते रीदित इति निष्ठायां इण्न उन्नः त्रातः त्राणः घ्राणः घ्रातः ह्रीणः ह्रीतः न ध्याख्यापृमूर्छिमदां एभ्यो निष्ठ
तस्य नत्वं न ध्यातः ख्यातः पूर्तः राल्लोपः मूर्त्तः मत्तः वित्तो भोगप्रत्यययोः विदेर्निष्ठान्तस्य निपातोयं भोगे प्रत्यये चार्थे प्र ५
वित्तं धनं वित्तः पुरुषः अनयोः किं विन्नः विभाषागमहने भित्तं शकलं भिन्नमन्यत् ऋण
माधमर्ण्ये ऋधातोः क्तनत्वं करस्य नत्वं निपात्यते अधमर्णव्यवहारे ऋतमन्यत् स्फायः स्फी निष्ठायां स्फीतः इण्निष्ठा
यां निरः कुषो निष्ठायां इट् स्यात् यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः निष्कुषितः वसति क्षुधोरिट् आभ्यां क्त्वानिष्ठयो
र्नित्यमिट् उषितः क्षुधितः अञ्चेः पूजायां पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् अञ्चितः गतौ तु अक्तः लुभो विमो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰कृ॰
४५

विभ्यः एतत्पूर्वादर्देर्निष्ठाया इण्न स्यात् समर्णः न्यर्णः व्यर्णः अर्दितोऽन्यः अभेश्चाविदूर्ये अभ्यर्णं नातिदूरं आसन्नं
अभ्यर्दितमन्यत् णेरध्ययने वृत्तं ण्यंताद्वृतेः क्तस्येड्भावो णिलुक्च अधीयमानेर्थे वृत्तं छंदश्छात्रेण संपादितं अधीत
मिति यावत् अन्यत्र तु वर्तिता रज्जुः शृतं पाके श्राति श्रपयत्योः क्ते शृभावो निपात्यते क्षीरहविषोः पाके शृतं क्षीरं स्वय
मेव विक्लिन्नं एवं वेसप्ये: क्षीरहविर्भ्यामन्यत्र तु श्राणं श्रपितं वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः एते णिचि निष्ठा
।शमितः ५ यां वा निपात्यंते पक्षे दमितः पूरितः दासितः स्पाशितः छादितः ज्ञापितः रुष्यमत्वरसंघुषास्वनां एभ्यो निष्ठाया इड्वा स्यात् रु
ष्टः रुषितः आंतः आमितः तूर्णः त्वरितः आस्यादित्वे फलं मंदे संघुष्टः संघुषितः आस्वांतः आस्वनितः हृषेर्लोमसु।
९५ हृषेर्निष्ठाया इड्वा स्यात् लोमसु विषयेषु हृष्टं हृषितं लोम विस्मितप्रतिघातयोश्च हृष्टो हृषितो मैत्रः विस्मितः प्रतिह
तो वेत्यर्थः अन्यत्र तु हृषु अलीके उदित्वान्निष्ठायां नेट् हृष्टस्तुष्टो इट् अपचितश्च चायतेर्निपातो वा अपचायितः
अपचितः प्यायः पी वा स्यान्निष्ठायां व्यवस्थितविभाषेयं तेन स्वांगे नित्यं पीनं मुखं अन्यत्र प्यानः पीनः स्वेदः सोपसर्ग
स्य न प्रप्यानः आङ्पूर्वस्यांध्रूधसोः स्यादेव आपीनोंधुः आपीनमूधः ह्रादो निष्ठायां ह्रस्वः स्यात् प्रह्लन्नः द्यतिस्यति
मास्थामित्ति किति एषां इकारोंतादेशः स्यात् त्तादौ किति ईत्वदत्वयोरपवादः दितः सितः मामाङ्मेङ् मितः स्थितः राम॰
शाच्छोरन्यतरस्यां शितः शातः छितः छातः व्यवस्थितविभाषात्वात् व्रतविषये श्यतेर्नित्यं संशितं व्रतं सम्यक् सं ४५
पादितमित्यर्थः संशितो ब्राह्मणः व्रतविषयकयत्नवानित्यर्थः दधातेर्हिः तादौ किति अभिहितः निहितं दोदद्घोः घु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सूत्रैव निपातनादिट् पतितः सेसिचीतिवेट् कत्वान्तिडे क्षुब्धादीनामीदित्वेनानित्यत्वज्ञापनार्थं तेन थाविन मिभराजु
पेत्यादि यस्य विभाषेत्यनेन काचइत्येवदर्शितः क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु क्षुब्धादीन्यष्टौ अनिड्वानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु इत्यन्वयः संयुक्ताः सक्तवो मंथाः मंथनदंडश्च क्षुब्धः मंथः स्यात् स्वान्तं मनः ध्वान्तं तमः लग्नं सक्तं निष्ठानत्वमपि निपातनात् म्लिष्टमविस्पष्टं विरिब्धः स्वरः स्वे रेभृ अनयोरुपधाया इत्वमपि निपात्यते फाण्टं अनायाससाध्यः कषायविशेषः माधवस्तु नवनीतभावात्प्रागवस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये आह बाढं भृशं अन्यत्र तु क्षुभितं क्षुब्धो राजेति तु आगमशास्त्रस्यानित्यत्वात् स्वनितं ध्वनितं लगितं म्लेच्छितं विरेभितं फाणितं वाहितं धृषिशसी वैयात्ये एतौ निष्ठायां अविनये एवानिटौ स्तः धृष्टो विशस्तः अन्यत्र धर्षितः विशसितः भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति अत एव नियमार्थमिदं सूत्रमिति वृत्तिः धृषेः आदित्वफलं चिंत्यमिति हरदत्तः माधवस्तु भावादिकर्मणो रेवैयात्ये विकल्पमाह धृष्टं धर्षितं प्रधृष्टः प्रधर्षितः दृढः स्थूलबलयोः स्थूले बले चेति च निपात्यते दृह दृहि वृद्धौ अस्मात् क्तः इडभावः नस्य ढत्वं हलोपः इदितो नलोपश्च दृढितो दृंहितोऽन्यः प्रभौ परिवृढः वृह वृहि वृद्धौ निपातनं प्राग्वत् परिवृहितः परिवृंहितोऽन्यः कृच्छ्रगहनयोः कषः कषो निष्ठायामनिट् स्यात् एतयोरर्थयोः कष्टं दुःखं तत्कारणं च स्यात्कष्टं कृच्छ्रमाभीलं कष्टो मोहः कष्टं शास्त्रं दुरवगाहमित्यर्थः कषितमन्यत् घुषिरविशब्दने घुषेर्निष्ठायामनिट् स्यात् घुष्टा रज्जुः अविशब्दने किं घुषितं वाक्यं शब्देन प्रकटीकृताभिप्रायमित्यर्थः अर्दः संनि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ.
उ.कृ.
७५

मुपासितः हरिदिनमुपोषितः राममनुजातः गरुडमारूढः विश्वमनुजीर्णः प्रत्येऽग्रात् गंगातीरेत्यादि । क्तोऽधिकरणे च ध्रौव्य
गतिप्रत्यवसानार्थेभ्यः । एभ्योऽधिकरणे क्तः स्यात् चाद्यथाप्राप्तं ध्रौव्यं स्थैर्यं मुकुंदस्यासितमिदमिदं यातं रमापतेः भुक्तमेत
दनंतस्येत्यत्र तु गोप्यो दिहस्त्वः पक्षे आसने कर्म कर्तरि भावे च आसितो मुकुंदः आसितं तेन गत्यर्थेभ्यः कर्मणि क
र्तरि च रमापतिरिदं यातः तेनेदं यातं । भुजेः कर्मणि अनंतेनेदं भुक्तं कथं तर्हि भुक्ता ब्राह्मणा इति भुक्तमस्ति एषामिति मत्व
र्थीयोऽच् । वर्तमाने इत्याधिकृत्य जीतः क्तः ञिमिदा स्नेहने ञिइंधी दीप्तौ । मतिबुद्धिपूजार्थेभ्यश्च मतिरिहेच्छा बुद्धेः पृथ
गुपादानात् राज्ञां मतः इष्टः इष्यमाणः बुद्धः विदितः पूजितः अर्चितः चकारोऽनुक्तसमुच्चयार्थः शीलितो रक्षि
पु७ तः क्षांतः आक्रुष्टो जुष्ट इत्यादि । नपुंसके भावे क्तः क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात् जल्पितं शयितं हसितं
९५ सुयजोर्ङ्वनिप् सुनोतेर्यजेश्च ङ्वनिप् स्यात् भूते सुत्वा सुत्वानौ यज्वा यज्वानौ जीर्यतेरतृन् भूत इत्येव जरन् जरंतौ
जरंतः वासरूपन्यायेन निष्ठापि जीर्णः जीर्णवान् छंदसि लिट् लिटः कानज्वा क्वसुश्च इह भूतसामान्ये छंदसि लिट् तस्य
विधीयमानौ कानच्क्वसू अपि छांदसाविति त्रिमुनिमतं कवयस्तु बहुलं प्रयुंजते तेनास्थिवास नगरोपकंठे श्रेयांसि स
र्वाण्यधिजग्मुषस्ते इत्यादि । वस्वेकाजाद्घसां कृतद्वित्वानामेकाचामादंतानां घसेश्च वसोरिट् नान्येषां आटिवान् आदि
वान् ददिवान् जक्षिवान् एषां किं बभूवान् भाषायां सदवसश्रुवः सदादिभ्यो भूतसामान्ये भाषायां लिट् वा स्यात् त एभ.
स्य नित्यं क्वसुः निषेदुषीमासनबंधधीरः अध्यूषुषस्तामभवज्जनस्य शुश्रुवान् उपेयिवाननाश्वाननूचानश्च एतेनि नूचान ९ ७५
सेदिवान् ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दोऽच्च स्यदादेः स्यदस्य स्याज्ञादौ किति चर्त्वं दत्तः घोर्वि दातः तांतो वा यमादेशः नेचैवं विदत्तमित्यादावुपसर्गस्य दस्तीति
दीर्घापत्तिः नकारादेर्निर्दिष्टाभावात् दांतो वा धांतो वा न च दांतत्वे निष्ठा नत्वं धांतत्वे झषस्तथोर्धोऽध इति धत्वं पाक्षिकं संनिपातपरि
भाषाविरोधात् अच उपसर्गात्तः अजंतादुपसर्गात्परस्य दा इत्यस्य घोः अवत्तः स्याज्ञादौ चर्त्वं प्रत्तः अवत्तः अवदत्तं
विदत्तं च प्रदत्तं तादिकर्मणि सुदत्तमनुदत्तं च निदत्तमिति चेष्यते १ चपाद्वा घ्या प्राप्तं दस्ति इगंतोपसर्गस्य दीर्घः स्यात् ।
तादेशे घोय तकारस्तदादौ उत्तरपदे खलु चेति चर्त्वं मा अपाये सिद्धं नीत्तं सूत्तं द्युमा स्थेतीत्वं धेट् धीतं गीतं पीतं जनस
नेत्यात्वं जातं सातं खातं अदो जग्धिल्यप्तिकिति ल्यपि ति लुप्तसप्तमीकं अदो जग्धिः स्यात् ल्यपि तादौ किति च इकार उच्चार
णार्थः धत्वं जग्नोनं जग्धः आदिकर्मणि क्तः कर्तरि च प्रकृतः कटं सः प्रकृतः कटस्तेन निशायामन्यतरस्यां दीर्घः हि
योरीर्घादिति नत्वं प्रक्षीणः सः वाक्रोशदैन्ययोः क्षियो निष्ठायां दीर्घो वा स्यात् आक्रोशे दैन्ये च क्षीणायुर्भव क्षितायुर्वा
क्षीणोयं तपस्वी क्षितो वा निनदीभ्यां स्नातेः कौशले आभ्यां स्नातेः सस्य षः स्यात् कौशले गम्ये निष्णातः शास्त्रेषु नदी
ष्णः सुपीतिकः सुत्रमनिष्णात प्रतेः स्नातेः षत्वं प्रतिष्णातं सूत्रं शुद्धमित्यर्थः अन्यत्र प्रतिस्नातं कपिष्ठलो गोत्रे कपि
ष्ठलो नाम यस्य कापिष्ठलिः पुत्रः गोत्रे किं कपीनां स्थलं कपिस्थलं विकुशमिपरिभ्यः स्थलम् एभ्यः स्थलस्य सस्य ष
स्यात् विष्ठलं कुष्ठलं शमिष्ठलं परिष्ठलं गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च एभ्यः कर्तरि
क्तः स्याद्भावकर्मणोश्च गंगां गतः गंगां प्राप्तः ग्लानः सः लक्ष्मीमाश्लिष्टो हरिः शेषमधिशयितः वैकुंठमधिष्ठितः शिव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰ कृ॰
९६

नन् वर्तमाने पवमानः यजमानः ताच्छील्यवयोवचनशक्तिषु चानश् एषु द्योत्येषु कर्तरि चानश् भोगं भुञ्जानः कवचं बिभ्रा
णः शत्रुं निघ्नानः इङ्धार्योः शत्रकृच्छ्रिणि आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि अधीयन् धारयन् अकृच्छ्रिणि किं कृच्छ्रे
णाधीते धारयति द्विषोऽमित्रे द्विषन् शत्रुः सुञो यज्ञसंयोगे सर्वे सुन्वन्तः सत्रिणः सर्वे यजमानाः अर्हः प्रशंसायां अर्हन्
आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलादिषु कर्तृषु बोध्याः तृन् कर्ता कटान्
अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् अलंकरिष्णुः इत्यादि णेश्छन्दसि वीरुधः
पारयिष्णवः भुवश्च छन्दसि इत्येव भविष्णुः कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति निरंकुशाः कवयः चकारोऽनुक्तस
मुच्चयार्थः भ्राजिष्णुरिति शिष्टाः एवं क्षयिष्णुः नैतद्भाष्ये दृष्टं ग्लाजिस्थश्च ग्स्नुः छन्दसीति निवृत्तं गिदयं न तु कित् तेन स्थ
ईत्वं न ग्लास्नुः गित्वान्न गुणः जिष्णुः स्थास्नुः चाद्भुवः श्र्युकः किति इत्यत्र गकारप्रश्लेषान्नेट् भूष्णुः दंशेश्छन्दस्युप
२५ संख्यानं दंक्ष्णवः पशवः त्रसिगृधिधृषिक्षिपेः क्नुः त्रस्नुः गृध्नुः धृष्णुः क्षिप्नुः शमित्यष्टाभ्यो घिनुण् उकार उच्चारणा
र्थः इति काशिका अनुबन्ध इति भाष्ये तेन शमिनितरा शमिनीतरे त्यत्र उगितश्चेति ह्रस्वविकल्पः नैवं शमिनितरा
दित्यादौ तस्य प्रसंगः हलन्तग्रहणमपकृष्य हलन्तानामेव तद्विधानात् नोदात्तोपदेशस्येति वृद्धिनिषेधः शमी तमी दमी
श्रमी भ्रमी क्लमी क्षमी प्रमादी उत्सर्गान्मदेः अलंकृञादिसूत्रेणेष्णुज् उक्तो वा सरूपविधिना घिनुणि उन्मादी ता
च्छीलिकेषु वासरूपविधिर्नास्ति इति तु प्रायिकं सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपप

राम॰
९६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पात्यंते उपपूर्वादिणोभाषायामपिक्कसमात्रेलिट् स्थानस्यनित्यं क्वसुः इट् उपेयिवान् उपेयुषः स्वामप्रत्येति मध्यां उ
पेयुषी उपेत्यविवक्षिते ईयिवान् समीयिवान् नञ्पूर्वादश्नातेः क्वसुरिडभावश्च रूपं जय ध्नेरनाश्वानितिभविविः
अनुपूर्वाद्वचेः कर्तरिकानच वेदस्यानुवचनं कृतवान् अनूचानः विभाषागमहनविदविशां दृशश्चेति वेति गमिवान् ज
गन्वान् जघ्निवान् जघन्वान् विविदिवान् विविद्वान् विविशिवान् विविश्वान् विशिना साहचर्याद्विदते ग्रहणं वेत्तेस्तु विविद्वा
न् दृशेश्च ददृशिवान् ददृश्वान् लटः शतृशानचावप्रथमासमानाधिकरणे। अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः
पचन्तं चैत्रं पश्य आने मुक् अंगस्यातो मुगागमः स्यात् आने परे पचमानं चैत्रं पश्य लडित्यनुवर्तमाने पुनर्लड्ग्रह
णं अधिकविधानार्थं तेन प्रथमासामानाधिकरण्येपि क्वचित् सन् ब्राह्मणः माङ्याक्रोशे इति वक्तव्यं मा जीवन् माङि लुङिति
प्राप्ते एतद्वचनसामर्थ्याल्लट् संबोधने च हे पचन् हे पचमान लक्षणहेत्वोः क्रियायाः क्रियायाः परिचायके हेतौ चार्थे वर्तमा
नाद्धातोर्लटः शतृशानचौ स्तः शयानाः भुंजते यवनाः अर्जयन् वसति हरिं पश्यन् मुच्यते हेतुः फले कारणं च तत्स्य च प्रयो
माणः सोमः ईदासः आसः परस्यानस्य ईत्स्यात् आदेः परस्य आसीनः विदेः शतुर्वसुः वेत्तेः परस्य शतुर्वसुरादेशो
विद्वन् विदन् विदुषी तौ सत् तौ शतृशानचौ सत्संज्ञौ स्तः लृटः सद्वा व्यवस्थितविभाषेयं तेनाप्रथमासामाना
धिकरण्ये प्रत्ययोत्तरपदयोः संबोधने लक्षणहेत्वोश्च नित्यं करिष्यन्तं करिष्यमाणं पश्य करिष्यतः अपत्यं कारिष्यतः
करिष्यद्भक्तिः हे करिष्यन् अर्जयिष्यन् वसति प्रथमासमानाधिकरणेपि क्वचित् करिष्यति करिष्यत् प्रत्ययोः शा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ उ॰ कृ॰ ९७ ज्ञसूदिता दीपिता दीक्षिता। नमिकंपी तिरेणापुक्तो बाधे सिद्दे दीपेर्ग्रहणं ज्ञापयति ताच्छीलिकेष्वासरूपविधिर्ना
स्ति इति प्रायिकमिति तेन कम्रा कमना युवतिः कंप्रा कंपना शाखा यदि स्यादेर्युज्ज्ञकथमथ सूदनः नंद्यादेः लप
तपदस्था भूवृषहनकमगमशृभ्य उकञ् लाषुकः पातुकः इत्यादि जल्पभिक्षकुट्टलुण्टवृङः षाकन् जल्पाकः भि
क्षाकः कुट्टाकः लुंटाकः वराकः वराकी प्रजोरिनिः प्रजवी प्रजविनौ प्रजविनः जिदृक्षिविश्रीण्वमाव्यथाभ्यम
परिभूप्रसूभ्यश्च जयी दरी क्षयी विश्रयी अत्ययी वमी अव्यथी अभ्यामी परिभवी प्रसवी स्पृहिगृहिपतिदयि
निद्रातन्द्राश्रद्धाभ्य आलुच् आद्यास्त्रयश्चुरादौ अदन्ताः स्पृहयालुः गृहयालुः पतयालुः दयालुः निद्रालुः तत्र
97 वीद्रा तन्दो नांतत्वं निपात्यते तंद्रालुः शीङो वाच्यः शयालुः दाधेट्सिशदसदो रुः दारुः धारुः सेरुः शदुः सद्रुः
सृघस्यदः क्मरच् सृमरः घस्मरः अद्मरः भंजभासमिदो घुरच् भंगुरः भासुरः मेदुरः विदिभिदिच्छिदेः कुरच्
विदुरः भिदुरं छिदुरं इण्नशजिसर्त्तिभ्यः क्वरप् इत्वरः इत्वरी नश्वरः जित्वरः सृत्वरः गत्वरश्च गमेरनु
नासिकलोपो निपात्यते गत्वरः गत्वरी जागुरूकः जागर्त्तेरूकः स्यात् जागरूकः यजजपदशां यङः यभ्योयङं
तेभ्य ऊकः स्यात् इष्यामितिभाष्ये नलोपे न निर्देशः यायजूकः जंजपूकः दंदशूकः नमिकंपिस्म्यजसकम
हिंसदीपो रः नम्रः कंप्रः स्मेरः अजस्रं सर्वदा क्रियासातत्ये वर्त्तते अजस्रं सततमित्यर्थः कम्रः हिंस्रः दीप्रः स राम॰
नाशंसभिक्ष उः चिकीर्षुः आशंसुः भिक्षुः विंदुरिच्छुः वेत्तेर्नुम् इषेश्छत्वं निपात्यते वेत्तितच्छीलो विंदुः इच्छु ९७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रिरह परिवद परिदह परिमुह दुष द्विष द्रुह दुह युज आक्रीड विविच त्यज रञ्ज भज अतिचर अपचर आमुष अभ्याहन च चिनुण
स्यात् संपर्की अनुरोधी आयामी आयासी परिसारी संसर्गी परिदेवी संज्वारी परिक्षेपी परिराटी परिदाही परि
मोही दोषी द्वेषी द्रोही दोही योगी आक्रीडी विवेकी त्यागी सूत्रे निपातनान्नलोपः रागी भागी अतिचारी अप
चारी आमोषी अभ्याघाती वौकषलसकत्थस्रंभः विकाषी विलासी विकत्थी विस्रंभी अपेचलषः चाषी अ
पलाषी विलाषी प्रेलपसृद्रुमथवदवसः प्रलापी प्रसारी प्रद्रावी प्रमाथी प्रवादी प्रवासी निंदहिंसक्लिशखाद
विनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयोवुञ् पंचम्यर्थे प्रथमा एभ्यो वुञ् स्यात् निंदकः हिंसकः इत्यादि ण्वु
ला सिद्धे वुञ्वचनं ज्ञापकं तच्छीलादिषु वासरूपन्यायेन तृजादयो नेति देविक्रुशोश्चोपसर्गे आदेवकः आक्रो
शकः उपसर्गे किं देवयिता क्रोष्टा चलनशब्दार्थादकर्मकाद्युच् चलनार्थाच्छब्दार्थाच्च युच् स्यात् चलनः चो
पनः कंपनः शब्दनः रवणः अकर्मकात् किं पठिता विद्यां अनुदात्तेतश्च हलादेः अकर्मकाद्युच् स्यात् वर्तनः वर्द्ध
नः अनुदात्तेतः किं भविता हलादेः किं एधिता अकर्मकात् किं वसिता वस्त्रं जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचल
षपतपदः जुइति सौत्रो धातुः गतौ वेगे च जवनः चंक्रमणः दंद्रमणः सरणः गर्द्धनः लिप्सुः हिंसः लषपतप
दे स्थकज्ञावाधाभाभूतत्त्वइति तेन ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति तेनालंकृञ् त्वञ्च क्रुधमंडार्थे
भ्यश्च क्रोधनः रोषणः मंडनः भूषणः नयः यकारांताद्युच् न स्यात् क्रूपिता क्ष्मायिता सूददीपदीक्षश्च य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰ ल॰
९८

श्रीः द्युतिगमिजुहोतीनां द्वे च हशिग्रहणादभ्यासस्य संज्ञा दिद्युत् जगत् जुहोतेर्दीर्घश्च जुहूः द्रुभयो अभ्यस्य ह्रस्वः दीर्घ
ति दद्रुः ध्यायतेः संप्रसारणं च धीः भुवः संज्ञान्तरयोः मित्रभूर्नाम कश्चित् धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वा
सार्थे प्रतिभूः विप्रसंभ्यो ड्वसंज्ञायां एभ्यो भुवो डुः स्यात् असंज्ञायां विभुर्व्यापकः प्रभुः स्वामी संभुर्जनिता संज्ञायां तु
विभूर्नाम कश्चित् मितद्र्वादिभ्य उपसंख्यानं मितं द्रवतीति मितद्रुः शंभुः अन्तर्भावितण्यर्थोऽत्र भवति धः कर्मणि ष्ट्रन्
धेट् धाञ् श्च कर्मण्यर्थे ष्ट्रन् स्यात् धात्री जनन्यामलकीवसुमत्युपमातृषु दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदश
नहः करणे दाबादेः ष्ट्रन् स्यात् करणेऽर्थे दात्यनेन दात्रं नेत्रं तितुत्रतथसिसुसरकसेषु च एषां दशानां कृत्प्रत्यया
९० लद
नामिण्न स्यात् शस्त्रं योत्रं योक्त्रं स्तोत्रं तोत्त्रं सेत्रं सेक्त्रं मेढ्रं पत्त्रं दंष्ट्रा नद्ध्री हलसूकरयोः पुवः पुवः ष्ट्रन्: क
रणे ष्ट्रन् तच्चेत्करणं हलसूकरयोरवयवः हलस्य सूकरस्य पोत्रं मुखमित्यर्थः अर्तिलूधूसूखनसहचर इत्रः अ
रित्रं लवित्रं धुवित्रं सवित्रं खनित्रं सहित्रं चरित्रं पुवः संज्ञायाम् पवित्रं येनाज्यमुत्पूयते पञ्चानामिका वे
ने कर्तरि चर्षिदेवतयोः पुव इत्रः स्यात् ऋषौ करणे देवतायां कर्तरि ऋषिर्वेदमन्त्रः तदुक्तमृषिणेति द
र्शनात् पूयतेऽनेनेति पवित्रं देवतायां तु अग्निः पवित्रं स मा पुनातु ॥ ॥ अथोणादयः ॥ कृवापाजिमिस्वदि
साध्यशूभ्य उण् । करोतीति कारुः । शिल्पी कारकश्च आतपो वातीति वायुः पायुर्गुदं जयत्यभिभवति रोगा
न् जायुरौषधं मिनोति प्रक्षिपति देहे ऊष्माणमिति मायुः पित्तं स्वादुः साध्नोति परकार्यमिति साधुः अ
कारुः शिल्पिनि कारके इति धरणिः

राम॰
९८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ति इष्टुं। कौटिल्ये त्वसि देवान् जिगाति सुम्नयुः। आदृगमहनजनः किकिनौ लिट् च। आदन्तादृदन्ताद्गमादिभ्यश्च कि
किनौ स्तः। पपिः सोमं ददिर्गाः। जग्मिर्युवा जघ्निर्वृत्रममित्रियं जज्ञि। भाषायां धा
ञ्कृसृगमिजनिनमिभ्यः। दधिः चक्रिः सस्रिः जग्मिः जज्ञिः नेमिः। सासहिवावहिचाचलिपापतीनामुपसंख्या
नं यङन्तेभ्यः सहेत्यादिभ्यः किकिनौ पतेर्णिगभावश्च निपात्यते। स्वपितृषोर्नजिङ्। स्वप्नक् तृष्णक् तृष्णजौ तृ
ष्णजः। धृषेश्चेति वाच्यमिति काशिकादौ धृष्णक्। शॄवन्द्योरारुः। शरारुः। वन्दारुः। भियः क्रुक्लुकनौ। भीरुः भीलुकः।
क्रुकन्नपि वाच्यः। भीरुकः। स्थेशभासपिसकसो वरच्। स्थावरः ईश्वरः भास्वरः पेस्वरः कस्वरः। यश्च यङः।
यातेर्यङन्ताद्वरच्। अतो लोपः। तस्य यलोपं प्रति स्थानिवत्त्वनिषेधाल्लोपो व्योरिति यलोपः। अल्लोपस्य स्थानि
वत्त्वमाश्रित्यातो लोपे प्राप्ते वरे लुप्तं न स्थानिवत्। यायावरः। भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।
धुर्वी हिंसायां विभ्राट् भाः भासौ धूः धुरौ विद्युत् ऊर्क् पूः पुरौ दृशिग्रहणस्यापकर्षाज्जुवतेर्दीर्घः जूः जुवौ जुवः। ग्रावग्रा
वस्तुधातुनामसमासः सूत्रे निपात्यते। ततः क्विप्। ग्रावस्तुत्। अन्येभ्योऽपि दृश्यते क्विप्। छित् भित्। दृशिग्रहणं विध्य
५२ न्तरोपसंग्रहार्थं क्वचिद्दीर्घः क्वचिदसंप्रसारणं क्वचिद्द्विवचनं क्वचिद्ध्रस्वः। तथा च वार्त्तिके क्विब्वचिप्रच्छ्यायतस्तुकट
प्रुजुश्रीणां दीर्घोऽसंप्रसारणं च। क्विब्वचीत्यादिना उणादिसूत्रेण केषांचित्सिद्धेन तच्छीलादौ तत्राबोधायामाभूदिति
वार्त्तिकग्रहणं। वक्तीति वाक्। प्रच्छतीति प्राट्। आयतं स्तौति आयतस्तूः। कटं प्रवते कटप्रूः। जूरुक्तः। श्रयति हरिं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
उ॰क॰
९९

सीमद्रं ईडेतिस्त्वादेः ॥ ईलतिः ईडुः ईषेः किच्च ईषेः उस्मात् सच कित् आदेरिकारादेशश्च ईषति हिनस्ति इषुः शरः इषु ईषुयोः
स्कन्देः सलोपश्च कंडुः सृजेरसुमच्च वान्सलोपः उप्रत्ययश्च रज्जुः कसेरादंत विपर्ययश्च ककारतकारयोर्विनियमः तर्कुः सू
त्रवेष्टनं नावंचेः न्यंक्वादित्वात्कुत्वं नियतमंचतीति न्यंकुः मृगः फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च फलेर्गुक् फल्गुः
पाटेः पटिः पाटयतीति पटुः नम्यतेनेन नाकुः वल्मीकं मन्यते इति मधुः जायते इति जतुः वलेर्गुक्च वलसंवरणे वल्गुः धाः
कित्सन्वच्च धयतेरुः स्यात्सच कित्सन्वच्च शिशुर्बालः यो द्वे च ययुरश्वो श्वमेधीयः सन्वादिति प्रकृते द्वेग्रहणमित्वनिवृत्य
र्थं कुर्भ्रश्च बभ्रुर्नकुलेन्तरे विशेषो बभ्रुर्नकुलपिंगलो चाद्न्यतो पि चक्रुः कर्त्ता जघ्नुर्हन्ता पपुः पालकः पृभिदिव्यधिगृधिधृषि
हृषिभ्यः कुः स्यात् पृरुः भिनत्ति भिदुर्वज्रं ग्रहिज्येति संप्रसारणे विहितं विध्यति विधुः शशांके कर्पूरे हृषीकेशे च राक्षसे गृधुः
कामः धृषुर्दक्षः कृग्रोरुच्च चात्कुः करोतीति कुरुः गृणातीति गुरुः अपदुःसुषु स्थः सुषामादिषु चेति षत्वं अपष्ठु प्रतिकू
लं दुष्ठु सुष्ठु रपेरिच्चोपधायाः रिपुः निशं रपतीति रिपुः अर्जिदृशिकम्यमिपंशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च
अर्जयतीति गुणान् ऋजुः सर्वान् विशेषेण पश्यतीति पशुः कंतुः अंधुः रूपः पांशुर्नीनद्योरजः तालव्या अपि दंत्याश्च सं
दस्रन्दर पांसवः बाधते बाहुः स्त्रीपुंसयोर्भुजः प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च त्रयाणां कुः संप्रसारणं भ्रस्जो सलोप
श्च पृथुः मृदुः न्यंक्वादित्वात्कुत्वे भृज्जतीति तपसा भृगुः लंघबहोर्नलोपश्च लघुः बालमूललघ्वलमंगुलीनां वा लो रत्व
मापद्यते रघुर्नृपभेदः बहुः ऊर्णोतेर्नुलोपश्च ऊरु सक्थि महति ह्रस्वश्च उरुमहत् श्लिषेः कश्च श्लिष्यतीति श्लि

राम॰
९९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्फुले स्याष्फुणीयं स्याप्युवीहिः पाटलः स्यात् छंदसीगौः मानन्याथे हृस्वनिजनिचविचहिभ्योनुम् दीर्यते इति
शारुः स्नुग्रस्थः सानुरस्त्रियां जानुजानुनी इहजनिवध्योश्चेति न निषेधः अनुबंधद्वयसामर्थ्यात् चास्तमं चारु
प्रियंवाक्यं मगव्यादित्वात्कुप्रत्यये च हुः इत्यपि किं जरयोः क्षिणः किंशृणाति इति किंशारुः सस्य सूकं वाण श्च जारा
मेतिजरायुः। गर्भाशयः त्रोष्ठलः नेत्रमने नवली इतिलालु ककेचचः कस्य ककेनगलेन वक्तीति ककवाकुः ह
कवाकुमित्प्रेचसरटेचरणायुधइति विश्वः भवपीतश्चरित्सविल निधनिमिमसि भ्रुः भरति बिभर्ति वा भरुः सा
मीहरस्य म्रियतेऽस्मिन्भूतानि मरुः निर्जलदेशः शेते इति शयुः अजगरः तरुर्व्हसः चरंति भक्षयंति देवता इमं इति च
रुः त्सरुः खड्गादिमुष्टिः तत्तुः स्वल्पे स्त्रियां मूर्तिः स्तनुस्तनूः धन्वा पात्र विशेषः धनुषा च धनु र्विंडः धनुरिवाजनि
वक्र इति श्रीहर्षः मद्गुः किन्नरः मङ्गुः पानीयाक किकेतिरभसः न्यंकादित्वात्कुः जणत्वेन सस्यदः अणस्य ल
वलेशाकणाणवः चात्कविवटिभ्यां क इति रसनाभिलिकद्रुः [illegible] वरतीति वट्रुः धान्येनि तु धान्येवाच्येऽणाउ
प्रत्ययः स्यात् सचनितत् नित्वादाद्युदात्तः प्रियंगवश्च मूलणवश्चमे ब्रीहिभेदस्त्वणुः पुमान् निरूढ़ंफलिपा
टीत्यादि सूत्रमभिव्याप्य संबध्यते स्फस्स्तिस्ति चप्पसिवसिहनि दिंवाधि मनुभ्यश्च स्फलीति फारुः आयुधकोपयोः स्व
रुर्वज्रः स्नेहुः व्याधिः चंद्रइत्यन्ये त्रपुसीसं पुंसिभस्मवसवः प्राणाः वसुर्देहे यो योक्ते शोच सुनोप्रेयथनेमरणे हनुर्वे च एकदेशः अं
ह्वेउष्ट्रं रुः वेधुः मन्तुः चालविदि अवयवे बिंदुः संदे मतमस्मारणायश्च सिंधुः देशेनदविशेषेऽब्धौ सिंधुर्ना सरितिस्त्रियामित

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ रा मसुरा वाना वेश्या व्रीहिप्रभेदयोः मसूरी पापरोगे स्यात् उपधानेऽप्यनः पुमान् इति मेदिनी म॰ मसुरमसुरौ च द्वौ विश्वः श्वाश्वशेराशो
उ॰ कृ॰ श्वुरः इत्याश्चर्ये श्वशुरः पतिपत्न्योः श्वसुः श्वश्रूः श्वशुरस्तु पितानयोरित्यमरः अविमह्योष्टिषच् अविषः महिषः राजासमु
१०० द्रश्च अमेर्दीर्घश्च आमिषं त्वास्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि रुहेर्वृद्धिश्च रौहिषो रंकुपांबरौ हिषाः रौहिषो मृगभेदः स्यात् रौहिषं
चतृणं मतमिति संसारावर्त्तः तवेर्णिद्वा तवेति सौत्रो धातुः तविषता विषावब्धौ स्वर्गे च स्त्रियां तु तविषी ताविषी नदीदेवकन्या
भूमिश्च तविषी बलमिति वेदभाष्यं नञि व्यथेः अव्यथिषोऽब्धि सूर्ययोः अव्यथिषी धरा रात्र्योः किलेर्बुक् च किल्बिषं इषिमदि
मुदि खिदि छिदि भिदि मंदि चंदि तिमि मिहि मुहि मुचि रुचि रुधि बंधि शुषिभ्यः किरच् इषिरोऽग्निः मदिरा सुरा मुदिरः कामु
100 कोऽभ्र योरिति विश्वमेदिन्यौ खिदिरश्चंद्रः छिदिरोऽसिकुठारयोः भिदिरं वज्रं मंदिरं गृहं स्त्रियामपि मंदिरे मंदिरा पिस्यादि
ति विश्वः चंदिरौ चंद्रहस्तिनौ तिमिरं तमः आह्विरो गश्च मिहिरः सूर्यः मुहिरः कामि मूर्ख्ययोः मुचिरो दाता रुचिरं रु
धिरं बधिरः शुष शोषणे शुषिरं छिद्रं शुष्कमित्यन्ये अशेर्णित् आशिरो वह्निरक्षसोः अजिरशिशिरशिथिलस्थिरस्फि
रस्थविरखदिराः अजेर्वीभावाभावः अजिरमंगणं शशेरुपधाया इत्वं शिशिरं स्यादृतोर्भेदे तुषारे शीतलेऽप्यव
त् अथमोचने उपधाया इत्वं रेफलोपः प्रत्ययरेफस्य लत्वं शिथिलं स्या स्फायो हिलोपः स्थिरं निश्चलं स्फिरं प्रभूतं ति
ष्ठतेर्वुक् ह्रस्वत्वं च स्थविरः खिदिरः वाकुलकात् प्रीडो वुक् ह्रस्वश्च शिविरं सलिकल्यनिमहिभडिभंडिशंडि पिं राम॰
डितुंडि कुकिभूभ्य इलच् सलति गच्छतीति निम्नमिति सलिलं कलिलं अनिलः महिला पृषोदरादित्वात् महेला पि १००

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुः भस्मः उषतो ज्योतिश्च आडपर्ययोः खनिमृभ्यां डिच्च आखनतीति आखुः परं शृणातीति परशुः पृषोदरादित्वात् सका
रलोपात् पर्शुरपि हरिमितयोर्द्रुवः हरिमितिभ्यां द्रुवः हरिद्रुः मितद्रुः हरीन् द्रवतीति हरिद्रुः मितं द्रवतीति मितद्रुः समुद्रः शतेच शतधा द्रवतीति श
तद्रुः नदी वाकुलकात्केवलादपि द्रवत्यूर्ध्वमिति द्रुः वृक्षः शाखा तद्वान् द्रुमः खरुषांकुपीयुनीलंगुलिगुः पंचैते कुप्रत्य
यान्ता निपात्यन्ते खनतेः रेफश्चान्तादेशः खरुः कामः क्रूरो मूर्खः अश्वश्च शङ्कुः कीलपाल्ययोः पिबते रीत्वं युगागमश्च
पीयुर्वायसः कालः सूर्यश्च निपूर्वाल्लगिगत्यावस्मात्कुः नेर्दीर्घश्च नीलंगुः कृमिविशेषः शृगालश्च नीलाङ्गुरित्यपा
ठान्तरं तत्रधातोरपि दीर्घः लगेसंगे अस्य अतः उत्वं च लगतीति लिगुश्चित्तं लिगुर्मूर्खः मृगय्वादयश्च एतेकुप्रत्ययान्ताः
निपात्यन्ते मृगयतीति मृगयुर्व्याधः देवयुर्धार्मिकः मित्रयुर्लोकयात्राभिज्ञः आप्नोतिगणोयं मद्विवाशिमथि चति
चंकिभ्यः उरच् मद्गुरा वाजिशाला वाश्रुरारात्रिः मथुरा चतुरः चंकुरः चंकुरोरथः अंकुरः खर्जूरादित्वात् अंकुरो
पि व्यथेः संप्रसारणं किच्च विधुरश्चोररक्षसोः मकुरदर्दुरौ मकुरो दर्पणः वाकुलकान्मुकुरोपि दॄ विदारणे धातो मकि मंडने=
द्विर्वचनेऽभ्यासस्य रुक् टिलोपश्च दर्दुरस्तोयदे भेके वाद्यभांडाद्रिभेदयोः दर्दुराचंडिकायां स्याद् ग्रामजालेचद
र्दुरमिति विश्वः मद्गुरादयश्च उरजन्ता निपात्यन्ते माद्यतेर्गुक् मद्गुरो मत्स्यभेदः कर्बुर्वर्णे रुमागमः कर्बुरः श्चित्ररक्षसोः
वर्णे खर्जूरादित्वाद्दीर्घोपि बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोः त्विषु इति रं तिदेव कोकतेर्वाकुक कुक्कुरः कुकुरः अ
सेरुरन् असुरः मज्जाघएण असुरः म सेच्च पंचमे पादे मन्दुरू रन्तीति वक्ष्यते मन्दुराश्वो दि प्रभेदे पण्ययो वितिमस्य । मसुरए१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ स्तु अगारेणिच्च वेपश्च भुर्वीस्तु रस्त्रियां कशाः कतुः क्रतुर्यज्ञः एधिवह्योश्चतुः एधतुः पुरुषः वहतुरनड्वान् जीवेरातुः जी

उ॰ क॰ वातुः स्त्रियां भक्ते जीविते जीवनौषधे आतृकन्वृद्धिश्च जीवेरित्येव जैवातृकः स्त्रिवंदु भिषगायुष्मत्सु शशीवले कृषिचमित

२०१ निधनिसर्जिखर्जिभ्य ऊः कर्षूः कुल्याकरीषाग्नी कर्षूर्नद्यां स्त्रियां मता चमूः तनूः धनूः शस्त्रं सर्ज अर्जने सर्जूर्वणिक् खर्जि

व्यथने खर्जूः आमा कृहेश्च कुरूः मृजेर्गुणश्च मर्जूः शुद्धिकृत् वहो धश्च वधूः जाया स्नुषा स्त्रीषु कषेश्छश्च कच्छूः

पामा णित्कसिपद्यर्तेः कासूः पाकिः पादूः चरणधारिणी आरूः पिंगलः अणोडश्च आडूः जलप्लववद्द्रव्यं नञिलं

101 घेर्नलोपश्च ह्रस्वश्च लाबूः तुम्बे समि स्थमरः के औणादिकश्चास्य कुशब्द उपपदे शृणातेरूः स्यादेरङादेशः कशेरूः तृणकंदे

स्त्री बाहुलकादुपसर्गेकशेरुः लीविच्चसितेच त्रोटङ् तरतेरूः स्यात् तस्य डुट् तर्दूः स्याद्दारुहस्तकः दरिद्रातेर्यालोप

श्च दरिद्र आश्च योतयोर्लोपः दद्रूः कुष्ठभेदः नृतिशृध्योः कूः नृतूर्नर्तकः शृधूः रयाने ऋतेरम्च ऋदितिसौत्रो

धातुः ऋतः रूः अमागमश्च रन्तूर्देवनदी सत्यवाक् च अंदूदंभूजेन्वकफेलूकर्कंधू दिधिषूः एते कूप्रत्ययांता

निपात्यंते अंदूर्बंधनं दभीर्नश्चेति निपातनान्नुम् अदेस्वाराभावे निपातनात् दुमेके दम्भूः जनेर्वुक् जंबूः जंम्बुः

ह्रस्वोऽप्येके बाहुलकाद्ध्रस्वोपि जंबुः कफेलाति इति कफेलूः श्लेष्मातकः निपातनादेवं कर्कं दधातीति कर्कंधू

र्बदरी निपातनान्नुम् दिधिं धैर्यं स्यति त्यजति दिधिषूः पुनर्भूः केचित्तु अंडूहूञ्जेनूकर्कंधू इति पठंति हंफकउल्कोश्च दं सम॰

फूः सर्पजातिः कमेर्बुक् कंबूः परद्रव्यापहारी मृगोकतिः मरुब गकलपक्षः गोमृदु गिरतेरुतिस्तस्य चमुद २०१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भड इतिसौत्रोधातुः भडिलोमहरसेवको भंडिलोदूतः कल्याणंच पांडिलोमुनिः पिंडिलोगणकः तुंडिलोमुखरः कोकिलः
भविलोभव्यः बाहुलकात्कुटिलः कमेः पश्च कपिलः गुपादिभ्यः कित् गुपिलोराजा तिजिलोनिशाकरः गुहिलं वनं मि
थिलादयश्च मथ्यंतेयत्ररिपवो मिथिलानगरी पथिलः पथिकः पतिकठिकुठिगडिगुडिदंशिभ्य एरक् पतेरः यत्नी
गेनाच कठेरः कृच्छ्रजीवी कुठेरः पर्णाशः बाहुलकान्नुमन् गंडेरोमेघः गुडेरोगुडकः दंशेरोहिंस्रः कुंबेर्नलोपश्च कुबे
रः रूपादेस्तच पतेरः पात्रः म्लेरादयः एरगंतानि पात्यंते म्लेरोजरा गुधेरोगोप्ता गुहेरोलोहघातकः मुहेरोमूर्खः कबेरो
नचपश्च कपोतः पक्षी भालेडवलुः भालीतिभवान् कठिचकिभ्यामोरन् कठोरः चकोरः किशोरादयश्च किरर्वंसघ्नन्ते
टिलोपः किमोस्मलोपः किशोरः अश्वशावः सहोरः साधुः कपिगडिगंडिकटिपटिभ्य ओलच् कपीतिनिर्देशान्नलो
पः कपोलः गडोलगंडोलौ गुडकपर्यायौ कटोलः कटुः पटोलः मीनातेरूरन् मयूरः संदो संप्रसारणंच सिंदूरं सितनिग
मिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् सिनोतीति सेतुः तितुत्रेतिनेट् तंतुः गंतुः मस्तुर्दधिमंडः सच्यत इति सक्तुः अर्देचो
दिः ज्वरत्वरेत्यूट् तत्राक्तौ सन्नुवर्तते अतिमनेतु बाहुलकात् ओतुर्बिडालः धातुः क्रोष्टा पाः किच्च पिबतीति पोतुर्वे
णे दिवाकरे अर्तेश्चतु अर्तेस्तुः स्यात्सचकित् ऋतुस्त्रीपुष्पकालयोः कमिमनिजनिगाभायाहिभ्यश्च एभ्यस्तुः स्यात्
कंतुः कंदर्पचित्तयोः मंतुरपराधः जंतुः प्राणी गातुः पुंस्कोकिले भृंगे गंधर्वे गायनेपिच भातुः आदित्यः यातुस्त्व
गकालयोः रक्षसिक्लीबे हेतुः कारणं चायः किः केतुर्ग्रहपताकयोः आप्नोतेर्ह्रस्वश्च अप्तुः शरीरं वसेस्तुन् च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ उ॰ क॰ १०२ पतंगः तरत्यादिभ्यश्च तरंगः लवंगं विडादिभ्यः किन् विडंगः मृदंगः कुरंगः वाहुलकात्कुत्वं च रञ्जेर्ह्रस्वश्च सारंगः वारंगः
खड्गादिभुहि गन्गम्योर्घ्योः गंगा अङ्गः घरोडाथः छापुरवडिभ्यः किन् छागः पूगः खड्गः वाहुलकात्षिद् अनादरे गन्
सत्वाभावश्च षिड्गस्तरलः षिड्गैरगयत्तमसंभ्रममेव मे केति माघः मञ्जः किन्तु भञ्जो गन् किन्स्यात् तस्यनुड्व भंगाः षिड्ग
लिभ्यामाः शृणातेर्ह्रस्वश्च शृंगं गएशाकुनौ तुड्वेति अनुवर्तते शार्ङ्गः मुदिग्योर्गग्घौ मुद्गः गर्गः अण्डन्कृसृभृ
102 वृञः करंडः सरंडः पक्षी भरंडः स्वामी वरंडो मुखरोगः मृदृभसोऽदिः शरत् दरत् हृदय कूलयोः भसज्जघने हृणा
तेषुगहस्वश्च दृषत् त्यजितनियजिभ्यो डित् त्यद् तद् यद् सर्वादयः एतेस्तुट्च एतद् सर्तेरटिः सरट् स्या
कानमृ घयोः वेदभाष्येतु ... कृशानुमिति मंत्रे सरद्भ्यो मधु मक्षिकाभ्य इति व्याख्यानं लंघेर्नलोपश्च लघट् वायुः
पारयतेरजिः पारक् सुवर्णं प्रथः किन्संप्रसारणं च पृथक् स्वरादिपाठादव्ययत्वं च भियः क्रुक् ह्रस्वश्च भिषक् पुष्पसि
भ्यां मधिक् युषसौत्रोयानुं युष्मद् अस्मद् त्वं अहं अर्तिस्तु मुकुरस्थिस्तु भायावापदियक्षिनीभ्यो मन् एभ्यश्चतु
देशाभ्यो मन् अर्तेश्च स्तोमः होमः सर्मैमनं धर्मः क्षेमं कुशलं छोमं मजादित्वाद्णि छोमं भामः क्रोधः।
यामः वामः पोभज ... पद्मं पक्ष्म जायां यक्ष्मो रोगराजः नेमः अर्द्धे स्यन्दनालोपश्च जिह्मः कुटिलं मंदयोः। रामः
अवतेष्टिलोपश्च मन्त्र्यायस्यायेटिलोपः न प्रकृते। अन्यथाद्विदिसेव ब्रूयात् ज्वरत्वरेति ऊढो तयोर्दीर्घेतेतु १०२
णः चादिपाठादव्ययत्वमित्यु ज्जलदलदलः तन्न तेषामसत्वार्थत्वात् वस्तुतस्तु स्वरादिपाठादव्ययत्वं अवतीति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गर्मुत्स्वं स्तवविशेषश्च ह बेस्तलश्च दर्बुलो मृगकामिनोः वाहुलकात्तु बटतेः चटुलं शोभनं हस्रकदिग्रुविभ्य
इति हरित्क्रूमिवलोच तरणाक्षाजिविशेषयोः सरित्वती रोहित् मृगविशेषस्य स्त्रीप्रयञ्जति सौत्रो धातुः क्र यस्य
रोहिन्नुरुषस्य वीबिल इति भाष्यं नाडेर्णिलुक्च नाडयतीति तडित् विद्युत् शमेष्टी वाहुलकादित्संज्ञायाभावः इ
इचन शोठः क्लीबः कमेरठः कमठः वाहुलकाज्जरठः रमेर्हिश्च रामठं हिंगुः शमेलः शालः कणेश्च कंठ कल
स्तपेश्च स्तपेः कलप्रत्ययः चानन्तरफेतेः स्तप लालना स्फलाफलनिके शपेर्वश्च शवलः वृषादिभ्यश्चित् वृषलं
त् अम्परे खयि परे अमपरस्य पस्येति यत्वपर्युदासात् ≍क≍पयोः प्राप्तोऽप्यनुत्पत्तिपक्षे नु यत्व प्राप्तोऽसम्पुंकानामिति

सः पुँस्कोकिलः पुंस्कोकिलः पुँस्पुत्रः पुंस्पुत्रः अमपरे किम् पुंक्षीरम् खयि किम् पुंदासः ख्याञ्जादेशेन पु

ल्यानुम् नश्छव्यप्रशान् अम्परे छवि नकारान्तस्य पदस्य रुः स्यान्न तु प्रशान् शब्दस्य विसर्गे सत्वम् श्चुत्वं

137 शार्ङ्गिंश्छिन्धि शार्ङ्गिँश्छिन्धि चक्रिंस्त्रायस्व चक्रिँस्त्रायस्व पदस्येति किं हंति अम्परे किम् सन्त्सरुः त्सरुः खड्गमु

ष्टिः अप्रशान् किम् प्रशान्तनोति नृन्पे नॄन्पे नित्यं रुः स्यात् पकारे परे कुप्वोः ≍क≍पौ च कवर्गे पवर्गे च परे

विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः चाद्विसर्गः येननाप्राप्तिन्यायेन विसर्जनीयस्य सः इत्य

स्यापवादोऽयं न तु णे परे विसर्जनीयः इत्यस्य तेन नासः स्तोममित्यादौ विसर्ग एव नॄँ≍पाहि नॄं≍पाहि नॄँः पाहि

नॄंः पाहि नॄन्पाहि कानाम्रेडिते कान्नकारस्य रुः स्यादाम्रेडिते परे संपुंकानामिति सः यथा कस्कादिषु च ए एम्॰

ष्विण उत्तरस्य विसर्गस्य षः स्यादस्यासिद्धत्वात् सः ≍क≍पयोरपवादः इति सः काँस्कान् कांस्कान् कस्कः कौतस्कुतः २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योः कुक्टुकावागमौ वास्तः खरि । कुक्टुकोरसिद्धत्वाज्जश्त्वं न चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यं
प्राङ्षष्ठः प्राङ्ख्षष्ठः प्राङ्क्षष्ठः सुगण्षष्ठः सुगण्ट्षष्ठः सुगण्ठ्षष्ठः । डः सि धुट् डात्परस्य स
स्य धुड्वा स्यात् षट्त्सन्तः षट्सन्तः नश्च नकारान्तात्परस्य सस्य धुड्वा स्यात् सन्त्सः सन्सः शि तुक् नस्य
पदान्तस्य शे परे तुग्वा स्यात् शश्छोऽटीति छत्वविकल्पः पक्षे झरो झरीति चलोपः सञ्छम्भुः सञ्च्छम्भुः स
ञ्च्शम्भुः सञ्शम्भुः ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् रूपाणामिह तुक्छत्वचलोपानां विकल्प
नात् ङमो ह्रस्वादचि ङमुण्नित्यं ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात् प्र
त्यङ्ङात्मा सुगण्णीशः सन्नच्युतः समः सुटि समो रुः स्यात्सुटि अलोऽन्त्यस्य अत्रानुनासिकः पूर्वस्य तु वा अत्र
रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् अनुनासिकात्परोऽनुस्वारः अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनु
स्वारागमः स्यात् खरवसानयोर्विसर्जनीयः विसर्जनीयस्य सः खरि परे विसर्जनीयस्य सः स्यात् एतदपवा
देवा पारीति वार्त्तिके विसर्गे प्राप्ते सम्पुंकानां सो वक्तव्यः सँस्स्कर्त्ता संस्स्कर्त्ता २ समो वा लोपमेक इति भाष्य
म् लोपस्यापि रुत्वकरणसत्वादनुस्वारानुनासिकाभ्यामेकसकारकं रूपद्वयम् द्विसकारकं तद्वमेव तत्रानचि
चेति सकारद्वित्वपक्षे त्रिसकारकं रूपद्वयम् अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इष्मावेनमः करोति । एकोऽयमपि निविष्य गतिसंज्ञायुरस्करोति । अगतित्वान्नेह । इः । उः । प्रत्ययाः । इदुदुपधस्य चाप्रत्ययस्य ।
यस्य इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः परयोः । निष्कृतम् । आविष्कृतम् । दुष्कृतम् । अप्रत्य-
यस्येति किम् । अग्निः करोति । वायुः करोति । एकादेशशास्त्रनिमित्तकस्य न षत्वम् । कस्कादिषु भ्रातुष्पुत्रशब्दस्य पा-
ठान्नेह । मातुः कृपा । मुहुसः प्रतिषेधः । मुहुः कामा । तिरसोऽन्यतरस्याम् । सो वा स्यात् कुप्वोः । तिरस्कर्त्ता तिरः
कर्त्ता । द्विस्त्रिश्चतुरिति कृत्वोऽर्थे । कृत्वोऽर्थे वर्त्तमानानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः । द्विष्करोति द्विः करोति ।
त्यादि । कृत्वोऽर्थे किम् । चतुष्कपालः । इसुसोः सामर्थ्ये । एतयोर्विसर्गस्य षो वा स्यात् कुप्वोः । सर्पिष्करोति सर्पिः करोति ।
धनुष्करोति धनुः करोति । सामर्थ्यमिह व्यपेक्षा । सामर्थ्ये किम् । तिष्ठतु सर्पिः पिब त्वमुदकम् । नित्यं समासेऽनुत्त-
रपदस्थस्य । इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात् कुप्वोः । सर्पिष्कुण्डिका । धनुष्कपालम् । अनुत्तरप-
दस्थस्य किम् । परमसर्पिः कुण्डिका । कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थः । व्यपेक्षा-
यां नित्यार्थश्च । अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । अकारादुत्तरस्यानव्ययस्य विसर्गस्य स-
मासे नित्यं सकारादेशः स्यात् करोत्यादिषु परेषु नत्त्तरपदस्थस्य । अयस्कारः । अयस्कामः । अयस्कंसः । अ-
यस्कुम्भः । अयस्पात्रम् । अयःसहिताकुशी । अयस्कर्णी । अतः किम् । गीःकारः । अनव्ययस्य किम् । स्वःकामः ।
समासे किम् । यशः करोति । अनुत्तरपदस्थस्य किम् । परमयशःकारः । अधःशिरसी पदे । एतयोर्विसर्गस्य

नवलत्वोऽर्थे इत्येव कृत्वोऽर्थे विद्यमाने से इदुदुपधस्य यो विसर्गस्तस्याप्रीत्यर्थं बहुलत्वः । अयस्कुशा २ करोतीत्यादौ दोषो नापि चतुष्करोतीत्यादावव्याप्तिः द्वित्रिचतुरिति अर्थे मि ।

तरवकि चास्याधिकारत्वात्तत्र प्रयोगमसिद्धत्वं इवोरमित्यन्मात्रविस्तरः ॥ ५ अत्र इसुसोः प्राति पदिकावयवयोर्ग्रहणात्तेन पेचुः काष्ठे । सरघुः पाकः कविभिः कृतं मित्यादौ नेष्टः ॥

सि २ पा ३

सर्पिष्कुण्डिका धनुष्कपालम् आकृतिगणोयं संहितायामित्यधिकृत्य छे च ह्रस्वस्य छे परे तुगागमः स्यात्
संहितायाम् चुत्वस्यासिद्धत्वाज्जश्त्वेन दः ततश्चुत्वस्यासिद्धत्वात्पूर्वं चुत्वेन जः तस्य चर्त्वेन चः चुत्वस्यासिद्धत्वा
न्नोः कुगिति कुत्वन्न स्वच्छाः शिवच्छाया आङ्माङोश्च एतयोश्छे परे तुक् स्यात् पदान्ताद्वेति विकल्पापवादः
आच्छादयति माच्छिदत् दीर्घात् दीर्घाच्छे परे तुक् स्यात् दीर्घस्यायं तुक् न तु छस्य सेनासुराच्छायेति ज्ञाप
कात् चेच्छिद्यते पदान्ताद्वा दीर्घात्पदान्ताच्छे परे तुग्वा स्यात् लक्ष्मीच्छाया लक्ष्मीछाया ॥ इति हल्संधिः
॥ ३ ॥ विसर्जनीयस्य सः विष्णुस्त्राता शर्परे विसर्जनीयः शर्परे खरि विसर्जनीयस्य विसर्जनीयो न त्वन्यत् कः
त्सरुः घनाघनः क्षोभणः इत्यत्र यत्वं सत्वं जिह्वामूलीयश्च न वा शरि शरि परे विसर्जनीयस्य विसर्जनीय
एव वा स्यात् हरिः शेते हरिश्शेते खर्परे शरि वा विसर्गलोपो वक्तव्यः रामस्थाता हरिस्फुरति पक्षे विसर्गस
त्वे चत्वे रूपत्रयम् कुप्वोः ≍क ≍पौ च ≍कः करोति कः करोति कः खनति ≍कः पठति कः पठति ≍कः फलति कः
फलति सोऽपदादौ विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः पयस्पाशम् यशस्कल्पम् यशस्कम् यशस्काम्य
ति अनव्ययस्येति वाच्यम् प्रातः कल्पम् काम्ये रोरेवेति वाच्यम् गीः काम्यति इणः षः इणः परस्य विसर्ग
स्य षः स्यात्पूर्वविषये सर्पिष्पाशम् सर्पिष्कल्पम् सर्पिष्कम् सर्पिष्काम्यति नमस्पुरसोर्गत्योः गतिसंज्ञक
योरनयोर्विसर्गस्य सः स्यात्कुप्वोः परयोः नमस्करोति साक्षात्प्रभृतीनि च कृञो योगे विभाषा गतिसंज्ञात

कः त्सरुरिति तत्तु तरं अपदाद्वाविति न संबध्यते व्याख्यानात् ॥ २ ॥
दित्वा ज्ञातित्वं स्वरादिपठितस्य तुगति त्वाभावश्चेन साधा
इत्यर्थति सच्च यच्च धर्म्म तिपिन लति ॥ ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. देवा गो येत्येवं कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदान्तयोर्यकारवकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे य
११ स्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः ओतो गार्ग्यस्य ओकारात्परस्य पदान्तस्या
लघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात् गार्ग्यग्रहणं पूजार्थं भो अच्युत लघुप्रयत्नपक्षे भो यच्युत पदान्तस्य
139 किं तोयम् उञि च पदे अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपः उञि पदे स उ एकाग्निः पदे किम् तन्त्रयुतं वेञसंप्रसा
रणे ऊतम् यद्यप्यत्र प्रतिपदोक्तो निपात उञिति गृह्यते तथापि गुणानां पदग्रहणम् हलि सर्वेषाम् भोभगोअघोपू
र्वस्य लघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन भो देवाः भो लक्ष्मि भो विद्वद्वृंद भगो नमस्ते
अघो याहि. देवा नम्याः देवा यांति. हलि किम् देवायिह रोऽसुपि अह्नो रेफादेशः स्यान्न तु सुपि रोरपवादः अ
हरहः अहर्गणः असुपि किम् अहोभ्यां अत्राहन्निति रुत्वं रूपरात्रिरथंतरेषु रुत्वम् वाच्यं अहोरूपं गतमहो
रात्रिरेषा एकदेशविकृतस्यानन्यत्वात् अहोरात्रः अहोरथन्तरं अहरादीनां पत्यादिषु वा रेफः विसर्गापवादः
अहर्पतिः गीर्पतिः धूर्पतिः पक्षे विसर्गोपध्मानीयौ रो रि रेफस्य लोपो रेफे परे ढ्रलोपे पूर्वस्य दीर्घोऽणः ढरे
फौ लोपयतीति ढ्रलोपः तस्मिन्निमित्ते परे अणो ढकाररेफात्मके पूर्वस्याणो दीर्घः स्यात् पुनारमते हरी रम्यः शम्भू
राजते अणः किम् तृढः वृढः तृहू हिंसायां वृहू उद्यमने पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्य दीर्घार्थम् अजर्घाः राम.
लीढः मनस्रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरिति लोपे च प्राप्ते विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं का ११

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सोन = २ पदस्य पदुहन्ने ससजुषोर्विशेष्यो तेन तद्वं न विधिरादेशस्त्वनोत्यस्येत्यस्य न फलितम् [illegible]
तावताहते त्वाभिमता सत्वस्यासिद्धत्वादुत्वगुणयोर्भत्वा शाघिद्वेवेति भावः = ४ व्याख्यानात्प्रथमाद्वितीययोः सुपूर्विभक्त्योर्ग्रहणं तदाह प्रथमे [illegible] इत्वस्येति यदीदं न स्यात् [illegible]
स्यानिनत्वि ॥ ओभाभूत्स्ववर्णग्रहणं स्यष्टार्थं सर्वस्या दीर्घत्वा सूर्वजातीयइत्यर्थे नेष्टसिद्धिरिति स्पष्टं भाष्ये = ५ आद्गुणः औसदिति निर्देशेन भाष्ये [illegible] भावः

सादेशः स्यात्पदशब्दे परे अयस्पदम् शिरस्पदं समास इत्येव अयः पदम् शिरः पदम् अनुत्तरपदस्थस्येत्ये-
व परमशिरःपदम् कस्कादिषु च भास्करः ॥ इति विसर्गसन्धिः ॥ स्वौजसमौडिति सुप्सु शिवस् अ-
र्च्य इति स्थिते ससजुषो रुः पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात् जश्त्वापवादः अतो रोरप्लुतादप्लुते अ-
प्लुतादतः परस्य रोरुः स्यादप्लुतेऽति भोभगो इति प्राप्तस्य यत्वस्यापवादः उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति
रुत्वमनूद्य उत्वविधेः सामर्थ्यात् प्रथमयोः पूर्वसवर्णः अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादे-
शः स्यात् इति प्राप्ते नादिचि अवर्णादिचि परे न पूर्वसवर्णदीर्घः स्यात् आद्गुणः एङः पदान्तादति शिवोर्च्यः
अत इति तपरः किम् देवा अत्र अतीति तपरः किम् स्वश्वागन्ता अप्लुतात्किम् एहि सुस्रोत ३ अत्र स्नाहि सु-
तस्यासिद्धत्वादतः परोयम् अप्लुतादिति विशेषणेन तु तस्मात्पर्यो न्नासिद्धत्वम् तपरकरणस्य तु सामर्थ्यम्
दीर्घनिवृत्त्या चरितार्थत्वात् अप्लुतेति किम् तिष्ठतु पय आ३ग्निदत्त गुरोरनृत इति प्लुतः हशि च अप्लुता-
दतः परस्य रोरुः स्याद्धशि शिवो वंद्यः रोरित्युकारानुबंधग्रहणान्नेह भ्रातरत्र भ्रातर्गच्छ देवास् इति स्थिते रुत्व-
म् भोभगो अघो अपूर्वस्य योऽशि एतत्पूर्वस्य रोर्यादेशः स्यादशि परे असन्धिः सौत्रः लोपः शाकल्यस्य देवा इह
देवायिह अशि किम् देवाः संति यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते तथापि विसर्गस्य ख्यानिबद्धावेन रु-
त्वाद्यत्वं स्यात् नत्वयमल्विधिः रोरिति समुदायाश्रयणात् भोस् भगोस् अघोस् इति सकारान्ताः निपाताः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुट् स्यो रुकारे ङकारौ जस्शट्ङ्याम्भ्यश्चेतः । विभक्तिश्च । सुप्तिङौ विभक्तिसंज्ञौ स्तः । तत्र स्वौजसमौडादीनां समानां त्रिकाणां प्रथमाद्याः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः । सुपः । सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः । द्व्येकयोर्द्विवचनैकवचने । द्वित्वैकत्वयोरेते स्तः । बहुषु बहुवचनम् । बहुत्वे एतत्स्यात् । रुत्वविसर्गौ रामः । सरूपाणामेकशेष एकविभक्तौ । एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते । प्रथमयोः पूर्वसवर्णः । नादिचि । वृद्धिरेचि । रामौ । चुटू । प्रत्ययाद्यौ चुटू इतौ स्तः । इति जस्येत्संज्ञायां न विभक्तौ तुस्माः । विभक्तिस्थास्तवर्गसकारमकारा इतो न । इति सकारस्य नेत्त्वम् । अतो गुणे । अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात् । इति प्राप्ते परत्वात्पूर्वसवर्णदीर्घे । अतो गुणे इति पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायेनाकः सवर्णे दीर्घ इत्यस्यैवापवादो न तु प्रथमयोरित्यस्यापि । रामाः । एकवचनं संबुद्धिः । संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् । एङ्ह्रस्वात्संबुद्धेः । एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते संबुद्धेश्चेत् । संबुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह हे कतरत्कुलेति । हे राम हे रामौ हे रामाः । एङ्ग्रहणं किम् हे हरे हे विष्णो । अत्र हि परत्वान्नित्यत्वाच्च संबुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति । अमि पूर्वः । अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात् । रामम् रामौ । लशक्वतद्धिते । तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः । इति शसः शस्येत्संज्ञा । तस्माच्छसो नः पुंसि । पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि

CC0 ... Digitized by ... Sharada Peetham

र्थं स्यात् इति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथः एतत्तदोः सुलोपोऽकोरन
ञ्समासे हलि अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे एष विष्णुः स शम्भुः अकोः
किम् एषको रुद्रः अनञ्समासे किम् असः शिवः हलि किम् एषोऽत्र सोऽचि लोपे चेत्पादपूरणम् सइत्यस्य चे २
सो लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत सेमामविड्ढि प्रभृतिम् इह कस्मात् पादपूरणग्रहणात् इति वामनः अ
विशेषाच्छ्लोकपादेऽपीत्यपरे सैष दाशरथी रामः लोपे चेदिति किम् स इत् क्षेति स एवमुक्त्वा सत्यमेवेत्यवधारणा
न्तु सप्तशब्देन्द्वसिद्धकुलमिति पूर्वसूत्रात्कुलग्रहणानुवृत्त्या लभ्यते नेह नसोऽहमाजन्मशुद्धानाम् इति स्वादिस ते ६
न्धिः अर्थवदधातुरप्रत्ययः प्रातिपदिकम् धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्राति
पदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः पूर्वसूत्रेण सि
द्धे समासग्रहणं नियमार्थम् यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैवेति तेन वाक्यस्य न
प्रत्ययः आपञ्चमपरिसमाप्तेरधिकारोऽयम् परश्च अयमपि तथा ङ्याप्प्रातिपदिकात् ङ्यन्तादाबन्ता
त्प्रातिपदिकाच्चेत्यापञ्चमपरिसमाप्तेरधिकारोऽयम् प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्येव सि
द्धे ङ्याप्ग्रहणम् ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात् आभ्यामाभ्यामभ्यदितेतदर्थं स्वौजसमौट्छष्टाभ्यां
भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ४ । १ । २ ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः

तेनश्चर्यैकार्यनिकाचसिद्धातिलथाहिसामी... डापौवाधे तत्तरानिकाद्यपि के + लेवकस्पंस्मान ङ्याप
ग्रहणसामर्थ्यात्तु डीवन्ता कानि एनिकेत्यपि सिद्धानि इति भावः २२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वचनं =७ ननु तर्हि तस्यापि सर्वनामत्वं सर्वनाम्नः स्मा [illegible] ... इत्यादेशः प्राप्नोति ... इति भाष्यस्वरसे तं विरुध्येतेति चेन्न [illegible]
तिवत्तर्हि विधिरस्त्वस्य वा तैं कभाष्य [illegible] =८८

सि॰ कौ॰ अत्वस्थाणत्वाय मल्विभेदात् अत एव सत्यतितादेश आरभ्यते ओसि च ओसि परेऽतोऽङ्गस्यैकारः स्यात् रामयोः
१२ ह्रस्वनद्यापो नुट् ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात् नामि नामि परेऽजन्ताङ्गस्य दीर्घः स्यात् रामाणाम् दावंता २
सुपि चेति दीर्घो यद्यपि परस्तथापीह न प्रवर्तते सन्निपातपरिभाषाविरोधात् नामीत्यनेन त्वारम्भसामर्थ्यात्परिभा
षा बाध्यते रामे रामयोः सुपि एत्वे कृते अपदान्तस्य मूर्धन्यः आपादपरिसमाप्तेरधिकारोऽयम् इण्कोरित्यधिकृत्य
आदेशप्रत्यययोः सहेः साडः सः इति सूत्रात्स इति षष्ठ्यन्तमनुवर्तते इण्कवर्गाभ्यां परस्यापदान्तस्यादेशस्य प्रत्यया
वयवस्य च सस्य मूर्धन्यादेशः स्यात् विवृताघोषस्य सस्य तादृश एव षकारः रामेषु इण्कोरिति किम् रामस्य आदे
(141) शप्रत्यययोः किम् सुपीः सुपिसौ अपदान्तस्य किम् हरिस्तत्र एवं कृष्णमुकुन्दादयः सर्वादीनि सर्वनामानि सर्वादी
नि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः तदन्तस्यापीयं संज्ञा द्वन्द्वे चेति ज्ञापकात् तेन परमसर्वत्रेति त्रल् परमभवका
नित्यत्राकच्च सिध्यति जसः शी अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात् अनेकाल्त्वात्सर्वादेशः न चार्वणस्त्र
सावनञ इत्यादाविवानुबन्धकृतमनेकाल्त्वमिति वाच्यम् सर्वादेशत्वात्प्रागित्संज्ञाया एवाभावात् सर्वे सर्वनाम्नः स्मै
अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात् सर्वस्मै ङसिङ्योः स्मात्स्मिनौ अतः सर्वनाम्न एतयोरेतौ स्तः सर्वस्मात् आ
मि सर्वनाम्नः सुट् अवर्णान्तात्सर्वनाम्नो विहितस्यामः सुडागमः स्यात् एत्वषत्वे सर्वेषाम् सर्वस्मिन् शेषं रामवत् राम॰
एवं विश्वादयोऽप्यदन्ताः सर्वादयश्च पञ्चत्रिंशत् सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व १३

न्व च अन्ताद् [illegible]
[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यधाने पिणत्वसिद्धिः स्तकुल्कभाव्या नाम्नीनुम्ग्रहणेनानुस्वारे कृते ऽङ्गत्वादपदन्त्वबाधकमिति = रूपमादि तिरूपमादिर्यस्य सः यथाः = प्रत्ययविशिष्टस्येति ङ्गे प्रत्ययपरत्वलाभानापत्तौ विशिष्टत्यादि रिति = तस्यादिकस्यैव तिद्वेदार्दि
दनमपादृष्टीदिष्याशैरेवदन्तादिशब्दोत्तरसुपं निमितीकृत्येदृपयंतमंगलोन्तस्यलुङ्परत्वे सदेवात्पूर्वं मद्दापति = ६

अट्कुप्वाङ्नुम्व्यवायेऽपि । अट् कवर्गः पवर्गः आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषा
भ्यां परस्य नस्य णः स्यात्समानपदे । पदव्यवायेऽपीति निषेधं बाधितुमाङ्ग्रहणम् । नुम्ग्रहणमनुस्वारोपलक्षणा
र्थम् । तच्चाकर्तुं शक्यम् । अयोगवाहानामट्सूपदेशस्योक्तत्वादिति णत्वे प्राप्ते । पदान्तस्य । पदान्तस्य नस्य णत्वं न
चि स्यात् । रामान् । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् । यः प्रत्ययो यस्मात्क्रियते तदादि शब्दरूपं तस्मिन्प्रत्यये परेऽ
ङ्गसंज्ञं स्यात् । भवामि भविष्यामीत्यादौ विकरणविशिष्टस्याङ्गसंज्ञार्थं तदादिग्रहणम् । विधिरिति किम् । स्त्री इ
वनश्च्दे वद यती । प्रत्यये किम् । प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत् । अङ्गस्येत्यधिकृत्य । टाङसिङसामिनात्स्याः ।
न अपाहीतद्द अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः । णत्वम् । रामेण । सुपि च । यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्या
त् । रामाभ्याम् । अतो भिस ऐस् । अकारान्तादङ्गाद्भिस ऐस् स्यात् । अनेकाल्त्वात्सर्वादेशः । रामैः । ङेर्यः । अतोऽङ्गा
त्परस्य ङेर्यादेशः स्यात् । रामाय । स्थानिवद्भावेन यादेशस्य सुप्त्वात्सुपि चेति दीर्घः । सन्निपातलक्षणो वि
धिरनिमित्तं तद्विघातस्येति परिभाषा तु नेह प्रवर्तते । कष्टाय क्रमण इति निर्देशेन तस्या अनित्यत्वज्ञापनात् । रामा
भ्याम् । बहुवचने झल्येत् । झलादौ बहुवचने सुपि परेऽतोऽङ्गस्य एकारः स्यात् । रामेभ्यः । बहुवचने किम् । रामः रामस्य ।
झलि किम् । रामाणाम् । सुपि किम् । पचध्वम् । जस्त्वम् । वावसाने । अवसाने झलां चरो वा स्युः । रामात् रामाद् । द्वित्वे
रूपचतुष्टयम् । रामाभ्याम् । रामेभ्यः । रामस्य । सस्य द्वित्वपक्षे खरि चेति चर्त्वेऽप्यान्तरतम्यात्स एव न तु तकारः ।

झलि किमिति उतो वृद्धौ लुकि हलीत्येवानुवर्त्य सन्निपातपरिभाषा ... सन्निपातपरिभाषाया अनित्यत्वज्ञापनार्थं तेन सर्वथा मित्यादावेव सिद्धिरित्युक्तं = २

CC-0. Lal Bahadur Shastri Sanskrit University Delhi. Digitized by ...

अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ इति भाष्योक्तेः ... इति भावः ॥८

सि० कौ०
५१

कृपाला इत्यर्थः असंज्ञायां किम् उत्तराः कुरवः स्वमज्ञातिधनाख्यायाम् ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता सं
ज्ञा जसि वा स्यात् स्वे स्वाः आत्मीया इत्यर्थः आत्मान इति वा ज्ञातिधनवाचिनस्तु स्वा ज्ञातयो ऽर्था वा अन्तरं बहिर्यो
गोपसंव्यानयोः बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा स्यात् अन्तरे अन्तरा वा गृहाः बाह्या इ
त्यर्थः अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः पूर्वादिभ्यो नवभ्यो वा एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः पू
र्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवं परादीनाम् शेषं सर्ववत् एकशब्दः संख्यायां नित्यैकवचनान्तः न बहुव्रीहौ ब
हुव्रीहौ चिकीर्षिते सर्वादेः सर्वनामसंज्ञा न स्यात् त्वकं पिता यस्य स त्वत्कपितृकः अहकं पिता यस्य स मत्कपि
तृकः इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते अन्यथा लौकिकविग्रहवाक्य इव तत्रापि अकच् स
वर्णे तत्सर्वसमासे ऽपि श्रूयेत अतिक्रान्तो भवकन्तमतिभवकान् इतिवत् भाष्यकारस्तु त्वकत्पितृकः मकत्पितृ
क इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ यथोत्तरं मुनीनां प्रामाण्यात् संज्ञोपसर्जनीभूतास्तु न सर्वादयः म
हासंज्ञाकरणेन तदन्तगुणानामेव गणे सन्निवेशात् अतः संज्ञाकार्यमन्तर्गणकार्यं च तेषां न भवति सर्वो ना
मकश्चित् तस्मै सर्वाय देहि अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय अतिकतरं कुलम् अतितत् तृती
यासमासे अत्र सर्वनामता न स्यात् मासपूर्वाय तृतीयासमासार्थवाक्ये ऽपि न मासेन पूर्वाय द्वन्द्वे च द्वन्द्वे उ पा०
क्ता संज्ञा न स्यात् वर्णाश्रमेतराणाम् समुदायस्यायं निषेधो न त्ववयवानाम् नचैवं तदन्तविधिना प्रसङ्गः १५

142

अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ इति भाष्यम् ॥९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेम सम सिम पूर्व पर अवर दक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् स्वमज्ञातिधनाख्यायाम् अन्त
रं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति उभशब्दो द्वित्ववि
शिष्टस्य वाचकः अत एव नित्यं द्विवचनान्तः तस्येह पाठस्तु अकाबित्यकजर्थः न च कप्रत्ययेन इष्टसिद्धिः द्विवचन
परत्वाभावे नोभयत्र उभयत्रेत्यादावित्याय च प्रसंगात् तदुक्तम् उभयोऽन्यत्रेति अन्यत्रेति द्विवचनपरत्वाभावे उभ
यशब्दस्य द्विवचनं नास्तीति कैयट अस्तीति हरदत्तः तस्माज्जस्ययजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्त
तया प्रथमचरमेति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वान्नित्यैव संज्ञा भवति उभये डतरडतमौ प्रत्य
यौ ततस्तदन्ता ग्राह्याः यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति सुप्तिङन्तमिति ज्ञापकात् तथापी
ह तदन्तग्रहणम् केवलयोः संज्ञायाः प्रयोजनाभावात् अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये
निर्धारणे वर्तेते ततोऽन्यतमशब्दस्य गणे पाठाभावान्न संज्ञा त्व त्व इति द्वावप्यन्यार्थौ एको दात्तोऽ
परोऽनुदात्त इत्येके एकस्तान्त इत्यपरे नेम इत्यर्द्धे समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते यथासंख्यमनुदे
शः समानामिति ज्ञापकात् अन्तरं बहिर्योग इति गणसूत्रेऽपुरीति वक्तव्यम् अन्तरायां पुरि पूर्वपरावरदक्षि
णोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात् सर्वत्र या प्रा
प्ता सा जसि वा स्यात् पूर्वे पूर्वाः स्वाभिधेयापेक्षोऽवधिनियमो व्यवस्था व्यवस्थायां किम् दक्षिणाः गाथकाः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ पृ॰ १५ क्रम् पादः पादौ पादाः पादम् पादौ पदः पादान् पदा सुडनपुंसकस्य सुट्प्रत्याहारः स्वादिपञ्चवचनानि स
र्वनामस्थानसंज्ञानि स्युरक्लीबस्य स्वादिष्वसर्वनामस्थाने कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु परतः पू
र्वं पदसंज्ञं स्यात् यचि भम् यकारादिष्वजादिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात् आकडारादेका
संज्ञा इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया या परानवकाशा च तेन शसादावचि भसंज्ञैव न
पदसंज्ञा अतो जश्त्वं न ततः दता जश्त्वम् द्भ्याम् मासः मासा माभ्यामित्यत्र रुत्वे यत्वे यलोपः माभ्याम् मा
दि॰ भिः भस्याधिकारोयम् अल्लोपोनः अङ्गावयवो सर्वनामस्थानयजादिस्वादिपरे योऽन् तस्याकारस्य लोपः स्यात्
रषाभ्यां नो णः समानपदे एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात् पूष्णः पूष्णा पूर्वस्मादपि विधौ
वा॰६ स्थानिवद्भावः इति पक्षे तु अल्लोपस्य स्थानिवत्त्वात् णत्वम् पूर्वत्रासिद्धे न स्थानिवदिति तु इह नास्ति तस्य दोषः
संयोगादिलोपलत्वणत्वेष्विति निषेधात् नलोपः प्रातिपदिकान्तस्य नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे
143 प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात् नलोपस्यासिद्धत्वाद्दीर्घत्वमेत्वमैस्त्वं च न पूषभ्यः इ
त्यादि विभाषा ङिश्योः अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः
परतः पूष्णि पूषणि पक्षे सुटि च रामवत् पदन्न इति सूत्रे प्रभृतिग्रहणं प्रकारार्थं तथा च ओजः स्वामपि दोष
न्नादेशो भाष्ये ककुद्दोषणी याचते इतः तेन पदं घ्रिपत्स्वरणे अस्त्रियां स्वान्ते इत्यानसंमनः इत्यादिसंगच्छते आ

प्रकाश्यं इति प्रकारः एवा दर्शनं च सुले नञ्स्य चनीत्यादावपि न लुप्तनेति निषेधस्यानित्यत्वात् सो
शिपरत्वेऽपि॰२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by eGangotri Sharada Peetham

सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात् विभाषा जसि जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्त्तव्ये द्वन्द्वे उक्त वा३
संज्ञा वा स्यात् वर्णाश्रमेतरे वर्णाश्रमेतराः शीभावं प्रत्येव विभाषेत्युक्तमतो नाकच् किन्तु कप्रत्यय एव वर्णाश्र
मेतरकाः प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः प्रथमे प्रथमाः शेषं रामवत्
स्ततः४ तयप्प्रत्ययान्तस्तदन्ताः शब्दाः ग्राह्याः द्वितये द्वितयाः नेमे नेमाः शेषं सर्ववत् विभाषाप्रकरणे तीयस्य ङित्सूप
संख्यानम् द्वितीयस्मै द्वितीयायेत्यादिः शेषं रामवत् एवं तृतीयः अर्थवद्ग्रहणे नानर्थकस्येह पटुजातीयाय जराया ज
रस् अन्यतरस्याम् जराशब्दस्य जरस् वाऽजादौ विभक्तौ पदाङ्गाधिकारे तस्य तदन्तस्य च अनेकाल्त्वात् सर्वादे
शः प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस् निर्जरसौ निर्जरसः इ
नादीन्बाधित्वा परत्वाज्जरस् निर्जरसा निर्जरेण निर्जरसे निर्जराय निर्जरसः पक्षे हलादौ च रामवत् वृत्तिकृ
ता तु पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जे
रसादिति रूपं न तु निर्जरसा निर्जरस्य इति केचिदिदमुक्तम् तथापि निर्जरसैरिति रूपान्तरमुक्तम् तदनुसारिभि
र्भिस्येकवचने निर्जरसैः स्यैव रूपमिति स्वीकृतं एतच्च भाष्यविरुद्धम् पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्य
कञ्छकन्नुदन्नासञ्छस्प्रभृतिषु पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक आ
स्य एषां पदादयः आदेशाः स्युः शसादौ वा यत्तु आसन पादस्य आसन्नादेश इति काशिकायामुक्तं तन्मूलादिकं

३१२

तदनुसारिभिरिति [illegible] सर्वविप्रतिषेधे एकस्मिन् [illegible] इति [illegible] प्रत्यायनादेशामदरिशं च विधाय भाटे
देशः परेऽन्वयोगविभागे [illegible]
लोपः स्यादिति वाच्यं [illegible] इत्यनित्यत्वं [illegible]
[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]
अस्त्रियां घित्वन्नस्याः निन्त्वाभावादिम् हरौ तत्तुल्यं धकार्य्यत्वात् स्थानीवत्वं स्पष्टमिति दिक् ॥१

ती २ कस्य २

सि. कौ. आङिति टासंज्ञा प्राचाम् हरिणा अस्त्रियां किम् मत्या घेर्ङिति घिसंज्ञस्य ङिति सुपि गुणः स्यात् हरये घेः किम् सख्ये
पु. ङिति किम् हरिभ्याम् सुपि किम् पट्वी घे ङिति गुणे कृते ङसिङसोश्च एङोङः सिङसोरति परे पूर्वरूपमेकादेशः
१६ स्य ३ स्यात् हरेः हर्य्योः हरीणाम् अच्च घेः इदुद्भ्यामुत्तरस्य ङेरौ स्यात् घेरन्तादेशश्चाकारः हरौ हर्य्योः हरिषु एवंश्री
स्य ४ पतिग्निरविकव्यादयः अनङ् सौ सख्युरङ्गस्यानङादेशः स्यात् असम्बुद्धौ सौ परे ङिच्चेत्यन्तादेशः अ
लोऽन्त्यात्पूर्व उपधा अन्त्यादलः पूर्वो योऽल् सोऽप्युपधासंज्ञः स्यात् सर्वनामस्थाने चासम्बुद्धौ नान्तस्योपधाया दी
र्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे अपृक्त एकाल् प्रत्ययः एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् हल्ङ्याब्भ्यो दीर्घा ध: सौ
त्सुतिस्यपृक्तं हल् हलन्तात्परं दीर्घौ यौ ङ्याबौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते हल्ङ्याब्भ्यः किम् ग्राम
णीः दीर्घात्किम् निष्कौशाम्बिः अतिखट्वः सुतिसीति किम् अभैत्सीत् तिपा सहचरितस्य ग्रहणात् सिचोऽत्र
144 ग्रहणं नास्ति अपृक्तं किम् बिभर्त्ति हल्किं बिभेद प्रथमं हल्किम् राजा नलोपो न स्यात् संयोगान्तलोपस्यासि पा ५
द्धत्वात् सखा हे सखे सख्युरसम्बुद्धौ सख्युरङ्गात्परं सम्बुद्धिवर्ज्जं सर्वनामस्थानं णित्कार्य्यकृत्स्यात् अचो
ञ्णिति ञिति णिति च प्रत्यये परे अजन्ताङ्गस्य वृद्धिः स्यात् सखायौ सखायः सखायम् सखीन् घिसंज्ञाभावान्न
नत्कार्य्यम् सख्या सख्ये ख्यत्यात्परस्य खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उ राम
स्यात् सख्युः औत् इदुद्भ्यां परस्य ङेरौ स्यात् उकारानुबन्धनिरूपणार्थो सखौ शेषं हरिवत् शोभनः सखासु १६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वं प्राणमूत्रशितिच आसेभवः आसन्यः दे मूर्धादस्य नपुंसकत्वमप्यत्र एवंभाव्यात् तेन दक्षिणं देहे निश्चा
चरमतिसंगच्छते भुजबाहू प्रवेष्टो दोरिति सादृच्यर्थासंस्त्वमपि दोषंत स्यत प्याविपस्यभजत इति ह्योर्न्हो
भवः घन्द्रः संख्याविसायपूर्वस्यान्हस्याहन्नन्यतरस्यां ङौ संख्यादिपूर्वस्यान्हस्याहन्नादेशो वा स्यान्ङौ घन्हि
घहनि घन्हे विगतमन्हः व्यन्हः व्यन्हि व्यहनि व्यन्हे अन्हः सायः सायान्हः सायान्हि सायाहनि सायान्हे
इत्यदन्ताः विश्वपाः दीर्घाज्जसि च दीर्घाज्जसीचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात् वृद्धिः विश्वपौ स
वर्णदीर्घः विश्वपाः पदीर्घात् आ टि नादिच्यास्यैवनिषेधम् जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति तथापि
गौर्यौ गौर्यः इत्याद्यर्थस्त्वमिहापि व्याप्यत्वादुपन्यस्तम् आतो धातोः आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य
स्यलोपः स्यात् अल्लोन्त्यस्य विश्वपः विश्वपा विश्वपाभ्याम् एवं शङ्खध्मादयः धातोः किम् हाहान् दासवर्णदी
र्घः हाहाः ङौ आद्गुणः हाहे शेषं विश्वपावत् आत इति योगविभागादधातोरप्याकारलोपः क्वचित् क्त्वा
प्त्वः इत्यादन्ताः हरिः प्रथमयोः पूर्वसवर्णः हरी जसि च ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे हरयः ह्रस्व
स्य गुणः ह्रस्वस्य गुणस्स्यात्संबुद्धौ एङ्ह्रस्वादिति संबुद्धिलोपः हे हरे हरिम् हरी हरीन् शेषो घ्यसखि
अनदीसंज्ञो ह्रस्वो यावितु तौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् शेषः किं सूत्रे एकसंज्ञाधिकारात्सिद्धे
ह्रदुतोः १ शेषग्रहणं स्पष्टार्थं ह्रस्वः किम् वातप्रम्यै किम् मात्रे आङो नास्त्रियाम् घेः परस्याङो नास्यादस्त्रियाम्

ङेर्ङ्किः हाहे ङसिङसोर्दीर्घः हाहाः इत्यो सिद्धिः १
हाहेः ५

उसीतिनोक्तमनुनाकुलेनेत्यत्रमुत्वस्यासिद्धत्वान्मनापत्तेोपुंस्त्वाभावेननाभावस्या
प्यनापत्तेोक्ताशिङ्के; नमुनेइति निषेधस्तुनहणिनमुत्वादेश इति व्याप्ति कविरधारात् = १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ ९२ क्विप्स्तौ क्विपर्यन्तानामेवेह । धीः २ धियौ ३ सुधीः २ क्विपर्यन्तानां किमर्थम् भवती संज्ञायामुपसर्जनत्वे च नात्वं सुधीर्धी

पू॰ नगणकार्यत्वात् क्विनीमकस्थित क्विः श्री ह्रयः आवलिक्रौनोः लिङ्क्विः हरिवत् प्राधान्ये परमश्री इत्यादि औडुलोमिः

१७ बहुश्रेयसे तु ३ औडुलोमी उडुलोमाः लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः अकारोऽनोपवादः औडुलोमिं औडुलोमी उडुलो ऊ

मान् इत्यादि वातप्रमीर्निस्रुणादि सूत्रे णमाङ् ई प्रत्ययः कित् वातं प्रमिमीते वातप्रमीः दीर्घाज्जसि च वा

तप्रम्यौ वातप्रम्यः हे वातप्रमीः अमि पूर्वः वातप्रमीं वातप्रम्यौ वातप्रमीन् वातप्रम्या वातप्रम्ये वातप्रम्यः

वातप्रम्योः वातप्रम्यां दीर्घत्वान्न नुट् ङौ तु सवर्णदीर्घः वातप्रमी वातप्रम्योः वातप्रमीषु एवं ययीपप्यादयः

यातस्यनेनेति ययीः मार्गः पाति लोकमिति पपीः सूर्यः पाथेः कित् द्वे चेति ई प्रत्ययः क्विप्तु न वातप्रमीशब्दस्यानु

अमि शसि ङौ च विशेषः वातप्रम्यं वातप्रम्यः वातप्रम्यि एरनेकाच इति वहुमालोपयत् प्रधीवत् बहुश्रे

यस्यो यस्य बहुश्रेयसी दीर्घज्यन्तत्वात् हल्ङ्यादिलोपः यूस्त्र्याख्यौ नदी ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः

२४ प्रथमलिङ्गग्रहणं पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्ववक्तव्यमित्यर्थः अम्बार्थनद्योर्ह्रस्वः अम्बार्थानां न

द्यन्तानां च ह्रस्वः स्यात्संबुद्धौ हे बहुश्रेयसि शसि बहुश्रेयसीन् आण्नद्याः नद्यन्तात्परेषां ङितामाडागमः स्या

त् आटश्च आटोऽचि परे वृद्धिरेकादेशः स्यात् बहुश्रेयस्यै बहुश्रेयस्याः नद्यन्तात्परत्वान्नुट् बहुश्रेयसीनाम् रामः

ङेराम्नद्याम्नीभ्यः नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् स्यात् इदुद्भ्यामित्यानुट् बाध्यते बहुश्रेयस्याम् १७

इयसीवहुश्री हेर्नेतिवाच्यमिति न ह्रस्वः ५ का॰

145

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सु सखा सखायौ सुसखायः अनङ्णिद्भाववर्णौ ङ्त्वात्तदन्तेऽपि प्रवृत्तिः समुदायस्य सखिरूपत्वाभावेनास
खीति निषेधाप्रवृत्तेर्घिसंज्ञा सुसखिना सुसखये ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात्ख्यत्यादित्युत्वेन सु
सखेः सुसखौ विवादि एवमतिषाखितः सखाऽतिसखा परमः सखायस्येति विग्रहे परमसखायौ विस्यादि गौणत्वे परमसखा
य्यनङ्णित्वे प्रवर्त्तेते सखीमतिक्रान्तोऽतिसखिः लिंगविशिष्टपरिभाषायाश्चानित्यत्वान्नैवच हरिवत् इहान
ङ्णित्वेन भवतः गोस्त्रियोरिति ह्रस्वेन सखिशब्दस्य लाक्षणिकत्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यै
व ग्रहणात् पतिः समास एव पतिशब्दः समास एव घिसंज्ञः स्यात् पत्या पत्ये पत्युः २ पत्यौ शेषं हरिवत्
समासे तु भूपतये कतिशब्दो नित्यं बहुवचनान्तः बहुगणवतुडति संख्या एते संख्यासंज्ञाः स्युः डतिच ड
त्यन्ता संख्या षट्संज्ञा स्यात् प्रत्ययस्य लुक्श्लुलुपः एतैः शब्दैः कृते प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् षड्भ्यो
लुक् षड्भ्यः परयोर्जश्शसोर्लुक् स्यात् प्रत्ययलोपे प्रत्ययलक्षणं प्रत्ययलोपेपि तदाश्रितं कार्यं स्यात् इति जसि
चेति गुणे प्राप्ते न लुमताङ्गस्य लुक्श्लुलुप एते लुमन्तः लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् कति
२ कतिभिः कतिभ्यः २ कतीनां कतिषु युष्मदस्मद्षट्संज्ञास्त्रिषु सरूपाः त्रिशब्दो नित्यं बहुवचनान्तः त्र
यः त्रीन् त्रिभिः त्रिभ्यः त्रेस्त्रयः त्रिशब्दस्य त्रयादेशः स्यादामि त्रयाणाम् परमत्रयाणां गौणत्वे तु नेति केचि
त् प्रियत्रीणां वस्तुतस्तु प्रियत्रयाणां त्रिषु द्विशब्दो नित्यं द्विवचनान्तः त्यदादीनामः एषामकारोन्तादेशः स्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पू॰
१८

पथस्तोपो अल्लोपस्य स्थानिवत्वाण्णिप्राप्ते क्रोस्तु मम् स्यानिवत् एकदेशविकृतस्यानन्यत्वा अनङ् णित्वे
प्रवर्तेते सखा सखायौ सखायः हे सखे: अनिदूर्ध्वेनूपात्परत्वाण्णिप्राप्ते ततोपिपरत्वात्सख्युरसंबुद्धाविति
प्रवर्तेते सखायम् सखायौ णित्वियम् सख्युः सहखेनवर्तेते इति सखः तमिच्छतीति सखीः सुखीः सुतीः स
त्यो सुत्यो ख्यत्यात्पादिति दीर्घस्यापि ग्रहणाडुकारः सख्युः सुख्युः सुत्युः लूनमिच्छतीति लूनीः लामम् प्रस्ती
मम् लामौः प्रस्तीमौः एवंङसिङसोर्ध्यण् नत्वम लत्वयोरसिद्धत्वात्स्यस्यादिस्यत्वं लुन्युः लाम्युः प्रस्तीम्युः
सुधीयति सुधीः पक्षीः ३५१ सुखिच्छियो सुखियः ईदन्ताः शंभुर्हरिवत् एवंविसुवायुभान्वादयः तृज्वत्क्रोष्टुः
क्रोष्टुस्तुजेते नन्तुत्वं वर्तते संबुद्धे सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्यः इत्यर्थः
ऋतो ङिसर्वनामस्थानयोः ङौ सर्वनामस्थाने च परे ऋदंताङ्गस्य गुणः स्यादिति प्राप्ते ऋदुशनस्पुरुदंशोने
हसां च ॥ ऋदंतानामुशनसादीनां चानङ् स्यात् असंबुद्धौ सौ परे अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहो
तृपोतृप्रशास्तृणाम् ॥ अवादीनामुपधाया दीर्घः स्यात् असंबुद्धौ सर्वनामस्थाने परे नप्त्रादिग्रहणं व्युत्पत्ति
पक्षे नियमार्थं तेन पितृभ्रातृतीनान्न ऊणातलवस्य भवत्येव समर्थे सूत्रे उणादाना इतिपाण्यप्रयोगात्
क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टुन् विभाषा तृतीयादिष्वचि अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा
क्रोष्टे क्रे न नूते ऋदन्तात् ङसिङसोरति परे उकार एकादेशः स्यात् रपरत्वम् रात्सस्य रेफात्संयोगान्तस्य
लपरत्वं भाव्यमानस्यापिङ्क्विसवर्णग्राहकत्वा द्वारांतर्यन्तो द्विमात्रनिवृत्यर्थं तेनाद्वृत्यादि रिङ्क्विरिति ल्वरितिसूत्रे केयरः यत्तुतपरत्वं ढलोपे इति दीर्घवा ॥ ग्रा॰ १९
धनार्थमिति तल्लसुपत्रवाजितावारणज्वाति ताइवस्तदसील्लमानेत्र तोरस्यभासेत स्वित्तरेश्यपायध्यतिरामायणप्रयोगाविरोधात्=१

राम॰
१८

146
प्र॰ ५२ ३

शेषं ईप्रत्ययान्तत्वात् गमीवत् अङ्यन्तत्वान्न सुलोपः अतिलक्ष्मीः शेषं वत्तु श्रेयसीवत् कुमारीमिच्छ-
न् कुमारीवाचरन्वा ब्राह्मणः कुमारी काजन्तादाचारे क्विं तामाकर्त्तरि क्विं पूर्वहल्ङ्याविति सुलोपः अचि
श्नुधातुभ्रुवां य्वोरियङुवङौ श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रु इत्येतस्य चाङ्गस्य इयङुवङौ स्तोऽजा-
दौ प्रत्यये परे ङिच्चेत्यन्त्यादेशः आन्तरतम्यादिरियङ् ओरुवङ् इयङि प्राप्ते एरनेकाचोऽसंयोगपूर्वस्य ।
धात्ववयवसंयोगपूर्वो न भवति य ईवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये प-
रे इति यण् कुमार्य्यौ कुमार्य्यः हे कुमारि अमि शसि च कुमार्य्यं कुमार्य्यः कुमार्य्या कुमार्य्याः कुमारीणाम्
कुमार्य्याम् प्रधीः प्रध्यौ प्रध्यम् प्रध्यः उन्नयतीत्युन्नीः धात्वन्तसंयोगस्य विशेषणादिह स्यादेव यण्
उन्न्यौ उन्न्यः हे उन्नीः उन्न्याम् ङेराम् उन्न्याम् एवं ग्रामणीः अनेकाचः किम् नीः नियौ नियः अमि शसि
च परत्वादियङ् नियम् नियः ङेराम् नियाम् असंयोगपूर्वस्य किम् सुश्रियौ यवक्रियौ गतिकारकेतरपू-
र्वपदस्य यण्नेष्यते शुद्धधियौ परमधियौ कथं तर्हि दुधियः वृश्चिकभियः इत्यादि उच्यते दुःस्थिता धीर्येषामि-
ति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः वृश्चि-
कस्य कुत्सितमपादानत्वं नेह विवक्षितम् वृश्चिकसंबन्धिनी भीर्वृश्चिकभीरिति स्वतन्त्रपदलोपो वा
न भूसुधियोः एतयोर्यण् न स्यादचि सुपि सुधियौ सुधियः सुखमिच्छतीति सुखीयति ततः क्विप् अल्लो-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नीः तिरौ तिरः २

सि॰ कौ॰ णत्वं यात्वत् एवं आमात्मा नादयः मा नरौ हेतः रृत नृ इत्यस्य नामि परे वा दीर्घः स्यात् नृणाम् नृणाम् इत्यृदन्ता

पू॰ कृत् अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशादित्वेरपरत्वम् कीः किरौ किरः इत्यादि गीर्वत् इ

१९ त्वाभावपक्षेतु कृ ऋदुदश्च नेति अतोऽङीतिच नपरकरणादनङ् गणो न कृः क्रौ क्रः कृम् क्रौ कृन् क्रा क्रे इत्यादिरुदृ

दन्ताः गम्लृ शक्लृ अनयोरनुकरणे अनङ् अमा याका गुणाविषयेनुलपरत्वं गमलौ गमलः गमलम् गमलौ गमलृन्

गम्ला गम्ले ङसिङसो मृलु अत उदिस त्वलपरत्वे संयोगान्तस्य लोपः गमुल् शकुल् इत्यादि इतिलृदन्ताः से: सयौ सयः

स्मृतेः स्मृतयौ स्मृतयः इत्येदन्ताः गोतो णित् गोशब्दात्परं सर्वनामस्थानं णिद्वत्स्यात् गौः गावौ गावः

अ॰ औतोऽम्शसोः आ ओतः इति छेदः ओकारादम्शसोरचि परे आकार एकादेशः स्यात् शसः साहचर्यात्सुवेनाम्

गृह्यते नेह अचिनवम् गाम् गावौ गाः गवा गोः इत्यादि ओतो णिदिति वाच्यं विहितविशेषणं च तेन सुद्योः सु

रव्या॰ द्यावौ ओकारान्ताद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह हे भानो हे भानवः उः शंभुः स्मृतोर्येन स्मृतोः स्मृता

वौ स्मृतावः स्मृताम् स्मृतावौ स्मृताः इत्योदन्ताः रायो हलि रै शब्दस्याकारोऽन्त्यादेशः स्याद्धलि विभक्तौ अचि

आयादेशः राः रायौ रायः रायम् रायौ रायः राभ्यां इत्यैदन्ता ग्लौः ग्लावौ ग्लावः ग्लावौ ग्लावम् ग्लावौ ग्ला

वः औतोऽम्शसोरिति नेह न प्रवर्तते ऐ औ च सूत्रेण ओ औ ऐतोः सावर्ण्याभावज्ञापनात् ॥ ॥ इत्यजन्ताः पुल्लि पत्र

ङ्गाः ॥ रमा औङ आपः आबन्तादङ्गात्परस्यौङः शी स्यात् औङित्यौकारविभक्तेः संज्ञा रमे रमाः संबुद्धौ च १९

इत्यादि॰

140

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्थवृद्धिस्सद्धं८
नाकिंगानुरास
ससादपीदि
त्कानंबद्ध त्वप्र
ति यदनैनविधा
वांमवती यतो
नतमितिवांचं
त्काकासिकंन
लेनदातुसमधे
तिधा.द्धौधाना
द्धेद
शिकितनेवकं
४८

मस्यैव लोपो नान्यस्य रेफस्य विसर्गः क्रोष्टुः आमि परत्वात्तृज्वद्भावे प्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् पू
र्वविप्रतिषेधेन क्रोष्टूनाम् क्रोष्टरि क्रोष्टौः एते हलादौ च पंभुवत् इत्युदन्ताः हूहूः हूहौ हूहवः हू
हूम् हूहौ हूहून् इत्यादि अतिचमूशब्दे तु नदीकार्यं विशेषः हे अतिचमु अतिचमूनाम् अतिचम्वा
म् खलपूः ओः सुपि धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण\
स्यात् अजादौ सुपि गतिकारकेतरपूर्वपदस्य यण् नेष्यते खलप्वौ खलप्वः इत्यादि एवं सुल्वादयः अनेकाचः
किम् लूः लुवौ धात्ववयवेति किम् उल्लूः उल्लुवौ असंयोगपूर्वस्य किम् कटप्रूः कटप्रुवौ कटप्रुवः गत्या तीदि
दि किम् परमलुवौ सुपि किम् लुलुवतुः स्वभूः न भूसुधियोः स्वभुवौ स्वभुवः वर्षाभ्वश्च अस्योवर्ण
स्य यण् स्यादजादौ सुपि वर्षाभ्वौ वर्षाभ्वः दृन्भ्वेति दृन्भूः अनुदृन्भूजम्भूकफेलूकर्कन्धूदिधिषु इत्युणादि
सूत्रेण व्युत्पादिताः दृन्भ्वौ दृन्भ्वः हे दृन्भूः दृन्भून् दृन्निति नां ते हि सार्थे ३ व्यये भुवः क्रिय दृन्भ्वः दृन्करपुनः
पूर्वस्य भुवो यण् वक्तव्यः दृन्भ्वम् दृन्भ्वौ इत्यादि खलपूवत् करभ्वं करभ्वः दीर्घपाठे करभूः एवं कारः स्वा
र्थिकः मत्तप्रत्यय करभ्वौ करभ्वः पुनर्भूर्योगिकः पुंसि पुनर्भ्वौ इत्यादि दृग्भूकारभूशब्दौ स्वयंभुवत्
इत्युदन्ताः धाता हे धातः धातारौ धातारः ऋवर्णान्नस्य णत्वं वाच्यम् धातॄणाम् इत्यादि एवं नप्त्रादयः
उद्गाता उद्गातारौ उद्गातारः पिता व्युत्पत्तिपक्षे न प्तादिग्रहणस्य नियमार्थत्वान्न दीर्घः पितरौ पितरः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कर्तृत्वादिविधिनिषेधौ भाष्ये पठितस्तस्य ... आह उपसर्जनमिति ५

सि॰ कौ॰ २०

हस्वस्यानिवत्त्वेनाबन्तत्वमाश्रित्य औङ आपः आङि चापः याडापः ह्रस्वनद्यापः ङे राम इति पञ्चापि विधयः मा भूवन् एवं न शनि शा इत्यस्तु तथापि नलोपे विधौ विरुद्धेनेभवंति आबाबिति प्रश्लिष्य आकारान्तस्येवापः सर्वत्र ग्रहणात् एवं हल्ड्याबादिसूत्रेपि आङ्आङ्आबन्ता ईं इति प्रश्लेषाद्दीति वह्वः निष्कौशाम्बिरित्यादि सिद्धे दीर्घग्रहणं प्रत्याख्येयम् नचैवमप्यतिखट्वायेत्यत्र स्याडापमाकारान्तं स्थानिवत्त्वेनाश्रित्य याट् स्यादिति वाच्यम् आबन्तं पदं गततः परस्य याट् विधानात् उपसर्जनस्त्रीप्रत्ययेतदादिनियमात् यदन्त इति नासिकायान् स्नसः नसा नोभ्यामित्यादि पद्वत्सुटिचमावत् निशायानिश निशः निशा ब्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ब्रश्चादीनां सप्तानां छशांतयोश्च षकारोन्तादेशः स्यात् झलिपदान्ते च षस्य जश्त्वेन डः निड्भ्यां निड्भिः सुपि डः सौति पदत्वे धुट् वाम् तस्यासिद्धत्वाज्झयो द्वितीया इति ठत्वयोर्ठ थ्यान न पदान्ताद्दोरिति ष्टुत्वं न निड्सु निट्त्सु चतोः कः सि षस्य ढस्य चकः स्यात् सकारे परे इति न भवति जश्त्वं प्रत्यसिद्धत्वात् केचित्तु व्रश्चादिसूत्रे दादेर्धातोरिति सूत्रादातोरित्यनुवर्तयन्ति तन्मते जस्त्वेन जकारे निज्भ्याम् निज्भिः श्चुत्वं निज्षु चोःकुरिति कुत्वं तु न भवति जस्त्वस्यासिद्धत्वात् मांस एतत्नासान्तं मांस पृतनास्नुवो वा च्याः शसादौ वा पृतः पृता ऋज्राम पद्वत्सुटि चमावत् गोपा विश्वपावत् मतिः मायेमहरिवत् स्त्रीत्वान्नत्वाभावः मतीः नात्वन्तमत्या ङिति ह्रस्वश्च इयङुवङ्स्थानौ स्त्रीशब्दौ नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे आण् नद्याः मत्यै मतये मत्याः मतेः

रा॰ २०

अत्रेयङुवङ्स्थानावल्लीति सूत्रमनुवर्तनीयम् ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आप एकारः स्यात्सम्बुद्धौ एङ्ह्रस्वादिति संबुद्धिलोपः हे रमे हे रमे हे रमाः स्त्रीत्वान्नत्वं न आङि चापः आ
ङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात् रमया रमाभ्यां रमाभिः याडापः आपः परस्य ङिद्वचनस्य याडा
गमः स्यात् वृद्धिरेचि रमायै सवर्णदीर्घः रमायाः रमयोः रमाणाम् रमायाम् रमयोः रमासु एवं दुर्गाम्बिका
दयः सर्वनाम्नः स्याड्ढ्रस्वश्च आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः याडोपवादः सर्वस्यै स
र्वस्याः एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा मिः सर्वनाम्न इति सुट् सर्वासां सर्वस्यां सर्वयोः सर्वासु एवं विश्वादयो
प्याबन्ताः विभाषा दिक्समासे बहुव्रीहौ अत्र सर्वनामता वा स्यात् उत्तरपूर्वस्यै उत्तरपूर्वायै दिङ्नामान्यन्तरा
ले इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह योत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै बहुव्री
वा लोप इत्यर्थः हि ग्रहणं स्पष्टार्थम् अन्तरस्यै शालायै इत्यर्थः अपुरीत्युक्तेर्नेह अन्तरायै नगर्यै विभाषा द्वितीयातृतीया
भ्याम् आभ्यामपरस्य ङितः स्याड्वा स्यादापश्च ह्रस्वः उदेरत्वं त्यकेःणकं तीयस्य ङित्सूपसंख्यानात् द्वितीयस्यै
द्वितीयायै द्वितीयस्याः द्वितीयायाः द्वितीयस्याम् द्वितीयायाम् शेषं रमावत् एवं तृतीया अम्बार्थनद्यो
र्ह्रस्वः हे अम्ब हे अक्क हे अल्ल असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न हे अम्बाडे हे अम्बाले हे अम्बिके
१२ जराजसो भीभावात्परत्वाज्जरस् आमि नुट् परत्वाज्जरस् जरसामित्यादि पक्षे रमावत् पूर्वविप्रतिषेधे हलादेश्च २
न भीभावे सन्निपातपरिभाषया अनित्यतां चाश्रित्य जरसोऽतिके चित्कृत्तन्निर्देशलम यद्यपि जरसादे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ पृ॰

परत्वान्नुट् स्त्रीणाम् स्त्रियाम् स्त्रियोः स्त्रीषु स्त्रि॰ अतिक्रान्तोऽतिस्त्रिः अतिस्त्रियौ गुणनाभावो त्वनुङः पर
त्वात्संमिबाधते क्लीबेनुमाच स्त्रीशब्दस्य पठितस्य कथायेनाम जसि च अतिस्त्रयः हे अतिस्त्रे वामशसोः
अतिस्त्रियम् अतिस्त्रीम् अतिस्त्रियः अतिस्त्रीन् अतिस्त्रिणा घेर्ङिति अतिस्त्रये अतिस्त्रेः२ अतिस्त्रि
योः२ अतिस्त्रीणाम् अतिस्त्रौ अमशसोकारे च नित्यं स्यादम् शसोस्तु विभाषया इयादेशो विनाप्यत्र स्त्रियाः
पुंस्युपसर्जने क्लीबेत्नुम् अतिस्त्रि अतिस्त्रिणी अतिस्त्रीणि अतिस्त्रिणे ङे प्रभृतावजादौ वक्ष्यमाणपु
म्वद्भावात्पक्षे प्राग्वद्रूपम् अतिस्त्रये अतिस्त्रिणः अतिस्त्रेः२ अतिस्त्रिणोः अतिस्त्रियोः इत्यादि स्त्रियान्तु
प्रायेण पुम्वत् शसि अतिस्त्रीः अतिस्त्रिया ङिति ह्रस्वश्चेति ह्रस्वान्तत्वप्रयुक्तो विकल्पः अस्त्रीति नु इय
ङुवङ्स्थानाविस्त्र्येव पर्युदासस्तत्सम्बन्धेनैवानुवृत्तेः शेषस्यायन्निषेधो नतु ह्रस्वस्य अतिस्त्रियै अतिस्त्र
यै अतिस्त्रियाः अतिस्त्रेः२ अतिस्त्रियाम् अतिस्त्रौ श्रीः श्रियौ श्रियः नेयङुवङ्स्थानावस्त्री इयङुव
ङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री हे श्रीः श्रियै श्रिये श्रियाः श्रियः वामि इयङुवङ्स्था
नौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री श्रीणाम् श्रियाम् श्रियि श्रियाम् प्रधीशब्दस्य वृत्तिकारादी
नां मते लक्ष्मीवद्रूपम् पदान्तरं विनापि स्त्रियां वर्तमानत्वान्नित्यस्त्रीत्वमिति स्वीकारात् लिंगान्तरानभिधा राम॰
यकत्वन्नित्यस्त्रीत्वमिति कैयटमते तु पुम्वद्रूपम् मनुष्यवाचीति निविग्रहे तु लक्ष्मीवत् आमि शसि च प्रध्यम् प्रध्य २९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नदीत्वपक्षे आटि निङे रीत्वे प्राप्ते ङ्याम् नदीसंज्ञकाभ्यामिदुद्भ्याम्परस्य ङेराम्स्यात् पक्षे अच्चघेः मत्यां म
तौ एवं श्रुतिस्मृत्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः अचिर
ऋतः तिसृचतसृ एतयोः ऋकारस्य रेफादेशः स्यादचि गुणदीर्घोत्वानामपवादः तिस्रः तिसृभिः तिसृभ्यः
२ आमि नुमचिरेति नुट् न तिसृचतसृ एतयोर्नामि दीर्घो न स्यात् तिसृणाम् तिसृषु स्त्रियामिति त्रिचतुरोर्विशे
षणान्नेह प्रियास्त्रयः स्त्रीणि वा यस्याः सा प्रियत्रिः मतिवत् आमि तु प्रियत्रयाणामिति विशेषः प्रियास्तिस्रो
यस्य स इति विग्रहे तु प्रियतिसा प्रियतिसौ प्रियतिसः प्रियतिसृम् इत्यादिः प्रियास्तिस्रो यस्येति तत्कुलं
प्रियत्रि स्वमोर्लुकाल्लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः नलुमतेति निषेधस्यानित्यत्वात्पक्षे प्रियति
सृ रादेशान्नपुंसकविप्रतिषेधेनेति नुम् प्रियतिसृणी प्रियतिसृणि तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्प
क्षे पक्षे नुम्रभावौ प्रियतिस्रा प्रियतिसृणा ङेरत्वे मत्यादि २ हाभ्यां ३ ङ्योः २ गौरी गौर्यौ गौर्यः नदीका
र्यम् हे गौरि गौर्यै इत्यादि एवं वाणीनद्यादयः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद्ङिणि ६ न४
ज्ञावेव प्राप्ते विभक्तौ लिंगविशिष्टाग्रहणम् सखी सख्यौ सख्यः इत्यादि गौरीवत् अङ्यन्तत्वात्सुलोपो न ल
क्ष्मीः शेषं गौरीवत् एवं तरीतंत्र्यादयः स्त्री इति स्त्रियाः स्त्रीशब्दस्येयङादेशः स्यादजादौ प्रत्यये परे स्त्रियौ स्त्रि
यः वाम्शसोः आमि शसि च स्त्रिया इयङ् वा स्यात् स्त्रियम् स्त्रीम् स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियाः २ स्त्रियोः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. पृ. २२ ॥ ॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥ अतोऽम् । अतोऽङ्गात् क्लीवात् स्वमोरम् स्यात् । अमि पूर्वः । ज्ञानम् । एङ्ह्रस्वा-
दिति हल्माच लोपः । हे ज्ञान । नपुंसकाच्च । क्लीवात्परस्यौङः शी स्यात् । भसंज्ञायाम् । यस्येति च । भस्येवर्णावर्णयोर्लो-
पः स्यादीकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते । औङः श्यां प्रतिषेधो वाच्यः । ज्ञाने । जश्शसोः शिः । क्लीवादन-
योः शिः स्यात् । शि सर्वनामस्थानम् । शि इत्येतदुक्तसंज्ञं स्यात् । नपुंसकस्य झलचः । झलन्तस्याजन्तस्य च ।
क्लीवस्य नुमागमः स्यात्सर्वनामस्थाने परे । उपधाया दीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं रामवत् । एवं धनवना-
दयः । अद्ड्डतरादिभ्यः पञ्चभ्यः । एभ्यः क्लीवेभ्यः स्वमोरद्ड् आदेशः स्यात् । टेः । डिति परे भस्य टेर्लोपः स्यात् । भ-
स्येति किम् । पञ्चमः । वावसाने । कतरत् कतरद् कतरे कतराणि । हे लुमत्वात्प्रथमयोरिति पूर्वसवर्णदीर्घ-
एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति । हे कतरत् । पुनस्तद्वत् । शेषं पुंवत् । कतमत् कतमद् । इतरत् । इत-
रद् । अन्यत् । अन्यतरत् । अन्यतमस्य तु अन्यतममित्येव । एकतरात्प्रतिषेधो वक्तव्यः । एकतरम् । जर-
सादेशे कृते सन्निपातपरिभाषया न जरस् । अजरम् । अजरसी अजरे । परत्वाज्जरसि कृते झलन्तत्वान्नुम् ।
सान्तमहतः संयोगस्य । सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्था-
ने परे । अजरांसि अजराणि । अमि लुकोऽपवादम् अम्भावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरिभा- सम.
षया न लुक् । अजरसं अजरं अजरसी अजरे अजरांसि अजराणि । शेषं पुंवत् । पद्दन्निति हृदयोद- २२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति विशेषः सुष्ठुधीर्यस्याः सुष्ठुध्यायतीति वेति विग्रहे रत्नमते तु सुधीः श्रीवत् मतान्तरे तु पुम्वत् सुष्ठु
धीरिति विग्रहे श्रीवदेव ग्रामणीः पुम्वत् ग्रामनयनस्योत्सर्गतः पुंधर्मत्वात्पदान्तरं विना स्त्रियामप्र
वृत्तेः एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् धेनुमतिवत् स्त्रियाञ्च स्त्रीवाची क्रोष्टुशब्दस्तृ
ज्वन्तवद्रूपं लभते ऋन्नेभ्यो ङीप् ऋदन्तेभ्यो नान्तेभ्यश्च ङीप् स्यात् स्त्रियाम् क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यः व
धूर्गौरीवत् सुभ्रूः श्रीवत् हे सुभ्रूः कथन्तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः प्रमाद एवायमिति
बहवः खलपूः पुम्वत् पुनर्भूः दृन्करेति यणादेशो वाच्यः नान्यत्र यङ्वदिति निषेधेन हे पुनर्भु पुनर्भ्व
म् पुनर्भ्वौ पुनर्भ्वः एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य
प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणमस्य
ष्येम् प्रणं बाधित्वा परत्वान्नुट् पुनर्भूणाम् भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः कैयटमते म
नं४ तान्तरे तु हे वर्षाभु पुनर्नवायान्तु हे वर्षाभु भेक्यां पुनर्नवायां स्त्री वर्षाभ्व ईदूतौ रेफमानिति यावत्त्वः वर्षा
भ्वश्च वर्षाभ्वौ वर्षाभ्वः स्वयंभूः पुम्वत् नषट्स्वस्रादिभ्यः षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ
न स्तः स्त्रियाम् स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा याता मातेति सप्तैते स्वस्रादय उदाहृताः
अप्तृन्तृचेति दीर्घः स्वसा स्वसारौ स्वसारः माता पितृवत् शसि मातॄः द्यौर्गौवत् राः पुम्वत् नौर्ग्लौवत्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रियक्रोष्टु२   हेसुधि२   धि२

सि.कौ. धिनी सुधीनि हे सुधे सुधिया सुधिना मध्वा मधिना मधु मधुनी मधूनि हे मधो हे मधु एवमम्बाद्य सानुशब्दस्य।
पू. स्नुनी स्नूनि सानूनि प्रियक्रोष्टुनी तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम् प्रियक्रोष्टूनि टादौ वा समस्तप्रियक्रोष्ट्रा प्रियक्रो
२३ वि.॰ ष्टुना प्रियक्रोष्टे प्रियक्रोष्टवे अन्यत्र तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव प्रियक्रोष्टुना प्रियक्रोष्टुने नुमचिरेति नुट्
प्रियक्रोष्टूनाम् सुलु सुलुनी सुलूनि [illegible] सुल्वा सुलुना धातृ धातृणी धातॄणि हे धातः धात्रा धातृणा हे धातृ॥
वे ज्ञातृकर्त्रादयः एवं ऋगमुस्याट्टेणोः आक्षिप्यमाने शुक्लत्वे पुमर्थे एव च वृत्तो वस्यात् मधु मधुनी मधूनि मधुने इ
त्यादि इहन पुंवत् यदिगन्तं मधु इति तस्याभाषितपुंस्कत्वाभावात् एवमग्रेऽपि प्रि प्रिणी प्रीणि प्रिणा एक
देशविकृतस्यानन्यत्वात् प्रियो हलि इत्यात्वम् प्रराभ्याम् प्रराभिः नुमचिरेति नुड्वात्वे प्रराणामिति माधवः वस्तुत
स्तु सन्निपातलपरिभाषया नुड्वात्वं नामीति दीर्घस्यारम्भसामर्थ्यात्परिभाषाबाधन इत्युक्तं प्रीणाम् स्नु स्नु
नी स्नूनि स्नुने इत्यादि इत्यजन्तनपुंसकलिङ्गाः॥ ॥ होढः हस्य ढः स्यात् झलि पदान्ते च हल्ङ्याब्भ्य इति सु
लोपः पदान्तत्वात् हस्य ढः जश्त्वचर्त्वे लिट् लिड् लिहौ लिहः लिहम् लिहौ लिहः लिहा लिड्भ्यामित्यादि लि
ट्सु लिट्त्सु दादेर्धातोर्घः उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदान्ते च उपदेशे किम् अधोक् इत्यत्र यथा स्या
त् दाममलिहमात्मानमिच्छति दाममलिह्यतीति ततः क्विपि दाममलिट् अत्र माभूत् एकाचो बशो भष् झषन्तस्य स्ध्वोः   पृ.
धातोरवयवो य एकाच् झषन्तस्तदवयवस्य वशः भष् स्यात् सकारे ध्वशब्दे परे पदान्ते च एकाचो धातोरिति   २३

151

हृदा१ आसानि आसा आसभ्यामित्यादि मांसि मांसा मान्भ्यामित्यादि ॥

का: स्यानां हृत् उदन् आसन् हृदि हृद्भ्यामित्यादि उदानि उद्ना उद्भ्यामित्यादि वस्तुतस्तु पृथुरिति यदुक्तं भा
काराद्येमित्युक्तं अत एव भाष्ये मांस्पचन्या उखा या इत्युदाहृतं आयस्स्यादित्वेन मत्वा [illegible] संप्रयोगांतस्यलोपे
यद्यपि न पद्दन्नित्यत्र दिक्छंदसीत्यनुवर्त्तितं तेन लोके न स्यात् अपि आपोमीत्यत्र मासश्छन्दसीति वार्त्तिके छन्दोग्रहणमाम
ति र्षणो लोकेऽपि क्वचिदिति कैयटोक्तरीत्याप्रयोगं अनुसरणपदादय: प्रयोक्तव्या इति बोध्यं ह्रस्वो नपुंसके प्रातिप
दिकस्य क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात् श्रीपं ज्ञानवत् श्रीपाम् अत्र सन्निपातपरिभाषया आ
तो धातोरित्यालोपो न स्वमोर्नपुंसकात् क्लीबादंगात्स्वमोर्लुक् स्यात् वारि इकोऽचि विभक्तौ इगन्तस्य क्लीब
स्य नुमागमः स्यादजादौ विभक्तौ वारिणी वारीणि नलुमतेति निषेधस्यानित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः
हे वारे हे वारि आङो ना वारिणा घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन वारि
णे वारिणः २ वारिणोः नुमचिरेति नुट् नामीति दीर्घत्वम् वारीणाम् वारिणि वारिणोः हलादौ हरिवत्
तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि
अनादये अनादिने इत्यादि शेषं वारिवत् पीलुर्वृक्षस्तत्फलं पीलु तस्मै पीलुने [illegible] पुंवत् प्रवृत्तिनिमि
त्तभेदात् अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः एषामनङ् स्याट्टादावचि स चोदात्तः अल्लोपोनः दध्ना दध्ने
दध्नः दध्नोः दध्नाम् दध्नि दधनि शेषं वारिवत् एवमस्थिसक्थ्यक्षि तदन्तस्याप्यनङ् अतिदध्ना सुधि सु

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ पू॰ २४

क्विप् अन्येषामपीति पूर्वपदस्य दीर्घः। दिव औत्। दिविति प्रातिपदिकस्यौत्स्यात्सौ परे। अल्लोपविधित्वेन स्थानिवत्त्वाभा-
वात् हल्ङ्याब्भ्य इति लोपो न। सुद्यौः। सुदिवौ सुदिवः। सुदिवम्। सुदिवौ। दिव उत्। दिवोऽन्तादेश उकारः स्यात्पदान्ते। सुद्युभ्या-
मित्यादि। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः। षट्चतुर्भ्यश्च। षट्संज्ञकेभ्यश्चतुर्भ्यश्च परस्यामो नुडागमः स्यात्। णत्वं द्वित्वं
चतुर्ण्णाम्। रोः सुपि। सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य। षत्वं तस्य द्वित्वप्राप्ते शरोऽचि। अचि परे शरो
न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रियचत्वः। प्रियचत्वारौ। गौणत्वे तु नुण्नेष्यते। प्रियचतुरां मायान्येतत्तु स्यादेव
परमचतुर्णाम्। कमलं कमलां वा आचष्टाणः। कमल्। कमलौ कमलः। कमलम्। कमल्षु। मो नो धातोः। धातोर्मस्य
नः स्यात् पदान्ते। नत्वस्यासिद्धत्वान्नलोपो न। प्रशान्। प्रशामौ प्रशामः। प्रशान्भ्यामित्यादि। कि-
मः कः। किमः कः स्याद्विभक्तौ। अकच्सहितस्याप्ययमादेशः। कः कौ के। कं कौ कानित्यादि सर्ववत्। इदमो
मः। इदमो मः स्यात्सौ परे। त्यदाद्यत्वापवादः। इदोऽय् पुंसि। इदम इदः स्थाने अय् स्यात्सौ पुंसि। सुलोपः। अयम्। त्य-
दाद्यत्वे पररूपत्वे च कृते। दश्च। इदमो दस्य मः स्याद्विभक्तौ। इमौ इमे। त्यदादेः संबोधनं नास्तीत्युत्सर्गः। अनाप्यकः।
अककारस्येदम इदोऽन् स्यादापि विभक्तौ। आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेन। हलि लोपः।
अककारस्येदम इदो लोपः स्यादापि हलादौ। नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे। आद्यन्तवदेकस्मिन्। ए-
कस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात्। आभ्याम्। नेदमदसोरकोः। अककारयोरिदमदसोर्भिस ऐस न

152

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्यति विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात्तिङि चोदात्तवतीति निघातो
न॥ ॥ इति कारकविभक्त्यर्थः॥ ॥ समर्थः पदविधिः २।१।१ पदसंबंधी यो विधिः स समर्थाश्रितो बोध्यः।
प्राक्कडारात्समासः २।१।३ कडाराः कर्मधारये इत्यतः प्राक् समास इत्यधिक्रियते। सह सुपा २।१।४ सहेति योगो विभ
ज्यते सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिद्ध्यर्थत्वात्क्वचित्तिङन्तेनापि समासः।

आकडारादित्यत्र [illegible] समासः [illegible] =२
सुबामन्त्रित इत्यतः सुबिति [illegible] सुबन्तसहितं सुबन्तसमासे [illegible] =२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]

सि. कौ. पृ. ५२

180

कस्येत्यर्थः । नत्वत्र लक्षणे सप्तमी तात्पर्यं अंते अग्निग्रंथपर्यंतमधीते साग्नि यथाऽसादृश्ये २।१।७ अयथासादृश्य
एव यथाशब्दः समस्यते तेनेह न यथा हरिस्तथा हरः हरेरुपमानत्वं यथाशब्दो द्योतयति तेन सादृश्य
इति यथार्थे ३ इति वा प्राप्ते निषिध्यते यावदवधारणे २।१।८ यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामाः यावच्छ्लो
कं सुप्प्रतिना मात्रार्थे २।१।९ शाकस्य लेशः शाकप्रति मात्रार्थे किम् वृक्षं प्रति विद्योतते विद्युत् अक्षश
लाकासंख्याः परिणा २।१।१० द्यूतव्यवहारे पराजये एवायं समासः अक्षेण विपरीतं वृत्तं अक्षपरि शलाका
परि एकपरि विभाषा २।१।११ अधिकारोऽयं एतत्सामर्थ्यादेव प्राक्सूत्रान्नित्यसमासत्वं सुप्सुपेति तु न नित्य
समासः अव्ययमित्यादिसमासविधानात् ज्ञापकात् अपपरिबहिरञ्चवः पंचम्या २।१।१२ अपविष्णुसंसा
रः अपविष्णुसंसारः अपविष्णोः परिविष्णोः परिविष्णु बहिर्वनं बहिर्वनात् प्राग्वनं प्राग्वनात् आ
ङ्मर्यादाभिविध्योः २।१।१३ एतयोराङ् पंचम्यन्तेन वा समस्यते सोऽव्ययीभावः आमुक्ति संसारः आमुक्तेः
आबालं हरिभक्तिः आबालेभ्यः लक्षणेनाभिप्रती आभिमुख्ये २।१।१४ आभिमुख्यद्योतकावभिप्रती
चिन्हवाचिना सह समस्येते वा प्राग्वत् अभ्यग्नि शलभाः पतन्ति अग्निमभिप्रत्यग्नि अग्निं
प्रति अनुर्यत्समया २।१।१५ यं पदार्थं समया तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः अनुवनमश
निर्गतः वनस्य समीपं गत इत्यर्थः यस्य चायामः २।१।१६ यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः

रामः ५२

[illegible]

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

र्यस्यैवात्रयोगस्कोऽधि हरिद्धि अधि इत्यत्रौ किं विग्रहवाक्यं अत्र निपातेना भिहिते ऽप्यधिकरणे
वचनसामर्थ्यात्सप्तमी अव्ययीभावश्च अयं नपुंसकं स्यात् ह्रस्वो नपुंसके प्रातिपदिकस्य गोपायती
ति गोपाः गाः पातीति गोपाः तस्मिन्नित्यधिगोपं समीपे लक्षस्य समीपं उपलक्षं समयायाम् निकषालंकां
आराद्वना दित्यत्र तु नाव्ययीभावः अभितः परितः अन्यारादिति द्वितीयापंचम्योर्विधानसामर्थ्यात् मद्रा
णां समृद्धिः सुमद्रं यवनानां व्यृद्धिः दुर्यवनं विगता ऋद्धिः मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययो
ति हिमं अत्ययो ध्वंसः निद्रा संप्रति न युज्यते इत्यतिनिद्रं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनु
विष्णु पश्चाच्छब्दस्यैनायं समासः ततः पश्चात्स्त्यस्यते इति भाष्यप्रयोगात् योग्यता वीप्सा पदार्थानति
वृत्तिसादृश्यानि यथार्थाः अनुरूपं रूपस्य योग्यमित्यर्थः अर्थमर्थं प्रति प्रत्यर्थं प्रतिशब्दस्य वीप्सा
यां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात् योगे द्वितीयागर्भेवाक्यमपि शक्तिमनतिक्रम्य यथाशक्ति
हरेः सादृश्यं सहरि वक्ष्यमाणेन सहस्य सः ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण युगपदिति विग्रहे
अव्ययीभावे चाकाले सहस्य सः स्यात् अव्ययीभावे न तु काले सचक्रं काले तु सहपूर्वाह्णं सदृशः सख्या सस
खि यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्यादित्येवमर्थं क्षत्राणां संपत्तिः
सक्षत्रं ऋद्धेराधिक्यं समृद्धिः अनुरूप आत्मभावः संपत्तिरिति भेदः तृणमप्यपरित्यज्य सतृणमत्ति ॥

भाष्यप्रयोगेति अत्र प्र
रस्मिन्निति स्वेऽपि प्रयो
गः एतद्भाष्यप्रयोगादेत
स्वैतत्पदार्थबोधकपद
स्य कृत्वा ...
तात्पर्यतः तद्धर्थकेनना
यं समासः अतएव यथा
सारूप्यइति सन्ने
इत्यत्र संयोगीति प्राप्ते
... भाष्यम्
पदार्थानतिवृत्तौ ७
वल्यमीतरस्त्वारं अरि
भावः ७ ननु नित्यसमा
समासत्वाद्वाक्यं दुर्लभम्
...
...
...
मित्यादौ बत्वा भावसपा
...
सादृश्यमर्थं ...
...

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आदीनां गतिविशेषवाचित्वात् अत्यर्थादकर्मकेति कर्तरि क्तः = ७ ... तत्पुरुषत्वेफलमाह समासान्त इति टजचावित्यर्थः

प्रत्ययग्रहणेति तदन्तस्यापि ग्रहणमित्याशयेनाह द्वितीयान्तमिति ७ = ... श्रितादिप्रकृतिभावः = ६ = ६।४।१४६ ... अचो दाहरणम् तत्पुरुषस्यांगुलेरित्यचित्यच्युलमिति

५।४।१०८
समक्षं अन्वक्षं ॥ अनश्च अन्नन्तादव्ययीभावाट्टच् स्यात् ॥ नस्तद्धिते नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते उपरा
५।४।१०९
जम् अध्यात्मम् नपुंसकादन्यतरस्याम् अन्नन्तं यत्क्लीबं तदन्तादव्ययीभावाट्टज्वा उपचर्मं उपचर्म नदीपौर्णमास्या
५।४।१११
ग्रहायणीभ्यः वा टच् उपनदं उपनदि उपपौर्णमासं उपपौर्णमासि उपाग्रहायणं उपाग्रहायणि झयः झय
५।४।११२
न्तादव्ययीभावाट्टज्वा उपसमिधं उपसमित् गिरेश्च सेनकस्य गिर्यन्तादव्ययीभावाट्टज्वा सेनकग्रहणं पूजार्थं
२।१।२२ २।१।२३
उपगिरं उपगिरि ॥ इत्यव्ययीभावः ॥ तत्पुरुषः अधिकारोऽयं प्राग्बहुव्रीहेः ॥ द्विगुश्च द्विगुरपि तत्पुरुषसंज्ञः
स्यात् इदं सूत्रं त्यक्तुं शक्यं संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञाद्वयसमावेशस्य सुवचत्वात् समा
२।१।२४
सान्तः प्रयोजनं पंचराजं ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः
सह समस्यते वा स तत्पुरुषः कृष्णं श्रितः कृष्णश्रितः दुःखमतीतः दुःखातीतः गम्यादीनामुपसंख्यानम् ग्रा
२।१।२५
मं गमी ग्रामगमी अन्नं बुभुक्षुः अन्नबुभुक्षुः स्वयं क्तेन द्वितीयेति न संबध्यतेऽयोग्यत्वात् स्वयंकृतस्यापत्यं
२।१।२६
स्वायंकृतिः ॥ खट्वा क्षेपे खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुपा समस्यते निन्दायां खट्वारूढो जाल्मः
२।१।२७ २।१।२८
नित्यसमासोऽयं नहि वाक्येन निन्दा गम्यते ॥ सामि सामिकृतं ॥ कालाः क्तेनेत्येव अनत्यन्तसंयोगार्थं वचनं मा
२।१।२९
सप्रमितः प्रतिपच्चन्द्रः मासं परिच्छेत्तुमारब्धवान् ॥ अत्यन्तसंयोगे च कालाः इत्येव अक्तान्तार्थं वचनं मुहूर्तं
२।१।३०
सुखं ॥ तृतीया तत्कृतार्थेन गुणवचनेन तत्कृतेति लुप्ततृतीयाकं तृतीयान्तं तृतीयान्तार्थकृतगुणवचने

नलोकेति षष्ठीनिषेधः कृष्णश्रित इति प्रथमानिर्दिष्टमिति द्वितीयान्तस्य पूर्वनिपातः ॥ ... ३ अयोग्यत्वादिति स्वयमित्यस्यात्मनेत्यर्थक
पदघटित वाक्ये श्रितशब्दादि प्रथमानिर्दिष्टम् ... स्य कर्त्रर्थतया द्वितीयान्तत्वानुपपत्तिरिति भावः = ५
मुपसर्जनमिति नास्यति न सङ्गः = ६ ... नन्वर्थेन तन्मासप्रमितः ... गुणवचनः गुणामुक्तवानिति गुणवचनः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible] ॥ २।१।१७

समस्यते । अनुगङ्गं वाराणसी । गङ्गाया अनु । गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः । तिष्ठद्गुप्रभृतीनि च । एता
नि निपात्यन्ते तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः । आयतीगवं इत्यत्रादेशः पुम्वद्भावविर
हः समासान्तश्च निपात्यते इत्यादि । पारे मध्ये षष्ठ्या वा । पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते एदन्तत्वं चान
योर्निपात्यते पक्षे षष्ठीतत्पुरुषः । पारेगङ्गादानय । गङ्गापारात् मध्येगङ्गात् गङ्गामध्यात् महाविकल्पेन वाक्य
मपि गङ्गायाः पारात् गङ्गाया मध्यात् । संख्या वंश्येन । २।१।१९ वंशो द्विधा विद्यया जन्मना च तत्र भवो वंश्यः तद्वाचिना स
ह संख्या वा समस्यते द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य । त्रिमुनि विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकरणं
अ० एकविंशति भारद्वाजं नदीभिश्च नदीभिः संख्या प्राग्वत् समाहारे चायमिष्यते सप्तगङ्गं द्वियमुनं । अन्यपदार्थे २।१।२१
च संज्ञायां । अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह समस्यते नित्यं संज्ञायां विभाषाधिकारेऽपि वाक्येन संज्ञा
नवगमादित्यनित्यसमासः । उन्मत्तगङ्गं नाम देशः । लोहितगङ्गं समासान्ताः इत्यधिकृत्य अव्ययीभावे शरत्प्रभृ
तिभ्यः । शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे शरदः समीपमुपशरदम् प्रतिविपाशं शरद् विपाश् अ
नस् मनस् उपानह् दिव् हिमवत् अनडुह् दिश् दृश् विश् चेतस् चतुर् त्यद् तद् यद् कियत् । जराया ज
रश्च उपजरसं प्रतिपरसमनुभ्योऽक्ष्णः यस्येति च प्रत्यक्षं । अक्ष्णः परमिति विग्रहे समासान्तविधानसा
मर्थ्यादव्ययीभावः परोक्षे लिट् इति निपातनादस्यैकारादेशः परोक्षं परोक्षा क्रियेत्यादि तु अर्श आद्यचि
प्रत्ययत् मिमिलजरोनामिप्रती ति समासः ॥२२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पंचमीइत्यंतिकार्थेऽपि द्वितीया चेत्यनेन तेभ्यइति बोध्यं प्रतिपदोक्तपरिभाषयेत द्वितीयाचेति न पंचम्या तेनेन समास इत्याद्यं:=४ राजपुरुष इतिप्रतीयते ति निविभक्त्यापद लोपः=६ याजकपूजकपरिचारक परिषेचकस्नातकअध्यापकउत्सादकहोतृपोतृभर्तृरथगणकपत्तिगणकइत्याकृति एतेयाजकादयः=७ गुणात्तरेणेति तरबन्तगुणेत्यस्यापवादइति सर्वगुणोत्कृष्टइत्यर्थः न तु सर्वपदानुवृत्तेः सर्वशब्दे एव दृष्टगुणवाचकादिति तरप्प्रत्ययान्तेनसर्वशब्दस्य समास इति वाच्योऽर्थः=८ गुणादिभिर्न तरवेतिचगुणवाची वेत्यन्वयेनाह तरवत एतेन नन्वयं तेनान्वयेन षष्ठ्यन्तनिर्धारणे हेतुर्न तुनियमेन निर्धारणे षष्ठ्येवायं निषेधोऽत्र उक्तो

सि. कौ. पू. ५५ मासो विशेष्यलिंगता चेति वृत्तव्यम् द्विजायायं द्विजार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूतबलिः गो निर्धारणे षष्ठी च युक्तास
हितं गोसुखं गोरक्षितं पंचमी भयेन चोराद्भयं चोरभयं भयभीतभीतिभीभिरिति वाच्यं वृकभीतः सं चेदत्र द्विधा पदको व्य
पेतापोढमुक्तपतितापत्रस्तैरल्पशः एतैः सहाल्पं पंचम्यन्तं समस्यते स तत्पुरुषः सुखापेतः कल्पना दैतोऽनास्य प्रा सर्वेषां
पोढः चक्रमुक्तः स्वर्गपतितः तरंगापत्रस्तः अल्पशः किम् प्रासादात्पतितः स्तोकान्तिकदूरार्थकृच्छ्राणि श्वेततर इत्यादौ न समवा
182 णि क्तेन स्तोकान्मुक्तः अल्पान्मुक्तः अन्तिकादागतः अभ्याशादागतः दूरादागतः विप्रकृष्टादागतः पतिश्वेतस्य चैतरह दूर
कृच्छ्रादागतः पंचम्याः स्तोकादिभ्यः इत्यलुक् षष्ठी राज्ञः पुरुषः राजपुरुषः याजकादिभिश्च एभिः ष लेत्यादिद्व्यान्तराधे यस्य
ष्ठ्यंतं समस्यते तृजकाभ्यां कर्तरीत्यस्य प्रतिप्रसवोऽयं ब्राह्मणयाजकः देवपूजकः गुणात्तरेण तरलोप नापेक्ष्यो सर्वेषां पदानाम
श्चेति वक्तव्यं तरबन्तं यद्गुणवाचि तेन समासः न निर्धारण इति पूरणगुणेति च निषेधस्य प्रतिप्रसवोऽयं मधिकोऽयं श्वेतो गुणः
सर्वेषां श्वेततरः सर्वश्वेतः सर्वेषां महत्तरः सर्वमहान् कृद्योगा च षष्ठी समस्यत इति वाच्यं इध्मप्रव्रश्चनः सुदाहरणार्थः एवं च न
२५ न निर्धारणे निर्धारणे या षष्ठी सा न समस्यते नृणां द्विजः श्रेष्ठः प्रतिपदविधाना षष्ठी न समस्यते इति रवप्युपन्नः=८
वाच्यं सर्पिषो ज्ञानं पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन पूरणाद्यर्थैः सदादिभिश्च ष
ष्ठी न समस्यते पूरणे सतां षष्ठः गुणे काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्लाः यदा प्रकरणादिना दन्ता इति याम: ५५
विशेष्यं ज्ञातं तदेदमुदाहरणं अनेनायं गुणेन निषेधः संज्ञाप्रमाणत्वादिसादिनिर्देशात् तेनार्थगो

प्रतिपदविधानेति पदं पदं प्रतिविहिता प्रतिपदविधाना षष्ठी शेष इति विहायान्येन सा विद्यते सा स्यात् आदि विहिता षष्ठी च समर्थी इत्यर्थः=४
ननु ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसङ्ग एव नास्ति ब्राह्मणशब्दस्य दन्तान्वयात् ब्राह्मणस्य ये दन्ताः शुक्ला इत्यर्थादत आह यदेति प्रकरणे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नार्थशब्देन च समासः प्राग्वत् शंकुलया खंडः शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृतेति किं अक्ष्णा
काणः पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः २।१।३१ तृतीयान्तमेतैः प्राग्वत् मासपूर्वः मातृसदृश-
पितृसमः ऊनार्थे माषोनं कार्षापणं माषविकलं वाक्कलहः आचारनिपुणः गुडमिश्रः आचारश्ल-
क्ष्णः मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं मिश्रं चानुपसर्गमसंधावित्यत्रानुपसर्गग्रहणात् गुडसंमिश्रा
धानाः अवरस्योपसंख्यानम् मासेनावरो मासावरः कर्तृकरणे कृता बहुलं २।१।३२ कर्तरि करणे च तृतीयान्तं
तेन बहुलं प्राग्वत् हरिणा त्रातो हरित्रातः नखैर्भिन्नो नखभिन्नः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं
नखनिर्भिन्नः कर्तृकरणे किं भिक्षाभिरुषितः हेतावेषा तृतीया बहुलग्रहणं सर्वोपाधिव्यभिचा-
रार्थम् तेन दात्रेण लूनवानित्यादौ न कृता किम् काष्ठैः पचतितरां कृत्यैरधिकार्थवचने २।१।३३ स्तुतिनिंदाफ-
लकमर्थवादवचनमधिकार्थवचनं तत्र कर्तरि करणे च तृतीयान्तं कृत्यैः सह समस्यते वातच्छेद्यं तृणं
काकपेया नदी अन्नेन व्यंजनम् २।१।३४ संस्कारद्रव्यवाचकं तृतीयान्तमन्नेन प्राग्वत् दध्ना ओदनो दध्योदनः
इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम् भक्ष्येण मिश्रीकरणं २।१।३५ गुडेन धानाः गुडधानाः मिश्रणक्रियाद्वा-
रा सामर्थ्यम् चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २।१।३६ चतुर्थ्यन्तार्थाय यत्तद्वाचिनार्थादिभिश्च चतुर्थ्यन्तं
वा प्राग्वत् यूपाय दारु यूपदारु नेह रंधनाय स्थाली अश्वघासादयस्तु षष्ठीसमासाः अर्थेन नित्यस-

तदर्थेन प्रकृतिविकृतिभाव एव बलिरक्षितग्रहणाज्ज्ञापकात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अर्द्धं नपुंसकमिति निर्दे २।२।२ त्वेन नपुंसकत्वे लब्धे नपुंसकग्रहणं ... अनेकव वेदे नैव लोके ... एकारो ... ओकारो वा ... नित्यं नपुंसके ... एक विभक्तावितिः ... द्वितीये ... इति नपुंसक ... ज्ञापकं ... इदं चापथ्यं नपुंसकमिति सूत्रे च चवद्गीति नपुंसक ... द्वितीये त्रिये तेन चात्र ... द्वितीयात्स्येवाकारः स्यात् ... प्राप्तापन्नयोरिति ...

सि॰कौ॰ पृ॰ ५५

183

दत्तलेखकः तत्र क्रीडायां विकल्पे जीविकार्थात् जकाभ्यां ... इति निषेधे प्राप्ते वचनं पूर्वापराधरोत्तरमे
२।२।१ कदेशिनैकाधिकरणे अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी षष्ठीसमासा
पवादः पूर्वंकायस्य पूर्वकायः अपरकायः एकदेशिना किं पूर्वं छात्रा
णां सर्वोप्येकदेशोह्ना समस्यते संख्याविसायेति ज्ञापकात् मध्याह्नः सायाह्नः केचित्तु सर्व एकदेशः
कालेन समस्यते न त्वह्नैव ज्ञापकस्य सामान्यापेक्षत्वात् तेन मध्यरात्रः उपरात्रः पश्चिमरात्र इत्या
दि सिद्धमित्याहुः २।२।२ अर्द्धं नपुंसकं समांशवाच्यर्द्धशब्दो नित्यं क्लीबे स प्राग्वत् एकविभक्त्यावयवेनैव च
न एकदेशिविषयको यमुपसर्जनसंज्ञानिषेधः तेन पंचखट्वी स्यादि सिध्यति अर्द्धं पिप्पल्याः अर्द्धपि
प्पली क्लीबे किं ग्रामार्द्धः द्रव्यैक्य एव अर्द्धं पिप्पलीनां २।२।३ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतान्येक
देशिना सह प्राग्वद्वा द्वितीयं भिक्षायाः द्वितीयभिक्षा एकदेशिना किं द्वितीयं भिक्षाया भिक्षुकस्य अन्यत
रस्यांग्रहणसामर्थ्यात् पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः भिक्षाद्वितीयं २।२।४ प्राप्तापन्ने च द्विती
यया पक्षे द्वितीयाश्रितेति समासः प्राप्तो जीविकां प्राप्तजीविकः जीविकाप्राप्तः आपन्नजीविकः जी
विकापन्नः इह सूत्रे द्वितीयया अ इति छित्त्वा अकारोपि विधीयते तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका
आपन्नजीविका २।२।५ कालाः परिमाणिना परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते मासो जात

कालस्वभिन्न ... भावः ... एकदेशे ... समासः जीविकार्थे ... जीनत्वात् ... तिहसेवे ... हितातु ... तास्वविशेषात् = ४ ... ग्राम ... पित्वा ... ५५ ... = ४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्विजस्य कुर्वाण इति नैयं घन्न षपेत्तया षष्ठी द्विजस्य घटं कुर्वन्निति तथाहि सत्य सामर्थ्या
देव समासाप्रसक्तौ निषेधोयं व्यर्थः स्यादित्यतो व्याचष्टे किंकर इत्यर्थ इति =२

सत्त्वेन निरनुबन्धग्रहणादित्यभावः =३
तृतीया कुर्मीतिकर्मक्तो तेड तरपदे तृतीयाति
प्रकृत्यातिस्वरितम् समासः औनो रात्तः =१

एवं गुणितमाघमित्यादि सिद्धं सुहितार्थास्तृप्त्यर्थाः फलानां सुहितः तृतीयासमासस्तु स्यादेव स्वरे विशेषः स
त् द्विजस्य कुर्वन् कुर्वाणो वा किंकर इत्यर्थः अव्ययं ब्राह्मणस्य कृत्वा पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृ
ह्यते नैन तलतुपरीत्यादि सिद्धमिति हरदत्तः तव्यं ब्राह्मणस्य कर्तव्यं तव्यता तु भवत्येव स्वकर्तव्यं स्वरे भेदः स
मानाधिकरणेन तत्रकस्य सर्पिषा विशेषणसमासस्त्विह बहुलग्रहणान्न गोर्थेनो रित्यादिषु योगयुवतीत्या
दीनां विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोप्यनेन वार्यते क्तेन च पूजायां २।२।१२ मति
बुद्धीति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते राज्ञां मतः पूजितो वा राजपूजित इत्यादौ तु भूते क्तान्ते
न सह तृतीयासमासः अधिकरणवाचिना च २।२।१३ क्तेन षष्ठी न समस्यते इदमेषामासितं गतं भुक्तं वा कर्म २।२।१४
णि च उभयप्राप्तौ कर्मणीति या षष्ठी सा न समस्यते आश्चर्यो गवां दोहोऽगोपेन तृजकाभ्यां कर्तरि २।२।१५ क
र्त्रर्थतृजकाभ्यां षष्ठ्या न समासः अपां स्रष्टा वज्रस्य भर्ता ओदनस्य पाचकः कर्तरि किं इक्षूणां भक्ष
णमिक्षुभक्षिका पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः भूभर्ता कथं तर्हि घटानां निर्मातुस्त्रिभुवन
विधातुश्च कलह इति शेषषष्ठ्या समास इति कैयटः कर्तरि च २।२।१६ कर्तृषष्ठ्या अकेन न समासः भवतः शा
यिका नेह तृजनुवर्तते तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात् नित्यं क्रीडाजीविकयोः २।२।१७ एतयो
रर्थयोरकेन नित्यं षष्ठी समस्यते उद्दालकपुष्पभञ्जिका क्रीडाविशेषसंज्ञा प्रायाभिधाने ण्वुल् जीविकायां
सञ्ज्ञा

इत्यादी ... ति नेड तथा च भट्टिः प्रायुंक्त यत्कृते रिक्षिगृहीमं मोदपाः किं कृतेमौ गाः कुम्भकर्णस्य यो विना कैयट हरद त्तौ तु प्राग्वद्धेति अपे षष्ठ्या परीत्युदाहृतं नोग्रक्षादयोऽयेना विनिषेधं मन्येते तौ चसर्वपक्षादितिभा ... योगादृक्षे वोः=३ हृताद्रक्षोनां कृति पपदानां स्वपितान स्पर्धा लुब्धेव दहनक विनावश्यवुभसा मंवेद्वस्थोवाकिमितिवक्तुमापापिनि कंलो घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह =३ ति१

रो भक्ष्य/इति केचित्तृजनि कर्तुः प्रकृति स्तव्यपेजकाद्गिस्थितिनिर्देशाद्विशेषं सिसे ... द्वयाद्यमा ...
केति षष्ठी निषेधस्त्वनित्यस्तृजकाभ्यामिति वक्तव्ये तृचः सानुबन्धस्य ग्रहणाज्ज्ञापकादित्याह=३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तद्धितार्थ इति विषयः ... [illegible] ... तद्धितार्थ [illegible]
यो वत्ताpि ति रित्यादेः समासे ... तद्धितार्थ ... अत एव द्विगोस्तद्धितस्य लुग्वचनं ... तद्धित विषय
इत्येव ... [illegible] ... सख्या वा चीन वृशब्दोऽत्र गृह्यते दिक्संख्ये संज्ञायामिति नियमात् समानाधि-
करणेनेति किं एकस्याः शोभनं ... षष्ठीसमासो ... [illegible] ... इति निषेधात्
... अत एव पंचानां ... विभक्त्यन्ते ... तद्धितार्थे ... द्विगुत्वात् पञ्चखट्वी ... [illegible] ... तत्पुरुषे

सि० कौ० २ ५६

तेन परमपात्रे सम्मिता इति वाक्ये न तु परमपात्रे सम्मिता इति ॥ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समाना- (२।१।४९)
धिकरणेन ॥ विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं ॥ एकशब्दस्य दिक्संख्ये संज्ञायामिति नियम-
बाधनार्थं च ॥ पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः । एकनाथः । सर्वयाज्ञिकाः । जरन्नैयायिकाः । पुराण-
मीमांसकाः । नवपाठकाः । केवलवैयाकरणाः ॥ दिक्संख्ये संज्ञायाम् ॥ (२।१।५०) समानाधिकरणेनेत्यादि सम-
स्तोऽधिकारः । संज्ञायामेवेति नियमार्थं सूत्रं । पूर्वेषुकामशमी । सप्तर्षयः । नेह । उत्तरा वृक्षाः । पंच ब्राह्मणाः ॥
तद्धितार्थोत्तरपदसमाहारे च ॥ तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्व-
त् । पूर्वस्यां शालायां भवः पौर्वशालः । समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः । सर्वनाम्नो वृत्तिमात्रे
पुंवद्भावः । आपरशालः । पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पु-
रुषः । तेन शालाशब्दे आकार उदात्तः । पूर्वशालाप्रियः । दिक्समाहारो नास्त्यनभिधानात् । संख्यायास्तद्धि-
तार्थे षण्णां मातृणामपत्यं षाण्मातुरः । पंच गावो धनं यस्येति त्रिपदे बहुव्रीहाववान्तरतत्पुरुषस्य विक-
ल्पे प्राप्ते द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं । गोरतद्धितलुकि । गोस्त्रियोरुपसर्जनस्य । समासा-
न्तो न तु तद्धितलुकि पञ्चगवधनः । पञ्चानां गवां समाहारः ॥ संख्यापूर्वो द्विगुः ॥ (२।१।५२) तद्धितार्थेत्यत्रोक्तः संख्या-
पूर्वो द्विगुसंज्ञः स्यात् ॥ द्विगुरेकवचनं ॥ (२।४।१) द्विग्वर्थः समाहार एकवत् स्यात् ॥ स नपुंसकमिति नपुंसकत्वं । पंचगवं

स्तद्धितार्थेत्यपि सूत्रे ... तद्धितलुकि ... गोरतद्धितलुकि ... द्विगुनस्योत्तरपदे ... [illegible] ... यद्यपि कृतेऽपि समासे अविशेषो नास्ति तथापि विभक्त्यन्तरे पंचभिर्गोभिः ... इत्यादिषु विशेषो बोध्यः=५

पा० ५६

असतित्वयांतरे तत्पुरुषे पूर्वपदस्य प्रकृतिस्वरेणाद्युदात्तत्वमेव स्यादितिभावः=१ — त्रिविधः २
विकल्पे प्राप्ते इति विभाषयोत्तरे इति शेषः तत्पुरुषे ... [illegible] ... धनमित्यपि स्यादितिभावः=२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सांकाश्यसिद्ध इति सांकाशेन निर्वृत्तिवने तपसा सिद्ध इत्यर्थः सांकाश्यनगरे सिद्धो जात इत्यर्थो वा =५ ध्वांक्षेणेति ध्वांक्षार्थग्रहणं =५ इवेति तत्र सदा योगात् कुलादौ चिरं न तिष्ठति स एव मुच्यते एवं हि निन्दा भवति =६ उत्तरपदेनेति इदं वार्तिकमेतत्सूत्रविषयमेवेति द्विनाथेति सूत्रे पाठ्यते तद्विषयस्यैव भाष्यकृता दाहृतत्वात् सर्वत्रेति तिद्व्यहजात इत्यत्रेत्यर्थः =१

स्यपस्य समासजातः द्व्यहजातः द्वयोरह्नोः समाहारो द्व्यहः द्व्यहो जातस्येति विग्रहः उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं द्व्यह्नो जातस्य यस्य द्व्यह्नजातः अह्नोऽह्न इति वक्ष्यमाणो ऽह्नादेशः पूर्वत्र तु न संख्यादेः समाहार इति तन्निषेधः सप्तमी शौण्डैः सप्तम्यन्तं शौण्डादिभिः प्राग्वत् अक्षेषु शौण्डः अक्षशौण्डः अधिशब्दोऽत्र पठ्यते अध्युत्तरपदादिति ख ईश्वराधीनः सिद्धशुष्कपक्वबन्धैश्च एतैः सप्तमी प्राग्वत् सांकाश्यसिद्धः आतपशुष्कः स्थालीपक्वः चक्रबन्धः ध्वांक्षेण क्षेपे ध्वांक्षवाचिना सह सप्तम्यन्तं प्राग्वत् निन्दायां तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः तीर्थकाकः कृत्यैर्ऋणे सप्तम्यन्तं कृत्य-

६० प्रत्ययान्तैः सह प्राग्वत् आवश्यके ऋणग्रहणं नियोगोपलक्षणार्थम् मासेदेयमृणं पूर्वाह्णेगेयं साम अ-
णेकिं मासेदेया भिक्षा संज्ञायाम् सप्तम्यन्तं सुपा प्राग्वत् संज्ञायां वाक्येन संज्ञानवगमान्नित्यसमासोयं अरण्येतिलकाः वनेकसेरुकाः हलदन्तात्सप्तम्याः इत्यलुक् क्तेनाहोरात्रावयवाः अहोरात्रस्यावयवा सप्तम्यन्ताः क्तान्तेन सह प्राग्वत् पूर्वाह्णकृतं अपररात्रकृतं अवयवग्रहणं किं अह्नि दृष्टम् तत्र तत्रेत्येतत्सप्तम्यन्तं क्तान्तेन सह प्राग्वत् तत्रभुक्तं क्षेपे सप्तम्यन्तं क्तेन प्राग्वत् निंदायाम् अवतप्तेनकुलस्थितं एतत् पात्रेसमितादयश्च एते निपात्यंते क्षेपे पात्रेसमिताः भोजनसमय एव संगता न तु कार्ये गेहेशूरः गेहेनर्दी आकृतिगणोयं चकारोवधारणार्थः तेनैषां समासान्तरे घटकतया प्रवेशो न

घटकतया प्रवेशो नेति तेन परमाः पात्रेसमिता इति वाक्यमेव भवति न तु सम-
इत्यादि नास्मासान्तरमिति भावः एतच्च शब्दकौस्तुभे स्थितं अन्ये तु केवलाः
पात्रेसमिता इति वाक्यमेव न तु पूर्वकाले केत्यादिना समासान्तरमित्याहुः =१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ पृ॰ ५७

185

कुमारः महावैयाकरणः पूज्यमाने। किं उत्कृष्टो गौः। पंकादुत्कृष्ट इत्यर्थः। वृन्दारकनागकुञ्जरैः पूज्यमानं। गोवृन्दा-
रकः। व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनं। कतरकतमौ जातिपरिप्रश्ने। कतरकठः कतम-
कलापः। गोत्रं च चरणैः सहेति जातित्वं। किं क्षेपे। कुत्सितो राजा किंराजा यो न रक्षति। पोटायुवतिस्तोक-
कतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। जातिः सुबन्तं पोटादिभिः समानाधिकरणैः समस्यते स कर्मधारयः।
६५ पुंवत्कर्मधारयजातीयदेशीयेषु। कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्परं ऊङभावो यस्मिं-
स्तथाभूतं पूर्वं पुंवत्स्यात्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रि-
या। नव्याकोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री। दत्तभार्या। पंचमभार्या।
६६ स्नोघ्नभार्या। सुकेशभार्या। ब्राह्मणभार्या। एवं पाचकजातीया पाचकदेशीयेत्यादि। इभपोटा स्त्री पुंसलक्ष-
णा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयं। गोगृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवसूतिका। गोधेनुः।
वशा वंध्या। गोवशा। वेहद् गर्भघातिनी। गोवेहत्। बष्कयणी तरुणवत्सा। गोबष्कयणी। कठप्रवक्ता। कठ-
श्रोत्रियः। कठाध्यापकः। कठधूर्तः। प्रशंसावचनैश्च। एतैः सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका।
गोप्रकाण्डम्। गवोद्धः। गोतल्लजः। प्रशस्ता गौरित्यर्थः। मतल्लिकादयो नियतलिङ्गाः न तु विशेष्यनि-
घ्नाः। जातिः किं। कुमारी मतल्लिका। युवा खलतिपलितवलिनजरतीभिः। पूर्वनिपातनियमार्थं इदं। लि-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by eGangotri

अनयोः पूर्वसूत्रेण समासे
परनिपातः स्यात्तस्मात्पूर्व
निपातार्थमिदं सूत्रमित्याश
येनाह पूर्वसूत्रापवाद इति=३
तस्मान्निपदिकानीत्यर्थः=१

कुरूपकुत्सितावद्यखेटगर्ह्याणकाः समा इत्यमरः=२
विशेषणविशेष्ययोस्संबंधिकतयाऽन्यतरोपादानमात्रे सति तदपेक्षसंभवेऽप्युभयोरुपादानं स
[illegible] सार्थमिति केयटः=६

कुत्सितानि कुत्सनैः ॥२।१।५३॥ कुत्स्यमानानि कुत्सनैः सह प्राग्वत् वैयाकरणखसूचिः मीमांसकदुर्दुरूढः पापा-
णके कुत्सितैः ॥२।१।५४॥ पूर्वसूत्रापवादः पापनापितः अणककुलालः उपमानानि सामान्यवचनैः ॥२।१।५५॥ घनश्यामः
इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते पूर्वनिपातनिय-
मार्थं सूत्रं उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥२।१।५६॥ उपमेयं व्याघ्रादिभिः सह प्राग्वत्साधारणधर्मस्या-
प्रयोगे सति विशेष्यस्य पूर्वनिपातार्थं सूत्रं पुरुषव्याघ्रः नृसोमः व्याघ्रादिराकृतिगणः सामान्याप्र-
योगे किं पुरुषो व्याघ्र इव शूरः विशेषणं विशेष्येण बहुलं ॥२।१।५७॥ भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्व-
त् नीलमुत्पलं नीलोत्पलं बहुलग्रहणात्क्वचिन्नित्यं कृष्णसर्पः क्वचिन्न रामो जामदग्न्यः पूर्वापरप्रथ-
मचरमजघन्यसमानमध्यमध्यमवीराश्च ॥२।१।५८॥ पूर्वनिपातनार्थमिदं पूर्ववैयाकरणः अपराध्यापकः अपर-
स्यार्द्धपश्चभावो वक्तव्यः अपरश्चासावर्द्धश्च पश्चार्द्धः कथमेकवीर इति पूर्वकालैकेति बाधित्वा परत्वा-
दनेन समासे वीरैक इति स्यात् बाहुलकाद्भविष्यति श्रेण्यादयः कृतादिभिः ॥२।१।५९॥ श्रेण्यादिषु च्व्यर्थ-
वचनं कर्त्तव्यम् अश्रेणयः श्रेणयः कृताः श्रेणीकृताः क्तेन नञ्विशिष्टेनानञ् ॥२।१।६०॥ कृतं च तदकृतं च
कृताकृतं शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् शाकप्रियः पार्थिवः शाकपार्थिवः व॰२
देवपूजको ब्राह्मणो देवब्राह्मणः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सद्वैद्यः वन्द्यमानेन महत्त्वा

सन्महदिति महापापमित्यादौ पूजाभावेऽपि विशिष्टणसमासो वोध्यः अत्रापि महत्त्वेन पापस्य गुरुत्वेन [illegible] पूजाऽस्त्येवेत्यन्ये=१

अत्र क्लिष्टतापेक्षस्यापि पुरुषशब्दस्य प्रधानत्वात्समासप्राप्तः सक्षमाभूदिति सामा-
न्याप्रयोग इत्युक्तमिति भावः कथं तर्हि भाष्याब्धिः क्वातिगंभीर इति वेच्छः सा-
मान्यप्रयोगसत्वेनास्याप्राप्तेः अत्र केचित् प्रमाद एवायमित्याहुः इह गांभी-
र्यसामान्यप्रयोगं न विवक्षितं किंतु स्थितं तदुरवगाहत्वादिना तस्याहविरतत्वादप्र-
प्रयोग एवेति निर्बाधः समास इति तु मनोरमायां=६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्याहरस्तोहेति असंदेहा इत्यस्य आरोपितः संदेहइत्यर्थः संदेहाभावः प्रयोजनमितियावत् अव्ययीभावेनपरवल्लिंगेनासंदेहा इत्यनुक्तमपन्नमितिभावः =२ असंहितमिति संहितासंज्ञासूत्रेभाष्यवार्त्ति
कं ऋतामिन्नायांमध्याविलंविनाहेतोसंहितामावइतिलदर्थः =४ अत्रनञ्इतिपातेः क्विपि विधानात्रानुगित्युभेवनस्पत्यादि व्यितिसूत्रेवृत्तिः नासत्याइत्येतानिचत्वारिपृथक्पदानिएतेन पात्य,
=अर्थाभावेइति माप्यस्थितोबदोदितेवबोधः भेदेनतदारोपबोधे अस्य भावोधत्वादात्मैनदाशे ॥ चवेनेर ६२ रा२
पबोधभेदबोधे इत्रच्चकरणादिकमेवज्ञापकमितिबोध्यं =३ २।२।७
६।३।७३

सि॰कौ॰ चिदेवचिन्मात्रं ईषदकृता ईषत्पिंगलः ईषत्कडारादीनांतिवाच्यम् ईषद्रक्तम् २।२।६ नञ् नञ्सुपासहसमस्यते नलोपो
सू॰ नञः नञोनस्यलोपःस्यात् उत्तरपदे अब्राह्मणः तस्मान्नुडचि ६।३।७४ लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमोभ
५८ वति अनश्वः अर्थाभावे अव्ययीभावेनसहायंविकल्प्यते रक्षोहागमलघ्वसंदेहाःप्रयोजनमिति असु
तायामसंहितमिति चभाष्यवार्त्तिकप्रयोगात् तेनानुपलब्धिरविवादःविघ्नविघ्नत्यादिसिद्धम् नञोनलोप
स्तिङिक्षेपे अपचसित्वंजाल्मनैकधेत्यादौनुनशब्देनसहसुप्सुपेतिसमासः नभ्राण्नपान्नवेदानासत्या
नमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या ६।३।७५ पातीतिपात्रंनतः वेदाइत्यसुन्नन्तः नसत्याः असत्याः नञ्
ति॰१ सत्यानासत्याः नमुंचतीतिनमुचिः नकुलमस्य नखमस्य नस्त्रीपुमान् नपुंसकं स्त्रीपुंसयोःपुंसकभावोनिपातना
त् नक्षरतीतिनक्षत्रं क्षीयतेक्षरतेर्वाक्षत्रं निपात्यते नक्रामतीतिनक्रः कमेरंः नअकमस्मिन्नस्तितिनाकः न
वा॰५ गौःप्राणिषूपसंख्यानम् ६।३।७७ नगइत्यत्रनञ्प्रकृत्यानगा अगाःपर्वताः अप्राणिषुकिं अगोवृषलःशीतेन निर्द्य
कौडेसतोनित्यमित्यनुवर्त्तमाने कुगतिप्रादयः एतेसमर्थेननित्यंसमस्यन्ते कुत्सितःपुरुषःकुपुरुषः
गतिश्चेति अनुवर्त्तमाने ऊर्यादिच्विडाचश्च एतेक्रियायोगेगतिसंज्ञाःस्युः ऊरीकृत्य शुक्लीकृत्यप
टपटाकृत्य कारिकाशब्दस्योपसंख्यानम् कारिकाक्रियाकारिकाकृत्य अनुकरणंचानितिपरं खाट्कृत्य
अनितिपरंकिं खाडितिकृत्वानिरष्ठीवत् आदरानादरयोःसदसती सत्कृत्य असत्कृत्य भूषणेऽलं अ
१।४।६४ राम ५८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उच्चावचम् उच्चावचादयश्च उच्चं नीचमित्यर्थः इदमि त्यन्यत्=निश्चितं प्रचितं च तयोर्निश्चप्रचादेशः=८ एतदत्तगे तस्सूत्रोदाहः आख्यातमि तिक्रियाप्रधानमित्यर्थः अत्रैही डाद्यस्यतो ऽन्यपदार्थे इत्यनुवर्तनेगणेनास्यसंबंधः
गत इत्यस्यात्तव्यार्थतोनस्य ध्वनयितुं युतक्रमेणोदाहरणदाह=पत्राभिधीयते इति=अश्नीतपिबतेति अत्रान्यपदार्थस्य क्रीडादि रूपत्वेन स्त्रीत्वात्समासत्वेन प्रातिपदिकत्वाट्टाप्=९ खादतमोदतेति मोदतेति
स्थाने मोदतेत्यादेशः=१० एहीहादयइति लङ्तमग इत्येकवचनेऽस्येडादेशः=एहियवमिति अत्रैवयोमीत्यस्य यवादेशः=१० उद्धरकोष्ठादि उद्धरोत्सृजेति विग्रहः उत्सृजेत्यस्य विवरणं देहीति कोष्ठादि तिरूपेत्य
स्याकांक्षास्मरणाय=११ द्रुतपाठ इति एहीडादिषु तिङन्तपदोत्तरपदकसमुदायानामित्यर्थः=१२

गपरिभाषया युवतिशब्दोऽपि समस्यते युवखलतिः युवखलतिः युवतिः खलती वा युवखलती युवजरती
२।१।२ युवत्यामेव जरती थम्भीपलिभेनतद्रूपासामानाधिकरण्यं कृत्यतुल्याख्या अजात्या भोज्योष्णम् तुल्यश्वेते सदृ
शश्वेतः अजात्या किं भोज्य ओदनः प्रतिषेधसामर्थ्याद्विशेषणसमासोऽपि न वर्णो वर्णेन समानाधिकरणे
२।४ न प्राग्वत् कृष्णसारंगः कडाराः कर्मधारये कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः कडारजैमिनिः जैमिनि
कडारः कुमारः श्रमणादिभिः कुमारी श्रमणा कुमारश्रमणा इह गणे श्रमणा प्रव्रजिता गर्भिणी।
त्यादयः स्त्रीलिंगाः पठ्यन्ते लिंगविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यम् चतुष्पादो गर्भिण्या चतुष्पा
ज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत् गोगर्भिणी मयूरव्यंसकादयश्च एते निपात्यन्ते मयूरो व्यंसकः
मयूरव्यंसकः व्यंसकोऽपर्त्तः उदक् च अवाक् च उच्चावचं निश्चितं प्रचितं च निश्चप्रचम् नास्ति किञ्चनं यस्य
किञ्चनः आख्यातमाख्यातेन क्रियासातत्ये अश्नीतपिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता क्रि
या पचतभृज्जता खादतमोदता एहीडादयोऽन्यपदार्थे एहीड इति यस्मिन् कर्मणि तदेहीडम् एहियवं
उद्धरकोष्ठात् उत्सृज देहि यस्यां क्रियायां सा उद्धरोत्सृजा उद्धमविधमा आकृतिगणोऽयमिह पाठः जहिकर्म
णा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्
कर्ताभिधीयत इत्यर्थः जहिजोडः जहिस्तम्बः नास्ति कुतोभयं यस्य सः अकुतोभयः अन्यो राजा राजान्तरं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰

हस्तेकृत्य पाणौकृत्य। प्राध्वं बंधने प्राध्वमित्यव्ययम् प्राध्वंकृत्य बंधनेनानुकूलं कृत्वेत्यर्थः प्रार्थनादिनात्वानु
कूल्यकरणे प्राध्वंकृत्वा जीविकोपनिषदावौपम्ये जीविकामिवकृत्वा जीविकाकृत्य उपनिषदमिवकृत्वा उपनि
षत्कृत्य औपम्ये किं जीविकांकृत्वा प्रादिग्रहणमगत्यर्थम् सुपुरुषः अत्र वार्तिकानि प्रादयोगताद्यर्थे प्रथ
मया प्रगत आचार्यः प्राचार्यः अत्यादयः क्रांताद्यर्थे द्वितीयया अतिक्रांतो मालामतिमालः अवादयः
क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया अवकोकिलः पर्यादयो ग्लानाद्यर्थे चतुर्थ्या परिग्लानोऽध्ययना
य पर्यध्ययनः निरादयः क्रांताद्यर्थे पंचम्या निःक्रांतः कौशांब्याः निष्कौशांबिः कर्मप्रवचनीयानां प्रतिषेधः
वृक्षंप्रति तत्रोपपदं सप्तमीस्थं सप्तम्यंते पदे कर्मणि इत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपद
संज्ञं स्यात् तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात् उपपदमतिङ् उपपदं सुबंतं समर्थेन नित्यं समस्यते ।
अतिङंतश्चायं समासः कुंभंकरोतीति कुंभकारः इह कुंभ अस् कार इत्यलौकिकं प्रक्रियावाक्यं अतिङ् किम् मा
भवान् भूत् माङि लुङिति सप्तमीनिर्देशात् माङुपपदं अतिङ्ग्रहणं ज्ञापयति सुपेत्येतन्नेहानुवर्तते इ
ति पूर्वसूत्रेपि गतिग्रहणं पृथक्कृत्य तिङ्ग्रहणं तत्रापकृष्यते सुपेति च निवृत्तं तथा गतिकारकोपप
दानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं व्याघ्री अश्वक्रीती कच्छपी अमैवाव्ययेन अमैवतु
ल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते स्वादुंकारं नेह कालसमयवेलासु तुमुन् कालः समयो वे

नन्वेवं तत्र ग्रहणं व्यर्थं प्रकृतत्वात् अधिकारादि भवतात् वाधिकारो रोवाप्तिसेलतत्राह तस्मिन्निति
अत्रेनोपपदसंज्ञा सा नियोगशिष्टत्वं प्रत्ययविधौ वोध्यामि=६ ननु सुपेत्यधिकारात्तिङे तेन
सनभाविष्यति तत्राहातिङ्ग्रहणमिति=४

व्याघ्री आङो घ्रा शब्दे न वेरा घ्राशब्दे न गतिसमासः = अश्वक्रीतीति अश्वेन क्रीतेति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उच्चावचमित्यादिवचनादेव … ७ एतदन्तगणस्याकृतिगणत्वात् … आख्यातमिति क्रियाप्रधानमित्यर्थः … अन्यपदार्थे … ८ … अन्यपदार्थ इत्यनुवर्तते … प्रातिपदिकत्वात् … ९ … खादत मोदतेति … १० एहीडादयः … एहि यवमिति … ११ उद्धरकोत्सृजेति विग्रहः … १२ … एहीडादिषु तिङन्तपदोत्तरपदकसमुदायानामित्यर्थः ॥ १३

गपरिभाषया युवतिशब्दोपि समस्यते युवाखलतिः युवखलतिः युवतिः खलती युवखलती युवजरती

२।१।६८ युवत्यामेव जरती धर्म्मीपलम्भेन तद्रूपास्सामानाधिकरण्यं कृत्यतुल्याख्या अजात्या भोज्योष्णम् तुल्यश्वेतः सदृ

शश्वेतः अजात्या किं भोज्य ओदनः प्रतिषेधसामर्थ्याज्जातिरेव न समासोपि न वर्णो वर्णेन समानाधिकरणे

२।४ न प्रागवत् कृष्णसारंगः कडाराः कर्मधारये कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः कडारजैमिनिः जैमिनि

कडारः कुमारः श्रमणादिभिः कुमारी श्रमणा कुमारश्रमणा कुमारश्रमणा इत्यादौ श्रमणा प्रव्रजिता गर्भिणी ।

त्यादयः स्त्रीलिंगाः पठ्यन्ते लिंगविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यम् चतुष्पादो गर्भिण्या चतुष्पा

ज्जातिवाचिनो गर्भिणीशब्देन सह प्रागवत् गोगर्भिणी मयूरव्यंसकादयश्च एते निपात्यन्ते मयूरो व्यंसकः

मयूरव्यंसकः व्यंसको धूर्तः उदक् च अवाक् च उच्चावचं निश्चितं प्रचितं च निश्चप्रचम् नास्ति किञ्चनं यस्य वहु

किञ्चनः आख्यातमाख्यातेन क्रियासातत्ये अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता क्रि

या पचत भृज्जता खादत मोदता एहीडादयोऽन्यपदार्थे एहि इड इति यस्मिन्कर्मणि तदेहीडम् एहि यवं

उद्धरकोत्सृज उद्धरोत्सृजेति यस्यां क्रियायां सा उद्धरोत्सृजा उद्धमविधमा असानत्स्यार्थमिह पाठः जहि कर्म

णा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्

कर्त्ता अभिधीयत इत्यर्थः जहिजोडः जहिस्तम्बः नास्ति कुतोभयं यस्य स अकुतोभयः अन्यो राजा राजान्तरं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

...तिङ्... समासस्य ... अथ ... तिङन्तेन चेति=९

187

सि॰कौ॰
पू॰

हस्तेकृत्य पाणौकृत्य प्राध्वं बंधने १।४।७८ प्राध्वमित्यव्ययम् प्राध्वंकृत्य बंधनेनानुकूलं कृत्वेत्यर्थः प्रार्थनादिना त्वानु
कूल्यकरणे प्राध्वं कृत्वा जीविकोपनिषदावौपम्ये १।४।७९ जीविकामिव कृत्वा जीविकाकृत्य उपनिषदमिव कृत्वा उपनि
षत्कृत्य औपम्ये किं जीविकां कृत्वा प्रादिग्रहणमगत्यर्थम् सुपुरुषः अथ वार्त्तिकानि प्रादयो गताद्यर्थे प्रथ
मया प्रगत आचार्यः प्राचार्यः अत्यादयः क्रान्ताद्यर्थे द्वितीयया अतिक्रान्तो मालामतिमालः अवादयः
क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलयाऽवकोकिलः पर्यादयो ग्लानाद्यर्थे चतुर्थ्या परिग्लानोऽध्ययना
य पर्यध्ययनः निरादयः क्रान्ताद्यर्थे पंचम्या निःक्रान्तः कौशाम्ब्याः निष्कौशाम्बिः कर्मप्रवचनीयानां प्रतिषेधः
वृक्षं प्रति तत्रोपपदं सप्तमीस्थं ३।१।९२ सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपद
संज्ञं स्यात् तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात् उपपदमतिङ् २।२।१९ उपपदं सुबन्तं समर्थेन नित्यं समस्यते अ
तिङन्तश्चायं समासः कुंभं करोतीति कुंभकारः इह कुंभ अम् कार इत्यलौकिकं प्रक्रियावाक्यं अतिङ् किम् मा
भवान् भूत् माङि लुङिति सप्तमीनिर्देशात् माङुपपदं अतिङ्ग्रहणं ज्ञापयति सुपेत्येतन्नेहानुवर्त्तत इ
ति पूर्वसूत्रेपि गतिग्रहणं पृथक्कृत्य तिङ्ग्रहणं तत्रापकृष्यते सुपेति च निवृत्तं तेन व्याघ्री गतिकारकोपप
दानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं व्याघ्री अश्वक्रीती कच्छपी अमैवाव्ययेन अमैव तु
ल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते स्वादुंकारं नेह कालसमयवेलासु तुमुन् कालः समयो वे

नन्वेवं तत्रग्रहणं व्यर्थं प्रकृतत्वात्... अधिकारादि... तस्मिंश्चेति
अनेनोपपदसंज्ञासंनियोगशिष्टत्वं प्रत्ययविधेर्बोध्यते=६ ननु सुपेत्यधिकारात् तिङा तेन
सन भविष्यति तत्राह अतिङ्ग्रहणमिति=४

व्याघ्रामति आङ्पूर्व घ्रा शब्दे न वेरा घ्रा शब्दे न गतिसमासः=अश्वक्रीतीति अश्वेन क्रीतेति क
रणस्य कृता समासः करणपूर्वादिति ङीप् सुबन्तेन समासे पूर्वटाप्यदन्तत्वाभावात् तन स्यादिति
भावः=कच्छपी... विभागात्के कच्छेपिबतीत्यर्थे उपपद समासः=२ पूर्व
सूत्रेण सिद्धे नियमार्थमिदं=तुल्यविधानमिति एतच्च अध्याहारलभ्यं येनामेव विधीयते तेनैव...

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विषयांतरमनःसंबंधं हन्त्येत्यर्थः विषयांतरमनःसंबंधः कणः अभिलाषं कृत्वा तनि इति पर्यंतं पयः पिबति=३

लंकृत्य भूषणे किं अलंकृत्वोदनं गतः पर्याप्तमित्यर्थः अनुकरणमित्यादिसूत्री स्वभावात्कृञ्विषया
१।४।६५ अंतरपरिग्रहे अंतर्हत्य मध्ये हत्वेत्यर्थः अपरिग्रहे किं अंतर्हत्वा गतः हतं परिगृह्य गत इत्यर्थः कणे
१।४।६६ मनसी श्रद्धाप्रतीघाते कणेहत्य पयः पिबति मनोहत्य कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषा
तिशये वर्त्तते मनःशब्दोप्यत्रैव १।४।६७ पुरोऽव्ययम् पुरस्कृत्य १।४।६८ अस्तं च अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्
अस्तंगत्य अच्छगत्यर्थवदेषु अच्छगत्य अच्छोद्य अभिमुखं गत्वा उक्त्वा चेत्यर्थः अव्य
यं किं जलमच्छं गच्छति अदोऽनुपदेशे अदःकृत्य अदःकृतं परस्योपदेशे तु अदः कृत्वा अदः
कुरु तिरोऽन्तर्द्धौ तिरोभूय विभाषा कृञि तिरस्कृत्य तिरःकृत्य तिरःकृत्वा १।४।७३ उपाजेऽन्वाजे एतौ कृञि वा गति
संज्ञौ उपाजेकृत्य उपाजेकृत्वा अन्वाजेकृत्य अन्वाजेकृत्वा दुर्बलस्य बलमाधायेत्यर्थः साक्षात्प्रभृती
नि च कृञि वा गतिसंज्ञाः स्युः च्व्यर्थ इति वक्तव्यम् साक्षात्कृत्य साक्षात्कृत्वा लवणंकृत्य लवणंकृत्वा
१।४।७५ मांतत्वं निपातनात् अनत्याधान उरसिमनसी उरसिकृत्य उरसिकृत्वा अभ्युपगम्येत्यर्थः मनसिकृत्य न्यधः
मनसिकृत्वा निश्चित्येत्यर्थः अत्याधानमुपश्लेषणं तत्र न उरसि कृत्वा पाणिं शेते मध्येपदेनिवचने च
एते कृञि गतिसंज्ञा वा स्युरनत्याधाने मध्येकृत्य मध्येकृत्वा पदेकृत्य पदेकृत्वा निवचनेकृत्य निवच
नेकृत्वा वाचं नियम्येत्यर्थः नित्यं हस्ते पाणावुपयमने कृञि उपयमनं विवाहः स्वीकारमात्रमित्यन्ये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

१८८

संख्यादिभिन्नतत्पुरुषस्य समासान्त अह्नादेशसंभवादहस्य ग्रहणार्थमिति = ५

पद्माऽघयोरित्यत्र द्विवचननिर्देशात्स्वप्रमाणद्वितीयशब्दोऽहरां
तयोराप्ति तत्र नत्रग्रहणात्सामर्थ्यादुपात्यान्त्ययोरेव योगे ग्रहणं उत्त
मोचैकस्यैतिविग्रहे सोऽह्नि वचनं नमिति तेनाप्याह्नः = ७

रावितिहृतन्तात्त्वादिति श्रुक्वत्त्वा नच प्रत्य वाणीत्वंप त्वान्नअह्नोयोऽकारस्तदन्तान्ङीविति तत्र व्याख्यानं त्वात्तन एव हति कात्युक्तारोऽन्यः पर्यन्तेपि न ङीप् अणोऽकार इति तत्र व्याख्यानात् नचैवमपि टजन्तत्वान्ङीप् स्यादिति वाच्यं टचः समासान्तत्वात् तदन्तस्य तद्धितार्थ प्रति उपसर्जनत्वात् अत एव हि आपिशलिना प्रोक्तमधीयाना ब्राह्मणी आपिशलेत्युदाहृतं भाष्ये द्विगोरिति ङीप् तु न शक्य एव अपरिमाणेति निषेधात् अत एव त्रापुक्तस्थेवोदाहरतिद्व्यह्नेति

सि॰ कौ॰ नच एकस्मान्हो नस्य णः स्यात् सर्वाह्नः पूर्वाह्नः संख्याताह्नः द्वयोरह्नोर्भवः कालाट्ठञ् द्विगोर्लुगनपत्ये इति ठञो लु-

पू॰ १६० क् द्व्यहः स्त्रियामदन्तत्वाट्टाप् द्व्यह्ना घरूढा अत्यह्नः क्षुभ्नादिषु च एषु णत्वं न स्यात् दीर्घाह्नी प्रावृ- २३

ट् एवं चैतदर्थमह्न इत्यदन्तानुकरणं क्षेपोन कर्तव्यः प्रातिपदिकान्ते णत्वं वा णत्वप्रसङ्गे क्षुभ्नादिपाठस्याव-

श्यकत्वात् अदन्तादिति तपरकरणान्नेह परागतमहः परान्हः न संख्यादेः समाहारे समाहारे वर्तमानस्य

संख्यादेरन्हादेशो न स्यात् संख्यादेरिति स्पष्टार्थम् द्वयोरह्नोः समाहारो द्व्यहः त्र्यहः उत्तमैकाभ्यां च आ-

भ्यामन्हादेशो न उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह पुण्यैकाभ्यामित्येव तु सूत्रयितुमुचितं पुण्याहम्

एकाहः उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थं [illegible] मित्येके संख्यातैकाहः अग्राख्यायामुरसः टच् स्या-

त् अश्वानामुर इव अश्वोरसं मुख्योऽश्व इत्यर्थः अनोऽश्मायःसरसां जातिसंज्ञयोः टच् स्यात् जातौ संज्ञायां

च उपानसं अमृताश्मः कालायसं मण्डूकसरसमिति जातिः महानसं पिण्डाश्मः लोहितायसं जलसरसं

इति संज्ञा ग्रामकौटाभ्यां च तक्ष्णः ग्रामस्य तक्षा ग्रामतक्षः साधारण इत्यर्थः कुट्यां भवः कौटः स्वतन्त्रः

स चासौ तक्षा च कौटतक्षः अतेः शुनः अतिश्वो वराहः अतिश्वी सेवा उपमानादप्राणिषु अप्राणिवि- राजराम.

षयकोपमानवाचिनः श्वन्रूच् स्यात् आकर्षः श्वेवाकर्षश्वः अप्राणिषु किं वानरः श्वेव वानरश्वा उ- १६०

अह्नोऽह्न इति सूत्रे अह्नादेशप्रत्याख्यानाच्च प्रत्ययेन एवेतत्तोऽचमनुवर्तनुवर्त्य टजपवादोऽस्तीति व्याचक्षाणस्य भाष्यकारस्य मते तु निर्विवादमेवात्र टाप् कथं तर्हि कालनिर्णयादीपिकायां द्व्यह्नीति प्रयोग इति चेदत्राहुः द्वे अहनी यस्यां तिथौ इति बहुव्रीहौ नान्तलक्षणो ङीप् वाच्यः भाष्यमते तु अह्नादेशः प्रत्याख्यातः एभ्योऽहः अच् स्यात् टचोपवादः इति व्याख्यायामह्न [illegible] द्व्यह्नो रेवतीति यमादिलोपाभावे ऽल्लोपोन इत्यकारलोपः इति = ७ =

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अग्रग्रहणं द्वन्द्वार्थमिति अन्यथा रात्रेरिति षष्ठीतत्पुरुषः स्यादिति भावः। ननु अहःशब्दस्याहस्त्वपाठादेव रात्रिशब्दस्य चारात्रित्वपाठाद्यो योगः समासं भवति हस्वो रात्रि इष्टो इति किमर्थम्। एवं स्थितिे चेन्मुख्यसंभवादागमग्रहणान्नातिप्रसंगः... समासान्तदर्शनात् =१= तृतीयेति यत्र विभाषा अमेव तुल्यविधानेष्वु उपपदं प्रशस्तं तृतीयामिति यत्तु अमैवान्येन तुल्यविधानं तस्याप्रयोगस्तु यथा अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वा णमुलौ उच्चैःकारमाचष्टे इति =२= अलंकृत्वेति अलंखल्वोरिति सूत्रमुपदशस्तृतीयाया मित्यतः पूर्वमिति भावः =४

लोऽग्ने हावाभो क्तुम्। अग्ने वेति किम्। अग्रे भोजं अग्रे भुक्त्वा। विभाषाग्रेप्रथमपूर्वेषु इति क्त्वा णमुलौ। अमा चान्येन च तुल्यविधानमेतत्। तृतीयाप्रभृतीन्यन्यतरस्याम्। उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं भुंक्ते मूलकोपदंशम्। क्त्वा च। तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य उच्चैः कृत्वा। अव्ययेऽयथाभिप्रेताख्याने इति क्त्वा। तृतीयाप्रभृतीनि किं। अलं कृत्वा खलु कृत्वा। तत्पुरुषस्यांगुलेः संख्याव्ययादेः। संख्याव्ययादेरंगुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अंगुली प्र

म७ माणमस्य द्व्यंगुलं दारु। निर्गतमंगुलीभ्यो निरंगुलं। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। एभ्यो रात्रेरच् स्या

च्चात् संख्याव्ययादेः। अहर्ग्रहणं द्वन्द्वार्थम्। अहश्च रात्रिश्च अहोरात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वरात्रः। पूर्व

रात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारो द्विरात्रं। अतिक्रान्तो रात्रिमतिरात्रः। राजाहःसखि

भ्यष्टच्। एतदन्तात्तत्पुरुषाट्टच् स्यात्। परमराजः। अतिराजौ कृष्णसखः। अह्नष्टखोरेव। टिलोपः स्यान्ना

न्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः। तद्धितार्थे द्विगुः। तमधीष्ट इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ रात्र्यहः

संवत्सराच्चेति खः। लिंगविशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी मद्रराज्ञी। अह्नोऽह्न एतेभ्यः।

सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात्समासान्ते परे। अह्नोऽदन्तात्। अदन्तपूर्वपदस्थाद्रेफात्पर

एतेभ्य इत्यनेनाहःसर्वैकदेशेति सूत्रस्थाः परामृश्यन्ते = सूत्रे तु यासाहि न्नहरादयो निर्दिष्टाः पूर्वकाले संख्यायां च निर्नुरुक्ष्ट तत्र सर्वे यान्ति ... मद्रराज्ञीति च चिभस्यैः इति पुंवद्भावे टिलोपे मद्रराजीति स्यादिति भावः =२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि० को०
पृ०
६१

109

संख्याव्ययेत्यादिने
तिशेषः ८६

धारयेति । महज्जातीयेऽस्ते आत्वं महाजातीया महदात्वे घासकरविशिष्टेष्वसंख्यानम् बहुव्रीहौ च अमामहा
न्धिकरण्यार्थमिदम् महतो महस्या वा घासो महाघासः महाकरः महाविशिष्टः । अष्टनः कपाले हविषि अष्ट
कपालं गवि च युक्ते गोशब्दे परे युक्ते इत्यर्थे गम्ये अष्टन आत्वं वक्तव्यमित्यर्थः । अष्टागवं शकटम् अचप्रत्य
न्ववेत्यत्राजिति योगविभागाद्बहुव्रीहावप्यच् अष्टानां गवां समाहारोऽष्टगवम् तद्युक्तत्वाच्छकटमष्टा
गवमिति वा । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः आत्स्यात् द्वौ च दश च द्वादश अधिकाद्दशेति वा द्वावि
ंशतिः अष्टादश अष्टाविंशतिः अबहुव्रीह्यशीत्योः किं द्वित्राः द्व्यशीतिः प्राक्शतादित्युक्तेर्नेह द्विशतं
द्विसहस्रं त्रेस्त्रयः त्रिशब्दस्य त्रयस्स्यात् पूर्वविषये त्रयोदश त्रयोविंशतिः बहुव्रीहौ तु त्रिदशास्त्रिदशाः
सुजर्थे बहुव्रीहिः अशीतौ तु त्र्यशीतिः प्राक्शतादित्येव त्रिशतं त्रिसहस्रं विभाषा चत्वारिंशत्प्रभृतौ स
र्वेषां द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्यात् चत्वारिंशदादौ परे द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टचत्वारि
ंशत् अष्टाचत्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवं पञ्चाशत्षष्टिसप्ततिनवतिषु एकादि
श्चैकस्य चादुक् एकादिर्नञ् प्रकृत्या स्यादेकस्यादुगागमश्च नञो विंशत्या समासे कृते एकशब्देन सह
तृतीयेति योगविभागात्समासः अनुनासिकविकल्पः एकेन न विंशतिः एकान्नविंशतिः एकाद्न
विंशतिः एकोनविंशतिरित्यर्थः षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यम् षो

राम० ६१

धासु वेति संख्याया विधार्थे इत्यादिना विहितस्य
धाप्रत्ययस्यैव ग्रहणं प्रत्यर्यप्रत्यययोः प्रत्ययस्ये
वेति परिभाषया तेनेह न षड् दधातीति षड्धा
धातोनुपसर्गे कः वा० २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

...नामिभूर्तित्रयसत्तापास्ते जेषु प्रसिद्धत्वात् = ८

आह्रियत इति टक् अध्यर्द्ध इति लुक् = ४

५।४।९८

उत्तरमृगपूर्वाच्च सक्थ्नः। चादुपमानात्। उत्तरसक्थं मृगसक्थं पूर्वसक्थं फलकमिव सक्थि फलकस
क्थम्। ५।४।९९ नावो द्विगोः॥ नौशब्दान्तात् द्विगोः टच् स्यात् न तु तद्धितलुकि। द्वाभ्यां नौभ्यामागतो द्विनावरूप्यः। हेतु
मनुष्येभ्य इति रूप्यः। द्विगोर्लुगनपत्ये इत्यत्राचीत्यस्यापकर्षणाद्वा लुक्। पंचनावप्रियः। द्विनावम्
त्रिनावम्। अतद्धितलुकि किं। पंचभिर्नौभिः क्रीतः पंचनौः। ५।४।१०० अर्धाच्च। अर्धान्नावष्टच् स्यात्। नावोर्द्धं नाव
म्। क्लीबत्वं [illegible]लोकात्। ५।४।१०१ खार्याः प्राचां। द्विगोरर्धाच्च खार्या टच् वा। द्विखारम् द्विखारि। अर्द्धखारं अर्द्ध
खारि। ५।४।१०२ द्वित्रिभ्यामंजलेः। टज्वा द्विगौ। द्व्यंजलं द्व्यंजलिः। अतद्धितलुकीत्येव। द्वाभ्यामंजलिभ्यां क्रीतः द्व्यंज
लिः। ५।४।१०४ ब्रह्मणो जानपदाख्यायाम्। ब्रह्मान्तात्तत्पुरुषाट्टच् स्यात् समासेन जानपदत्वमाख्यायते चेत्। सुराष्ट्रे ब्र
ह्मा सुराष्ट्रब्रह्मः। ५।४।१०५ कुमहद्भ्यामन्यतरस्याम्। आभ्यां ब्रह्मणो वा टच् स्यात् तत्पुरुषे। कुत्सितो ब्रह्मा कुब्रह्मः
कुब्रह्मा। ६।३।४६ आन्महतः समानाधिकरणजातीययोः। महत आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरप
दे जातीये च परे। महाब्रह्मः महाब्रह्मा महादेवः महाजातीयः। समानाधिकरणे किम्। महतः सेवा मह
त्सेवा। लाक्षणिकं विहाय प्रतिपदोक्तः सन्महदिति समासो ग्रहीष्यत इति चेत् महाबाहुर्न स्यात्। तस्मा
दत्र लाक्षणिकप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति परिभाषा नेह प्रवर्तते समानाधिकरणग्रहणसामर्थ्यात्।
आदिति योगविभागात् आत्वम्। मागेकादशभ्य इति निर्देशात् एकादशः। महतीशब्दस्य पुंवत्कर्म

अंजलिभ्यां क्रीतं द्व्यंजलिना क्रांजलिः धान्यादि यतस्य मूल्यत्वासंभवात् किंतु अंजलिपरिमितं ... द्विप्रभृति तस्तरवैत
अपरिमाणत्वाद्व्यंजलिरित्यत्र तद्धितस्य लुक् ... तलुक् = ८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सामान्ये नपुंसकमिति ॥ अत्र निपातलिंगविषये तेनादिपञ्चत्वात्यादौ ... इति ... नन्वत्र कर्मधारयः ... पुंस्त्वमिति ... समानाधिकरणत्वाभावात् ...
तिदारादिरुत्ताप्रेनेतिसूत्रेभाष्ये स्पष्टं ॥ = ७ नन्वत्पुरुषो नञ्जि तिपरवल्लिंगमिति यावद्धिकारो ऽयं अनञ्कर्मधारय इत्युक्तेर्न नञ्तत्पुरुषस्य न कर्मधारयस्य ... समानाधिकरणभावात्
समानाधिकरणव्यवहारः नञ्समासेहि आरोपितोत्तरपदार्थ आरोपितधर्मके ऽर्थे ... इति भावः ॥ = ७ ... प्रथमज्ञानविषयी भूतोग्रन्थः = नंदकर्तृकप्रथमप्रारंभविषयीभूतो द्रोणः = ११ बाहुल्ये
इति ... बाहुल्येइत्याकांक्षायामावरकद्रव्यनियतत्वाच्छायायास्तद्बाहुल्ये इति ... पूर्वपदार्थभूतमेवत्यच्छायेना ह पूर्वपदार्थेति = १२ =

सि॰कौ॰ द्वंद्वैकवचनस्य द्विवचनेनित्यं ॥ बहुत्वे द्वित्ववत् भवति त्रिशूल्यं मुपुनर्वसवः तिष्यपुनर्वसू तिष्येति किं विशा
पू॰ खा ... नुराधाः नक्षत्रेति किं तिष्यपुनर्वसवो माणवकाः स नपुंसकं समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् पर
६२ वल्लिंगापवादः पंचगवं दंतोष्ठं अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः पंचमूली आबन्तो वा पंचखट्वी पंच
खट्वम् अनो नलोपश्च वा च द्विगुः स्त्रियां पंचतक्षं पंचतक्षी पात्राद्यन्तस्य न पंचपात्रं त्रिभुवनं चतुर्युगं पु
190 ण्यसुदिनाभ्यामह्नः क्लीबतेष्टा पुण्याहं सुदिनाहं पथः संख्याव्ययादेः संख्याव्ययादेः परः कृतसमास
न्तः पथिशब्दः क्लीबमित्यर्थः त्रयाणां पन्थाः त्रिपथं विरूपः पन्थाः विपथं कृतसमासांतग्रहणान्नेह सु
पंथाः अतिपंथाः सामान्ये नपुंसकं मृदु पचति प्रातः कमनीयं तत्पुरुषोऽनञ्कर्मधारयः अधिकारो
यं संज्ञायां कंथोशीनरेषु कंथांतस्तत्पुरुषः क्लीबं स्यात् सा चेदुशीनरदेशोत्पन्नायाः संज्ञा सुसमस्या
पत्यानि सौशमयस्तेषां कंथा सौशमिकंथं संज्ञायां किं वीरणकंथा उशीनरेषु किं दाक्षिकंथा उपज्ञोप
द्यो४ क्रमं तदाद्याचिख्यासायां उपज्ञांत उपक्रमांतश्च तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्य
माणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः नंदोपक्रमं द्रोणः छा
या बाहुल्ये छायांतस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये इक्षूणां छाया इक्षुच्छायं विभा राम
षा सेनेति विकल्पस्यापवादः इक्षुच्छायानिषादिन्य इति तु इति समन्तात् निषादिन्य इति आङ् प्रश्लेषो ६३

CC-0. Lal-Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ॐ॥ षोडशोऽध्यायः॥ परवल्लिंगं द्वंद्वतत्पुरुषयोः॥ एतयोः परपदस्येव लिंगं स्यात्॥ कुक्कुटमयूर्याविमे
मयूरी कुक्कुटाविमौ॥ अर्द्धपिप्पली॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः॥ पंचसु कपा
लेषु संस्कृतः पंचकपालः पुरोडाशः॥ प्राप्तो जीविकां प्राप्तजीविकः॥ आपन्नजीविकः॥ अलंकुमार्यै
अलंकुमारिः॥ अत एव ज्ञापकात्समासः॥ निष्कौशांबिः॥ पूर्ववदश्ववडवौ॥ द्विवचनमतंत्रं॥ अश्ववडवौ
अश्ववडवान् अश्ववडवैः॥ रात्राह्नाहाः पुंसि॥ एतदंतौ द्वंद्वतत्पुरुषौ पुंस्येव॥ अनंतरत्वात्परवल्लिंगता
पवादोऽयं परत्वात्समाहारनपुंसकतां बाधते॥ अहोरात्रः॥ रात्रेः पूर्वभागः पूर्वरात्रः॥ पूर्वाह्णः॥ द्व्यहः॥
संख्यापूर्वं रात्रं क्लीबं॥ द्विरात्रं त्रिरात्रं गणरात्रं॥ अपथं नपुंसकं॥ तत्पुरुष इत्येव॥ अन्यत्र तु अपथो देशः॥
कृतसमासांतनिर्देशान्नेह अपंथाः॥ अर्द्धर्चाः पुंसि च॥ अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः॥ अर्द्धर्चः अ
र्द्धर्चं॥ ध्वजः ध्वजं॥ एवं तीर्थशरीरमंडपयूपदेहांकुशकलशेत्यादि॥ जात्याख्यायामेकस्मिन्बहुवच
नमन्यतरस्यां॥ एकोऽप्यर्थो वा बहुवद्भवति॥ ब्राह्मणाः पूज्याः॥ ब्राह्मणः पूज्यः॥ अस्मदो द्वयोश्च॥ एकत्वे
द्वित्वे च विवक्षिते अस्मदो बहुवचनं वा स्यात्॥ वयं ब्रूमः॥ पक्षे अहं ब्रवीमि॥ आवां ब्रूव इति वा॥ सविशेषण
स्य प्रतिषेधः॥ पटुरहं ब्रवीमि॥ फल्गुनीप्रोष्ठपदानां च नक्षत्रे॥ द्वित्वे बहुत्वं प्रयोक्तव्यं वा स्यात्॥ पूर्वे फल्गु
न्यौ पूर्वाः फल्गुन्यः॥ पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदाः॥ नक्षत्रे किं॥ फल्गुन्यौ माणविके॥ तिष्यपुनर्वस्वोर्न

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निपातनात् षष्ठ्या अलुक् ... ऊङभावो यस्यामिति ... भाषितः पुमान् ... पुंस्कप्रवृत्तिनिमित्तस्याधात्वि ... समानाधिकरणे ...
शब्दश्च यदर्थे ज्ञाने तद्विशिष्टशब्दस्य प्रवृत्तिनिमित्तं तत्प्रवृत्तिनिमित्तं भाषितः पुमान् येन ... कुटीजीकफल्यादिवत् ... पुंस्त्रीलिंगे स्त्री ... भार्या ...
त्यादिप्रयोगेषु ... विशिष्टस्यापि बोधनात् ... पुंस्त्वे ... पूर्वपदे ...
पत्नीत्वे ... तद्भावात् ... तेनैव पूर्वपदत्वादिति भावः अत एव ...

सि.कौ. पू. ६२ (णी)प्रियादिषु ॥ भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिर्निपातनात् पञ्चम्या अलुक् षष्ठ्याश्च
लुक् तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्ये
व रूपं स्यात् समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः गोस्त्रियोरिति ह्रस्वः चित्रा गावो
यस्येति लौकिकविग्रहे चित्रा अस् गो अस् इत्यलौकिकविग्रहे चित्रगुः रूपवद्भार्यः चित्राजरतीगोर्य
स्येति विग्रहे अनेकोक्तेर्बहूनां बहुव्रीहिः अत्र केचित् चित्राजरतीगुः जरती चित्रा गुर्वी एवं दीर्घा तन
191 न्वी जंघा यस्य स दीर्घतन्वीजंघः त्रिपदे बहुव्रीहौ प्रथमं न पुंवत् उत्तरपदस्य मध्यमेन व्यवधानात् द्वितीय
मपि न पुंवत् पूर्वपदत्वाभावात् उत्तरपदं पालादि समासस्य चरमावयवे रूढः पूर्वपदशब्दस्तु प्रथमा
वयवे इति वदन्ति वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते आनङ् ऋतो द्वन्द्वे इत्यत्र यथा तेनोपात्तस्य पूर्वस्यैव चित्रा
रजुरित्यादि अत एव चित्राजरतीगौ गावो यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुरिति भाष्यं कर्मधारये पूर्वपदे
तु द्वयोरपि पुंवत् जरच्चित्रगुः कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः स्त्रियाः किं ग्रामणिकुलं दृष्टि
रस्य ग्रामणीर्दृष्टिः भाषितपुंस्कात्किम् गंगाभार्यः अनूङ् किं वामोरूभार्यः समानाधिकरणे किम्
कल्याण्या माता कल्याणीमाता स्त्रियां किम् कल्याणी प्रधानं यस्य कल्याणीप्रधानः पूरण्यां अप्पू राम. ६२
५।४।१२६ रणीप्रमाण्योः पूरणार्थप्रत्ययान्तं यत् स्त्रीलिंगं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात् कल्याणीपं

पूर्वपदार्थगतमुत्तरपदस्थाः अन्त्यप्रथम ... स्त्रीवेनजरतीश ... जरती चासौ गौश्च जरद्गवी गोरतद्धित ... चित्राजरद्गवीयस्येति
स्यापि पुंवद्भाव इति भावः ... एवं का ... व्यापि ... बहुव्रीहौ ... नित्यमात्रा ... संहितसफलत्वरोऽत्र ...
लौकिकेति समासः लिङ्गविशिष्टपरिभा...

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सभेति सभाशब्दः शालायां संघे च तत्राद्ये प्रतिषेधावाह संघातेति = ३ यस्येति त्रिकस्येति [illegible] प्रथमान्तमित्युक्तं तथापि द्वितीयाश्रितादिभिरिति [illegible]
कतात्प्रथमया [illegible] = ७ अन्यपदस्येति पदे नहि [illegible] अन्यपदार्थाभिधीयते तथा च द्वितीयाद्यर्थे इति तत्फलितं तदाह अप्रथमेति = ८ प्रादिभ्य इति परं [illegible] तदस्य पदान्तरेण बहु-
व्रीहिर्वाच्यः पूर्वपदान्तर्गतस्योत्तरपदलोपो वाच्यः = ११ नञ इति परं परस्त्यर्थवाचिपदं तदन्तस्य पदान्तरेण बहुव्रीहिरस्त्यर्थवाचिनां तु वा लोपश्चेत्यर्थः = १२ [illegible] समासो न स्यात् [illegible]
विभक्तीति = १२

बोध्यः ॥ सभा राजामनुष्यपूर्वा [2.4.23] राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् इनसभं ई
श्वरसभं पर्यायस्यैवेष्यते नेह राजसभा चन्द्रगुप्तसभा अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह र
क्षःसभं पिशाचसभं ॥ अशाला च [2.4.24] संघातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् स्त्रीसभं स्त्रीसंघात
इत्यर्थः ॥ विभाषा सेनासुराच्छायाशालानिशानाम् [2.4.25] एतदन्तस्तत्पुरुषः क्लीबं वा स्यात् ब्राह्मणसेनं ब्राह्म
णसेना यवसुरं यवसुरा कुड्यच्छायं कुड्यच्छाया गोशालं गोशाला श्वनिशं श्वनिशा तत्पुरुषोऽन
ञ्कर्मधारय इत्यनुवर्तनेनेह दृढसेनो राजा असेना परमसेना ॥ इति तत्पुरुषः ॥ शेषो बहुव्रीहिः [2.2.23]
अधिकारोऽयं द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्य
र्थः ॥ अनेकमन्यपदार्थे [2.2.24] अनेकं प्रथमान्तमन्यपदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः अप्रथ
माविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितं प्राप्तमुदकं यं ग्रामं स प्राप्तोदको ग्रा
मः ऊढरथोऽनड्वान् उपहृतपशू रुद्रः उद्धृतौदना स्थाली पीताम्बरो हरिः वीरपुरुषको ग्रामः प्रथमार्थे
तु न वृष्टे देवे गत इत्यधिकरणानामपि न पञ्चभिर्भुक्तमस्य प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः
प्रपतितपर्णः प्रपर्णः नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः अविद्यमानपुत्रः अपुत्रः अस्तीति विभ
क्तिप्रतिरूपकमव्ययम् अस्तिक्षीरा गौः स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूर [6.3.34]
प्राकृद्धघात् ७

अशालं किं धर्मशा
धर्मशालेत्यर्थः
४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

१ सापत्न्य इति आभाषितपुंस्काद्वेति द्वितीयस्य पुंवद्भावेन भवति सति च पुंवद्भावे नकारादेशाभावात् सापत्नः इति स्यात् आद्यस्य तु वद्भा
वेऽपि सापत्ने स्त्रीत्वे न भवतीति भावः = ५ भावत्का इति भवतष्ठक् छसौ हा वस्याग्नि पुंवद्भावे कृते ठस्येकः इति कादेशः प्राप्तिस्तानलक्षणः कादेशः = ७ पूर्वसूत्रे वेति निर्दिष्टका नेकअा
गमछ्येकिंचिदपेक्षया सर्वस्यत्यर्थः = ८ लिंगादिति अन्यथा एषा एतयोः कात्पूर्वस्य आपि विधौ पमानमितिन निविषयस्यात् इति भावः = १

सि.कौ. वचनस्य किं कर्त्र्यभावः कर्त्रीत्वं शारदः कल्याण्यादित्वादेनु सामान्येन पुंस्त्व भस्याढे तद्धिते हस्ति

पू. नीनां समूहो हास्तिकं अठेति किं रौहिणेयः स्त्रीभ्यो ढगिति ढेत्र्यस्यते अग्नेर्ढगिति टकिन्तु पुंव

६४ द्भावः आग्नायी देवतास्य स्थालीपाकस्याग्नेयः सपत्नी शब्दस्त्रिधा पर्यायात्सपत्नशब्दाच्छा

र्ङ्गरवादित्वान्ङीन् एकः समानः पतिर्यस्या इति विग्रहे विवाहनिबन्धनं पतिशब्दमाश्रित्य नित्यस्त्रीलिंगो

द्वितीयो स्वामिपर्यायपतिशब्दे न समाभाषितपुंस्कस्तृतीयः आद्ययोः शिवाद्यण सपत्न्या अपत्यं साप

192 त्नः तृतीयात्तु लिंगविशिष्टपरिभाषया पत्युत्तरपदलक्षणो ण्य एव नत्वण् शिवादौ तूभयोरेव ग्र

हणात् सापत्यः ठक्छसोश्च भवत्याश्छात्राः भावत्काः भवदीयाः एतद्वार्तिकमेकतद्धिते चेति

सूत्रे च न कर्तव्यं सर्वनाम्नो वृत्तिमात्रे इति भाष्यकारेष्टप्रागतार्थत्वात् सर्वमयः सर्वकाम्यति स

र्विका भार्या यस्य सर्वकभार्यः सर्वप्रिय इत्यादि पूर्वसूत्रे वेदं स्त्रेणेति लिंगात् तेनाक्वचिदेकशेषद्वन्द्वौ

च न सार्विका सर्वाः कुक्कुट्यादीनामण्डादिषु कुक्कुट्या अण्डं कुक्कुटाण्डं मृग्याः पदं मृगपदं मृगक्षीरं

काकशावः क्यङ्मानिनोश्च एतयोः परतः पुंवत् एनीवाचरति एतायते श्येनीवाचरति श्येनाय

ते स्वाभिन्नां कांचित् दर्शनीयां मन्यते दर्शनीयमानिनी दर्शनीयां स्त्रियं मन्यते दर्शनीयमानिनी राम.

चैत्रः न कोपधायाः कोपधायाः स्त्रियां न पुंवत् पाचिकाभार्यः रसिकाभार्यः मद्रिकायते मद्रि ६४

६।३।३९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग्रहणीनिवृत्तिमात्रपरत्वेनाग्रहणं शब्द लिङ्गविशेषविवक्षायां न भक्तिरित्यादि सिद्धे प्रिया दिषु भक्तिशब्दस्य पाठोऽपि प्रमाणीति करणेऽप्यन्यपदस्य विशेष्यनिघ्नत्वात् ... प्रमाणम् ...

चमीया सा रात्रीणां ताः कल्याणीपंचमा रात्रयः स्त्रीप्रमाणीयस्य स्त्रीप्रमाणः पुंवद्भावनिषेधोऽ
प्यन्यपदार्थप्रधानग्रहणादेव रात्रिः पूरणी वाच्या चेदुक्तोदाहरणे मुख्यान्यत्र तु न यथा स्व न
पुनः रयपदार्थ इदं नोत्तरपदात् बहुव्रीहिः कस्मात् पुंवद्भावः केऽणः केऽपरेऽणो ह्रस्वः स्यात् इति मा मैं न
केऽपि रूपे परे ह्रस्वेन स्यात् कल्याणपंचमीकः पक्षः अत्र तिरोहितावयवभेदस्य पक्षस्यान्य
ऽदार्थत्वाद्रात्रेरप्रधानं बहुकर्त्तृकः अप्रियादिषु किं कल्याणीप्रियः प्रिया मनोज्ञा कल्याणी सुभ
गा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया सामान्येनपुं
सकं दृढं भक्तिर्यस्य स दृढभक्तिः स्त्रीत्वविवक्षायां तु दृढाभक्तिः तसिलादिष्वाकृत्वसुचः तसि
लादिषु कृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत् स्यात् परिगणनं कर्त्तव्यं त्रयाश्रित्र्यतियासिपरिहा
राय त्रतसौ तरप्तमपौ चरड्जातीयरौ कल्पपदेशीयरौ रूपप्पाशपौ थाल् तिल् थ्यनौ बह्वी
षु बहुत्र बहुतः दर्शनीयतरा दर्शनीयतमा घरूपेति वक्ष्यमाणो ह्रस्वः परत्वात्पुंवद्भावं बाधते
पट्वितरा पट्वितमा पटुचरी पटुजातीया दर्शनीयकल्पा दर्शनीयदेशीया दर्शनीयरूपा दर्शनी
यपाशा बहुथा प्रशस्ता दृकी हृक्कतिः अजाभ्यो हिता अजथ्यी शालिवद्गल्पार्थस्य पुंवद्भावो वक्त
व्यः बह्वीभ्यो देहि बहुशः अल्पशः त्वतलोर्गुणवचनस्य शुक्लाया भावः शुक्लत्वं शुक्लता गुण

यद्यपि बह्वादिषु ङीषो वैकल्पिकत्वान्न भाविबहुत्वादि ... अथ्यापीति वक्तिजथ्या बहुशः ... तसिलादिकृत्वसुच्प्रत्यये तिल् ...
... इत्यनेन गतार्थं वादि इति मनोरमायां स्थितं ८

Lal Bahadur Shastri University Delhi Digitized by Sarvagya Sharada Peetham

श्रीगलंदितिनंदिताकपुत्रगुणातिरितयद्यपि श्रोरादेतिसर्वनित्यसम्भिन्नाद्विनहुत्वसमुद्भवप्रत्ययम्भिन्नमपिविधेयसमर्पकपदयत्वनपुंसकत्वेत्युक्तं
इतिभावः यद्यपि श्रोरादेतितपरत्वात्केवलमपरेचैतत्तथापि इदंत्वलकाङ्गोच्चारणाय थिः श्रीरीत्येवास्तु स्वरूपेशब्दस्येतिसुपत्योर्नोपातमितिभावः पूर्वेनसहेतिलक्षणयोगे किंकिं
णापिसपुत्रेणसिंहीस्वपितिनिर्भयम् एवंदशमिपुत्रैर्भारंवहतिगर्दभीइहसहशब्दोनतुल्यायोगवचनः भारंकर्मकवहनक्रियायांपुत्राणामनन्वयात् किंतुविद्यमानवच

सि॰कौ॰
पृ॰
६५

दिक् दक्षिणपूर्वा नामग्रहणाद्यौगिकानां न ऐंद्र्याश्च कौबेर्याश्चांतरालं नैऋते नैर्ऋतमिति सरूपे समस्यं तेयद्
णविषये मन्त्रे पदे तृतीयांते च सहचरणविषये इदंयद्भवमिति यज्ञे समस्येत कर्मव्यतिहारे स बहुव्रीहिः इतिशब्द
ग्रहणं विषयविशेषालंभ्यते अन्येषामपि दृश्यते दीर्घपदमनुवर्त्तते इचि कर्मव्यतिहारे बहुव्रीहौ पूर्वपदस्य
दीर्घः इच् समासांतो वक्ष्यते तिष्ठद्गुप्रभृतीनि चेत्प्रत्ययस्य णाठस्य यीभावस्त्वमव्ययत्वं च केशाकेशि गृहीत्वा
इदं युद्धं प्रवृत्तं केशाकेशि दंडादंडि मुष्टीमुष्टि ओर्गुणः उवर्णांतस्य भस्य
193 गुणः स्यात् तद्धिते अवादेशः बाहूबाहवि ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं
तेन स्वायंभुवमित्यादि सिद्धं सरूपे किं हलेन मुसलेन तेनेदं तिष्ठत्यपायोगे वर्त्तमानं सहेत्येतत्तृतीयांतेन
प्राग्वत् वोपसर्जनस्य बहुव्रीह्यवयवस्य सहस्य सः स्याद्वा पुत्रेण सह सपुत्रः सहपुत्रो वा गतः तुल्ययोगे
वचनं प्रायिकं सकर्मकः सलोमकः प्रकृत्याशिषि सहशब्दः प्रकृत्या स्यादाशिषि स्वस्ति राज्ञे सहपुत्राय सहा
मात्याय अगोवत्सहलेष्विति वाच्यं सगवे सवत्साय सहलाय बहुव्रीहौ संख्येये डजबहुगणात् संख्येये यो
बहुव्रीहिस्तस्माड्डच् स्यात् उपदशाः अबहुगणात्किं उपबहवः उपगणाः अन्यस्यरे विशेषः संख्याया
स्तत्पुरुषस्य डच् वाच्यः निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य निर्गतस्त्रिंशतोंगुलिभ्यो निस्त्रिंशः
खड्गः बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच् व्यत्ययेन षष्ठी स्वांगवाचि सक्थ्यक्ष्यंतात् बहुव्रीहेः षच् स्यात्

नः दशभिःपुत्रैर्विद्यमानैर्युक्तत्यर्थः एतच्चसहशब्दस्यविद्यमानार्थत्वमस्तीतिवक्तव्यं अन्यदस्याशीः इत्तुसहपुत्रेति नेतिबोध्यं तत्रत्याय्यसहयुक्तेइत्यत्रयोगे नेव=७

सम॰
६५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कामानिनी कोपधप्रतिषेधे तद्धितवुग्रहणं च कर्तव्यम् नेह पाकाभार्या यस्य स पाकभार्यः संज्ञापूरण्योश्च ६।३।३८ अनयो

र्न पुंवत् दत्ताभार्यः दत्तामानिनी लुप्तक्रियानिमित्तः स्त्रियां च संज्ञाभूतोयमिति भाष्ये तर्हि स्वत्वमस्ति पंचमी

भार्यः पंचमीपाशा वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ६।३।३९ वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्त

विकारार्थस्तदंता स्त्री न पुंवत् स्रौघ्नीभार्यः माथुरीयते माथुरीमानिनी वृद्धिनिमित्तस्य किं मध्यमभार्यः तद्धि

तस्य किं कांडलावभार्यः वृद्धिपाठेनाकिं तावज्ज्ञार्यः रक्ते तु काषायी कंथा यस्य काषायकंथः विकारे तु हैमी मु

द्रिका यस्य हैममुद्रिकः वृद्धिपाठेन वृद्धिं प्रति फलोपधानाभावादिह पुंवत् वैयाकरणभार्यः सौवश्वभार्यः स्वांगा ६।३।४०

च्चेतः स्वांगाद्य ईकारस्तदंता स्त्री न पुंवत् सुकेशीभार्यः स्वांगात्किं पटुभार्यः ईतः किं अकेशभार्यः अमानिनी

निवत्वेत्यम् सुकेशमानिनी सुकेशमानी जातेश्च ६।३।४१ जातेः परो यः स्त्रीप्रत्ययस्तदंतं न पुंवत् शूद्राभार्यः ब्राह्मणीभार्यः

सौत्रस्यैवायं निषेधः तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढे तद्धिते इति भवत्येव संख्ययाव्ययासन्नादूराधिकसं २।२।२५

ख्याः संख्येये संख्येयार्थया संख्यया व्ययादयः समस्यंते स बहुव्रीहिः दशानां समीपे ये संति ते उपदशाः नव एकाद

श वेत्यर्थः बहुव्रीहौ संख्येये डजबहुगणात् ५।४।७३ इति डच् तिविंशतेर्डिति ६।४।१४२ विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति आसन्न

विंशाः विंशतेरासन्ना इत्यर्थः अदूरविंशाः अधिकचत्वारिंशाः द्वौ वा त्रयो वा द्वित्राः द्विरावृत्ता दश द्विदशाः विं

शतिरित्यर्थः दिङ्नामान्यंतराले दिशो नामान्यंतराले वाच्ये प्राग्वत् दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

५।४।१२०

सि॰ कौ॰ पू॰ ६६

क्तव्यो विग्रः ख्यश्च विख्यः कथं तर्हि विनसा हतबान्धवेति भट्टिः विगतया नासिकयोपलक्षितेति व्याख्येयं सुप्रा
तसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते शोभनं प्रा
तरस्य सुप्रातः शोभनं श्वोऽस्य सुश्वः शोभनं दिवाऽस्य सुदिवः शारेरिव कुक्षिरस्य शारिकुक्षः चतस्रोऽश्रयो
ऽस्य चतुरश्रः एण्या इव पादावस्य एणीपदः अजपदः प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः नञ्दुःसुभ्यो [५।४।१२१]
हलिसक्थ्योरन्यतरस्यां अच् स्यात् अहलः अहलिः असक्थः असक्थिः एवं दुःसुभ्यां शक्त्योरिति पा
194 ठान्तरं अशक्तुः अशक्तिः [५।४।१२२] नित्यमसिच् प्रजामेधयोः नञ्दुःसुभ्य इत्येव अप्रजाः दुःप्रजाः अमेधाः दुर्मेधाः
सुमेधाः [५।४।१२४] धर्मादनिच् केवलात् केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात् कल्याणधर्मा
केवलात्किं परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ माभूत् स्वशब्दो हीह न केवलं पूर्वपदं किंतु मध्यमत्वाद
पेक्षितं संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः एवं तु परमस्वधर्मेत्यपि साध्वेव निवृत्ति
धर्मा अनुष्ठितधर्मेत्यादिवत् पूर्वपदं तु बहुव्रीहिणाक्षिप्यते [५।४।१२५] जंभा सुहरिततृणसोमेभ्यः जंभेति कृत
समासान्तं निपात्यते जंभो भक्ष्ये दन्ते च शोभनो जंभोऽस्य सुजंभा हरितजंभा तृणं भक्ष्यं यस्य तृणमिव दन्ता अ
स्येति वा तृणजंभा एवं सोमजंभा स्वादिभ्यः किं पतितजंभः [५।४।१२६] दक्षिणेर्मा लुब्धयोगे दक्षिणे ईर्म व्रणं यस्य द राम॰ ६६
क्षिणेर्मा मृगः व्याधेन कृतव्रण इत्यर्थः इच् कर्मव्यतिहारे कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् समासा

५।४।१२७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दीर्घे सक्थिनी यस्य स दीर्घसक्थः । जलजाक्षी । स्वांगात्किं । दीर्घसक्थि शकटं स्थूलाक्षा वेणुयष्टिः अक्ष्णो
दर्शनादित्यच् ॥ अंगुलेर्दारुणि ॥ ५।४।११४ अंगुल्यन्ताद्बहुव्रीहेः षच् स्याद्दार्वर्थे पंचांगुलयो यस्य तत् पंचांगुलं
दारु अंगुलीसदृशावयवं धान्यादिविक्षेपकाष्ठमुच्यते बहुव्रीहेः किं द्वे अंगुली प्रमाणमस्य द्व्यंगुलमप
स्थि: तद्धितार्थेति तत्पुरुषे तत्पुरुषस्यांगुलेरित्यच् दारुणि किं पंचांगुलिर्हस्तः ॥ द्वित्रिभ्यां ष मूर्ध्नः ॥ ५।४।११५ आभ्यां
मूर्ध्नः षः स्याद्बहुव्रीहौ द्विमूर्धः त्रिमूर्धः नेतुर्नक्षत्रे अब्वक्तव्यः मृगो नेता यासां ता मृगनेत्रा रात्रयः पु
ष्यनेत्राः ॥ अन्तर्बहिर्भ्यां च लोम्नः ॥ ५।४।११७ आभ्यां लोम्नोऽप् स्याद्बहुव्रीहौ अन्तर्लोमः बहिर्लोमः ॥ अञ्नासिकायाः सं
ज्ञायां नसं चास्थूलात् ॥ ५।४।११८ नासिकान्ताद्बहुव्रीहेरच् स्यान्नासिकाशब्दश्च नसं प्राप्नोति न तु स्थूलपूर्वात् ॥ पूर्वप
दात्संज्ञायामगः ॥ ८।४।३ पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने द्रुरिव नासिका
अस्य द्रुणसः । खरणसः । अगः किं । ऋचामयनमृगयनं अक्षराद्गयनादिभ्य इति निपातनात् णत्वाभावमा
श्रित्य अग इति प्रत्याख्यातं भाष्ये अस्थूलात्किं स्थूलनासिकः खुरखराभ्यां वा नस् खुरणाः खरणाः
पक्षेऽजपि दृश्यते खुरणसः खरणसः ॥ उपसर्गाच्च ॥ प्रादेर्यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासिकाया नसा
देशश्च । असंज्ञार्थं वचनं । उन्नता नासिका अस्य उन्नसः । उपसर्गादनोत्पर इति सूत्रं च तत्कृत्वा भाष्यकारा
ह उपसर्गाद्बहुलं । उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलं प्रणसः । वेर्ग्रो वक्तव्यः । विगता नासि

उपसर्गादनोऽत्पर इति कथमिदं विज्ञायते ओकारात्परः ओत्परः न ओत्परः अनोत्परः अहोस्विदोकारः परः अस्मात्सोऽयमोत्परः न ओत्परः अनोत्परः इति किं वात्र यदि विज्ञायते ओकारात्परः ओत्परः न ओत्परः अनोत्परः इति प्रमो प्रुंच न अत्रापि प्राप्नोति अथ विज्ञायते ओकारः परो यस्मात्सोऽयमोत्परः न ओत्परः अनोत्परः इति प्राणोपनिर्देशः अत्रापि निषेधः प्राप्नोति प्र
वक्तव्यः प्रकृतं भवति ... तदनोत्परः प्रकृतः ओनः भाविन्य
वाकारे ... एवं तर्हि उपसर्गाद्बहुलमिति वक्तव्यम् २

...नि एषां स्यात् कपि ... इत्यमरः = ... दन् ... अस्य ... सः = ... शब्दादिति यथा ... कपश्चापि ... स्यात् ...
गंधिरित्यादावपि स्यादतः ... समासांतापेक्षः शेष इह गृह्यते स्यादेतत् अनुक्तसमासांतादिति व्याघ्रपादिति स्यान्निषेधो वापि समासांत इत्युक्तं = सुगंधीति गंधस्य त्यादिना
समासात् प्रियपथ इति दिक्पूरित्यप्रत्ययसमासांतः = उपबहव इति संख्याया अव्ययेति त्यादिना समासः = १

९५

सि०कौ० पृ० ६७ सुपूर्वस्य दंतस्य दतृ इत्यादेशः स्यात् वयसि द्विदन् चतुर्दन् षड्दंतः अस्य षोडन् सुदन् सुदती वयसि किं द्वि
दंतः करी सुदंतः ... स्त्रियां संज्ञायां दंतस्य दतृ आदेशः स्यात् समासांतो बहुव्रीहौ अयोदती फालदती
संज्ञायां किं समदंती विभाषा श्यावारोकाभ्यां दंतस्य दतृ बहुव्रीहौ श्यावदन् श्यावदंतः अरोकदन् अ
रोकदंतः अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च एभ्यो दंतस्य दतृ वा कुड्मलाग्रदन् कुड्मलाग्रदंतः ककुदस्याव
स्थायां लोपः अजातककुत् पूर्णककुत् त्रिककुत्पर्वते त्रीणि ककुदान्यस्य त्रिककुत् संज्ञैषा पूर्वेण विशेष
195 स्य त्रिककुदोन्यः उद्विभ्यां काकुदस्य लोपः उत्काकुत् विकाकुत् ककुदं तालु पूर्णाद्विभाषा पूर्णकाकु
त् पूर्णकाकुदः सुहृद्दुर्हृदौ मित्रामित्रयोः सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते सुहृन्मित्रं दुर्हृदमित्रः अ
न्यत्र सुहृदयः दुर्हृदयः उरःप्रभृतिभ्यः कप् व्यूढोरस्कः प्रियसर्पिष्कः द्विपुमान् अनड्वान् पयः नौः
लक्ष्मीरिति एकवचनांतानि पठ्यन्ते द्विवचनबहुवचनांतेभ्यस्तु शेषाद्विभाषेति विकल्पेन कप् द्विपुमा
न् द्विपुंस्कः अर्थान्नञः अनर्थकं नञः किं अपार्थं अपार्थकं इनः स्त्रियां बहुदंडिका नगरी अ
तिन स्त्र्यनुग्रहणामर्थवत्ता चानृच्छ्रके नापि तदंतविधिं प्रयोजयंति बहुवाग्मिका स्त्रियां किं बहु
दंडी बहुदंडिको ग्रामः शेषाद्विभाषा अनुक्तसमासांताच्छेषाधिकारस्थाद्बहुव्रीहेः कप्वा स्यात् म सम० ६७
हायशस्कः महायशाः अनुक्ते त्यादि किं व्याघ्रपात् सुगंधिः प्रियपथः शेषाधिकारस्थात् किं उपबह

वा२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पादस्येति मध्यस्य लोपः समासान्तो न स्यात् आदेः परस्येत्यादेः स्यात् शं विकः कन्प्रसज्येत एषां द्वंद्वभावोऽत्र समासांतापेक्षस्यैव स्यात् अयं च प्रत्ययोऽन्तःसमासांत इति कप्युनःसमासान्ता
न स्यात् अनादेः स्थानिद्वारेणेति वचनमवलादोक्त्यादिकत्वमवयवत्वं गृह्यते इति भावः ॥

द्विमु १२

तः केशाकेशि मुसलामुसलि द्विदंड्यादिभ्यश्च तादर्थ्ये चतुर्थ्यां एषां सिद्ध्यर्थमिच्प्रत्ययः स्यात् सौ द्वंद्वो यस्मि
न्प्रहरणे तत् द्विदंडि द्विमुसलि उभाहस्ति उभयाहस्ति प्रसंभ्यां जानुनोर्ज्ञुः आभ्यां परयोर्जानुशब्दयोर्ज्ञु
रादेशः स्याद्बहुव्रीहौ प्रगते जानुनी अस्य प्रज्ञुः संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वज्ञुः ऊर्ध्वजानुः धनुषश्च ध
नुरंतस्य बहुव्रीहेरनङादेशः स्यात् शार्ङ्गधन्वा वा संज्ञायां शतधन्वा शतधनुः जायाया निङ् जायांतस्य
बहुव्रीहेर्निङादेशः स्यात् लोपो व्योर्वलि वकारयकारयोर्लोपः स्याद्वलि पुंवद्भावः युवतिर्जाया यस्य यु
वजानिः गंधस्येदुत्पूतिसुसुरभिभ्यः एभ्यो गंधस्येकारोंतादेशः स्यात् उद्गंधिः पूतिगंधिः सुगंधिः सुर
भिगंधिः गंधस्येत्वे तदेकांतग्रहणं एकांतं एकदेश इव अविभागेन लक्ष्यमाणम् इत्यर्थः सुगंधि पुष्पं सलि
लं च सुगंधिर्वायुः नेह शोभना गंधा द्रव्याण्यस्य सुगंधः आपणिकः अल्पाख्यायां सूपस्य गंधो लेशो य
स्मिंस्तत् सूपगंधि भोजनं घृतगंधिः गंधो गंधक आमोदे लेशे संबंधगर्वयोः इति विश्वः। उपमानाच्च पद्मस्ये
व गंधोऽस्य पद्मगंधिः पादस्य लोपोऽहस्त्यादिभ्यः हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यात्
बहुव्रीहौ स्थानिद्वारेणायं समासांतः व्याघ्रस्येव पादावस्य व्याघ्रपात् अहस्त्यादिभ्यः किं हस्तिपादः कु
सूलपादः कुंभपदीषु च कुंभपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियां पादः पत् कुंभपदी स्त्रियां किं कुं
भपादः संख्यासुपूर्वस्य पादस्य लोपः स्यात्समासांतो बहुव्रीहौ द्विपात् सुपात् द्वयमिदं तत्संदेहे संख्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यत्रैकत्वं बहुत्वं वा सह द्वन्द्वे रजस्तमः समाहारो भवेदन्योऽथ एकत्वं तु पुनः =५

सि.कौ. रुः निष्ठा निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् कृतकृत्यः जातिकालसुखादिभ्यः परा निष्ठा वाच्या सारंगजग्धी मासजा
स. ता सुखजाता प्रायिकं चेदं कृतकटः पीतोदकः वाहिताग्न्यादिषु आहिताग्निः अग्न्याहितः आकृतिगणो
६८ ऽयं प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ अस्युद्यतः दण्डपाणिः क्वचिन्न विवृतासिः ॥ इति बहुव्रीहिः ॥
चार्थे द्वन्द्वः अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चा
२५ र्थाः परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः अन्यतरस्यानुषंगिकत्वेनान्वयोऽन्वाचयः
मिलितानामन्वयः इतरेतरयोगः समूहः समाहारः तत्रेश्वरं गुरुं च भजस्वेति समुच्चये भिक्षामट गां चा
न्हा७ नयेत्यन्वाचये च न समासोऽसामर्थ्यात् धवखदिरौ संज्ञापरिभाषम् आनङ्कृते होतृपोतृनेष्टोद्गातारः द्वयो
196 र्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे होतापोतानेष्टोद्गातारः राजदन्तादिषु परं एषु पूर्वप्रयोगार्हं परं स्यात् दन्तानां रा
जा राजदन्तः धर्मादिष्वनियमः अर्थधर्मौ धर्मार्थौ दम्पती दम्पती जायापती जायाशब्दस्य जंभावो
दंभावश्च निपात्यते वा आकृतिगणोऽयं द्वन्द्वे घि द्वन्द्वे घिसंज्ञं पूर्वं स्यात् हरिश्च हरश्च हरिहरौ अने
कप्राप्तावेकत्र नियमोऽनियमः शेषे हरिगुरुहराः हरिहरगुरवः अजाद्यदन्तं द्वन्द्वे पूर्वं स्यात् ईशा
कृष्णौ बहुष्वनियमः अश्वरथेन्द्राः इन्द्राश्वरथाः घ्यन्तादजाद्यदन्तं विप्रतिषेधेन इन्द्राग्नी अल्पाच्तरं रामः
शिवकेशवौ ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण हेमन्तशिशिरवसन्ताः कृत्तिकारोहिण्यौ ६८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उत्तरपूर्वेति दिङ्नामेत्यादिना समासः = सुप्सुपेति तेन सह त्यादिना समासः अयमाव: शेषाद्बहुव्रीहिरित्यतः शेषपदमनेकमन्यपदार्थे इत्यतो ...
याश्च पासन्ते त्यादिषु च निवर्तते तथा च शेषाधिकारस्या ... त्वाभावादुपवह्वइत्यादिषु कप्रत्ययो नेति एवं चानेकमन्यपदार्थे इति सङ्गात्पृथक् सख्यायाव्ययासन्नेत्या
दीनामारंभः कबभावार्थमप्यावश्यक इति स्थिते ननु शास्त्रे दुश्चीति तस्य |र्थे १| शेषशब्दस्यानुक्तसमासोत्तरपदस्य शेषाधिकारस्य ... त्वं च के पामि त्यत आह तेना
दिनेति अर्थभेदेन शब्दभेदः सत्यपर्थभेदे प्रागुक्त्या भेद इति मतद्वयं भ्रा ॥ द्वयाहर्त्तिद्वितीतत्रमितिविवेकः =१ बहुश्रेयसीति अतिशयेन प्रशस्यः श्रेयान् विच

वः उत्तरपूर्वोऽसपत्नः तेनादिना शेषपाल्लोऽन्यस्य पर: न्या॥ पा॰ पोऽन्यतरस्यां कपि आवन्तस्य ह्रस्वो वा स्यात्
बहुमालकः बहुमालकः कबभावे बहुमालः ॥ पा॰ ५।४।१५५ न संज्ञायां शेषादिति प्राप्तः कप् न स्यात्संज्ञायां विश्वे
देवा अस्य विश्वेदेवः ॥ पा॰ ५।४।१५६ ईयसश्च ॥ ईयसन्तोत्तरपदान्न कप् बहवः श्रेयांसोऽस्य बहुश्रेयान् गोस्त्रियोरि
ति ह्रस्वे प्राप्ते ईयसो बहुव्रीहेः ह्रस्वो नेति वाच्यं बहुश्रेयसी बहुव्रीहेः किं अतिश्रेयसिः ॥ पा॰ ५।४।१५७ वन्दिते भ्रातुः ॥
पूजितेऽर्थे यो भ्रातृशब्दस्तदन्तान्न कप् स्यात् प्रशस्तो भ्राता अस्य प्रशस्तभ्राता सुभ्राता न पूजनादि
ति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेव वक्ष्यते वन्दिते किं मूर्खभ्रातृकः ॥ पा॰ ५।४।१५९ नाडीतन्त्र्योः स्वाङ्गे ॥
स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कप् न स्यात् बहुनाडिः कायः बहुतन्त्रीर्ग्रीवा तन्त्री धमनी स्त्रीप्रत्ययां
तत्वाभावाद्ध्रस्वो न स्वाङ्गे किं बहुनाडीकः स्तम्भः बहुतन्त्रीका वीणा ॥ पा॰ ५।४।१६० निष्प्रवाणिश्च ॥ कबभावोऽत्र नि
पात्यते प्रपूर्वाद्वयतेर्ल्युट् प्रवाणी तन्तुवायशलाका निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः ॥ सप्तमी
कान्नवरत्यघ्नोः सप्तमीविशेषणे बहुव्रीहौ सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यं कण्ठेका
लः अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः चित्रगुः सर्वनामसंख्ययोरुपसंख्यानम् सर्व
श्वेतः द्विशुक्लः अभिधानयोः समासे संख्या पूर्वं प्राक्परविप्रतिषेधात् अन्यः संख्याया अस्त्रीयसाः
द्विचाः द्वेहेपि ह्यादशाः वा प्रियस्य गुडप्रियः प्रियगुडः गड्वादेः परा सप्तमी गडुकण्ठः क्वचिन्न बहेग

सुन प्रशस्यः श्रे बाढि भाषेति कृ स्तः बहुश्रेयसीति नह्युतश्चेति नित्यं स्तः काष्ठेगविशिष्ट रिभाव पाईयसश्चे तिप्रतिषिध्यते = स्त्रीप्रत्ययान्तत्वा दिति आविशिते नि ष्यस्तीप्रत्ययस्य स्त्रियाभित्यधिका रे अधिहितत्वादि तिभावः =७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि० कौ०
पू०
६६

कित्यै । क्षुद्रजंतवः एषां समाहारे द्वंद्वः स्यात् यूकालिक्षम् आनकुलात् क्षुद्रजंतवः येषां चाविरोधः शाश्वति
कः एषां प्राग्वत् अहिनकुलम् गोव्याघ्रम् काकोलूकमित्यादेः परत्वाद्विभाषावृक्षमृगेति प्राप्तं च कारेण बाध्य
ते शूद्राणामनिरवसितानाम् अबहिष्कृतानां शूद्राणां प्राग्वत् तक्षायस्कारम् पात्राद्बहिष्कृतानां तु चंडालमृ
तपाः गवाश्वप्रभृतीनि च यथोच्चारितानि साधूनि गवाश्वम् दासीदासमित्यादि विभाषावृक्षमृगतृण
धान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् वृक्षादीनां सप्तानां द्वंद्व अश्ववडवेत्यादि द्वंद्वत्रयं
197 च वा प्राग्वत् वृक्षादौ विशेषाणामेव ग्रहणम् प्लक्षन्यग्रोधम् प्लक्षन्यग्रोधाः रुरुपृषतं रुरुपृषताः
कुशकाशम् कुशकाशाः व्रीहियवम् व्रीहियवाः दधिघृतम् दधिघृते गोमहिषम् गोमहिषाः शु
कबकम् शुकबकाः अश्ववडवम् अश्ववडवौ पूर्वापरम् पूर्वापरे अधरोत्तरे फलसेनावनस्पतिमृगश अधरोत्त
कुनिक्षुद्रजंतुधान्यतृणानां बहुप्रकृतिरेव द्वंद्व एकवद्भावः नेह बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधौ
इत्यादि विभाषावृक्षेति सूत्रे पशुशकुनिग्रहणम् जातिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थम्
पशुग्रहणं हस्त्यश्वादिषु सेनांगत्वान्नित्ये प्राप्ते मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वंद्वः अन्यैस्तु सहे
तरेतरयोग एवेति नियमार्थं मृगशकुनिग्रहणम् एवं पूर्वापरमधरोत्तरमित्यपि अश्ववडवग्रहणम्
तु पदेन नपुंसकत्वार्थम् ॥ अश्ववडवपरत्वात्तत्पुंवद्वडवाविति स्यात् विप्रतिषिद्धम् ॥

६८ पत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

समाहारणं किम् ग्रीष्मवसंतौ लघ्वक्षरं पूर्वम् कुशकाशम् अभ्यर्हितं च तापसपर्वतौ वर्णानामानु-
पूर्व्येण ब्राह्मणक्षत्रियविट्शूद्राः भ्रातुर्ज्यायसः युधिष्ठिरार्जुनौ ॥ द्वंद्वश्च प्राणितूर्यसेनांगानाम् एषां द्वं-
द्व एकवत्स्यात् पाणिपादम् मार्दंगिकपाणविकम् रथिकाश्वारोहम् समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थमिदं कर-
णम् पाण्यादीनां समाहार एव यथा स्यात् अनुवादे चरणानाम् चरणानां द्वंद्व एकवत्स्यात् सिद्धस्योपन्यासे स्थेणोर्लु-
ङि विषये उदगात् कठकालापम् प्रत्यष्ठात् कठकौथुमम् अध्वर्युक्रतुरनपुंसकम् यजुर्वेदे विहितो यः
क्रतुः तद्वाचिनामनपुंसकलिंगानां द्वंद्व एकवत्स्यात् अर्काश्वमेधम् अध्वर्युक्रतुः किम् इषुवज्रौ साम-
वेदे विहितौ अनपुंसकं किम् राजसूयवाजपेये अर्धर्चादौ ही अध्ययनतोऽविप्रकृष्टाख्यानाम् अध्ययने अध्य-
यनेति किम् पितापुत्रौ अविप्रकृष्टेति किम् याज्ञिकवैयाकरणौ प्रत्यासन्नाम्नायानां तेषां द्वंद्व एकव-
त्स्यात् पदकक्रमकम् जातिरप्राणिनाम् अप्राणिजातिवाचिनां द्वंद्व एकवत् धानाशष्कुलि अप्राणिनां तु ब्रा-
विट्शूद्राः द्रव्यजातीनामेव नेह रूपरसौ गमनाकुंचने जातिप्राधान्यविवक्षायामेकवद्भावः द्रव्यविशेषवि-
वक्षायां तु बदरामलकानि विशिष्टलिंगो नदी देशोऽग्रामाः ग्रामवर्जनदीदेशवाचिनां भिन्नलिंगानां समाहा-
रे द्वंद्वः स्यात् उद्ध्यश्च इरावती च उद्ध्येरावति गंगा च शोणश्च गंगाशोणम् कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम्
भिन्नलिंगानां किम् गंगायमुने मद्रकेकयाः अग्रामाः किम् जांबवं नगरं शालूकिनी ग्रामः जांबवशालू-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
द्वं॰
७०

190

देवताः स्यात् देवताद्वन्द्वे च । आग्नामरुतौ देवते अस्य आग्निमारुतं कर्म आग्नीवरुणौ देवते अस्य आ-
ग्निवारुणं देवताद्वन्द्वे चेत्युभयपदवृद्धिः अलौकिके वाक्ये आनङ् मीत्वं च बाधित्वा इत् वृद्धौ किं आ-
ग्नेन्द्रः नेन्द्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधः विसोमेन आग्नावैष्णवं दिवो द्यावा देवताद्वन्द्वे उत्तरपदे द्या-
वाभूमी द्यावाक्षामा दिवसश्च पृथिव्यां दिवस्येव चाद्यावा आदेशः ऽकारोच्चारणं सकारस्य रुत्वमा-
भूत् इत्येवमर्थं द्यौश्च पृथिवी च दिवस्पृथिव्यौ द्यावापृथिव्यौ छन्दसि दृष्टानुविधिः द्यावा चिदस्मै
पृथिवी दिवस्पृथिव्योरिति रित्यत्र पदकाराः विसर्गं पठन्ति उषासोषसः उषस्शब्दस्योषासादेशो
देवताद्वन्द्वे उषासासूर्यम् मातरपितरावुदीचां उदीचां किं मातापितरौ द्वन्द्वाच्चुदषहान्तात् समाहारे
चवर्गान्तात् दषहान्ताच्च द्वन्द्वात् टच् स्यात् समाहारे वाक्त्वचं त्वक्स्रजं समीदृषदं वाक्त्विषं छत्रोपा-
नहं समाहारे किं प्रावृट्शरदौ ॥ इति द्वन्द्वः ॥ ॥ अथैकशेषः सरूपाणां एको रामौ रामाः विरूपा-
णामपि समानार्थानाम् वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वृद्धो यूना तल्लक्षण-
श्चेदेव विशेषः यूना सहोक्तो गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्
गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वृद्धः किं गर्गगार्ग्यायणौ यूना किं गर्गगार्ग्यौ तल्लक्षणः किं भाग-
वित्तिको कृत्स्नं किं गार्ग्यवात्स्यायनौ स्त्री पुंवच्च यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुं-

इदमकृत्स्नं शेषे वैरूप्यं न गोत्रादिकृतं=१

अ ४५ भागवित्तस्य गोत्रापत्यं भागवित्तिरित्यस्मा भागवित्ति २
[illegible] सौवीरेषु बहुलमिति कुत्सा-
यां ठक् इह कुत्सा सौवीरत्वं चाधिकमर्थस्तेन न युवत्वमात्रकृतं वैरूप्यं=२

७०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अधिकरणमिह द्रव्यं चकारो विभाषानुकर्षणार्थः तदेतद्याचष्टे विरुद्धार्थानामिति = १

चानधिकरणवाचि विरुद्धार्थानां अद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात् शीतोष्णं शीतोष्णे वैकल्पिकः
समाहारे द्वंद्वः च इत्यर्थ इति सूत्रेण प्राप्तः स विरुद्धानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमा
र्थमिदं तेन द्रव्यवाचिनां इतरेतरयोग एव शीतोष्णे उदके स्तः विप्रतिषिद्धं दिनं नरकपां चजन्यं इत्या
त्मिकः समाहारद्वंद्वो भवत्येव न दधिपयआदीनि एतानि नैकवत्स्युः दधिपयसी इध्माबर्हिषी निपा
तनात् दीर्घः ऋक्सामे वाङ्मनसे अधिकरणैतावत्त्वे च द्रव्यसंख्यावगमे एकवद्वेति नियमोऽनसा
तु दशदंतोष्ठाः विभाषा समीपे अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एव वेति रूपो
८७ नियमो वा स्यात् उपदशं दंतोष्ठम् उपदशाः दंतोष्ठाः आनङृतो द्वंद्वे विद्यायोनिसंबंधवाचिनाम्
ऋदंतानां द्वंद्वे आनङ् स्यात् उत्तरपदे होतापोतारौ होतृपोतृनेष्टोद्गातारः मातापितरौ पुत्रेऽन्यतर
स्यामिति त्वलोमनङ् केवलस्यापि न इत्यनुवृत्तेः पितापुत्रौ देवताद्वंद्वे च इहोत्तरपदे आनङ् मित्राव
रुणौ वायुशब्दस्य प्रयोगप्रतिषेधः अग्निवायू वाय्वग्नी पुनर्द्वंद्वग्रहणं प्रसिद्धसाहचर्यस्य परि
ग्रहार्थं तेन ब्रह्मप्रजापती इत्यादौ नानङ् एतद्धि नैकहविर्भागित्वेन श्रुतं नापि लोके प्रसिद्धसाहच
र्यं ईदग्नेः सोमवरुणयोः देवताद्वंद्वे इत्येव अग्नेः स्तुत्स्तोमसोमाः अग्नेः परेषामेषां सस्य षः स्या
त्समासे अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नीवरुणौ इद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरित्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वृत्तिघटकीभूतयत्किंचित्पदातिरिक्तपदेन विग्रहोऽस्वपदविग्रहः यथा समस्य … इत्यस्वपदविग्रहः =४ अविग्रहो लौकिकविग्रहरहित इत्यर्थः =४
परार्थेति प्रत्येकार्थनिर्भिन्नापरपदार्थानुभावेनान्वयो विशिष्टार्थः स्वपरार्थः स एवाभिधीयते येन तत्परार्थाभिधानं अत एव तिङन्ते वृत्तिर्न भवति तत्र कार्यीभावानभ्युपगमात्
अन्यथा सदुपवत्यादिफले सद्भावान्वयेनस्यात् सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेत्यभ्युपगमादित्येके समर्थसूत्रे घटस्यादपरस्य प्राद्…

सि॰ कौ॰ पू॰ ७१ मात्वं गत्वादेकवद्भावस्त्वन्यथा त्वौ पुंभाव इत्यादौ समासांतोऽन ॥ इत्येकशेषः ॥ कृत्तद्धितसमासैकशेष सनाद्यन्तधातुरूपाः पंच वृत्तयः परार्थाभिधानं वृत्तिः वृत्त्यर्थावबोधकं वाक्यं विग्रहः स द्विधा लौकिकोऽलौकिकश्च परिनिष्ठितत्वात्साधुर्लौकिकः प्रयोगानर्होऽसाधुरलौकिकः यथा राज्ञः पुरुषः राजन् ङस् पुरुष सु इति अविग्रहो नित्यसमासोऽस्वपदविग्रहो वा समासश्चतुर्विध इति प्रायोवादः अव्ययीभावतत्पुरुष बहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात् पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थ प्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वन्द्व इत्यपि प्रायोवादः प्रायोभिप्रा यः सूपप्रति उन्मत्तगंगमित्यादावव्ययीभावे अतिमालादौ तत्पुरुषे द्वित्राः सप्त इति बहुव्रीहौ दन्तोष्ठमित्या दौ द्वन्द्वे चाभावात् तत्पुरुषविशेषः कर्मधारयः तद्विशेषो द्विगुः अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव तत्पुरुषस्य क्वचिदेवेत्युक्तं किंच सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा सुबंतेनेति विज्ञेयः समासः षड्विधो बुधैः सुपा राजपुरुषः तिङा पर्यभूषयत् नाम्ना कुंभकारः धातुना कटप्रूः अजस्रं तिङां तिङा पिबतखादता ति ङां सुपा कृंतविचक्षणेति यस्यां क्रियायां सा कृंतविचक्षणा एहीडादयोऽन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः ॥ इति सर्वसमासशेषः ॥ ❀ ॥ ऋक्पूरब्धूःपथामानक्षे अ अनक्षे इति छेदः ऋगाद्यंत स्य समासस्य अप्रत्ययोंऽतावयवः स्यात् अक्षे या धूस्तदंतस्य तु न अर्धर्चः अनृचबह्वृचावध्येतर्येव ने राम॰ ७१

प्रातिपदिकेनेत्यर्थः अत्र हि प्रसुबुत्पत्तेः प्रागेवोपपदसमासः =४ अनेकग्रहणमत्र तु द्वयोरिति भ्रान्तद्विधानाद्बहुपदसमासत्वेनतयोरेव संभवातीति भावः =६
घटः जात इत्यादौ =५

199

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वत् गार्गी च गार्ग्यायणश्च गार्ग्यौ ॥ अस्त्रियामित्यनुवर्त्तमाने यञञोश्चेति लुक् दाक्षी च दाक्षायणश्च दा
क्षी पुमान् स्त्रिया स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ
भ्रातृपुत्रौ स्वसृदुहितृभ्यां भ्राता च स्वसा च भ्रातरौ पुत्रश्च दुहिता च पुत्रौ नपुंसकमनपुंसकेनैकव
च्चास्यान्यतरस्यां अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्चैकवत्स्यात् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शु
९।३५ क्ला शाटी शुक्लं वस्त्रं तदिदं शुक्लं तानि पिता मात्रा मात्रा सहोक्तौ पिता वा शिष्यते माता च पिता च पितरौ श्वशु २।२।७१
रः श्वश्र्वा श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते श्वशुरौ श्वश्रूश्च श्वशुरश्च श्वशुरौ त्यदादीनि सर्वैर्नित्यं सर्वैः सहोक्तौ त्य
६ दादीनि नित्यं शिष्यन्ते स च देवदत्तश्च तौ त्यदादीनां मिथः सहोक्तौ यत् परं तच्छिष्यते स च यश्च यौ पूर्वशे
षोपि दृश्यत इति भाष्यं स च यश्च तौ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि सा च देवदत्तश्च तौ स
च देवदत्तश्च यज्ञदत्ता च तानि पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते तच्च देवदत्तश्च ते अद्वन्द्वतत्पु
रुषविशेषणानामिति वक्तव्यम् कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ तच्च सा च अर्द्धपिप्पल्यौ ते ग्राम्य
पशुसंघेष्वतरुणेषु स्त्री एकशेषप्रकरणे विवक्षायां स्त्री शिष्यते पुमान् स्त्रियेत्यस्यापवादः गाव इमाः ग्राम्येति किं
रुरव इमे पशुः किं ब्राह्मणाः संघेषु किं एतौ गावौ अतरुणेषु किं वत्सा इमे अनेकशफेष्विति वाच्यं अ
श्वा इमे इह सर्वत्र एकशेषे कृते अनेकाभावात् द्वंद्वेन तेन द्विशेषो द्विरंशो लादेः समासस्येत्यंतोदात्त।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वो चाक्षिभ्रुवं दारगवं गावश्च दाराश्च दारगवं ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवं निपातनाट्टिलोपः पदष्ठीवं
निपातनात्पादशब्दस्य पद्भावः नक्तं च दिवा च नक्तंदिवं रात्रिश्च दिवा च रात्रिंदिवम् रात्रेर्मा
न्तत्वं निपात्यते अहनि च दिवा च अहर्दिवम् वीप्सायां द्वन्द्वो निपात्यते अहन्यहनीत्यर्थः
सरजसमिति साकल्येऽव्ययीभावः बहुव्रीहौ तु सरजः पंकजः निश्चितं श्रेयो निःश्रेयसं तत्पु
रुषः नेह निःश्रेयान्पुरुषः पुरुषस्यायुः पुरुषायुषं ततो द्विगुः द्व्यायुषं त्र्यायुषं त
तो द्वन्द्वः ऋग्यजुषं ततस्त्रयः कर्मधारयाः जातोक्षः महोक्षः वृद्धोक्षः शुनः समीपमुप
शुनम् टिलोपाभावः संप्रसारणं च निपात्यते गोष्ठे श्वा गोष्ठश्वः ब्रह्महस्तिभ्यां वर्चसः अ
च्स्यात् ब्रह्मवर्चसं हस्तिवर्चसं पल्यराजभ्यां चेति वक्तव्यम् पल्यवर्चसं राजवर्चसं अवसम
न्धेभ्यस्तमसः अवतमसं संतमसम् अन्धयतीत्यन्धः पचाद्यच् अन्धश्च तमोऽन्धतमसम्॥

५ श्वसो वसीयःश्रेयसः वसुशब्दः प्रशस्तवाची तत ईयसुनि वसीयः श्वःशब्द उत्तरपदार्था
शंसामाशीर्विषमाह मयूरव्यंसकादित्वात्समासः श्वोवसीयसं श्वःश्रेयसं भूयात् अन्ववतप्ता
द्रहसः अनुरहसं अवरहसं तप्तरहसं प्रतेरुरसः सप्तमीस्थात् उरसि प्रत्युरसं विभक्त्यर्थेऽव्ययीभावः अनुगवमायामे
एतन्निपात्यते दीर्घे अनुगवं यानं गवां पश्चादायाम इति समासः द्विस्तावा त्रिस्तावा वेदिः अच्प्रत्ययष्टिलोपः समासश्च नि

200

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हृ ऋक्साम वहूकन्तं विष्णोः पूः विष्णुपुरं लोकेनहं लोकात् विमलापं सरः धुरौ तहयेनरोत्थो
ऽपेट्गत् अपथ इति कृतसमासांतस्यानुकरणं अक्ष्यपेयप्रभा एभ्योऽपस्य इत्यात् द्विर्गता आपो यस्मिन्निति
द्वीपं अंतरीपं प्रतीपम् समीपम् समाप्योदेवयजनमिति तु समाप्योपयस्मिन्निति बोध्यम् कृतसमासां
तद्ग्रहणान्नेह स्वप् स्वपी अवर्णांतो वा प्रेयं परेवं प्रापं परापं ऊदनोर्देशे अक्ष्णोपुरस्तोऽस्य कस्य
देशेऽनूपो देशः राजधुरा अक्षे तु अक्षधूः दृढधूरक्षः सखिपथो रम्यपथो देशः अक्ष्णोऽत्यं चैव पूर्वोत्त
मलोम्न एतस्मात्सामलोमांतात्समासांतः स्यात् प्रतिसामं अनुसामम् अवसामम् प्रतिलोमम् अनुलोम
म् अवलोमम् कृष्णोदक्पांडुसंख्यापूर्वायाभूमेरजिष्यते कृष्णभूमः उदकभूमः पांडुभूमः द्विभूमः त्रिभूमः
ग्रामाद्वः संख्याया नदीगोदावरीभ्यां च पंचनदम् सप्तगोदावरम् अजिति योगविभागादन्यत्रापि पद्मनाभः ऊ
र्णनाभः दर्शनात् अचतुरपाद्ह्लोत्स्यात् समासांतः गवामहीवगवाहः अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वन
डुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायु
षत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः एते पंचविंशतिरजंता निपात्यंते आद्यास्त्रयो बहुव्रीहयः
अविद्यमानानि चत्वारि यस्य सो चतुरः सुचतुरः सुपाभ्यां चतुरो ज्ञिष्यते विचतुराः चतुर्णां समीपे
उपचतुराः ततः काशाद्वंद्वा स्त्रीपुंसौ धेन्वनडुहौ ऋक्सामे वाङ्मनसे अद्वितीयं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ पू॰ ७३ त्येव मनसा आज्ञातुं शीलमस्य मनसाज्ञायी ॥ आत्मनश्च आत्मनस्तृतीयाया अलुक् स्यात् पूरणे इति वक्तव्यं पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः आत्मनापंचमः जनार्दनस्त्वात्मचतुर्थ एवेति तु बहुव्रीहि वैयाः पूरणे किं आत्मकृतं वैयाकरणाख्यायां चतुर्थ्याः आत्मन इत्येव आत्मनेपदं आत्मनेभाषा तादर्थ्ये चतुर्थी चतुर्थीति योगविभागात्समासः परस्मै च परस्मैपदं परस्मैभाषा हलदंतात्सप्तम्याः संज्ञायां हलंतादंता

२०१ त्सप्तम्या अलुक् स्यात् संज्ञायां त्वचिसारः गवियुधिभ्यां स्थिरः आभ्यां परस्य सस्य षः स्यात् गविष्ठिरः अत्र गवीति वचनादेवालुक् युधिष्ठिरः अरण्येतिलकाः अत्र संज्ञायामिति सप्तमीसमासः हृद्द्युभ्यां च हृदिस्पृक् दिविस्पृक् कारनाम्नि च प्राचां हलादौ प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदंतात्सप्तम्या अलुक् मुकुटेकार्षापणं दृषदिमाषकः पूर्वेण सिद्धे नियमार्थं कारनाम्न्येव प्राचामेव हलादावेवेति कारनाम्नि च किं अभ्यर्हितपशुः काराद्‍न्यस्येतद्यस्य नाम प्राचां किं यूथपशुः हलादौ किं अविकटोरणः हलदंतात्किं नद्यांदोहो नदीदोहः मध्याद्गुरौ मध्येगुरुः अंताच्च अंतेगुरुः अमूर्द्ध मस्तकात्स्वांगादकामे कंठेकालः उरसिलोमा अमूर्द्धमस्तकात्किं मूर्द्धशिखः मस्तकशिखः अकामे किं मुखेकामोस्य मुखकामः बंधे च विभाषा हलदंतात्सप्तम्या अलुक् हस्तेबंधः हस्तबंधः राम॰

हलदंतात्किं गुप्तिबंधः तत्पुरुषे कृति बहुलं स्तंबेरमः कर्णेजपः क्वचिन्न कुरुचरः प्रावृट्शर ७३

CC-0. Lal Bahadur Shastri University, Delhi, Digitized by Sarvagya Sharada Peetham

५।४।८५

गुणावांश्च मेधादौ तु चेदं निपातनं वेदिरितिकिं छिलावती स्त्रिस्लावतीरज्जुः उपसर्गोदध्वनः प्रगतो
ध्वानं प्राध्वो रथः नञः पूजनात् पूजनार्थात्सरेभ्यः समासान्ता न स्युः सुराजा अतिराजा स्वतिभ्यामेव ने
ह परमराजः पूजनात् किं गामतिक्रान्तो तिगवः बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः नेह सु
सक्थ्यः स्वक्षः किमः क्षेपे क्षेपे यः किम तस्मात्परं यत् तदन्तात् समासान्ता न स्युः कुत्सितो राजा किं
राजा किंसखा किंगौः क्षेपे किं किंराजः किंसखः किंगवः नञस्तत्पुरुषात् समासान्तो न अराजाः अ
सखाः तत्पुरुषात् किं अधुरं शकटं पथो विभाषा नञस्तत्पुरुषाद्वा समासान्तः अपथं अपथाः तत्पु
रुषादित्येव अपथो देशः अपथं वर्त्तते ॥❀॥ इति समासान्ताः ॥❀॥ अलुगुत्तरपदे अलुगधि
कारः प्रागानङः उत्तरपदाधिकारस्त्वापादपरिसमाप्तेः पञ्चम्याः स्तोकादिभ्यः एभ्यः पञ्चम्या अलुक्स्या न्यायदि
त् उत्तरपदे स्तोकान्मुक्तः एवं अन्तिकादर्थ दूरादर्थकृच्छ्रेभ्यः उत्तरपदे किं निष्क्रान्तः स्तोकान्निःस्तोकः ब्राह्म
णच्छंसिन उपसंख्यानं ब्राह्मणेविहिता निशास्त्राणि एषां शास्त्राणामनीतानि शंसतीति ब्राह्मणाच्छं
सी अहरिति विशेषः द्वितीयार्थे पञ्चम्युपसंख्यानादेव ओजःसहोम्भस्तमसस्तृतीयायाः ओजसाकृ
तं इत्यादि अञ्जस उपसंख्यानम् अञ्जसाकृतं आर्जवेन कृतमित्यर्थः पुंसानुजो जनुषान्ध इति च यस्या
ग्रजः पुमान् स पुंसानुजः जनुषान्धो जात्यन्धः मनसः संज्ञायां मनसागुप्ता आज्ञायिनि च मनसः इ

६।३।४ ६।३।५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पू॰
७४

होतुःपुत्रः ऋतो विद्यायोनिसंबंधेभ्यः॥ विद्यासंबंधयोनिसंबंधवाचिनः ऋदंतात्षष्ठ्या अलुक् होतुरंतेवासि
होतुःपुत्रः पितुरंतेवासि पितुःपुत्रः विद्यायोनिसंबंधेभ्यः तत्पूर्वोत्तरपदग्रहणं नेह होतृधनं पितृगृहं
विभाषा स्वसृपत्योः ऋदंतात्षष्ठ्या अलुग्वा स्यात् स्वसृपत्योः मातुःपितुर्भ्यामन्यतरस्यां आभ्यां स्वसुः स
स्य षो वा स्यात्समासे मातुःष्वसा मातुःस्वसा पितुःष्वसा पितुःस्वसा लुकि सति मातृपितृभ्यां स्वसा आ
भ्यां परस्य स्वसुः सस्य षः स्यात्समासे मातृष्वसा पितृष्वसा असमासे तु मातुःस्वसा पितुःस्वसा मातुःप
तिः मातृपतिः॥ ० ॥ इत्यलुक्समासः॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्व
भाषितपुंस्काद्घोङी तदंतस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पप्रत्ययेषु चेलडादिषु चोत्तरपदेषु ब्राह्मणि
तरा ब्राह्मणितमा ब्राह्मणिरूपा ब्राह्मणिकल्पा ब्राह्मणिचेली ब्राह्मणिब्रुवा ब्राह्मणिगोत्रेत्यादि ब्रुवः
पचाद्यच् वच्यादेशाभावोपि निपात्यते चेलडादीनि वृत्तिविषये कुत्सनवाचीनि चेतः कुत्सिता
नि कुत्सनैरिति समासः ङ्याः किं दत्तात राभाषितपुंस्कात्किं आमलकीतरा कुवलीतरा नद्याः शेषस्यान्य
तरस्यां अङ्गतनद्याङ्यंतैकाच अत्र घादिषु ह्रस्वो वा स्यात् ब्रह्मबंधुतरा ब्रह्मबंधूतरा स्त्रितरा स्त्रीत
रा ङ्यन्तग्रहणात् लक्ष्मीतरा उगितश्च उगितः परा या नदी तदंतस्य घादिषु ह्रस्वो वा स्यात् विदुषितरा राम॰
ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत् विद्वत्तरा ह्रस्वादिषु तु विदुषीतरेत्यपि ह इति तन्निर्मूलं ह्रद ७४

202

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्कालदिभ्यो जे प्रावृषिजः शारदिजः कालेजः दिविजः पूर्वस्यायं प्रपंचः विभाषावर्षक्षरशरवरात्
एभ्यः सप्तम्या अलुक् जे वर्षेजः वर्षजः क्षरेजः क्षरजः शरेजः शरजः वरेज वरजः घकालतनेषु काल
नाम्नः सप्तम्या विभाषा अलुक् स्यात् घ पूर्वाह्णेतरे पूर्वाह्णतरे पूर्वाह्णेतमे पूर्वाह्णतमे काले पूर्वा
ह्णे काले पूर्वाह्णकाले तने पूर्वाह्णेतने पूर्वाह्णतने शयवासवासिष्वकालात् खेशयः खशयः ग्रामे
वासः ग्रामवासः [illegible] ग्रामेवासी ग्रामवासी हलदन्तादित्येव नेह भूमिशयः अकालात्किं पूर्वा
ह्णशयः अपो योनियन्मतिषु अप्सुयोनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः अप्सुभवाः सव्यः अप्सुमतीवा
ज्यभागो नेमिः स्वेभ्यः तिष्ठुच इन्नेतादिषु सप्तम्या अलुग् स्यात् एवं लवणायी सेनाकाष्ठ सिद्धः चक्रबंधः
स्थे बेंभोबांधो सप्तम्या अलुग् न समस्थः विषमस्थः भाषायां किं कुसे स्थासरे ९ षष्ठ्या आक्रोशे
चौरस्यकुलं आक्रोशे किं ब्राह्मणकुलं वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु वाचोयुक्तिः दिशोदण्डः प
श्यतोहरः आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च अमुष्यापत्यं आमुष्यायणः नडादित्वा
त्फक् अमुष्यपुत्रस्यभावः आमुष्यपुत्रिका मनोज्ञादित्वाद्वुञ् एवमामुष्यकुलिका देवानांप्रिय
इति च मूर्खे अन्यत्र देवप्रियः शेपपुच्छलांगूलेषु शुनः शुनःशेफः शुनःपुच्छः शुनोलांगूलः दिव
श्च दासे दिवोदासः पुत्रेऽन्यतरस्यां षष्ठ्या अलुग्वा निंदायां दास्याःपुत्रः दासीपुत्रः निंदायां किं ब्रा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उदशक्तुः उदकशक्तुः उदबिंदुः उदकबिंदुः उदवज्रः उदकवज्रः उदकुमारः उदककुमारः उदहारः उदकहारः
उदविवधः उदकविवधः उदगाहः उदकगाहः पूर्ववत् १५

सि॰ कौ॰ पृ॰ ७५

च उदमंथः उदकमंथः उदौदनः उदकौदनः इकोह्रस्वोऽङ्योगालवस्य ६।३।६१ इगंतस्याङ्यंतस्य ह्रस्वो वा स्यादुत्त
रपदे ग्रामणिपुत्रः ग्रामणीपुत्रः इकः किं रमापतिः अङ्यंतस्य किं गौरीपतिः गालवग्रहणं पूजार्थं अ
न्यतरस्यामित्यनुवृत्तेः इयङुवङ्भाविनामव्ययानां च नेति वाच्यं श्रीमदः भ्रूभंगः शुक्लीभावः अभ्रुकुं
सादीनामिति वक्तव्यं भ्रुकुटिः भ्रूकुटिः भ्रुकुंसः भ्रूकुंसः अकारोनेन विधीयत इति व्याख्यानांतरे भ्रकुं
सः भ्रकुटिः भ्रुवा कुंसो भाषणं शोभा वा यस्य सः स्त्रीवेषधारी नर्तकः भ्रुवः कुटिः कौटिल्यं एके तद्धि
ते च एकशब्दस्य ह्रस्वः स्यात् तद्धिते उत्तरपदे च एकस्या आगतं एकरूप्यं एकक्षीरं ङ्यापोः संज्ञाछंदसो
कालिदासः ७ र्बहुलं रेवतिपुत्रः अजक्षीरं त्वे च त्वप्रत्यये ङ्यापोर्वा ह्रस्वः अजत्वं रोहिणित्वं रोहिणीत्वं ष्यङः सं अजात्वं ७४
प्रसारणं पुत्रपत्योस्तत्पुरुषे ष्यङंतस्य पूर्वपदस्य संप्रसारणं स्यात् पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे सं
२०३ प्रसारणं संप्रसारणस्य दीर्घः स्यादुत्तरपदे परे कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः कौमुदगंधी
पतिः व्यवस्थितविभाषया ह्रस्वो न स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषेधात् परमका
रीषगंधीपुत्रः उपसर्जने तु तदादिनियमान्नेह अतिकारीषगंध्यपुत्रः बंधुनि बहुव्रीहौ बंधुशब्दे उ
त्तरपदे ष्यङः संप्रसारणं स्याद्बहुव्रीहौ कारीषगंध्याबंधुरस्य कारीषगंधीबंधुः बहुव्रीहाविति किम् राम॰
कारीषगंध्याबंधुः कौ बनिर्देशस्तु शब्दस्वरूपापेक्षया मातच्मातृकमातृषु वा कारीषगंधीमातः ७५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यस्य हृल्लेखयपदण्लासेषु हृदयं लिखतीति हृल्लेखः हृदयस्य प्रियं हृद्यं हृदयस्येदं हार्दं हृल्लासः ले
६।३।५० खेत्यणन्तस्य ग्रहणं घञि तु हृदयलेखः लेखग्रहणमेव ज्ञापकं उत्तरपदाधिकारे तदन्तविधिर्नास्तीति ।
वा शोकष्यञ्रोगेषु हृच्छोकः हृदयशोकः सौहार्द्यं सौहृदय्यं हृद्रोगः हृदयरोगः हृदयशब्दपर्या
यो हृच्छब्दोप्यस्ति तेन सिद्धे प्रपंचार्थमिदं पदस्य पदाज्यातिगोपहतेषु उत्तरपदेषु पादस्य पदा
देशः स्यात् पादाभ्यामजतीति पदाजिः पदातिः अजतिभ्यां चेति इण्प्रत्ययः अजेर्व्यभावो नि पादि ५
पातनात् पदगः पदोपहतः पद्यत्यतदर्थे पादस्य पत्स्यादतदर्थे यति परे पादौ विध्यन्तीति पद्याः शर्कराः
६ अतदर्थे किं पादार्थमुदकं पाद्यं इके चरतावुपसंख्यानं पादाभ्यां चरति पदिकः पद्यो हित्वात् हन् हि
मकाषिहतिषु च यद्दिमे यत्काषी पद्धतिः ऋचः शे ऋचः पादस्य पत्स्यात्छे गायत्री पच्छः शंसति
पादं पादमित्यर्थः ऋचः किं पादशः कार्षापणं ददाति वा घोषमिश्रशब्देषु पद्घोषः पादघोषः प
न्मिश्रः पादमिश्रः पच्छब्दः पादशब्दः निष्के चेति वाच्यं पन्निष्कः पादनिष्कः उदकस्योदः संज्ञायां ।
उदमेघः उत्तरपदस्य चेति वक्तव्यं क्षीरोदः पेषंवासवाहनधिषु च उदपेषं पिनष्टि उदवासः उदवा
हनः उदधिर्घटः समुद्रे तु पूर्वेण सिद्धं एकहलादौ पूरयितव्येऽन्यतरस्यां उदकुम्भः उदककुम्भः एके
ति किं उदकस्थाली पूरयितव्य के ति किं उदकपर्वतः मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सु॰

सि॰ कौ॰ पू॰ ७६ नतु मूर्धादिष्वनुवृत्तासु सगर्भ्यः अनुसख्यो यूथ्यः योनः सनुत्यः तत्रभव इत्यर्थे सगर्भसयूथसनुताद्यत्
अमूर्धादिषु किं समानमूर्धा समानप्रभृतयः समानोदर्काः समानस्येति योगो विभज्यते तेन सपक्षः साध
र्म्यः सजातीयम् इत्यादि सिद्धमिति काशिका अथवा सहशब्दः सदृशवचनोऽस्ति सदृशः सख्या ससखीति
यथा तेनायमस्वपदविग्रहो बहुव्रीहिः समानः पक्षोऽस्येत्यादि ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूप
स्थानवर्णवयोवचनबन्धुषु एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात् सज्योतिः सजनपद इत्यादि च
रणे ब्रह्मचारिणि ब्रह्मचारिण्युत्तरपदे समानस्य सः स्यात् चरणे समानत्वेन गम्यमाने चरणः शाखा ।
ब्रह्म वेदः तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी समानस्य सः सब्रह्मचारी तीर्थे ये तीर्थे ८७
204 उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात् सतीर्थ्यः एकगुरुकः समानतीर्थेवासीति यत्प्रत्ययः
विभाषोदरे यादौ प्रत्यये विवक्षितेऽयेव सोदर्यः समानोदर्यः दृग्दृशवतुषु सदृक् सदृशे चेति वक्तव्यं सदृषाः ५
सदृक्षः वतुउत्तरार्थः इदंकिमोरीश्की दृग्दृशवतुषु इदम् ईश् किमः की स्यात् ईदृक् ईदृशः की
दृक् कीदृशः वतूदाहरणं वक्ष्यते दृक्षे च ईदृक्षः कीदृक्षः आ सर्वनाम्नः सर्वनाम्नः आकारः स्या
त् दृग्दृशवतुषु दृक्षे च तादृक् तादृशः तावान् तादृक्षः दीर्घः मत्वोत्वे अमूदृक् अमूदृश अमूदृक्षः राम॰
समासेऽङ्गुलेः सङ्गः अङ्गुलिशब्दात् सङ्गस्य मूर्धन्यः स्यात् समासे अङ्गुलिषङ्गः समासे किं अङ्गुलेः ७६

५३८०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कारीषगंध्यामातः कारीषगंधीमातृकः कारीषगंध्यामातृकः कारीषगंधीमाता कारीषगंध्यामाता अत्रा
देव निपातनात् मातृशब्दस्य मातृजादेशः कपविकल्पस्तु बहुव्रीहावेवेदं नेह कारीषगंध्यामाता चित्र
सामर्थ्याश्चित्स्वरो बहुव्रीहिस्वरं बाधते इष्टकेषीकामालानां चिततूलभारिषु इष्टकादीनां तदंतानां च
पूर्वपदानां चितादिषूत्तरपदेषु ह्रस्वः स्यात् इष्टकचितं पक्वेष्टकचितं इषीकतूलं मुंजेषीकतू
लं मालभारी उत्पलमालभारी कारे सत्यागदस्य सत्यंकारः अगदंकारः अस्तोश्चेति वक्तव्यं अस्तु सुमस्यात् ५
कारः धेनोर्भव्यायाम् धेनुंभव्या लोकस्य पृणे लोकंपृणं पृण इति मूलविभुजादित्वात् कः इत्येनभ्या
णस्य अनभ्यासमित्यः दूरतः परिहर्तव्या इत्यर्थः भ्राष्ट्राग्न्योरिंधे भ्राष्ट्रमिंधः अग्निमिंधः गिलेगिल
स्य तिमिंगिलः अगिलस्य किं गिलगिलः गिलगिले च तिमिंगिलगिलः उष्णभद्रयोः करणे उष्णंकर
णं भद्रंकरणं रात्रेः कृति विभाषा रात्रिंचरः रात्रिचरः रात्रिंमन्यः रात्र्यटः अखिदर्थमिदं सूत्रं खित्तु
अरुर्द्विषदिति नित्यं वक्ष्यते रात्रिंमन्यः सहस्य सः संज्ञायां उत्तरपदे सपलाशं संज्ञायां किं सहयु
ध्वा ग्रंथांताधिके च अनुपयोरर्थयोः सहस्य सः स्यादुत्तरपदे समुहूर्त्तं ज्योतिषमधीते सद्रोणाखा
री द्वितीये चानुपाख्ये ॥ ॥ अनुमेये द्वितीये सहस्य सः स्यात् सराक्षसी का निशा राक्षसी साक्षाद
नुपलभ्यमाना निशयानुमीयते समानस्य छंदस्यमूर्द्धप्रभृत्युदर्केषु समानस्य सः स्यादुत्तरपदे

अप्रधाने=२ अनुमेये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रखाचिह्नकर्णाइतिवा॥८८ ...मयाद्वस्थिवीलिविचिह्नकर्णाइत्यादिरर्थः ...

सि॰कौ॰ रूपः कुचरूपः आत्मानविभाषेयं ईषदर्थेपि पूर्वेविभक्तिर्षेयान्तिस्यमेव कवंचो ॥६॥ लेउत्तरपदे उत्तरपदे कवंका
पृ॰ चस्या ॥ का कवोष्णं कोष्णं कदुष्णं पृषोदरादीनियथोपदिष्टं पृषोदरप्रकाराणिशिष्टैर्यथोच्चरितानि तथैव
७७ साधूनि पृषतः उदरं पृषोदरं तलोपः वारिवाहको बलाहकः पूर्वपदस्यवः उत्तरपदादेश्वलत्वं भवेद्
र्णोगमाद्धंसः सिंहोवर्णविपर्ययात् गूढोत्मावर्णविकृतेर्वर्णनाशात्पृषोदरं दिक्शब्देभ्यस्तीरस्य
तारभावोवा ॥ दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तरतीरं दुरोदाशनाशदभध्येषूत्वंउत्त
रपदादेष्टुत्वंच दुःखेनदाश्यते दूडाशः दुःखेननाश्यते दूणाशः दुःखेनदभ्यते दूडभः ध्यत्तेर्भ्याः
देभनं लोपो निपात्यते दुःखेनध्यायति दूढ्यः आतश्चोपेति कः भवंतो स्यामीदंति वृषी भवच्छब्द
205 स्यवृआदेशः सदेरधिकरणेड्ड आकृतिगणोयं ॥ संहितायां अधिकारोयं कर्णेलक्षणस्या
विष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य कर्णशब्देपरेलक्षणवाचकस्यदीर्घः द्वि
गुणाकर्णः लक्षणस्यापिकं शोभनकर्णः भिन्नकर्णः छिद्रकर्णः स्रुवकर्णः स्वस्तिकर्णः नहिवृ ६.३.११६
तिवृषिव्यधिरुचिसहितनिषु क्वौ क्विन्नतेष्वेषुपूर्वपदस्यदीर्घः उपानत् नीवृत् प्रावृट् मर्मावित् नीरुक्
अभीरुक् ऋतीषट् परीतत् क्वावितिकिं परिणहनं विभाषापुरुषे इत्यतोमण्डूकप्लुत्याविभाषानुव रामः
र्ततेसाचव्यवस्थिता तेनगतिकारकयोरेव नेह पटुरुक् तिग्मरुक् वनगिर्योःसंज्ञायांकोटरकिं ७७
अविष्टादीनांकिं विष्टकर्णः अष्टकर्णः पंचकर्णः मणिकर्णः ॥ ६.३.११७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संगः भीरोःस्थानं भीरुशब्दात्स्थानस्य सस्य मूर्द्धन्यः स्यात् समासे भीरुस्थानं असमासे तु भीरोः स्था
ने ज्योतिरायुषः स्तोमः आभ्यां स्तोमस्य सस्य मूर्द्धन्यः स्यात् समासे ज्योतिष्टोमः आयुष्टोमः समासे
किं ज्योतिषः स्तोमः सुषामादिषु च सस्य मूर्द्धन्यः शोभनं साम यस्य सुषामा सुषेधिः एति संज्ञायाम
गात् सस्य मूर्द्धन्यः हरिषेणः एति किम् सुसक्थः संज्ञायां किम् पृथुसेनः अगात्किं विष्वक्सेनः इ
णकोरेव सर्वसेनः नक्षत्राद्वा एति संज्ञायामकारान्मूर्द्धन्यो वा रोहिणीषेणः रोहिणीसेनः अगका
रात्किं शतभिषक्सेनः आकृतिगणोयं अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुको
तिकोतिकारकरागछेषु अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु अन्यदाशीः अन्यदाशा अ
न्यदास्था अन्यदास्थितः अन्यदुत्सुकः अन्यदूतिः अन्यद्रागः अषष्ठीत्यादि किं अन्यस्यान्येन
वाशीः कारके छे च नायं निषेधः अन्यस्य कारकोऽन्यत्कारकः अन्यस्यायं अन्यदीयः गहादेराकृ
तिगणत्वाच्छः अर्थे विभाषा अन्यदर्थः अन्यार्थः कोः कत्तत्पुरुषेचि अजादावुत्तरपदे कुत्सि
तोष्ट्रः कदुष्ट्रः कदन्नं तत्पुरुषे किम् कूष्ट्रो राजा त्रौ च कुत्सितास्त्रयः कत्रयः रथवदयोश्च कद्रथः क
द्वदः तृणे च जातौ कत्तृणं कापथ्यक्षयोः कापथं काक्षः अल्पशब्देन तत्पुरुषः अजादिनेव
कुत्वादिर्वा ईषदर्थे ईषज्जलं काजलं अजादावपि ईषदम्लं काम्लः विभाषा पुरुषे कापु

६।३।१०५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कत्रयः३

४ ६ नु ४ पसंख्यानं ६ शिरीषवनं १

णत्वं विभाषौषधिवनस्पतिभ्यः वनस्पतिः स्यात् दूर्वावणं दूर्वावनं शिरीषवणं घच म ऋयामेव नेह देवदा
रुवनं इरिकादिभ्यः प्रतिषेधो वक्तव्यः इरिकावनं मिरिकावनं वाहनमाहितात् आरोप्यमुच्यते तच्चाहितस्यान्नि
मित्तात्परस्य वाहनस्य नकारस्य णत्वं स्यात् इक्षुवाहणं आहितात्किं इंद्रवाहनं इंद्रस्वामिकं वाहनमित्यर्थः व
ह नेस्तु हि वृद्धि रिष्टैव स्वचे निपातनात् पानं देशे पूर्वपदस्थान्निमित्तात्परस्य पाननस्य णत्वं स्याद्देशे गम्ये क्षी
रपानं येषां ते क्षीरपाणाः उशीनराः सुरापाणाः प्राच्याः पीयत इति पानं कर्मणि ल्युट् वा भावकरणयोः पा
नस्येत्येव क्षीरपाणं क्षीरपानं गिरिनद्यादीनां वा गिरिनदी गिरिणदी चक्रनितंबा चक्रणितंबा प्रातिपदि
कान्त नुम्विभक्तिषु च पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात् प्रातिपदिकान्ते माषवापि
णौ नुमि ब्रीहिवापाणि विभक्तौ माषवापेण पक्षे माषवापिनावित्यादि उत्तरपदं यत्प्रातिपदिकं तदंतस्यैव ण
त्वं नेह गर्गाणां भगिनी अत एव नुम्ग्रहणं ज्ञापकं अङ्गस्य नुम्विधानात् तदङ्गस्यो हि नुम् न तूत्तरपदस्य किं च पदि
एवन्नित्यादौ ह्रिवे नुमो णत्वार्थमपि नुम्ग्रहणं प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न युवादेर्न रम्यमुना परि
पक्ता एकाजुत्तरपदे णः नित्यमित्युक्तं वृत्रहणौ हरिमानयतीत्यत्र हरिमाणौ नुमि क्षीरपाणि विभक्तौ क्षीरपेण
रम्यविणा कुमतिश्च कवर्गवत्युत्तरपदे शागवत् हरिकामिणौ हरिकामाणि हरिकामेण पदव्यवायेपि पदेन
मवधाने णत्वं न स्यात् माषकुंभवापेन चतुरंगयोगेन अनन्तरितं इति वाच्यं आर्द्रगोमयेण शुष्कगोमयेण
ज्ञश्चसुत्तुमग्रहणमिदं ज्ञापकमाहुः स्वह्रर्शयति ज्ञापकं विशिष्टमितिश्चे ९५ ८ ४ ३८
नयतिकिंत्वेति=

गर्गाणामिति इह भगिनीति तस्य पदं न तु भगिनीत्यस्य च भवत्येवा
ण्यन्तस्य हृणोप्यस्य पदं केवलमिति प्राप्तं ममसंज्ञा हे अस्मत्पूर्वोक्त
९५=

206

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

८।४।४

शुलकादीनां कोटरादीनां वने परे किं शुलकादीनां गिरौ परे दीर्घः स्यात् वनं पुरगामिश्रकासिध्रकासारि
काकोटराग्रेभ्यः वनशब्दस्योत्तरपदस्थस्य एभ्य एव णत्वं स्यान्नत्वन्येभ्यः इद्रकोटराणां यंचदीर्घं विधौ कोटरादयो
बोध्याः तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः अग्रेशब्दस्य तु विध्यर्थः पुरगावणं मिश्रकावणं सिध्र
कावणं सारिकावणं कोटरावणं एभ्य एवेति किं असिपत्रवनं वनस्य अग्रे अग्रेवणं राजदन्तादित्वान्निपातनात्स
प्तम्या अलुक् प्रातिपदिकार्थमात्रे प्रथमा किं शुलका गिरिः वले वलप्रत्यये परे दीर्घः स्यात् संज्ञायां कृषीवलः मतौ ११८
बह्वचोऽनजिरादीनां अमरावती अनजिरादीनां किं अजिरवती बह्वचः किम् ब्रीहिमती संज्ञायामित्येव ने
ह वलयवती शरादीनां च शरावती इको वहेऽपीलोः इगन्तस्य दीर्घः स्याद्वहे ऋषीवहं पीवहं इकः किं पिंड
वहं अपीलोः किं पीलुवहं अपील्वादीनामिति वाच्यं दारुवहं उपसर्गस्य घञ्यमनुष्ये बहुलं उपसर्गस्य बहुलं
दीर्घः स्यात् घञन्ते परे न तु मनुष्ये परिपाकः परीपाकः अमनुष्ये किं निषादः इकः काशे इगन्तस्योपसर्गस्य
दीर्घः स्यात्काशे नीकाशः नीकाशः इकः किं प्रकाशः अष्टनः संज्ञायां उत्तरपदे परे दीर्घः अष्टापदं संज्ञायां
221 राकृतिगणः आपत्कालिकी आपत्कालिका वाहीकग्रामेभ्यश्च वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः
छस्यापवादः कास्तीरं नाम वाहीकग्रामः कास्तीरिकी कास्तीरिका विभाषोशीनरेषु एषु ये ग्रामास्तद्वाचि
भ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः सौदर्शनिकी सौदर्शनिका सौदर्शनीयः ओर्देशे ठञ् उवर्णान्ताद्देशवाचिनष्ठञ्
८४ निषादकर्षू नैषादकर्षुकः केण इति ह्रस्वः देशे किम् पटोश्छात्राः पाटवाः ञिठव्यावृत्त्यर्थं तु ठञ्ग्रहणम्
वृद्धाच्छं परत्वादयं बाधते दाक्षिकर्षुकः वृद्धात्प्राचाम् प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम् आढ राम
कजम्बुकः आढकजम्बुकः नेह मल्लवास्तु माल्लवास्तवः धन्वयोपधाद्वुञ् धन्वविशेषवाचिनो यकारोप ८३
धाच्च देशवाचिनो वृद्धाद्वुञ् स्यात् ऐरावतं धन्व ऐरावतकः सांकाश्यकः पिल्पशब्दो वुञ्छणादिसूत्रेण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निस्वः निसीगते ह्रस्वात्तादौ तद्धिते ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ न तु तद्धितपरे निर्गतो वर्णाश्रमेभ्यः
निष्टः चातुलाद्धिः अरण्याण्णः आरण्याः सुमनसः दूरादेत्यः दूरेत्यः उत्तरादाहञ् औत्तराहः ऐषमोह्यः श्व
सोऽन्यतरस्याम् एभ्यस्त्यब्वा पक्षे यथाप्राप्तौ ट्युट्युलौ ऐषमस्त्यम् ऐषमस्तनम् ह्यस्त्यम् ह्यस्तनम् श्वस्त्यम्
श्वस्तनम् पक्षे शैषिकलिङ्गबस्तले तीररूप्योत्तरपदादञ्ञौ यथासंख्येन काकतीरम् पाल्वलतीरम् शैवरूप्य
म् तारकरूप्याम् आदितिनोक्तम् बहुच्पूर्वान्नाम्नस्तु बाहुरूप्यम् दिक्पूर्वपदादसंज्ञायां ञः अस्योपवादः पौर्वशा
लः असंज्ञायां किम् संज्ञाभूतायाः पञ्चालेभ्यो मा भूत् पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः प्राचां ग्रामनगराणा
मित्युत्तरपदवृद्धिः मद्रेभ्योऽञ् दिक्पूर्वपदादित्येव दिशोऽमद्राणामिति निषेधस्तु साहचर्यादुक्तः पौर्वमद्रः आप
रमद्रः उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् अञ् स्यात् शैवपुरम् प्रस्थोत्तरपदपलद्यादिकोपधादण् माद्रकिप्र
स्थः पालदः नैलीनकः कण्वादिभ्यो गोत्रे एभ्यो गोत्रप्रत्ययान्तेभ्योऽण् स्यात् कण्वो गर्गादिः काण्वस्य छा
त्राः काण्वाः इञश्च गोत्रे यदिञ् तदन्तादण् स्यात् दाक्षाः गोत्रे किम् सौतंगमेरिदं सौतंगमीयम् गोत्रमिह शा
स्त्रीयम् न तु लौकिकं तेनेह न पाणिनीयम् न द्व्यचः प्राच्यभरतेषु इञश्चेत्यणोऽपवादः प्राक्षीयाः काशीयाः
भरतानां प्राच्यत्वेपि पृथग्ग्रहणम् अन्यत्र प्राच्यग्रहणे भरतानामग्रहणे लिंगं वृद्धिर्यस्याचामादिस्तद्वृद्धम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

१५

सि.कौ. पू. ५५ ञादेरपवादः काच्छः सैंधवः मनुष्यतत्स्थयोर्वुञ् कच्छादिभ्यः अणोऽपवादः कच्छे जातादि काच्छको म
नुष्यः काच्छकं हसितं मेति किम् काच्छो गौः अपदातौ साल्वात् साल्वशब्दस्य कच्छादित्वाद्वुञि सिद्धे नियमा
र्थमिदम् अपदाताविति साल्वकः साल्वः पदातिर्व्रजति गोयवाग्वोश्च साल्वाद्वुञ् कच्छाद्यणोऽपवादः सा
ल्वको गौः साल्विका यवागूः साल्वमन्यत् गर्त्तोत्तरपदाच्छः देशे अणोऽपवादः वृकगर्त्तीयम् उत्तरपदग्रह
२२२ णं बहुच्पूर्वनिरासार्थम् गहादिभ्यश्च छः गहीयः मुखपार्श्वतसोर्लोपश्च मुखतीयम् पार्श्वतीयम् अ
व्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम् कुग्जनस्य परस्य च जनकीयम् परकीयम् देवस्य च देव
स्वस्य च ७४× कीयम् स्व. स्वीयं स्वकीयम् वेणुकादिभ्यश्छण्वाच्यः वेणुकीयम् वेत्रकीयम् औत्तरपदकीयम् प्रा
चीनकटादेः प्राग्देशवाचिनः कटादेश्छः स्यात् अणोऽपवादः कटनगरीयम् कटघोषीयम् कटपल्वली
यम् राज्ञः क च वृद्धत्वाच्छे सिद्धे तत्संनियोगेन कादेशमात्रं विधीयते राजकीयम् वृद्धादकेकान्तखोपधा
त् अक इक एतदन्तात् खोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात् ब्राह्मणको नाम जनपदः यत्र ब्राह्मणा आयु
सू ३ धजीविनः तत्र जातो ब्राह्मणकीयः शाल्मलकीयम् आयोमुखीयम् कंथापलदनगरग्रामह्रदोत्तरपदात् कं ग्राम ३
थादिपंचकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात् ठञ्ञिठादेरपवादः दाक्षिकंथीयम् दाक्षिपलदीयम् ग्रामः ५५
दाक्षिनगरीयम् दाक्षिग्रामीयम् दाक्षिह्रदीयम् पर्वताच्च पर्वतीयः विभाषामनुष्ये मनुष्यभिन्नेऽ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शाल्मलिकीयम्:३

ण्यंतो सांकाश्यकः कांपिल्यकः प्रस्थपुरवहांताच्च एतदन्ताद्वृद्धाद्देशवाचिनो वुञ्स्यात् छस्यापवादः
मालाप्रस्थकः नांदीपुरकः पैलुवहकः प्रान्तग्रहणमप्रार्थ्यं प्राग्देशोत्तरेणासिद्धम् रोपधेतोः प्रा
चाम् रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ्स्यात् पाटलिपुत्रकः ईतः काकंदकः जनपदतदव
ध्योश्च जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ्स्यात् आदर्शकः त्रैगर्त्तकः अवृद्धादपि बहुवचनवि
षयात् अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ्स्यात् अवृद्धादणो वृद्धा
च्छस्यापवादः अवृद्धाज्जनपदात् आंगकः अवृद्धाज्जनपदावधेः आजमीढकः वृद्धाज्जनपदा दार्वकः
वृद्धाज्जनपदावधेः कालंजरकः विषयग्रहणं किम् एकशेषेण बहुत्वे माभूत् वर्त्तनी च वर्त्तन्यः तासु भ
वो वार्त्तनः कच्छाग्निवक्त्रवर्त्तोत्तरपदात् देशवाचिनो वृद्धादवृद्धाच्च वुञ्स्यात् दारुकच्छकः काण्डाग्नकः
सैंधुवक्त्रकः बाहुवर्त्तकः धूमादिभ्यश्च देशवाचिभ्यो वुञ् धौमकः नैर्थकः नगरात्कुत्सनप्रावीण्ययोः
नगरशब्दाद्वुञ्स्यात्कुत्सने प्रावीण्ये च गम्ये नैगरकः चोरः शिल्पी वा कुत्सने इति किम् नागरा ब्राह्मणाः
भ३ अरण्यान्मनुष्ये वुञ्स्यात् अरण्यशब्दस्य णस्यापवादः पथ्यध्यायन्यायविहारमनुष्येषु आरण्यकाः अरण्या गोम
याः विभाषा कुरुयुगन्धराभ्याम् वुञ् कौरवकः कौरवः यौगंधरकः यौगंधरः मद्रवृज्योः कन् जनपद
वुञोऽपवादः मद्रेषु जातो मद्रकः वृजिकः कोपधादण् माहिषिकः कच्छादिभ्यश्च देशवाचिभ्योऽण्वु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हारमत्रत्र्य हस्तित्विति वाच्यं आरण्यकः पथ्यध्यायन्यायविहारमनुष्यहस्तिवागावो ×३

सि॰कौ॰
पू॰
७४

स्य २ वउ तू ३

न्स्यात् द्वैप्यम् द्वैप्या कालाट्ठञ् कालवाचिभ्यष्ठञ् स्यात् मासिकम् सांवत्सरिकम् सायंप्रातिकः पौनःपुनि
कः यन्तर्हि शार्वरैस्तमसो निषिध्यते इति कालिदासः अनुदितौषसरागे इति भारविः समानकालीनम् प्राक्का
लीनमित्यादि च अपभ्रंशा एवेत इति प्रामाणिकाः तत्र जात इत्यर्थात्कालाधिकारः प्रावृषः शरदः ठञ् ऋ
त्वणोपवादः शारदिकं श्राद्धम् विभाषा रोगातपयोः शारदिक। शारदो वा रोग आतपो वा एतयोः किम्।
शारदं दधि निशाप्रदोषाभ्यां च वा ठञ् स्यात् नैशिकम् नैशम् प्रादोषिकम् प्रादोषम् श्वसस्तुट् च श्व
सः ठञ् स्यात्तस्य तुडागमश्च द्वारादीनां च द्वारस्वरस्वाध्यायव्यल्कशस्वस्तिस्वर्स्फ्यकृतस्वादुमृदुश्वस्श्वन्स्वा
एषां न वृद्धिरैजागमश्च शौवस्तिकम् संधिवेलाद्यृतुनक्षत्रेभ्योऽण् संधिवेलादिभ्यः ऋतुभ्यो नक्षत्रेभ्यश्च
कालवृत्तिभ्योऽण् स्यात् संधिवेलायां भवं सांधिवेलम् ग्रैष्मम् तैषम् संधिवेलासंध्यामावास्यात्रयोदशी
चतुर्दशीपंचदशीपौर्णमासीप्रतिपत् संवत्सरात्फलपर्वणोः सांवत्सरं फलं पर्व वा सांवत्सरिकमन्यत्
प्रावृष एण्यः। प्रावृषेण्यः। वर्षाभ्यष्ठक् वर्षासु साधु वार्षिकं वासः कालात्साधुपुष्प्यत्पच्यमानेषु
लिसंध्यर्थे सर्वत्राण् च तलोपश्च हेमन्तादण् स्यात्तलोपश्च वेदलोकयोः चकारात् ऋत्वण् हैमनम्
हैमन्तम् सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवा
चिभ्यष्ट्युट्युलौ स्तस्तयोस्तुडागमश्च तु अनः आदेशः सायंतनम् दोषातनम् दिवातनम् चिरंतन

इत्यादिनिर्दिष्टत्वात् चिरंतनम् सायंतनम् प्राह्णेप्रगेऽव्ययेभ्यो त्युट्युलौ तुट् च प्राह्णे
तनम् प्रगेतनम्।

स्य॰ ७५

२२३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्य २

र्थे पर्वतात् चो वा स्यात् पक्षे अण् पर्वतीयानि पार्वतानि वा फलानि अमनुष्ये किम् पर्वतीयो मनुष्यः कृक
ण पर्णाद्भारद्वाजे भारद्वाजदेशवाचिभ्यामाभ्यां छः कृकणीयम् पर्णीयम् भारद्वाजे इति किम् कार्कणम् पा
र्णम् युष्मदस्मदोरन्यतरस्यां खञ् च चाच्छः पक्षे अण् युवयोर्युष्माकं वायं युष्मदीयः अस्मदीयः तस्मि
न्नणि च युष्माकास्माकौ युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च यौष्माकीणः आस्माकीनः यौ
ष्माकः आस्माकः तवकममकावेकवचने एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अ
णि च तावकीनः तावकः मामकीनः मामकः छे तु प्रत्ययोत्तरपदयोश्च मपर्यन्तयोरनयोरेकार्थयो
स्त्वमौ स्तः प्रत्यये उत्तरपदे च त्वदीयः मदीयः त्वत्पुत्रः मत्पुत्रः अर्द्धाद्यत् अर्द्ध्यम् परावराधमोत्तम
या पूर्वाच्च परार्द्ध्यम् अवरार्द्ध्यम् अधमार्द्ध्यम् उत्तमार्द्ध्यम् दिक्पूर्वपदाट्ठञ् च चाद्यत् पौर्वार्द्धिकम् पू
र्वार्द्ध्यम् ग्रामजनपदैकदेशादञ्ठञौ ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्द्धा
न्तादञ्ठञौ स्तः इमेऽस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धाः पौर्वार्द्धिकाः ग्रामस्य पूर्वस्मिन्नर्द्धे भवा इति
तद्धितार्थे समासः ठञ्ग्रहणं स्पष्टार्थम् अन्यत्र तु लक्षे यतोऽप्यनुकर्षः संभाव्येत मध्यान्मः मध्यमः अ
सांप्रतिके मध्यशब्दादकारप्रत्ययः स्यात् सांप्रतिकेऽर्थे उत्कर्षापकर्षहीनो मध्यो वैयाकरणः मध्यन्दा
रु नातिह्रस्वं नातिदीर्घमित्यर्थः द्वीपादनुसमुद्रं यञ् समुद्रसमीपे यो द्वीपः तद्विषयाद्द्वीपशब्दाद्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पू॰
४६

ला। प्रदोषावस्कराद्वुन् पूर्वाह्णकः अपराह्णकः आर्द्रकः मूलकः प्रदोषकः अवस्करकः पंथः पंथच पथि जातः पंथकः

अमावास्याया वा अमावास्यकः अमावास्यः अच अमावास्यः सिंधपकराभ्यां कन् सिंधुकः कच्छाद्यणि मनुष्यवुञि च प्रा

प्ते अपकरकः औत्सर्गिके ण्य प्राप्ते अण् औच क्रमात्स्मः सैंधवः आपकरः। श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपु

नर्वसुहस्तविशाखाषाढाबहुलाल्लुक् एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात् लुक्तद्धितलुकि तद्धि

तलुकि उपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात् [illegible] श्रविष्ठासु जातः श्रविष्ठः फल्गुन इत्यादि चित्रारेवतीरोहिणीभ्यः स्त्रिया

मुपसंख्यानम् चित्रायां जाता चित्रा रेवती रोहिणी आभ्यां लुक् तद्धितलुकीति लुकि कृते तिष्यपुष्यादेरास्तिगण्यत्वा

२२५

न्नर्ङीष् फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ स्त्रियामित्येव फल्गुनी अषाढा श्रविष्ठाषाढाभ्यां छण् वक्तव्यः स्त्रियाम

पि श्राविष्ठीयः आषाढीयः जे प्रोष्ठपदानाम् प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धि जातार्थे ञ्णिति किति च

प्रोष्ठपदासु जातः प्रौष्ठपादो माणवकः जे इति किम् प्रोष्ठपदासु भवः प्रौष्ठपदः बहुवचननिर्देशात्पर्यायोऽपि गृह्यते भद्र

पादः स्थानान्तगोशालखरशालाच्च एभ्यो जातार्थस्य लुक् स्यात् गोस्थाने जातः गोस्थानः गोशालः खरशालः विभा

षा सेनेति नपुंसकत्वे ह्रस्वत्वम् वत्सशालाभिजिदश्वयुक्शतभिषजो वा। एभ्यो जातार्थस्य लुग्वा स्यात् वत्सशा राम॰

लेजातः वत्सशालः वात्सशाल इत्यादि जातार्थे प्रतिप्रसूतोऽयमाडिवक्तव्यः शातभिषः शातभिषजः शतभिष ४६

क्। नक्षत्रेभ्यो बहुलम् जातार्थप्रत्ययस्य बहुलं लुक् स्यात् रोहिणः रौहिणः कृतलब्धक्रीतकुशलाः तत्रेत्येव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शरिभ्यस्त्यो वक्तव्यः चिरत्नम् परुत्नम् परारित्नम् अग्रादिपश्चाड्डिमच् अग्रिमम् आदिमम् अन्ताच्च
अन्तिमम् विभाषा पूर्वाह्णापराह्णाभ्याम् आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च पक्षे ठञ् पूर्वाह्णेतनम् अपराह्णे-
तनम् घकालतनेष्विति लुक् पूर्वाह्णः सोढोस्येति विग्रहे तु पूर्वाह्णतनम् पौर्वाह्णिकम् अपराह्णतनम् आ-
पराह्णिकम् तत्र जातः सप्तमी समर्थाज्जात इत्यर्थे अणादयो घादयश्च स्युः स्रुघ्ने जातः स्रौघ्नः औत्सः राष्ट्रि-
यः अवारपारीण इत्यादि प्रावृष एण्य एतस्यापवादः प्रावृषि जातः प्रावृषिकः संज्ञायां शरदो वुञ् ऋत्व-
णोपवादः शारदका दर्भविशेषा मुद्गविशेषाश्च उत्तरपदस्य अधिकारोयं हनस्त इत्यस्मात्प्राक् अव-
यवादृतोः अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च पूर्ववार्षिकः नेपरे
अपरहैमनः अवयवात्किम् पूर्वासु वर्षासु भवः पौर्ववर्षिकः ऋतोर्वृद्धिमद्विधाववयवानामिति तदन्तवि-
धिः पूर्वत्र इह तु न अवयवत्वाभावात् सुसर्वार्धाज्जनपदस्य उत्तरपदस्य वृद्धिः सुपाञ्चालकः सर्वपाञ्चा-
लकः अर्धपाञ्चालकः जनपदतदवध्योरिति वुञ् सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः दिशो-
ऽमद्राणाम् दिग्वाचकाज्जनपदवाचिनो वृद्धिः पूर्वपाञ्चालकः दिशः किम् पूर्वपञ्चालानामयं पौर्वपञ्चालः अ-
मद्राणां किम् पौर्वमद्रः योगविभाग उत्तरार्थः प्राचां ग्रामनगराणाम् दिशः परेषां ग्रामवाचिनां नगरवाचि-
नां च वृद्धिः पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः ग्रामो ग्रामः नगरे पूर्वपाटलिपुत्रकः पूर्वाह्णापराह्णार्द्रम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पू॰
६७

नागरः पौर्वनागरः प्राचां किम् मद्रनगरमुदक्षु तत्र भवः माद्रनगरः जंगलधेनुवलजान्तस्य विभाषितमुत्तरम् जंगलाद्यन्तस्यांगस्य पूर्वपदस्याचामादेरचो वृद्धिः उत्तरपदस्य वा ञ्णिति किति च कुरुजंगले भवं कौरुजंगलं कौरुजांगलम् वैश्वधेनवम् वैश्वधैनवम् सौवर्णवलजम् सौवर्णवालजम् इति कुक्षिकलशिवस्त्यस्त्यहेर्ढञ् द्वार्त्ते यं कौक्षेयम् कलशिर्घटः तत्र भवं कालशेयम् ग्रीवाभ्योऽण् च चाड्ढञ् ग्रैवेयम् ग्रैवम् गंभीराञ्ञ्यः गंभीरे भवं गांभीर्यम् अव्ययीभावाच्च परिमुखं भवं पारिमुख्यम् परिमुखादिभ्य एवेष्यते नेह औपकूलः अन्तःपूर्वपदाट्ठञ् अव्ययीभावादित्येव वेश्मनि इति अन्तर्वेश्मं तत्र भवमान्तर्वेश्मिकम् आन्तर्गणिकम् अध्यात्मादेष्ठञिष्यते अध्यात्मं भवमाध्यात्मिकम् अनुशतिकादीनां च एषामुभयपदवृद्धिः स्यात् ञ्णिति किति च आधिदैविकम् आधिभौतिकम् ऐहलौकिकम् पारलौकिकम् [illegible] अध्यात्मादिराकृतिगणः देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् एषां पंचानां वृद्धिप्राप्तावादेरच आत् ञ्णिति किति च दाविकम् देविकाकूले भवा दाविकाकूलाः शालयः शिंशपाया विकारः शांशपश्चमसः पलाशादिभ्यो वेत्यञ् दित्यौहम् दात्यौहम् दीर्घसत्रे भवं दीर्घसत्रम् श्रेयसि भवं श्रायसम् ग्रामात्पर्यनुपूर्वात् ठञ् स्यात् अव्ययीभावादित्येव पारिग्रामिकः आनुग्रामिकः जिह्वामूलांगुलेश्छः जिह्वामूलीयम् अंगुलीयम् वर्गान्ताच्च कवर्गीयम् अशब्दे यत्खावन्यतरस्याम् पक्षे पूर्वेण छः मद्वर्ग्यः मद्वर्गीणः मद्वर्गीयः अशब्दे किम् कवर्गीयो वर्णः कर्ण

225

राम॰
६७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः प्रायभवः तत्रेत्येव स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः उपजानूपक-
र्णोपनीवेष्ठक् औपजानुकः औपकर्णिकः औपनीविकः संभूते स्रुघ्ने संभवति स्रौघ्नः कोशाड्ढञ् कौशेयं
वस्त्रम् कालात्साधुपुष्प्यत्पच्यमानेषु हेमंते साधुः हैमंतः प्राकारः वसंते पुष्प्यंति वासंत्यः कुंदलताः शरदि पच्यं-
ते शारदाः शालयः उप्ते च हेमन्ते उप्यन्ते हैमंता यवाः आश्वयुज्या वुञ् ठञोपवादः आश्वयुज्याम् उप्ता आश्वयु-
जकाः माषाः ग्रीष्मवसंतादन्यतरस्याम् पक्षे ऋत्वण् ग्रैष्मकं ग्रैष्मम् वासन्तकम् वासन्तम् देयमृणे कालादि-
त्येव मासे देयमृणं मासिकम् कलाप्यश्वत्थयवबुसाद्वुन् ॥ ऽ यस्मिन्काले मयूराः कलापिनो भवन्ति स उपचा-
रात्कलापी कालः तत्र देयमृणं कलापकम् अश्वत्थस्य फलमश्वत्थः तद्युक्तः कालोऽश्वत्थः यस्मिन्कालेऽश्वत्थाः फ-
लंति तत्र देयमृणमश्वत्थकम् यस्मिन्काले यवबुसमुत्पद्यते तत्र देयमृणं यवबुसकम् ग्रीष्मावरसमाद्वुञ् ग्रीष्मे
देयमृणं ग्रैष्मकम् आवरसमकम् संवत्सराग्रहायणीभ्यां ठञ् च वुञ् सांवत्सरिकम् सांवत्सरकम् आग्रहा- आग्रहायणिकं
यणकम् व्याहरति मृगः कालवाचिनः सप्तम्यन्ताद्व्याहरतीत्यर्थे अण् स्यात् सः यो व्याहरति स मृगश्चेत् निशा-
यां व्याहरति नैशो मृगः नैशिकः तदस्य सोढम् कालादित्येव निशा सहचरितमध्ययनं निशा तत्सोढमस्य नैशः नैशि-
कः तत्र भवः स्रुघ्ने भवः स्रौघ्नः राष्ट्रियः दिगादिभ्यो यत् दिश्यम् वर्ग्यम् शरीरावयवाच्च दंत्यम् कर्ण्यम्
प्राच्यां नगरांते प्राच्यां देशे नगरान्ते ऽपूर्वपदस्योत्तरपदस्य चामादेरचो वृद्धिः ञ्णिति किति च स्रुघ्ननगरे भवः स्रौघ्न-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्युक्तं अपत्यप्रत्ययान्तात आगतः इत्यस्मिन्नर्थे वुञ् वत्सत्यप्राप्तुः =१

मातृकं १

सि॰ कौ॰ पृ॰ ४०८

बुञोऽपवादः हौतृकं भ्रातृकं पितुर्यच्च चात् ठञ् ऋतष्ठञ् ठीऽङ्कृतः यस्येति लोपः पित्र्यम् पैतृकम् गोत्रादङ्कवत् विदेभ्य आगतः वैदम् गार्गम् औपगवकम् नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् नञः परेषामुच्यादीपं चानामादेरचो वृद्धिः पूर्वपदस्य तु वा इत्यादौ आशौचं अशौचम् आनैश्वर्यम् आक्षेत्रज्ञम् अक्षेत्रज्ञम् आकौशलम् अकौशलम् आनैपुणम् अनैपुणम् हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः समादागतम् समरूप्यम् विषमरूप्यम् पक्षे गहादित्वाच्छः समीयम् विषमीयम् देवदत्तरूप्यम् दैवदत्तम् मयट् च सममयम् ... विषम... समीयम् देवदत्तमयम् प्रभवति तस्मै हिमवतः प्रभवति हैमवती गङ्गा विदूराञ्ञ्यः विदूरात्प्रभवति वैदूर्यो मणिः तद्गच्छति पथिदूतयोः स्रुघ्नं गच्छति स्रौघ्नः पन्थाः दूतो वा अभिनिष्क्रामति द्वारम् तदित्येव स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारं अधिकृत्य कृते ग्रन्थे तदित्येव शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः शारीरकंभाष्यमिति त्वभेदोपचारात् शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः शिशूनां क्रन्दनं शिशुक्रन्दनं तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः यमस्य सभा यमसभं क्लीबत्वं निपातनात् यमसभीयः किरातार्जुनीयं इन्द्रजननादिराकृतिगणः इन्द्रजननीयं विरुद्धभोजनीयं सोऽस्य निवासः स्रुघ्नो निवासोऽस्य स्रौघ्नः अभिजनश्च स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः यत्र स्वयं वसति स निवासः यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः आयुधजीविभ्यश्छः पर्वते पर्वतवाचिनः प्रथमान्तादस्मिन्नर्थे छः स्यात् हृद्गोलः पर्वतोऽभिजन एषामायुधजीविनां ते हृद्गोलीयाः आयुधेति किम् ऋक्षोदः पर्वतोऽभिजनोऽ

संघांकेऽस्यास्तिनाश्रुंक्ताधैः तिथ्यादि इति तः इतीरावचप्रति अतादयश्च औपगवकमित्यादिगोत्रवरणादि तिन्नुठञ्श्च अतैस्वह इतीराथधूर्गानामङ्क्ष =२

२२०

राम॰ ५८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ललाटात्कनलंकारे कर्णिकाललाटिका तस्यव्याख्यानं इति चव्याख्यातव्यनाम्नः सुपांव्याख्यानः सौपोग्रं
प्यः लैङः सैङ्गः सुप्सुभवंसौपम् वकृचोन्नोरात्ता दुन्त् षत्वंणत्वयोर्विधायकं शास्त्रं षत्वणत्वे तस्यव्याख्या
नस्तत्रभवोवाषात्वणत्विकः क्रतुयज्ञेभ्यश्च सोमसाध्येषुयागेष्वेतौप्रसिद्धौ तत्रान्यतरोपादानेनसिद्धे
उभयोपादानसामर्थ्यादसोमकाअपीहग्रहणं अग्निष्टोमस्यव्याख्यानस्तत्रभवोवाग्निष्टोमिकः वाजपे
यिकः पाकयज्ञिकः नावयज्ञिकः बहुवचनंस्वरूपविधिनिरासार्थम् अनंतोदात्तार्थआरंभः अध्याये
ष्ववर्षेः ऋषिशब्देभ्योलक्षणयाव्याख्येयसंप्रवृत्तिभ्योभवेव्याख्यानेचाध्यायेठञ्स्यात् वसिष्ठेनदृष्टो
मंत्रोवसिष्ठस्तस्यव्याख्यानस्तत्रभवोवावासिष्ठिकोध्यायः अध्यायेषुकिम् वासिष्ठीऋक् पौरोडाश
पुरोडाशात्ष्ठन् पुरोडाशसहचरितोमंत्रःपुरोडाशः सएवपौरोडाशः तत्रष्ठन् पौरोडाशिकः
पुरोडाशिकः छंदसोयदणौ छंदस्यः छांदसः व्यजन्द्वाह्मणप्रथमाध्वरपुरश्चरणनामाख्याता
दृ[illegible]क् ऋचः ऐष्टिकः पाशुकः अत्र चातुर्होतृकः ब्राह्मणिकः आर्चिकः इत्यादि अणगयनादिभ्यः
ठञा[illegible]पवादः आर्गयनः औपनिषदः वैयाकरणः ततआगतः अभाददगतसोऽयः ठगायस्थानेभ्यः
शुल्कशालायाआगतः शौल्कशालिकः शुंडिकादिभ्योण् आयस्थानठकाठादीनांचापवादः शुंडि
कादागतः शौंडिकः कार्कणः नैर्वः विद्यायोनिसंबंधेभ्योवुञ् औपाध्यायकः पैतामहकः अत्रष्ठञ्
एत्वेनस्वामीस्वामिनमयंमेतिवा ऽयः स्वामीग्राह्यभागः
सपाक्षिन्नुत्स्यदंतेतराय स्यानं = ३

नामाख्यातग्रहणं संघातविगृहीतार्थं तत्र नामग्रहणस्य ख्या
देवसिद्धे विगृहीतग्रहणं आख्यातार्थमिति निरोद्धेये = ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ पू॰ ११९

लाप्यंतेवासिभ्यः हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः वैशंपायनांतेवासिभ्यः आलंबिनः पुराणप्रोक्तेषु ब्रा
ह्मणकल्पेषु तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात् यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवंति पुराणेन
चिरंतनेन मुनिना प्रोक्ताः भल्लुः भाल्लविनः शाट्यायनः शाट्यायनिनः कल्पे पिंगः पैंगी कल्पः पुरेति किं या
ज्ञवल्क्यानि ब्राह्मणानि आश्मरथः कल्पः अणि आपत्यस्येति यलोपः कठचरकाल्लुक् आभ्यां प्रोक्तप्रत्यय
स्यालुक् स्यात् कठेन प्रोक्तमधीयते कठाः चरकाः कलापिनोऽण् कलापिना प्रोक्तमधीयते कालापाः नांतस्य टिलो
पे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसं
ख्यानमिति टिलोपः छगलिनो ढिनुक् छगलिना प्रोक्तमधीयते छागलेयिनः पाराशर्यशिलालि
भ्यां भिक्षुनटसूत्रयोः णिनिः स्यात् पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणः भिक्षवः शैलालिनो न
टाः कर्मंदकृशाश्वादिनिः भिक्षुनटसूत्रयोरित्येव कर्मंदेन प्रोक्तमधीयते कर्मंदिनो भिक्षवः कृशाश्विनो नटाः
तेनैकदिक् सुदाम्नाद्रिणा एकदिक् सौदामनी तसिश्च स्वरादिपाठादव्ययत्वं पीलुमूलेन एकदिक् पीलुमूलतः
उरसो यच्च चात्तसिः अणोपवादः उरसा एकदिक् उरस्यः उरस्तः उपज्ञाते तेनेत्येव पाणिनिना उपज्ञातं पाणि
नीयं कृते ग्रंथे वररुचिना कृतो ग्रंथो वाररुचो संज्ञायां तेनेत्येव अग्रंथार्थमिदं मक्षिकाभिः कृतं माक्षिकं
मधु कुलालादिभ्यो वुञ् तेन कृते संज्ञायां क्षुद्राभिः कृतं क्षौद्रं भ्रामरं वाटरं पादपं तस्येदं उपगोरिदमौप

कुलालेन कृतं कौलालकं वारुडकं क्षुद्राभ्रमरवटर पादपादञ्

227

सम॰ ११९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यांते आसौंदाः द्विजाः पांडिकाद्भ्यो ञ्यः पांडिको भिजनोस्य पांडिक्यः सिंधुतक्षशिलादिभ्योणञौ सिंध्वादिभ्यो
ण् तक्षशिलादिभ्योञ् यथासंख्यं सैंधवः तक्षशिला नगरी अभिजनोस्य ताक्षशिलः तूदीसलातुरवर्मतीकू
चवाराड्ढक्छण्ढञ्यकः तूदी अभिजनोस्य तौदेयः शालातुरीयः वार्मतेयः कौचवार्यः भक्तिः सोस्य
नुवर्त्तते भज्यते सेव्यते इति भक्तिः स्रुघ्नो भक्तिरस्य स्रौघ्नः अचित्ताददेशकालाट्ठक् अपूपा भक्तिरस्य आपू
पिकः पायसिकः अचित्तात्किम् दैवदत्तः अदेशात्किम् स्रौघ्नः अकालात्किम् ग्रैष्मः महाराजाट्ठञ् माहारा
जिकः वासुदेवार्जुनाभ्यां वुन् वासुदेवकः आर्जुनकः गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् अणोपवादः परत्वाद् भौ ६
छं बाधते ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः नाकुलकः बहुलग्रहणान्नेह पाणिनो भक्तिरस्य पा
णिनीयः जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने जनपदस्वामिवाचिनां बहुवचने ज
नपदवाचिना समानश्रुतीनां जनपदवत्सर्वं स्यात्प्रत्ययः प्रकृतिश्च जनपदतद्वध्योश्चेति प्रकरणे ये प्रत्यया
उक्तास्ते त्रातिदिश्यंते आंगाः जनपदो भक्तिरस्य आंगकः अंगाः क्षत्रिया भक्तिरस्य आंगकः जनपदिनां किं पंचालाद्ब्राह्म
णो भक्तिरस्य पांचालः जनपदेनेति किं पौरवो राजा भक्तिरस्य पौरवीयः तेन प्रोक्तं पाणिनिना प्रोक्तं पाणिनीयं
तित्तिरिवरतन्तुखण्डिकोखाच्छण् छंदो ब्राह्मणानि इति तद्विषयता तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः काश्य
पकौशिकाभ्यामृषिभ्यां णिनिः काश्यपेन प्रोक्तमधीयते काश्यपिनः कलापिवैशंपायनांतेवासिभ्यश्च क

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पृ॰
१००

पालाशादण् कौपिंजलः गोत्रवुञोपवादः हास्तिपादस्यापत्यं हास्तिपादः तस्यायं हास्तिपदः आथर्वणिकस्येक
लोपश्च अण्स्यात् आथर्वणिकस्यायमाथर्वणो धर्मे आम्नायो वा चरणाद्वुञोपवादः समाप्ताः शैषिकाः तस्य
विकारः अश्मनो विकारे टिलोपो वक्तव्यः अश्मनो विकारः आश्मः भास्मनः मार्त्तिकः अवयवे च प्राण्योषधिवृ
क्षेभ्यः चाद्विकारे मयूरस्यावयवो विकारो वा मायूरं मौर्वं काण्डं भस्म वा पैप्पलं बिल्वादिभ्योण् बैल्वः कोपधाच्च
अणोपवादः तर्कु तार्कवं तैत्तिडीकं त्रपुजतुनोः षुक् आभ्यामण् स्यात् विकारे एतयोः षुगागमश्च त्रापु
भाद्रदारनं ६ षं जातुषं ओरञ् दैवदारवं अनुदात्तादेश्च दाधित्थं कापित्थं पलाशादिभ्यो वा पालाशं कारीरं शम्याष्ट्
लञ् शामीलं भस्म स्त्रियां ङीष् शामीली स्रुक् मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः प्रकृतिमात्रान्मयड्वा।
स्याद्विकारावयवयोः अश्ममयं आश्मनं अभक्ष्येत्यादि किं मौद्गः सूपः कार्पासमाच्छादनं नित्यं वृद्धशरादि
२२४ भ्यः आम्रमयं शरमयं एकाचो नित्यं त्वङ्मयं कथं तर्हि आप्यमम्मयमिति न स्यादित्यणंतात्स्वार्थेष्यञ्
कथं तर्हि पैष्टी सुरेति सामान्य विवक्षायां न स्यादित्यण् संज्ञायां कन् पिष्टादिसेव पिष्टस्य विकारविशेषः
पिष्टकः पूपो पूपः पिष्टकः स्यात् व्रीहेः पुरोडाशे मयट् स्यात् बिल्वाद्यणोपवादः व्रीहिमयः पुरोडाशः ब्रै राम॰ १००
ह्यमन्यत् असंज्ञायां तिलयवाभ्यां तिलमयं यवमयं संज्ञायां तु तैलं यावकः तालादिभ्योण् अन्मयटोर
पिष्टाच्च मयट् स्यात् विकारे पिष्टमयं भस्म

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वहे स्तुरणोङ् संबोद्धुः स्वं सांवहित्रं आग्नीध्रः शरणे रण् भं च आग्नि मिन्धे आग्नीत् तस्य स्थानं आग्नीध्रं ता
स्माँत्सोप्याग्नीध्रः समिधामाधाने षेण्यण् सामिधेन्यो मंत्रः सामिधेनी अरुः रथाद्यत् रथ्यं चक्रं पत्त्रपूर्वाद
ञ् पात्त्रंवाहनं आश्वरथस्येदं आश्वरथं पत्राध्वर्युपरिषदश्च अञ् पत्राद्वाहे अश्वस्येदं वाहनं यमाश्वं आ
ध्वर्यवं पारिषदं हलसीराट्ठक् हालिकं सैरिकं द्वंद्वाद्वुन्वैरमैथुनिकयोः काकोलुकिका कुत्सकुशिकिका
२५ द्वंद्वे वासुरादिभ्यः प्रतिषेधः दैवासुरं गोत्रचरणाद्वुञ् औपगवकं चरणाद्धर्माम्नाययोरिति वक्तव्यं काठकं
संघांकलक्षणेष्वञ्यञिञामण् घोषग्रहणमपि कर्तव्यं अञ् वैदः संघो को घोषो वा वैदं लक्षणं यञ् गार्गः
गार्गी इञ् दाक्षः दाक्षं परंपरासंबंधोंकः साक्षात्तु लक्षणं शाकलाद्वा अयमेवोक्तेऽर्थे पक्षे चरणत्वाद्वुञ् शा
कलेन प्रोक्तमधीयते शाकलास्तेषां संघो को घोषो वा शाकलः शाकलकः लक्षणे क्लीबता छंदोगौक्थि
कयाज्ञिकबह्वृचनटाञ्ञ्यः छंदोगानां धर्म आम्नायो वा छांदोग्यं औक्थिक्यं याज्ञिक्यं बाह्वृच्यं नाट्यं
चरणाद्धर्माम्नाययोरित्युक्तं तत्साहचर्यान्नटाच्छब्दात्त्पितयोरेव नदंडमाणवांतेवासिषुः दंडप्रधाना मा
णवा दंडमाणवास्तेषु शिष्येषु च वुञ्न स्यात् दाक्षाः दंडमाणवाः शिष्या वा रैवतिकादिभ्यश्छः तस्येदमि
त्यर्थे वुञोपवादः रैवतिकीयः वैजवापीयः कौपिंजलहास्तिपदादण्वाच्यः कौपिंजलस्यापत्यं इहेवनि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पृ॰
१०१

भ्यः फलपाकात्ययस्य लुक् स्यात् हरितक्यादीनां लिंगमेव प्रकृतिवत् हरितक्याः फलानि हरितक्यः कंसीय
परशव्ययोर्यञञौ लुक् कंसीयपरशव्याभ्यां यञञौ स्तः छयतोश्च लुक् कंसाय हितं कंसीयं तस्य विकारः
कांस्यं परशवे हितं परशव्यं तस्य पारशवः प्राग्दीव्यतीयाः समाप्ताः प्राग्वहतेष्ठक् तद्वहतीत्यत प्राक् ठ
गधिक्रियते तदाहेति माशब्दादिभ्य उपसंख्यानं माशब्दः कारिशतिय आह समाशब्दिकः स्वागतादीनां च
ऐच् न स्यात् स्वागतमित्याह स्वागतिकः स्वाध्वरिकः स्वंगस्यापत्यं स्वांगिः व्यंगस्यापत्यं व्यांगिः व्यडस्यापत्यं
व्याडिः व्यवहारेण चरति व्यावहारिकः स्वपतौ साधु स्वापतेयं आहौ प्रभूतादिभ्यः प्रभूतमाह प्राभूतिकः
पार्याप्तिकः पृच्छतौ सुस्नातादिभ्यः सुस्नातं पृच्छति सौस्नातिकः सौखशायनिकः आनुशातिकादिः गच्छ
तौ परदारादिभ्यः पारदारिकः गौरुतल्पिकः तेन दीव्यति खनति जयति जितं अक्षैर्दीव्यति आक्षिकः अ
भ्याखनति आभ्रिकः अक्षैर्जयति आक्षिकः अक्षैर्जितमाक्षिकं संस्कृतं दध्ना संस्कृतं दाधिकं मारीचिकं
कुलत्थकोपधादण् ठकोऽपवादः कुलत्थैः संस्कृतं कौलत्थं तैत्तिडीकं तरति उडुपेन तरति औडुपिकः
गोपुच्छात् ठञ् गोपुच्छिकः नौद्व्यचष्ठन् नाविकः घटिकः बाहुभ्यां तरति बाहुका स्त्री चरति तृतीयांतात् गच्छ
ति भक्षयतीत्यर्थेप्ययं ठक् स्यात् हस्तिना चरति हास्तिकः शाकटिकः दध्ना चरति दाधिकः आकर्षात् ष्ठल् आ
कर्षो निकषोपलः आकर्षादिति पाठांतरं तेन चरति आकर्षिकः षित्वात् ङीष् आकर्षिकी पर्पादिभ्यष्ठ
न् पर्पेण चरति पर्पिकः पर्पिका येन पीठेन पंगवश्चरंति स पर्पः आश्विकः रथिकः श्वगणाट्ठञ्च चात् ष्ठ

२२९

राम॰
१०१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पवादः तालादिभ्यस्त्विति तालं धनुः अन्यत्र तालमयं ऐन्द्रायुधं जातरूपेभ्यः परिमाणे अण् बहुवचनात्सर्वा
पर्यग्रहणं हाटकः तापनीयः सौवर्णो निष्कः परिमाणे किं हाटकमयी यष्टिः प्राणिरजतादिभ्योऽञ् शौकं
वाकं राजतं ञितश्च तत्प्रत्ययात् ञित् यो विकारावयवार्थः प्रत्ययस्तदन्तादञ् स्यात् नयोरेवार्थयोः मय
टोऽपवादः शामीलस्य शामीलं दाधित्थं कापित्थं ञितः किं बैल्वमयं क्रीतवत्परिमाणात् प्राग्वतेष्ठञ् इ
त्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्ते तथैव विकारे निर्दिश्यन्ते आर्हादीनामपवादः
निष्केण क्रीतं नैष्किकं एवं निष्कस्य विकारोपि नैष्किकः शतस्य विकारः शत्यः शतिकः उष्ट्राद्वुञ् प्राण्य
ञोऽपवादः औष्ट्रकः उमोर्णयोर्वा औमं औमकं और्णं और्णकं वुञभावे यथायथं मयडणञौ एण्या ढ
ञ् ऐणेयं एणस्य तु ऐणं गोपयसोर्यत् गव्यं पयस्यं द्रोश्च द्रुर्वृक्षः तस्य विकारोऽवयवो वा द्रव्यं मानेवयः
द्रोरित्येव द्रुवयं यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं फले लुक् विकारावयवप्रत्ययस्य लुक् स्यात् फले आ
मलक्याः फलं आमलकं प्लक्षादिभ्योऽण् विधानसामर्थ्यान्न लुक् प्लाक्षं न्यग्रोधस्य च केवलस्य अस्यन
वृद्धिरैजागमश्च नैयग्रोधं जंब्वा वा जंबूशब्दात्फलेऽण्वा स्यात् जांबवं पक्षे ओरञ् तस्य लुक् लुप्च जंबु जंबु: ४
फलप्रत्ययस्य लुब्वा स्यात् लुपि युक्तवत् जंब्वाः फलं जंबूः फलपाकशुषामुपसंख्यानम् व्रीहयः मुद्गाः पु
ष्पमूलेषु बहुलम् मल्लिकायाः पुष्पं मल्लिका जात्याः पुष्पं जाती विदार्या मूलं विदारी बहुलग्रहणा
न्नेह पाटलानि पुष्पाणि साल्वानि मूलानि बाहुलकात् क्वचिल्लुक् अशोकं करवीरं हरितक्यादिभ्यश्च ए

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वितियां त्प्रयच्छत्यर्थे ठक् स्यात् यत्तु
यच्छति तद्गर्ह्यं चेत् = ६

लवणाल्लुक् लवणेन संसृष्टो लवणः सूपः

सि॰ कौ॰ संसृष्टं दाधिकं चूर्णादिनिः चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः लवणाल्लुक् लवणेन संसृष्टो लवणः सूपः ओजःसहोम्भसा वर्तते
पृ॰ लवणांशात्कं मुद्गादण् मौद्गः ओदनः व्यञ्जनैरुपसिक्ते दध्ना उपसिक्तं दाधिकं ओजःसहोम्भसा वर्तते तत्प्रत्यनुपूर्वमीपलोमकूलम् द्वितीयांतादस्माद्
१०२ ओजसिकः शूरः साहसिकः चौरः आंभसिको मत्स्यः तत्प्रत्यनुपूर्वमीपलोमकूलम् द्वितीयांतादस्माद्
वर्तते ऽस्मिन्नर्थे ठक् स्यात् क्रियाविशेषणत्वात् द्वितीया प्रतीपं वर्तते प्रातीपिकः आन्वीपिकः प्राति
लोमिकः आनुलोमिकः प्रातिकूलिकः आनुकूलिकः परिमुखं च परिमुखं वर्तते पारिमुखिकः चा
त्पारिपार्श्विकः प्रयच्छति गर्ह्यं द्विगुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः त्रैगुणिकः वृद्धेर्वृधुषिभा
वो वक्तव्यः वार्धुषिकः कुसीददशैकादशात् ष्ठन्ष्ठचौ गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छत्यर्थे कु
सीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छति कुसीदिकः कुसीदिकी एकादशार्थत्वाद् एकादश दत्तव
स्तुतो दशात्रेति विग्रहे कारः समासांत इहैव सूत्रे निपात्यते दशैकादशिकः दशैकादशिकी दशै
का दशान्प्रयच्छतीत्यत्तमणे एवेहापि तद्धितार्थः उञ्छति बदराण्युञ्छति बादरिकः रक्षति समा
जं रक्षति सामाजिकः शब्ददर्दुरं करोति शब्दं करोति शाब्दिकः दार्दुरिकः पक्षिमत्स्यमृगान्हन्ति स्व रामः
रूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्यायेषु मीनस्यैव पक्षिणो हन्ति पाक्षिकः शाकुनिकः १०२
मायूरिकः मात्स्यिकः मैनिकः शाकुलिकः मार्गिकः हारिणिकः सारंगिकः परिपन्थं च तिष्ठति असमा ति १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दशदत्ता एकादशगृह्णाति तस्येव गर्ह्यत्वादिति भावः = ५

तिनेवेधस्तस्मेव यस्तत्त्वारादिषु तेदत्त विधिं ज्ञापयति। समर्थः १

न् श्वादेरिञि ऐचन श्वभस्त्रस्यापत्यं श्वाभस्त्रिः श्वादंष्ट्रिः तदादिविधौ चेतदेव ज्ञापकं इकारादाविति वाच्यं श्वगणेन चरति श्वागणिकः श्वागणिकी श्वागणिकः श्वगणिकी पदान्त स्यान्यतरस्यां श्वादे रिगस्य पदस्य वृद्धांतस्ये ज्वाश्वापदस्येदं श्वापदं शौवापदं वेतनादिभ्यो जीवति वेतनेन जीवति वैतनिकः धानुष्कः वस्नक्रयविक्रयाट्ठन् वस्नेन मूल्येन जीवति वस्निकः क्रयविक्रयसंघातविगृहीतार्थौ क्रयविक्रयिकः क्रयिकः विक्रयिकः आयुधाच्छ च चाट्ठन् आयुधेन जीवति आयुधीयः आयुधिकः हरत्युत्संगादिभ्यः उत्संगेन हरत्यौत्संगिकः भस्त्रादिभ्यष्ठन् भस्त्रया हरति भस्त्रिकः षित्वाङ् भस्त्रिकी विभाषा विवधात् विवधेन हरति विवधिकः पक्षे ठक् वैवधिकः एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन् वीवधिकः वीवधिकी विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कंधवाह्ये काष्ठे व

१८५ र्तेते अण् कुटिलिकायाः कुटिलिका व्याधानां गतिविशेषः कर्मारोपकरणभूतं लोहं च कुटिलिकया हरति मृगान् अंगारान् कौटिलिको व्याधः कर्मारश्च निर्वृत्तेऽक्षद्यूतादिभ्यः अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरं क्त्रेर्मम्नित्यं त्रिप्रत्ययान्तप्रकृतिकात् तृतीयान्तान्निर्वृत्तेऽर्थे मप्स्यान्नित्यं कृत्वा निर्वृत्तं कृत्रिमं पक्त्रिमं भावप्रत्ययान्तादिमप् वक्तव्यः पाकेन निर्वृत्तं पाकिमं त्यागिमं अपमित्ययाचिताभ्यां कक्कनौ अपमित्येति ल्यबन्तं अपमित्य निर्वृत्तमापमित्यकं याचितेन निर्वृत्तं याचितकं संसृष्टे दध्ना

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ किसरादिभ्यः ष्ठन् किसरं पण्यमस्य किसरिकः षित्वान्ङीष् किसरिकी किसर २ उपीर २ नलद २ स्यादि किसराद
श॰ यः सर्वे सुगंधिद्रव्यविशेषवाचिनः शलालुनोऽन्यतरस्यां ष्ठन् पक्षे ठक् शलालुकः शलालुकी शालालु
१०३ कः शालालुकी शलालुः सुगंधिद्रव्यविशेषः शिल्पं मृदंगवादनं शिल्पं मार्दंगिकः मड्डुकझर्झरादन्यतरस्यां मस्य २
मड्डुकवादनं शिल्पमस्य माड्डुकः माड्डुकिकः झार्झरः झार्झरिकः प्रहरणं तदस्येत्येव असिः प्रहरणमस्य आ
सिकः धानुष्कः परश्वधाट्ठञ्च पारश्वधिकः शक्तियष्ट्योरीकक् शाक्तीकः याष्टीकः अस्तिनास्तिदिष्टं म
तिः तदस्येत्येव अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः नास्तीति मतिर्यस्य स नास्तिकः दिष्टं मतिर्य
स्य स दैष्टिकः शीलं अपूपभक्षणं शीलमस्य आपूपिकः छत्रादिभ्यो णः गुरोर्दोषाणामावरणं छत्रं तत्
शीलमस्य छात्रः कार्मस्ताच्छील्ये कार्म इति ताच्छील्ये टिलोपो निपात्यते कर्मशीलः कार्मः नस्तद्धिते इत्येवं
231 सिद्धे णकार्यं ताच्छीलिके णेऽपि तेन चौरी तापसीत्यादि सिद्धम् ताच्छील्ये किं कार्मणः कर्माध्ययने वृत्तं प्रथमां
तात्स्वर्थे ठक् स्यात् अध्ययने वृत्ता या क्रिया सा चेत् प्रथमांतस्यार्थः एकं अन्यत् वृत्तं अस्य ऐकान्यिकः यस्या
ध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः बह्वच्पूर्वपदात् ठच् प्राग्विषये द्वादशा रामः
न्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः द्वादशापपाठाः अस्य जाता इत्यर्थः हितं भक्षाः अपूपभक्षणं । १०३
हितमस्मै आपूपिकः तदस्मै दीयते नियुक्तं अग्रभोजनं नियुक्तं दीयतेऽस्मै आग्रभोजनिकः श्राणामांसौद

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तृतीयान्तात् हरति हरतीत्यर्थे ठक् स्यात् पथ्यन्तं वर्जयित्वा आप्यवाति तिष्ठति पारिपन्थिकश्चौरः परिपन्थं
च तिष्ठति पारिपन्थिकः माथोत्तरपदपदव्यनुपदं धावति दण्डाकारो माथः पन्थाः दण्डमाथं धावति
दाण्डमाथिकः पादविकः आनुपदिकः आक्रन्दाट्ठञ्च आक्रन्दात् स्यात् चात् ठक् धावत्यर्थे आक्रन्दं
दाण्डमाथिकः पादविकः आनुपदिकः आक्रन्दिकः पदोत्तरपदं गृह्णाति पूर्वपदं गृह्णाति पौर्वपदिकः औत्तरपदि
कः आक्रन्दिकः प्रतिकण्ठार्थललामं च गृह्णात्यर्थे ठक् प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः आर्थिकः लालामि
कः धर्मं चरति धार्मिकः अधर्माच्चेति वक्तव्यम् आधर्मिकः प्रतिपथमेति ठंश्च प्रतिपथमेति प्रातिप
थिकः समवायान् समवैति सामवायिकः सामूहिकः परिषदो ण्यः परिषदं समवैति पारिषद्यः सेना
या वा ण्यः स्यात् पक्षे ठक् सैन्याः सैनिकः संज्ञायां ललाटकुक्कुट्यौ पश्यति ललाटं पश्यति लालाटिकः
सेवकः कुक्कुटीशब्देन तत्पातार्हो स्वल्पदेशो लक्ष्यते कौक्कुटिकः भिक्षुः तस्य धर्म्यं आपणिकस्य आ
पणिकम् महिष्यादिभ्यः महिष्याः धर्म्यं माहिषं याजमानं ऋतोऽञ् पातुर्धर्म्यं पात्रं नराच्चेति वक्तव्यं नरस्य धर्म्या
नारी विशसितुरिड्लोपश्चाञ्सन्नियोगेन वक्तव्यः विशसितुर्धर्म्यं वैशस्त्रं विभाजयितुर्णिलोपश्चाञ्च वाच्यः
विभाजयितुर्धर्म्यं वैभाजित्रं अवक्रयः षष्ठ्यन्तात् ठक् स्यात् अवक्रयेऽर्थे आपणस्यावक्रय आपणि
कः राजग्रासं द्रव्यमवक्रयः तदस्य पण्यं अपूपाः पण्यमस्य आपूपिकः लवणाट्ठञ् लावणिकः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ स्यधनुषा द्वितीयान्ताद्विध्यतीत्यर्थे यत् स्यान्नचेत्तद्धनुःकरणं पादौ विध्यन्ति पद्याः शर्कराः धनगणं लब्धा तन्नं
पृ॰ लमेतत् धनं लब्धा धन्यः गणं लब्धा गण्यः अन्नाण्णः अन्नं लब्धा आन्नः वशंगतः वश्यः परेच्छानुचारी पद
१०५ मस्मिन्दृश्यं पद्यः कर्दमः नातिशुष्क इत्यर्थः मूलमस्याबर्हि आबर्हणमाबर्हः उत्पाटनं तदस्यास्तीति आ
बर्हि मूलमाबर्हि येषां ते मूल्या मुद्गाः संज्ञायां धेनुष्या धेनुशब्दस्य षुगागमो यप्रत्ययश्च स्वार्थे निपात्यते स
ज्ञायां धेनुष्या बंधके स्थिता गृहपतिना संयुक्ते ञ्यः गृहपतिर्यजमानः तेन संयुक्तो गार्हपत्योऽग्निः नौव
योधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु नावा तार्यं नाव्यं व
यसा तुल्यो वयस्यः धर्मेण प्राप्यं धर्म्यम् विषेण वध्यो विष्यः मूलेन आनाम्यं मूल्यं मूलेन समो मूल्यः सी
232 तया समितं सीत्यं क्षेत्रं तुलया संमितं तुल्यं धर्मपथ्यर्थन्यायादनपेते धर्मादनपेतं धर्म्यं पथ्यम् अर्थ्यं न्या
य्यं छंदसो निर्मिते छंदसा निर्मितं छंदस्यं इच्छया कृतमित्यर्थः उरसोऽण्च चाद्यत् उरसा निर्मितः पु
त्र औरसः उरस्यः हृदयस्य प्रियः हृद्यो देशः हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः बंधने चर्षौ
हृदयशब्दात् षष्ठ्यंतात् बंधने यत्स्याच्छंदे विषये हृदयस्य बंधनो हृद्यः वशीकरणमंत्रः मतजनहलात्कर
णजल्पकर्षेषु मतं ज्ञानं तस्य करणं भावः साधनं वा मत्यं जनस्य जल्पो जन्यः हलस्य कर्षो हल्यः तत्र सा राम॰
धुः अग्रे साम सु साधुः सामन्यः ये चाभावकर्मणोरिति प्रकृतिभावः कर्मण्यः शरण्यः प्रतिजनादिभ्यः १०५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नाट्ठन् श्राणा नियुक्तं दीयतेऽस्मै श्राणिकः श्राणिकी । मांसौदनग्रहणं संघातविगृहीतार्थं मांसौदनिकः मां
सिकः औदनिकः । भक्तादणन्यतरस्यां पक्षे ठक् भक्तमस्मै नियुक्तं दीयते भाक्तः भाक्तिकः तत्र नियुक्तः आकरे नि
युक्त आकरिकः अगारान्ताट्ठन् देवागारे नियुक्तो देवागारिकः । अध्यायिन्यदेशकालात् निषिद्धदेशकाल
वाचकात् ठक् स्यादध्येतरि श्मशानेऽधीते श्माशानिकः चतुर्दश्यामधीते चातुर्दशिकः कठिनान्तप्रस्तारसंस्था
नेषु व्यवहरति तत्रेत्येव वंशकठिने व्यवहरति वांशकठिनिकः वंशा वेणवः कठिना यस्मिन् देशे स वंशकठिनः
तस्मिन् देशे या क्रिया यथानुष्ठेया तां तथैवानुतिष्ठतीत्यर्थः प्रास्तारिकः सांस्थानिकः निकटे वसति नैकटिको भि
क्षुः आवसथात् ष्ठल् आवसथे वसति आवसथिकः षित्वान् ङीष् आवसथिकी आकर्षात्पर्पादेर्भस्त्रादि
भ्यः कुसीदसूत्राच्च आवसथात्किसरादेः षितः षडेते ठगधिकारे षडिति सूत्रषट्केन विहिता इत्यर्थः प्रत्य
यास्तु सप्त ठकोऽधिकारः समाप्तः प्राग्घिताद्यत् तस्मै हितमित्यतः प्राग्यदधिक्रियते तद्वहतिरथयुगप्रा
संगं रथं वहति रथ्यः युग्यः वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासंगः तं वहति प्रासंग्यः धुरो
यड्ढकौ हलि चेति दीर्घप्राप्ते न भकुर्छुरां भस्य कुर्छुरामित्युपधाया दीर्घो न स्यात् धुर्यः धौरेयः खः सर्व
धुरात् सर्वधुरां वहति सर्वधुरीणः एकधुराल्लुक् च एकधुरीणः एकधुरः शकटादण् शाकटं वहति शा
कटो गौः हलसीराट्ठक् हालिकः सैरिकः संज्ञायां जन्याः जनीं वधूं तां वहति प्रापयति जन्यो मित्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पृ॰
१०५

स्थूलादिरसस्तद्धं स्थौलशीर्षं खलयवमाषतिलवृषब्रह्मणश्च खलाय हितं खल्यं यव्यं ब्रह्मण्यं चाऽऽख्या द्रू२
अजाविभ्यां थ्यन् अजथ्या यूथिः अविथ्या आत्मन्विश्वजनभोगोत्तरपदात्खः आत्माध्वानौ खे एतौ खे
प्रकृत्या स्तः आत्मने हितं आत्मनीनं विश्वजनीनं कर्मधारयादेवेष्यते षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ
एव विश्वजनीयं पंचजनादुपसंख्यानं पंचजनीनं सर्वजनाट्ठञ्खश्च सार्वजनिकः सर्वजनीनः महा
जनाट्ठञ् माहाजनिकः मातृभोगीणः पितृभोगीणः राजभोगीनः आचार्यादणत्वं च आचार्यभो
गीनः सर्वपुरुषाभ्यां णढञौ सर्वाण्णो वेति वक्तव्यं सर्वस्मै हितं सार्वं सर्वीयं पुरुषाद्वधविकारसमूहतेनकृ
तेषु आध्यकारप्रयोगात्तेनेत्यस्य दृष्टमर्थे निर्देशः पुरुषवधः पौरुषेयः तस्येदमित्यणि प्राप्ते पुरुषस्य वि

233

कारः पौरुषेयः प्राणिरजतादिभ्योऽञित्यञि प्राप्ते समूहे त्वणि प्राप्ते एकाकिनोऽपि परितः पौरुषेयवृता
इवेति माघः तेन कृते ग्रन्थे त्वणि प्राप्ते अयं प्रत्ययः प्रासादादौ अप्राप्त एवेति विवेकः माणवचरकाभ्यां ख
ञ् माणवाय हितं माणवीनं चारकीणं तदर्थं विकृतेः प्रकृतौ। विकृतिवाचकात्तु चतुर्थ्यन्तात्तदर्थायां प्र
कृतौ वाच्यायां छः प्रत्ययः स्यात् अंगारेभ्य एतानि अंगारीयाणि काष्ठानि प्राकारीया इष्टकाः शंकव्यं दा
रु छदिरुपधिबलेर्ढञ् छादिषेयाणि तृणानि बालेयास्तंडुलाः उपधिशब्दात्स्वार्थे इष्यते उपधीयत इ राम॰
त्युपधिः रथांगं तदेव औपधेयं ऋषभोपानहोर्ञ्यः छस्यापवादः आर्षभ्यो वत्सः औपानह्यो मुंजः १०५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

खञ्। प्रतिजनं साधुः प्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वैश्वजनीनः। भक्ताण्णः। भक्ते साधवो भाक्ताः
शालयः। परिषदो ण्यः। पारिषद्यः। परिषद इति योगविभागात् णोऽपि पारिषदः। कथादिभ्यष्ठक्। कथायां साधुः काथिकः।
गुडादिभ्यष्ठञ्। गुडे साधुः गौडिक इक्षुः। साक्तुको यवः। पथ्यतिथिवसतिस्वपतेर्ढञ्। पथि साधुः पाथेयं। आतिथे-
यः। वसनं वसतिः। तत्र साधुः वासतेयी रात्रिः। स्वापतेयं धनं। सभाया यः। सभ्यः। समानतीर्थे वासी। साधुरिति निवृत्तं।
वसतीति वासी। समाने तीर्थे गुरौ वसतीति सतीर्थ्यः। समानोदरे शयित ओ चोदात्तः। समाने उदरे शयितः स्थि-
तः। समानोदर्यो भ्राता। सोदराद्यः। सोदर्यः। अथ छः प्राग्वत्। इति प्राग्घितीयाः। प्राक्क्रीताच्छः। तेन क्रीतमित्यतः
प्राक् छोऽधिक्रियते। उगवादिभ्यो यत्। प्राक्क्रीतादित्येव। उवर्णान्तात् गवादिभ्यश्च यत् स्यात्। छस्यापवादः। नाभि
नभं च। नभ्योऽक्षः। नभ्यमञ्जनं रथनाभावेवेदं। शुनः संप्रसारणं वा च दीर्घत्वं। शुन्यं शून्यं। ऊधसोऽनङ्। ऊधन्यः। चद
कंबलाच्च संज्ञायां यत्स्यात्। कंबल्यमूर्णापलशतं। संज्ञायां किं। कंबलीया ऊर्णा। विभाषा हविरपूपादिभ्यः।
आमिक्ष्यं दधि। आमिक्षीयं। पुरोडाश्यास्तंडुलाः। पुरोडाशीयाः। अपूप्यं अपूपीयाः। तस्मै हितं। वत्सेभ्यो हि-
तो वत्सीयो गोधुक्। शरीरावयवाद्यत्। दंत्यं कंठ्यं। नस्तनासिकायाः। यत्तस्तुद्रेषु न।
स्यं नाभ्यं। ये च तद्धिते। यादौ तद्धिते परे शिरःशब्दस्य शीर्षन्नादेशः स्यात्। शीर्षण्यः। तद्धिते किं। शिर इच्छति शि-
रस्यति। वा केशेषु। शीर्षण्याः शिरस्याः केशाः। अचि शीर्ष इति वाच्यं। अजादौ तद्धिते शिरसः शीर्षादेशः।
प्राक्क्रीतीयप्रकरणं तु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अस्मात् अणः यस्येति इकारलोपः पुनः टिड्ढेति ङीप् पक्षे आर्द्धखारी १

सि॰ कौ॰ अर्धप्रस्थिकं आर्धप्रस्थिकं अतः किं आर्धकौडविकं तपरः किं अर्धखार्यां भवा अर्धखारी आर्धखारी भा
पू॰ र्या इयत्र वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात् शताच्च ठन्यतावशते शतेन क्रीतं शतिकं शत्यं अशते किं तं२
१०६ शतं परिमाणमस्य शतकः संघातः इह प्रत्ययार्थो वस्तुतः परसंख्यार्थोऽन्नाभिधीयते न ठन्यतौ न किंतु कनेव अससमा
से इत्येव द्विशतेन क्रीतं द्विशतकं संख्याया अतिशदन्तायाः कन् संख्यायाः कन्स्यादार्हीयेष्वर्थेषु न तु तिशदन्ता
दन्तायाः पंचभिः क्रीतः पंचकः बहुकः त्यन्तायास्तु साप्ततिकः शदन्तायाः चात्वारिंशत्कः वतोरिड्वा वत्वन्ता
त्कन इड्वा स्यात् तावत्कः तावतिकः विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां योगविभागः कर्त्तव्यः आभ्यां कन् स्यात् ।
असंज्ञायां ड्वुन् स्यात् कनोऽपवादः विंशकः त्रिंशका संज्ञायां तु विंशतिकः त्रिंशत्कः कंसाट्टिठन् टो ङीब
र्थः इकार उच्चारणार्थः कंसिकः कंसिकी अर्धाच्चेति वक्तव्यं आर्धिकः आर्धिकी कार्षापणाट्टिठन्वक्तव्यः
प्रतिरादेशश्च वा कार्षापणिकः कार्षापणिकी प्रतिकः प्रतिकी शूर्पादञन्यतरस्यां शौर्पं शौर्पिकं शतमा
२४ नविंशतिकसहस्रवसनादण् एभ्योऽण् स्यात् ठञ्ठकनामपवादः शतमानेन क्रीतं शातमानं वैंशतिकं
साहस्रं वासनं अध्यर्धपूर्वद्विगोर्लुगसंज्ञायां अध्यर्धपूर्वात् द्विगोश्च परस्यार्हीयस्य लुक् स्यात् अध्यर्ध राम॰
कंसं द्विकंसं संज्ञायां तु पांचकलापिकं विभाषा कार्षापणसहस्राभ्यां लुग्वा स्यात् अध्यर्धकार्षापणं अध्य १०६
र्धकार्षापणिकं द्विकार्षापणं द्विकार्षापणिकं [illegible] नो लुक् पक्षे अध्यर्धप्रतिकं द्वि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

234

चर्मण्यप्ययमेव पूर्वप्रतिषेधेन अ्गेपानहं चर्मण्येव उक्त् चर्मण्यपि विकृतिस्तद्वाचकादस्यात् वाध्रैर्द
र्दवार्ध्रं चर्म तदस्य तदस्मिन्स्यादिति प्राकारमासामिष्टकानां स्यात्प्राकारीया इष्टकाः प्रासादीयंदारु
प्राकारोस्मिन्स्यात्प्राकारीयोदेशः इतिपाश्चोलोकिकीं विवक्षामनुसारयति तेनेह न प्रासादोदेवदत्तस्य
स्यादिति परिखायाढञ् पारिखेयीभूमिः छ्यतोः पूर्णो विधिः छ प्राग्वतेष्ठञ् तेन तुल्यमितिवतिं व
क्ष्यति ततः प्राक् ठञधिक्रियते आर्हाद्गोपुच्छसंख्यापरिमाणाट्ठक् तदर्हतीत्येतदभिव्याप्य ठञधिका
रमध्ये ठञोपवादष्ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा असमासे निष्कादिभ्यः आर्हादिखेतत्ते नक्रीतमि
त्यावत् समस्तशब्दोऽनिष्कादिभ्योऽसमासे ठक्स्यादार्हीयेष्वर्थेषु नैष्किकं समासे तु ठञ् परिमाणान्तस्या
संज्ञाशाणयोः उत्तरपदवृद्धिः स्यात् जिद्वादौ परमनैष्किकं असंज्ञेतिकिं पंचकलापाः परिमाणमस्य पांच
कलापिकं असमासग्रहणं ज्ञापकं भवति इतः प्राक् तदन्तविधिरिति तेन सुगव्यं यवापूप्यमित्यादि इतऊर्ध्वं
तु संख्यापूर्वपदानां तदन्तस्य ग्रहणं प्राग्वतेरिष्यते तच्चालुकि पारायणिकः द्वैपारायणिकः अलुकीति किं द्वा
भ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं द्विशूर्पेण क्रीतं शूर्पादञ्चान्यतरस्यां किं तु ठञ् द्विशौर्पिकं अर्धात्परिमाणस्य पूर्वस्य
तु वा अर्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा जिति किति च अर्धद्रोणेन क्रीतं
आर्धद्रौणिकं अर्धद्रौणिकं नातः परस्य अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न पूर्वपदस्य तु वा जिदादौ ।

मनुवर्त्तते ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰
पृ॰
१०७

पातिकं गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् गोर्निमित्तं संयोग उत्पातो वा गव्यः द्व्यचः धन्यः यशस्यः स्वर्ग्यः
गोद्व्यचः किं वैजयस्य वैजयिकः असंख्येत्यादि किं पंचानां पंचकं सप्तकं प्रास्थिकं खारीकं अश्वादि आश्वि
कं आश्मिकं ब्रह्मवर्चसादुपसंख्यानं ब्रह्मवर्चस्यं पुत्राच्छ च चा यत् पुत्रीयः पुत्र्यः सर्वभूमिपृथिवीभ्या
मणञौ सर्वभूमेर्निमित्तं संयोगः उत्पातो वा सार्वभौमः पार्थिवः सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते तस्येश्व
रः तत्र विदित इति सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः पार्थिवः लोकसर्वलोकाट्ठञ् तत्र विदित
इत्यर्थे लौकिकः अनुशतिकादित्वादुभयपदवृद्धिः सार्वलौकिकः तस्य वापः उप्यतेऽस्मिन्निति वापः क्षे
त्रं प्रस्थस्य वापः प्रास्थिकं द्रौणिकं खारीकं पात्रात्ष्ठन् पात्रस्य वापः पात्रिकं पात्रिकी क्षेत्रभक्तिः तदस्मि
235 न्वृद्ध्यायलाभशुल्कोपदा दीयते वृद्धिर्दीयत इत्यादि क्रमेण प्रत्येकं संबंधादेकवचनं पंचास्मिन्वृद्धिः आ
यः लाभः शुल्कः उपदा वा दीयते पंचकः शतिकः शत्यः साहस्रः उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः ग्रा
मादिषु स्वामिग्राह्यो भाग आयः विक्रेत्रा मूलादधिकं ग्राह्यं लाभः रक्षानिर्वेशो राजभागः शुल्कः उत्कोच उ भेट
पदा चतुर्थ्यर्थे उपसंख्यानं पंचास्मै वृद्ध्यादिर्दीयते पंचको देवदत्तः सममब्राह्मणे दानमिति वदधिक राम॰
रणत्वविवक्षायां वा पूरणार्धाट्ठन् यथाक्रमं ठक् ठन्नोरपवादः द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयि १०७
कः तृतीयिकः आर्धिकः अर्धशब्दो रूपकस्यार्धे रूढः भागाद्यच्च चाट्ठन् भागशब्दोपि रूपकस्यार्धे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कार्षापणस्यार्धे तु इत्यर्थः = १

धन ४.

मतिकं अध्यर्धसहस्रं अध्यर्धसाहस्रं द्विसहस्रं द्विसाहस्रं द्वित्रिपूर्वान्निष्कात् लुग्वास्यात् द्विनिष्कं
द्विनैष्किं त्रिनैष्किकं बहुपूर्वाच्चेति वक्तव्यं बहुनिष्कं बहुनैष्किकं बिस्ताच्च द्वित्रिबहुपूर्वात् बिस्तादाई
यस्य लुग्वा स्यात् द्विबिस्तं द्विबैस्तिकमित्यादि विंशतिकात्खः अध्यर्धपूर्वाद्द्विगोरित्येव अध्यर्धविंशतिकी
नं द्विविंशतिकीनं खार्या ईकन् अध्यर्धखारीकं द्विखारीकं केवलायाश्चेति वक्तव्यं खारीकं पणपादमाष
शताद्यत् अध्यर्धपण्यं द्विपण्यं अध्यर्धद्विपाद्यं इह पादः पदिति न यस्येति लोपस्य स्थानिवद्भावात्
पद्यत्यतदर्थे इत्यपि न प्राप्नोति गार्ग्यस्येव तत्र ग्रहणात् शाणाद्वा यत्स्यात् पक्षे ठञ् तस्य लुक् अध्यर्ध
शाण्यं अध्यर्धशाणं द्वित्रिपूर्वादण्च शाणादित्येव चायत् तेन तेन रूप्यं परिमाणान्तस्य संज्ञाशाणयो
रिति पर्युदासाद्वृद्धिरेव द्वैशाणं द्वैशाण्यं द्विशाणं इह ठञादयस्त्रयोदश प्रत्ययास्तेषां समर्थविभक्ति
योर्थाश्चाकालिकास्ते इदानीमुच्यन्ते तेन क्रीतं गोपुच्छेन क्रीतं गौपुच्छिकं साप्ततिकं प्रास्थिकं ठक् नै
ष्किकं इञ्‍ञोण्या: गोण्या इत्स्यात्वाद्धितलुकि लुक्ताद्धितलुकीति लुकोपवादः पंचभिर्गोणीभिः क्रीतः पटः
पंचगोणिः तस्य निमित्तं संयोगोत्पातौ संयोगः संबंधः उत्पातः शुभाशुभसूचकः शतिकः शत्योवाधा
नपति ॥ संयोगः शतिकं शत्यं दक्षिणाक्षिस्पंदनं तस्य निमित्तं तन्निमित्तम् वातपित्तश्लेष्मभ्यः शमनको
पनयोरुपसंख्यानं वातस्य शमनं कोपनं वा वातिकं पैत्तिकं श्लैष्मिकं सन्निपाताच्चेति वक्तव्यं सान्नि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ त्प्रत्ययः अंशो भागः वस्नं मूल्यं भृतिर्वेतनं पंच अंशो वस्नो भृतिर्वास्य पंचकः तदस्य परिमाणं प्रस्थं परि
पु॰ माणमस्य प्रास्थिको राशिः संख्यायाः संज्ञासंघसूत्राध्ययनेषु एवं सूत्रमनुवर्त्तते तत्र संज्ञायां स्वार्थे प्रत्य
१०८ यो वाच्यः यद्वाद्योकयोरिति वत्से त्योमात्रवृत्तेः परिमाणे निप्रत्ययः पंचेव पंचकाः शाकुनयः पंचपरिमा
णमेषां इति वा संघे पंचकः सूत्रे अष्टकं पाणिनीयं सेय शाब्दस्य प्राणीसमूहे रूढत्वात् सूत्रं ग्रंथगुणात्तं पं
चकमध्ययनं स्तोमडविधिः पंचदशमंत्राः परिमाणमस्य पंचदशः सप्तदशः एकविंशः सोमयागेषु छं
दोगैः क्रियमाणा एष्वादिसंज्ञिका स्तुतिः स्तोमः पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशी
तिनवतिशतं एतेरूढिशब्दा निपात्यंते पंचद्दशतो वर्गे वा पंचपरिमाणमस्य पंचद्वर्गः दशत् पक्षे पंच
238 कः दशकः त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डुण् त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि चा
त्वारिंशानि तदर्हति लब्धुं योग्यो भवति इत्यर्थे द्वितीयांताट्ठञादयः स्युः श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः छे
दादिभ्यो नित्यं नित्यमभीक्ष्णं छेदं नित्यमर्हति छैदिको वेतसः छिन्नप्ररूढत्वात् विरागो विरंगं च विरागं
नित्यमर्हति वैरंगिकः शीर्षच्छेदाद्यच्च शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः शैर्षच्छेदिकः यद्योगे संनियो राम॰
गेन शिरसः शीर्षभावो निपात्यते दंडादिभ्यः एभ्यो यत्स्यात् दंडमर्हति दंड्यः अर्घ्यः वध्यः पात्रा १०८
द्घंश्च चाद्यत् तदर्हतीत्यर्थे पात्रियः पात्र्यः कडंकरदक्षिणाच्छ च चाद्यत् कडंकरोतीति विग्रहे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भागो वृद्धिरस्मिन्भाग्यः भागिकः भाग्यं शतं भागिकं भाग्या भागिका विंशतिः तद्धरति वहत्यावहति
भाराद्वंशादिभ्यः वंशादिभ्यः परो यो भारशब्दस्तदंतात्प्रातिपदिकं तद्धरतीत्यादिष्व
र्थेः वंशभारं हरति वहत्यावहति वा वांशभारिकः ऐक्षुभारिकः भाराद्वंशादिभ्यः इत्यस्य व्याख्यांतरं भा
रभूतेभ्यो वंशादिभ्य इति भारभूतान्वंशान्हरति वांशिकः ऐक्षुकः वस्नद्रव्याभ्यां ठन्कनौ यथासंख्ये
न वस्नं हरति वहति आवहति वा वस्निकः द्रव्यकः संभवत्यवहरति पचति
प्रस्थं संभवति प्रास्थिकः कटाहः प्रस्थं स्वस्मिन्समावेशयतीत्यर्थः प्रास्थिकी ब्राह्मणी प्रस्थ
मुपसंहरति पचति चेत्यर्थः तत्पचतीति द्रोणाद्दण्च द्रोणं पचति द्रौणी द्रौणिकी आढकाचितपा
त्रात्खोऽन्यतरस्यां पक्षे ठञ् आढकं भवति अवहरति पचति वा आढकीना आढकिकी आचि
तीना आचितिकी पात्रीणा पात्रिकी द्विगोष्ठंश्च आढकाचितपात्रादित्येव आढकाद्यंतात् द्विगोः
संभवत्यादिष्वर्थेषु ष्ठन् खौ वा स्तः पक्षे ठञ् तस्याध्यर्धेति लुक् षित्वान्ङीप् द्व्याढकिकी द्व्याढकीना
द्विगोरिति ङीप् द्व्याढकी द्व्याचितिकी द्व्याचितीना अपरिमाणेति ङीप्निषेधः द्व्याचिता द्विपात्रिकी
द्विपात्रीणा द्विपात्री कुलिजाल्लुक्खौ च कुलिजांतात् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ वा स्तः चा
त् ष्ठन् लुगभावे ठञ् ष्यवर्णं द्विकुलिजी द्विकुलिजीना द्विकुलिजिकी द्वैकुलिजिकी सोऽस्यांशवस्न

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰
पृ॰
१०६

कोध्यापकः। मासंभृतो मासिकः कर्मकरः। मासंभूतो मासिको व्याधिः। मासंभावी मासिक उत्सवः। मासाद्वय
सियत्खञौ मासंभृतो मास्यः मासीनः। द्विगोर्यप् मासाद्वयसीत्यनुवर्त्तते द्वौ मासौ भृतो द्विमास्यः। षण्मा
सात् ण्यच्च वयसीत्येव यवप्यनुवर्त्तते चाट्ठञ्च षाण्मास्यः षण्मास्यः षाण्मासिकः। अवयसि ठंश्च
चाण्यत्। षाण्मासिको व्याधिः षाण्मास्यः। समायाः खः। समामधीष्टो भृतो भूतो भावी वा समीनः। द्विगोर्वा। स
मायाः ख इत्येव। तेन परिजय्येत्येतः। प्राक्निर्देशात् द्विषु पंचस्वर्थेषु प्रत्ययाः। द्विसमीनः। द्वैसमिकः। रात्र्यह
संवत्सराच्च द्विगोरित्येव। द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। समासांतविधेरनित्यत्वान्नटच्। द्वि
संवत्सरीणः। संख्यायाः संवत्सरसंख्यस्य च। संख्याया उत्तरपदस्य वृद्धिः स्यात् ञिदादौ द्विसांवत्सरिकः।
द्वेषष्टी भृतो द्विषाष्टिकः। परिमाणांतस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्र
हणार्थं तेन द्वैसमिक इत्युत्तरपदवृद्धिर्न। वर्षाल्लुक् च। वर्षशब्दांताद्द्विगोः खः। यत्ठञ्वा च लुक् त्रीणि रू वा॰ ५
पाणि। द्विवर्षीणो व्याधिः। द्विवर्षः। वर्षस्याभविष्यति। उत्तरपदवृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षि
कः। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न। गम्यते हि तत्र भविष्यत्ता न तु शब्दितार्था। द्वे वर्षे अधीष्टो भृ
तो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। परिमाणान्तस्यासंज्ञाशाणयोः। द्वौ कुडवौ प्रयोजनमस्य द्विकौ तम॰
डविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकं। द्विनैष्किकं। असंज्ञायां किं पंचकलायाः परिमाणमस्य पांच १०६

237

CC-0: Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ऽत एव निपातनात् ठच् कडंकरं माषमुद्गादिका इत्यर्हतीति कडंकरीयो गौः कडंकर्यः दक्षिणामर्हति
दक्षिणीयः दक्षिण्यः स्थालीबिलात् स्थालीबिलं अर्हतीति स्थालीबिलीयास्तण्डुलाः स्थालीबिल्या पा
कयोग्या इत्यर्थः यज्ञर्त्विग्भ्यां घखञौ यथासंख्यं स्तः यज्ञम् ऋत्विजं वा ऽर्हतीति यज्ञियः आर्त्विजीनो यजमानः
यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानं यज्ञियो देशः आर्त्विजीन ऋत्विक् आर्हीयाणां ठगादीनां
वादशानां पूर्णो ऽवधिः अतःपरं ठञेव पारायण तुरायण चान्द्रायणं वर्तयति पारायणिकः छात्रः तुराय
णं यज्ञविशेषः तं वर्तयति तौरायणिको यजमानः चान्द्रायणिकः संशयमापन्नः संशयविषयीभूतो
ऽर्थः सांशयिकः योजनं गच्छति योजनिकः क्रोशशतयोजनशतयोरुपसंख्यानं क्रोशशतं गच्छति क्रो १।७
शशतिकः योजनशतिकः ततो ऽभिगमनमर्हतीति वक्तव्यं क्रोशशतादभिगमनमर्हति क्रोशशतिको भि गमनद
क्षुः योजनशतिकः आचार्यः पथः ष्कन् योडीषर्थः पंथानं गच्छतीति पथिकः पथिकी पंथो णनित्यं।
पंथानं नित्यं गच्छति पान्थः पान्थाः पान्था उत्तरपथेनाहृतं च उत्तरपथेनाहृतम् गच्छति औत्तरपथिकः
आहृतप्रकरणे वारिजंगलस्थलकान्तारपूर्वादुपसंख्यानं वारिपथिकं कालात् वृत्सादिभ्यो णिस्यतः
प्रागधिकारो ऽयं तेन निर्वृत्तं अन्हा निर्वृत्तमाह्निकं तमधीष्टो भृतो भूतो भावी अधीष्टः सत्कृत्य व्यापा
रितः भृतो वेतनेन क्रीतः भृतः स्वसत्तया व्याप्तकालः भावी तादृश एवानागतः मासमधीष्टो मासि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मौत्तरपथिकं उत्तरपथेन म्र

सि.कौ. पू. ११०

भ्यां तु यथासंख्यं नेष्यते यथाकथाच दीयते कार्यं वा याथाकथाचं अनादरेण देयं कार्यं चेत्यर्थः हस्तेन दी
यते कार्यं वा हस्त्यं संपादिनि तेनेत्येव कर्णवेष्टकाभ्यां संपादि कार्णवेष्टकिकं मुखं कर्णालंकाराभ्यां अव
श्यं शोभत इत्यर्थः कर्मवेषाद्यत् कर्मणा संपादिकं कर्म्यं शौर्यं वेषेण संपादी वेष्यो नटः वेषः कृत्रिम आ
कारः तस्मै प्रभवति संतापादिभ्यः संतापाय प्रभवति सांतापिकः सांग्रामिकः योगाद्यच्च चात्ठञ् योगाय
प्रभवति योग्यः यौगिकः कर्मण उकञ् कर्मणे प्रभवति कार्मुकं समयस्तदस्य प्राप्तं समयः प्राप्तोस्य साम
यिकं ऋतोरण् ऋतुः प्राप्तोस्य आर्तवं कालाद्यत् कालः प्राप्तोस्य काल्यं शीतं प्रकृष्टे ठञ् कालादित्येव
तदस्येति च प्रकृष्टो दीर्घः कालोस्येति कालिकं वैरं प्रयोजनं तदस्येत्येव इंद्रमहः प्रयोजनमस्य ऐंद्रम
238 हिकं प्रयोजनं फलं कारणं च विशाखाषाढादण् मन्थदंडयोः आभ्यामण् स्यात् प्रयोजनमित्यर्थे क्रमात्
मंथदंडयोरर्थयोः विशाखा प्रयोजनमस्य वैशाखो मंथः आषाढो दंडः चूडादिभ्य उपसंख्यानं चूडा
चौडं श्रद्धा श्राद्धं अनुप्रवचनादिभ्यश्छः अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयं समापनात्स
पूर्वपदात् व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयं ऐकागारिकट् चौरे एकमसहाय राम:
मगारं प्रयोजनमस्य मुमुक्षिषोः स ऐकागारिकश्चौरः आकालिकडाद्यन्तवचने समानकालावाद्यं ११०
तौ यस्येत्याकालिकः समानकालस्य आकाल आदेशः आशुविनाशीत्यर्थः पूर्वदिवसे यथा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कलापिकं तद्धितांतः संज्ञा किं हैशाणं कुलिजशब्दमपि केचित्पठंति द्वैकुलिजिकः त्रिंशच्चत्वारिंश

वर्षशब्दात्ता द्विगोः। प्रत्ययस्य नित्यं लुक् स्याच्चेत्तेन प्रत्ययार्थे द्विवर्षो दारकः षष्टिरात्रेण पच्यं

ते॥ बहुवचनमतंत्रं षाष्टिको धान्यविशेषः तृतीयान्तात्कन् रात्रशब्दलोपश्च निपात्यते तेन परिज

य्यलभ्यकार्यसुकरं मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः मासेन लभ्यं कार्यं सुकरं वा मासिकं तद

स्य ब्रह्मचर्यं द्वितीयांतात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात् अत्यंतसंयोगे द्वितीया मासं ब्रह्मचर्यमस्य मा

सिको ब्रह्मचारी आर्धमासिकः यद्वा प्रथमांतादस्येत्यर्थे प्रत्ययः मासोऽस्येति मासिकं ब्रह्मचर्यं महानाम्न्या

दिभ्यः षष्ठ्यंतेभ्य उपसंख्यानं महानाम्न्यो नाम विदामघवन्नित्याद्या ऋचः तासां ब्रह्मचर्यमस्य महानाम्निकः ह

रदत्तस्तु भस्याढ इति पुंवद्भावान्माहानामिक इत्याह तदस्य चरतीति चातुर्मास्याड्डुनडिनौ वक्तव्यौ यालोपश्च चा

तुर्मास्यानि चरति चातुर्मासकः चातुर्मासी चतुर्मासाण्ण्यो यज्ञे तत्र भव इत्यर्थे चतुर्षु मासेषु भवंति चातु

र्मास्यानि यज्ञाः अण् संज्ञायां चतुर्षु मासेषु भवति चातुर्मासी आषाढी तस्य च दक्षिणा यज्ञाख्येभ्यः

द्वादशाहस्य दक्षिणा द्वादशाहिकी आख्याग्रहणादकालादपि आग्निष्टोमिकी वाजपेयिकी तत्र च

दीयते कार्यं भववत् प्रावृषि दीयते कार्यं वा वैवृष्टं व्युष्टादिभ्योऽण् संग्रामप्रवास इत्यादि तेन यथाकथाच

हस्ताभ्यां णयतौ यथाकथाचेत्यव्ययसंघातात्तृतीयांतात् हस्तशब्दाच्च यथासंख्यं णयतौ स्तः आर्था

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रवृत्तेणयं शरत्कालाधिकारस्य हीनावधिः व्युष्टादिभ्योऽण् व्युष्टे दीयते कार्यं वा २४

सि॰कौ॰
पू॰
१११

वरत्वं द्रढिमा चोरी षष्यः ओ विरी मौ याथाकामी गुणवचनब्राह्मणादिभ्यः कर्मणि च चाड्ढवे जडस्य कर्म भा
वो वा जाड्यं मौढ्यं ब्राह्मण्यं अर्हतो नुम् च अर्हतो भावः आर्हन्त्यं आर्हन्ती ब्राह्मणादिराकृतिगणः यथा
तथायथापुरयोः पर्यायेण नञ्पूर्वयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ञिरादौ अयथा तथा
स्य भावः आयथातथ्यं अयाथातथ्यं आयथापुर्यं अयथापुर्यं आ पादसमाप्तेर्भावकर्माधिकारः
चतुर्वर्णादीनां स्वार्थ उपसंख्यानं चत्वारो वर्णाः चातुर्वर्ण्यं चातुराश्रम्यं त्रैस्वर्यं षाड्गुण्यं सैन्यं सान्नि
ध्यं सामीप्यं औपम्यं त्रैलोक्यमित्यादि सर्ववेदाः सर्ववेदाः तानधीते सर्ववेदः सर्वादेरिति लुक् स
एव सार्ववेद्यः चतुर्वेदस्योभयपदवृद्धिश्च चतुरो वेदानधीते चतुर्वेदः स एव चातुर्वैद्यः चतुर्विद्यस्ये
239 ति पाठांतरे चतुर्विद्य एव चातुर्वैद्यः स्तेनाद्यन्नलोपश्च नेति संघातग्रहणं स्तेनचौर्येपचाद्यच्
स्तेनस्य भावः कर्म वा स्तेयं स्तेनादिति योगं विभज्य स्तेन्यमिति यत्प्रत्ययांतमपि केचिदिच्छंति सख्युर्यः स
ख्युर्भावः कर्म वा सख्यं दूतवणिग्भ्यां च दूतस्य भावः कर्म वा दूत्यं वाणिज्यं इति काशिका माधव
स्तु वाणिज्याशब्दः स्वभाववात्स्त्रीलिंगः भाव एव चात्र प्रत्ययो न तु कर्मणीत्याह भाष्ये तु दूतवणि
ग्भ्यां चेति नास्त्येव ब्राह्मणादित्वाद्वाणिज्यमपि कपिज्ञात्योर्ढक् कापेयं ज्ञातेयं पत्यंतपुरोहितादि राम
भ्यो यक् सैनापत्यं पौरोहित्यं राजासे राजशब्दोऽसमासे यकं लभत इत्यर्थः राज्ञो भावः कर्म वा राज्यं १११

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ततौ स्त्रीपुंसाभ्यां न स्यातां सत्यत्र तयोः सावकाशत्वादिति भावः पौंस्नमिति संयोगान्तलोपे पुमः खयीति रुत्वा तिकावनुनासिकानुस्वारौ विसर्गौ कृते सत्व ७ः

ह्वाग्रानुत्पत्त्यादिनौ लरे तत्रैव न स्यादिति वा आकालात्वस्य आकालिका विद्युत् ठञ् पूर्वो वाधिः ते
न तुल्यं क्रिया चेद्वतिः ब्राह्मणेन तुल्यं ब्राह्मणवदधीते क्रिया चेत्किं गुणतुल्ये मा भूत् पुत्रेण तुल्यः स्थू
लः तत्र तस्येव मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः चैत्रस्येव चैत्रवत् मैत्रस्य गावः तदर्हं विधि
मर्हतीति विधिवत् पूज्यते क्रियाग्रहणं मंडूकप्लुत्याऽनुवर्त्तते तेनेह न राजानमर्हतीति छत्रं तस्य भाव
स्त्वतलौ प्रकृतिजन्यबोधे प्रकारो भावः गोर्भावो गोत्वं गोता त्वान्तं क्लीबं तलन्तं स्त्रीलिंगं आ च त्वात् ब्र
ह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते अपवादैः सह समावेशार्थं गुणवचनादिभ्यः कर्मणि वि
धानार्थं चेदं चकारो नञ्स्नञ्भ्यामपि समावेशार्थः स्त्रिया भावः स्त्रैणं स्त्रीत्वं स्त्रीता पौंस्नं पुंस्त्वं पुं
स्ता न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः इतः परं ये भावप्रत्ययास्तेन
ञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा अपतित्वं अपटुत्वं नञ्पूर्वात्किं वार्हस्पत्यं तत्पुरुषात्किं
नास्य पटवः सन्तीत्यपटुस्तस्य भावः आपटवं अचतुरेति किं आचतुर्यं आसंगत्यं आलवण्यं आ
वटं आयुध्यं आकत्यं आरस्यं आलस्यं पृथ्वादिभ्य इमनिज्वा वा च नञ्णादिसमावेशार्थः र ऋतो व ३
हलादेर्लघोः इष्ठेमेयःसु टेः लोपः स्यादिष्ठेमेयःसु परतो भावः प्रथिमा पार्थवं म्रदिमा मार्दवं व
र्णदृढादिभ्यः ष्यञ् च चादिमनिच् यो ब्रह्म शुक्लिमा दार्ढ्यं ष्यङ् म ङ्भ परिकशार्ढ परिवृढानामे
४२

अपतित्वमिति संपत्यं नेति यकुन भवति अपटुत्वमितिर
हलिंगात्वलघुत्वादित्यण न भवति =५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ न पदे खञ् तिल्यं तैलीनं माष्यं माषीणं उम्यं औमीनं भंग्यं भांगीनं अणव्यं आणवीनं सर्वचर्मणः कृतः
पू॰ खखञौ असामर्थ्येपि निपातनात् समासः सर्वश्चर्मणा कृतः सर्वचर्मीणः यथामुखसंमुखस्य दर्शनः खः मु सार्वचर्मी
११२ खः मुखस्य सदृशं यथामुखं प्रतिबिंबः निपातनात् सादृश्येऽव्ययीभावः समं सर्वं मुखं संमुखं समशब्दस्यांतलो
पो निपात्यते यथामुखं दर्शनः यथामुखीनः सर्वस्य मुखस्य दर्शनः संमुखीनः तत्सर्वादेः पथ्यंगकर्मपत्र
व्याप्नोति सर्वादेः पथ्याद्यंतात् खः स्यात् सर्वं पथानं व्याप्नोति सर्वपथीनः सर्वांगीणः सर्वपत्रीणः सर्वक
मीणः सर्वपात्रीणः आप्रपदं प्राप्नोति पदस्याग्रं प्रपदं तन्मर्यादीकृत्य आप्रपदं आप्रपदीनः पटः अनुप
द्सर्वान्नायानयं बद्धाभक्षयतिनेयेषु अनुरायामे सादृश्ये वा अनुपदं बद्धा अनुपदीना उपानत् सर्वान्ना
240 नि भक्षयति सर्वान्नीनो भिक्षुः आयानयं स्थलविशेषः तं नेयः आयानयीनः शारः परोवरपरंपरपुत्रपौ
त्रमनुभवति परांश्च अवरांश्च अनुभवति परोवरीणः अवरस्योत्वं निपात्यते परांश्च परतरांश्च अनुभवति
परंपरीणः प्रकृतेः परं परभावो निपात्यते पुत्रपौत्रमनुभवति पुत्रपौत्रीणः परंपराशब्दस्तु अव्युत्पन्नं प्रा
व्लांतरं स्त्रीलिंगं तस्मादेव स्वार्थे ष्यञि पारंपर्यं कथं पारोवर्यमिति असाधुरेवायं खप्रत्ययसन्नियोगे
नैव परोवरेति निपातनात् अवारपारात्यंतानुकामं गामी अवारपारं गामी अवारपारीणः अवारीणः पारी
णः पारावारीणः अत्यंतं गामी अत्यंतीनः भृशं गंतेत्यर्थः अनुकामं गामी अनुकामीनः यथेष्टं गंता इत्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

समासेतु ब्राह्मणादित्वात् ष्यञ् आधिराज्यं प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् प्राणभृज्जाति आ
श्वं औष्ट्रं वयोवचनं कौमारं कैशोरं औद्गात्रं औन्नेत्रं सौष्टवं हायनान्तयुवादिभ्योऽण् द्वैहायनं त्रैहायनं यौव
नं स्थाविरं श्रोत्रियस्य यलोपश्च श्रौत्रं कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः युवादिब्राह्मणादि
कौशल्यं ४ त्वाच्च पक्षेऽपि कौशलमित्यादि इगन्ताच्च लघुपूर्वात् शुचेर्भावः कर्म वा शौचं मौनकं पैकाव्यं कावि ण व्रस्य ब्राह्म
२५ ण्यादित्वा योपधाद्गुरूपोत्तमाद्वुञ् रामणीयकं आभिधानीयकं सहायाद्वा साहाय्यं साहायकं द्वंद्व मनोज्ञा
दिभ्यश्च शौष्योपाध्यायिकामानोज्ञकं गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु अत्याकारोऽधिक्षेपः तदवेतस्तेगो
त्रचरणयोर्भावकर्मणि प्राप्तः अवगतवान्वा गार्गिकया श्लाघते गार्ग्यत्वेन विकत्थत इत्यर्थः गार्गिकयाकुरुते
गार्ग्यत्वेन परान् अधिक्षिपतीत्यर्थः अत्याकुरुते गार्गिकामन्ववेतः गार्ग्यत्वं प्राप्तोऽवगतवानिति वार्थ काठके
नश्लाघते होत्राभ्यश्छः होत्राशब्दा ऋत्विग्वाची स्त्रीलिंगः बहुवचनाद्विशेषग्रहणं अच्छावाकस्य भावः कर्म
वा अच्छावाकीयं मैत्रावरुणीयं ब्रह्मणस्त्वः होत्रावाचिनो ब्रह्मन्शब्दात् त्वः स्यात् छस्यापवादः ब्रह्मत्वं ने
तिवाच्ये त्ववचनं तलो बाधनार्थं ब्राह्मणपर्यायात् ब्रह्मन्शब्दात्तु त्वतलौ ब्रह्मत्वं ब्रह्मता नञ्स्नञोरधिका
रः समाप्तः धान्यानां भवने क्षेत्रे खञ् भवत्यस्मिन्निति भवनं मुद्गानां भवनं क्षेत्रं मौद्गीनं व्रीहिशाल्योर्ढक् व्रैहेयं शा
लेयं यवयवकषष्टिकाद्यत् यवानां भवनं क्षेत्रं यव्यं यवक्यं षष्टिक्यं विभाषा तिलमाषोमाभङ्गाणुभ्यः यवाख्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ क्षीरं ह्योगोदोहस्य विकारः हैयंगवीनं नवनीतं तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ पी
पू॰ लूनां पाकः पीलुकुणः कर्णस्य मूलं कर्णजाहं पक्षात्तिः मूलग्रहणमात्रमनुवर्त्तते पक्षस्य मूलं पक्षतिः ते
११३ न वित्तश्चुंचुप्चणपौ पकारः प्रत्यययोरादेर्लुप्तनिर्दिष्टः तेन वित्तः संज्ञा. विद्यया वित्तः विद्याचुंचुः
विद्याचणः विनञ्भ्यां नानाञौ नसह असहार्थे पृथग्भावे वर्त्तमानाभ्यां स्वार्थे प्रत्ययौ विना नाना वेः शा
लच्छंकटचौ क्रियाविशिष्टसाधनवाचकात्स्वार्थे विस्तृतं विशालं विशंकटं संप्रोदश्च कटच् संकटं
प्रकटं उत्कटं चाद्विकटं अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानं अलाबूनां रजः अलाबूकटं तिलकटं
241 गोष्ठजादयः स्थानादिषु पशुनामभ्यः गवां स्थानं गोगोष्ठं अश्वगोष्ठं संघाते कटच् अवीनां संघातः अ
विकटः विस्तारे पटच् अविपटः द्वित्वे गोयुगच् द्वावुष्ट्रौ उष्ट्रगोयुगं षट्त्वे षड्गवच् अश्वषड्गवं स्नेहे
तैलच् तिलतैलं सर्षपतैलं भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ इक्षुशाकटं इक्षुशाकिनं अवात्कु
टारच्च चात्कटच् अवाचीनः प्रसिद्धः अवकुटारः अवकटः नतेर्नासिकायाः संज्ञायां टीटञ्नाटज्भ्र
टचः अवादित्येव नतेनमनं नासिकायां नते अभिधेये इनच् पिटचौ प्रत्ययौ प्रकृतेश्चिकचिरादेशावादेश रा
ऽस्याच कप्रत्ययचिक्तादेशौ चवक्तव्यौ चिकिनं चिपिटं चिक्कं क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी क्लि ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नतं अवटीटं अवनाटं अवभ्रटं तद्योगान्नासिका अवटीटा पुरुषोऽवटीटः नेर्बिडबिरीसचौ निबिडं निबिरीसं इनच्पिटच्चिकचि इति निरि त्यवनासिकायाः २४॥

र्थः समांसमां विजायते यलोपो ऽवग्रहविभक्तेरलुक्च पूर्वपदे निपात्यते समांसमीना गौः समांसमीना साध्वी
वपति वर्षं प्रसूयते खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः समांसमां विजायते समायां समायां वा अद्यश्वीना
वडवी अद्य श्वो वा विजायते अद्यश्वीना वडवा आसन्नप्रसवेत्यर्थः केचित्तु विजायत इति नानुवर्त्तयंति अ
द्यश्वीनं मरणं आसन्नमित्यर्थः आगवीनः आङ्पूर्वात् गोः कर्मकरे खप्रत्ययो निपात्यते गोः प्रत्यर्पणप
र्यंतं यः कर्म करोति स आगवीनः अनुग्वलंगामी अनुगु गोः पश्चात् पर्याप्तं गच्छति अनुगवीनो गोपालः
अध्वनो यत्खौ आध्वानमलं गच्छतीति अध्वन्यः अध्वनीनः येचामावकर्मणोः आत्माध्वानौ खे इति प्र
कृतिभावः अभ्यमित्राच्छ च चाद्यत्खौ अभ्यमित्रीयः अभ्यमित्र्यः अभ्यमित्रीणः अमित्राभिमुखं सुष्ठु
गच्छतीत्यर्थः गोष्ठात्खञ् भूतपूर्वे गोष्ठो भूतपूर्वो गौष्ठीनो देशः अश्वस्यैकाहगमः एकाहेन गम्यत इत्ये
काहगमः आश्वीनोऽध्वा शालीनकौपीने अधृष्टाकार्ययोः शालाप्रवेशमर्हतीति शालीनः अधृष्टः कूप
पतनमर्हतीति कौपीनं पापं तत्साधनत्वात्तद्वत् गोप्यत्वात्पुरुषलिंगमपि तत्संबंधात्तदाच्छदनमपि व्रा
तेन जीवति व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन व्रातीनः साप्तपदीनं सख्यं सप्तभिः पदैरवाप्य
ते साप्तपदीनं हैयंगवीनं संज्ञायां ह्योगोदोहस्य हियंगुरादेशः विकारार्थे खञ् निपात्यते उदस्त इति दोः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ स्य डः स्यात् युक्तेऽर्थे त्रिंशदधिका अस्मिन् त्रिंशं शतं विंशं संख्याया गुणस्य निमाने मयट् भागस्य मूल्ये
प्र॰ वक्तव्ये मानात् स्वार्थे मयट् तासंख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् यवानां द्वौ भागौ निमानमस्योदश्वित्भागस्य द्विमय
११४ मुदश्विद्यवानां गुणस्येति किं द्वौ व्रीहियवौ निमानमस्योदश्वितः निमाने किं द्विगुणो क्षीरस्य एकस्तैलस्य द्वि
गुणं तैलं पच्यते क्षीरे तस्य पूरणे डट् एकादशानां पूरणः एकादशः नान्तादसंख्यादेर्मट् डटो मडागमः स्या
त् पञ्चानां पूरणः पञ्चमः नान्तात्किं विंशः असंख्यादेः किं एकादशः षट्कतिकतिपयचतुरां थुक् एषां
थुगागमः स्यात् डटि षण्णां पूरणः षष्ठः कतिथः कतिपयशब्दस्य असंख्यात्वेऽपि अत एव ज्ञापकात् डट्
242 कतिपयथः चतुर्थः चतुरश्छयतावाद्यक्षरलोपश्च तुरीयः तुर्यः बहुपूगगणसंघस्य तिथुक् इतौ
त्येव पूगसंघयोरसंख्यात्वेऽपि अत एव डट् बहुतिथः इत्यादि वतोरिथुक् इतीत्येव यावतिथः द्वेस्तीयः
डटोऽपवादः द्वयोः पूरणो द्वितीयः त्रेः संप्रसारणं च तृतीयः विंशत्यादिभ्यस्तमडन्यतरस्यां एभ्यो डटस्तम
डागमो वा स्यात् विंशतितमः विंशः एकविंशः एकविंशतितमः नित्यं शतादिमासार्धमाससंवत्सराच्च
शतस्य पूरणः शततमः एकशततमः मासादेरत एव डट् मासतमः षष्ट्यादेश्चासंख्यादेः षष्टितमः
एक२ संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव षष्ठः एकषष्टितमः मतौ छः सूक्तसाम्नोः मत्वर्थे छः स्या ता॰
त् अच्छावाकशब्दोऽस्मिन्नस्तीति अच्छावाकीयं सूक्तं वारवन्तीयं साम अध्यायानुवाकयोर्लुक् मत्व ११

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लुमित्य द्वयसज्मात्रचावूर्ध्वं
५:५ परिमाणे वतेते=४

ण्णे च चुञ्चुपौ अस्य वित्तः वित्तः चुञ्चुश्च चुञ्चुः उपाधिभ्यां त्यकन्नासन्नारूढयोः संज्ञायामित्यनुवर्त्तते प
र्वतस्यासन्नं स्थलं उपत्यका आरूढं स्थलमधित्यका कर्मणि घटोऽठच् घटते इति घटः पचाद्यच् कर्म
णि घटते कर्मठः पुरुषः तदस्य संजातं तारकादिभ्य इतच् तारकाः संजाता अस्य तारकितं नभः आकृतिगणो
यं प्रमाणे द्वयसज्दघ्नञ्मात्रचः तदस्येत्यनुवर्त्तते ऊरू प्रमाणमस्य ऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं प्रमा
णे लः लुक् शमः दिष्टिः वितस्तिः द्विगोर्नित्यं द्वौ शमौ प्रमाणमस्य द्विशमं प्रमाणपरिमाणाभ्यां संख्या
याश्च संशये मात्रज्वक्तव्यः शममात्रं प्रस्थमात्रं पंचमात्राः वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ तावदेव ताव
द्द्वयसं तावन्मात्रं पुरुषहस्तिभ्यामण् च पुरुषः प्रमाणमस्य पौरुषं पुरुषद्वयसं यत्तदेतेभ्यः परिमाणे हस्ति नं ७
वतुप् यत्परिमाणमस्य यावान् तावान् एतावान् किमिदंभ्यां वो घः आभ्यां वतुप् स्यात् वस्य च घः कियान्
इयान् किमः संख्यापरिमाणे डति च चाद्वतुप् तस्य च वस्य घः का संख्या एषां ते कति कियन्तः संख्या
याअवयवे तयप् पंचावयवा अस्य पंचतयं द्वित्रिभ्यां तयस्यायज्वा द्वयं द्वितयं त्रयं त्रितयं उभादुदात्तो
नित्यं उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः उभयं तदस्मिन्नधिकमिति दशान्ताड्डः एकादशान्य ता
धिकाः अस्मिन्नेकादशं शतसहस्रयोरेवेष्यते नेह एकादश अधिका अस्यां विंशत्यां प्रकृतिप्रत्य
याथयोः समानजातौ यत्र येष्यते नेह एकादश माषा अधिका अस्मिन्सुवर्णशते शदन्तविंशतेश्च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ अभेः पाल्यति कोरीयेश्च अनुकामयते अनुकः अभिकामयते अभिकः अभीकः पार्श्वेनान्विच्छति अन-
प्र॰ जुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः अयःशूलदण्डाजिनाभ्यां ठक्ठञौ तीक्ष्णउपायः अयःशूलं तेना-
११५ न्विच्छति आयःशूलिकः साहसिकः दण्डाजिनं दम्भः तेनान्विच्छति दाण्डाजिनिकः तावतिथं ग्रहणमिति
लुग्वा कन्स्यात्पूरणप्रत्ययस्य च वा लुक् द्विकं द्वितीयकं वा ग्रहणं द्वितीयेन रूपेण ग्रहणमित्यर्थः ताव-
तिथेन गृह्णातीति कन्वक्तव्यः नित्यं च लुक् षष्ठेन रूपेण गृह्णातीति षट्को देवदत्तः पंचकः स एषां ग्रामणीः
देवदत्तो मुख्यो येषां ते देवदत्तकाः त्वत्काः मत्काः शृंखलमस्य बंधनं करभे शृंखलकः करभः उत्क उन्म-
243 नाः उत्कः उन्मनस्कः दृश्यते उच्छब्दात्स्वार्थे कन् उत्कः उत्कण्ठितः कालप्रयोजनाद्रोगे कालवचनात्प्रयोज-
नवचनाच्च कन्स्याद्रोगे द्वितीयेऽहनि भवो द्वितीयको ज्वरः प्रयोजनं कारणं रोगस्य फलं वा विषपुष्पैर्ज-
नितो विषपुष्पको उष्णं कार्यमस्य उष्णकः रोगे किं द्वितीयो दिवसोऽस्य तदस्मिन्नन्नं प्राये संज्ञायां प्राय-
भवान्नसमर्थात्कन्स्यात् यत्प्रत्ययान्तमन्नं चेत्प्रायविषयं तत्र गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्ण-
मासी वटकेभ्य इनिर्वाच्यः वटकिनी कुल्माषादञ् कुल्माषाः प्रायेणान्नमस्यां कौल्माषी श्रोत्रियंश्छ-
न्दोधीते श्रोत्रियः वेत्यनुवृत्ते श्छांदसः श्राद्धमनेन भुक्तमिनिठनौ श्राद्धी श्राद्धिकः पूर्वादिनिः पूर्वं
कृतमनेन पूर्वी सपूर्वाच्च कृतपूर्वी इष्टादिभ्यश्च इष्टमनेन इष्टी अधीती छंदसि परिपंथिपरिपरि-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्थस्य अत एव ज्ञापकात् छन्दोविधानसामर्थ्याच्च विकल्पेन लुक् गर्दभाण्डः गर्दभाण्डीयः विमुक्तादि
भ्योऽण् मत्वर्थेऽण् स्यात् अध्यायानुवाकयोः विमुक्तशब्दोऽस्मिन्नस्तीति वैमुक्तः देवासुरः गोषदादिभ्यो वु
न् मत्वर्थे वुन् स्यात् अध्यायानुवाकयोः गोषदकः इषेत्वकः तत्र कुशलः पथः वुन् स्यात् पथि कुशलः प
थकः आकर्षादिभ्यः कन् आकर्षे कुशलः आकर्षकः आकर्षादिष्विति रेफरहितो मुख्यः पाठः आक
आक षकः र्षो निकषः धनहिरण्यात्कामे कामः इच्छा धने कामो धनकः देवदत्तस्य हिरण्यकः स्वाङ्गेभ्यः प्रसिते के
५ शेषु प्रसितः केशकः तत्परश्चनार्थस्तत्पर इत्यर्थः उदराट्ठगाद्यूने अविजिगीषुः ठक्स्यात् कनोऽपवादः बु
भुक्षयाऽत्यन्तपीडित उदरे प्रसितः औदरिकः आद्यूने किं उदरकः उदरपरिमार्जनादौ प्रसित इत्यर्थः
सस्येन परिजातः कन्स्वर्थे तेन तु ठक् सस्यशब्दो गुणवाची न तु धान्यवाची शस्येनेति पाठान्तरं शस्ये
न गुणेन परिजातः संवृतः शस्यकः साधुः अंशं हारी हारी स्याद् वध्यकेऽणिनिः अत एव तद्योगे षष्ठी न
अंशको दायादः तन्त्रादचिरापहृते तन्त्रकः पटः प्रत्यग्र इत्यर्थः ब्राह्मणकोष्णिके संज्ञायां आयुध
जीविनो ब्राह्मणा यस्मिन् देशे स ब्राह्मणकः अल्पमन्नं यस्यां सा उष्णिका यवागूः अन्नशब्दस्य उष्णा
देशो निपात्यते शीतोष्णाभ्यां कारिणि शीतं करोति शीतकः अलसः उष्णं करोति उष्णकः शीघ्रकारी
अधिकं अध्यारूढशब्दात् कन् उत्तरपदलोपश्च अनुकाभिकाभीकः कमिता अन्वभिभ्यां कन्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. पृ. ११६

244

आसन्दीवान् अस्थिशब्दस्याष्ठीभावः अष्ठीवानन्यत्र चक्रीवान्नाम राजा चक्रवानन्यत्र कक्ष्यायाः संप
सारणं कक्षीवान्नाम ऋषिः कक्ष्यावानन्यत्र चर्मणो लोपाभावो णत्वं च चर्मण्वती नाम नदी चर्मव
त्यन्यत्र उदन्वानुदधौ च उदकशब्दस्य उदन्भावो मतौ उदधौ संज्ञायां उदन्वान्समुद्रः ऋषिश्च राजन्व
न्सौराज्ये राजन्वती भूः राजवत्यन्यत्र प्राणिस्थादातो लजन्यतरस्यां चूडालः प्राणिस्थात्किं शिखा
वान्दीपः आतः किं हस्तवान् प्राण्यंगादेव नेह मेधावान् प्रत्ययस्वरेणैव सिद्धे अंतोदात्तत्वे चूडालो
ऽस्त्रीत्यादौ स्वरितत्वानुदात्ते पदादाविति स्वरितत्वाधनार्थश्चकारः सिध्मादिभ्यश्च लच् वा स्यात् सिध्मलः
सिध्मवान् अन्यतरस्यां ग्रहणं मतुप्समुच्चयार्थं न तु प्रत्ययविकल्पार्थं तेनाकारान्तेभ्य इनिठनौ न वातदं
तबलललाटानामूङ् च वातूलः वत्सांसाभ्यां कामबले आभ्यां लच् स्यात् यथासंख्यं कामवति बलव
ति चार्थे वत्सलः अंसलः फेनादिलच्च वा लच् अन्यतरस्यां ग्रहणं मतुप्समुच्चयार्थमनुवर्त्तते फे
नलः फेनिलः फेनवान् लोमादिपामादिपिच्छादिभ्यः शनेलचः लोमादिभ्यः शः लोमशः लोमवान् रो
मशः रोमवान् पामादिभ्यो नः पामनः पामवान् अंगात्कल्याणे अंगना लक्ष्म्या अच्च लक्ष्मणः
विषुगित्युत्तरपदलोपश्चाकृतसंधेः विषुणः पिच्छादिभ्य इलच् पिच्छिलः पिच्छवान् उरसिलः उर
स्वान् प्रज्ञाश्रद्धार्चाभ्यो णः प्राज्ञो व्याकरणं श्राद्धः आर्चः वृत्तेश्च वार्त्तः तपःसहस्राभ्यां

सि. ११६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रोगे पर्यायेऽर्थे नान्तरे लोके तु परिपन्थिशब्दो नन्याय्यः अनुपपद्यन्वेष्टा अनुपदी साक्षाद्द्रष्टरि
संज्ञायां साक्षाद्द्रष्टा साक्षी क्षेत्रियच्परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः शरीरान्तरे चिकित्स्यः अप्र
तीकार्य इत्यर्थः इन्द्रियमिन्द्रलिंगमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा इन्द्र आत्मा तस्य लिं
गं करणेन कर्तुरनुमानात् इति करणं प्रकारार्थः इन्द्रेण दुर्जयमिन्द्रियं तदस्यास्त्यस्मिन्निति मतुप् गावो २४
स्यास्मिन्वा सन्तीति गोमान् भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने संबंधेऽस्ति विवक्षायां भवन्ति मतुपाद
यः १ रसादिभ्यश्च मतुप् रसवान् अन्यमत्वर्थीयनिवृत्त्यर्थं वचनं रसरूपवर्णगंधस्पर्शशब्द।
स्नेह गुणात् एकाचः स्ववान् गुणग्रहणं रसादीनां विशेषणं तसौ मत्वर्थे तान्तसान्तौ भसंज्ञौ स्तो
मत्वर्थे प्रत्यये वसोः संप्रसारणं विदुष्मान् गुणवचनेभ्यो मतुपो लुगिष्टः शुक्लो गुणोऽस्यास्तीति
शुक्लः पटः कृष्णः मादुपधायाश्च मतोर्वोऽयवादिभ्यः मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादि
वर्जितात्परस्य मतोर्मस्य वः किंवान् ज्ञानवान् विद्यावान् लक्ष्मीवान् यशस्वान् यवादेस्तु यवमा भास्वान् ४
न् भूमिमान् झयः झयन्तान्मतोर्मस्य वः स्यात् अपदान्तत्वान्नवजस्त्वं विद्युत्वान् संज्ञायां मतोर्मस्य
वः स्यात् अहीवती मुनीवती शरादित्वाद्दीर्घः आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्व
ती एते षट् संज्ञायां निपात्यन्ते आसन्नशब्दस्य आसंदीभावः आसंदीवान् ग्रामः अन्यत्रास्मा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. लोहस्ती शिखावलः केकी ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः मत्वर्थे नि
श. पात्यन्ते ज्योतिष उपधालोपो नश्च प्रत्ययः ज्योत्स्ना तमस उपधाया इत्वं रश्च तमिस्रा स्त्रीत्वमतन्त्रं तमिस्रं शृं
११७ गादिनच् शृंगिणः ऊर्जसो वलच् लेनवाधा माभूदिति विनिरपि ऊर्जस्वी ऊर्जस्वलः ऊर्जोऽसुगागमः इ
नि वृत्तिस्तु चिंत्या ऊर्जस्वलीरितिवत् असुन्तत्वेनैवोपपत्तेः गोशब्दान्मिनिः गोमी मलशब्दादिनच् मलि
नः ईमसश्च मलीमसः अत इनिठनौ दंडी दंडिकः व्रीह्यादिभ्यश्च व्रीही व्रीहिकः नच सर्वेभ्यो व्रीह्यादि
भ्य इनिठनौ इष्यंते किंतर्हि शिखामालादिभ्य इनिः यवखदादिभ्य इकः अन्येभ्य उभयं तुंदादिभ्य इलच्च
तुंदी ७ चादिनिठनौ मतुप् च तुंदिलः तुंदिकः तुंदवान् उदर पिचंड यव व्रीहि स्वांगाद्विवृद्धौ कर्णिलः कर्णी
कर्णिकः कर्णवान् एकगोपूर्वाट्ठञ्नित्यं एकशतमस्यास्ति ऐकशतिकः ऐकसहस्रिकः गोशतिकः
245 गोसहस्रिकः शतसहस्रान्ताच्च निष्कात् निष्कात्परो यः शतसहस्रशब्दो तदंतात्प्रातिपदिकाट्ठञ्स्या
न्मत्वर्थे नैष्कशतिकः नैष्कसहस्रिकः रूपादाहतप्रशंसयोर्यप् आहतं रूपमस्यास्तीति रूप्यः कार्षाप
णः प्रशस्तं रूपमस्यास्तीति रूप्यो गौः आहतेति किं रूपवान् अन्येभ्योपि दृश्यते हिम्याः पर्वताः गुण्या ब्रा
ह्मणाः अस्मायामेधास्रजो विनिः यशस्वी यशस्वान् मायावी मायावान् व्रीह्यादिपाठादिनिठनौ मा राम
यी मायिकः विन्नन्तत्वात्कुत्वं स्रग्वी आमयस्योपसंख्यानं दीर्घश्च आमयावी शृंगवृंदाभ्यामार १०

CC-0. ...Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विनीनी विनीनोरिकारोनकारपरिज्ञाणार्थः तपस्वी सहस्री असंतत्वाददन्तत्वाच्च सिद्धे पुनर्वचनमणो बा।
धनार्थमिति सहस्रात्तु ठनोपि बाधनार्थं अण् च योगविभाग उत्तरार्थः तापसः साहस्रः ज्योत्स्नादिभ्य उपसं
ख्यानं ज्यौत्स्नः तामिस्रः सिकताशर्कराभ्यां च सैकतो घटः शार्करः देशे लुबिलचौ च चादण् मतुप् च सि
कता सन्त्यस्मिन्देशे सिकताः सिकतिलः सैकतः सिकतावान् एवं शर्करादयः इत्यादि दंतउन्नतउरच् उन्नता दं
ताः संत्यस्य दंतुरः ऊषसुषिमुष्कमधोरः ऊषरः सुषिरः नपुंसकमपि मुष्को ऽंडः मुष्करः मधु माधुर्यं मधु
रः खमुखकुंजेभ्य उपसंख्यानं खरः मुखरः कुंजो हनुः कुंजरः नगपांसुपांडुभ्यश्च नगरं पांडुरः पांसु सि।२६
रः पांडरशब्दस्तु अव्युत्पन्न एव कच्छ्वा ह्रस्वत्वं च कच्छुरः युद्रुभ्यां मः द्युमः द्रुमः केशाद्वोन्यतरस्यां
मत्तेनाल्पतरस्यां ग्रहणेन मतुपि सिद्धे पुनर्ग्रहणं मतुप्‌ठनोः समावेशार्थं केशवः केशी केशिकः केश नि।२
वान् अन्येभ्योपि दृश्यते मणिवो नागविशेषः हिरण्यवो निधिविशेषः अर्णसो लोपश्च अर्णवः गां
ड्यजगात्संज्ञायां ह्रस्वदीर्घयोर्यणा तंत्रेण निर्देशः गांडिवं गांडीवं अर्जुनस्य धनुः अजगवं पिनाकं॥
कांडांडादीरन्नीरचौ कांडीरः आंडीरः रजःकृष्यासुतिपरिषदो वलच् रजस्वला स्त्री कृषीवलः व राम।
लइति दीर्घः आसुतीवलः शौंडिकः परिषद्वलः पर्षदिति पाठांतरे पर्षद्वलः अन्येभ्योपि दृश्यते भ्रातृ
वलः शत्रुवलः वलइत्यत्र [illegible] संज्ञायामित्यनुवृत्तेर्नेह दीर्घः दंतशिखात्संज्ञायां दंताव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वरो वा पंचमो स्यास्तीति पंचमी उक्तः अन्वाधनार्थमिदं वयसि किं पंचमवान् ग्रामः सुखादिभ्यश्च इनि
सि.को. मत्वर्थे सुखी दुःखी मालाक्षेपे माली धर्मशीलवर्णान्ताच्च धर्माद्यन्तादिनि मत्वर्थे ब्राह्मणधर्मी ब्राह्मण
पू. शीली ब्राह्मणवर्णी हस्ताज्जातौ हस्ती जातौ किं हस्तवान्पुरुषः वर्णाद्ब्रह्मचारिणि वर्णी पुष्करादिभ्यो
११८ देशे पुष्करिणी पद्मिनी देशे किं पुष्करवान् हस्ती बाहूरुपूर्वपदाद्बलात् बाहुबली ऊरुबली सर्वादेश्च
सर्वधनी सर्वबीजी अर्थाच्चासंनिहिते अर्थी संनिहिते तेन्वर्थवान् तदंताच्च धान्यार्थी हिरण्यार्थी
बलादिभ्यो मतुमन्यतरस्यां बलवान् बली उत्साहवान् उत्साही संज्ञायां मन्माभ्यां मन्नंतान्मांताच्च निर्प
थें७ त्व प्रथिमिनी दामिनी संज्ञायां किं सोमवान् कंशंभ्यां बभयुस्तितुतयसः पामेति मांतो कमिस्तुदक्क कं७
सुखयोः पामिति सुखे ऋग्भ्यां सप्तप्रत्ययाः स्युः ख्यस्य सो सकारः पदत्वार्थः कंबः कंभः कंयुः कं
246 तिकन्तुः कत्तः कंयः शंबः शंभः शंयुः शंतिः शंतुः शंतः शंयः अनुस्वारस्यैकल्पिकः परसवर्णः
बकारयकारपरस्यात्तु नासिको क्यौ तुंदिबलिवटेर्भः तुन्दानाभिस्तुंदिभ इन्यो यथायथमिति माधवः
तुंदिभः बलिभः वटिभः पामादित्वाद्वलिनोऽपि अहंशुभमोर्युस् अहमिति मांतं अहंकारे शुभमिति शु
भे अहंयुः अहंकारवान् शुभंयुः शुभान्वितः ॥ इति मत्वर्थीयाः ॥ प्राग्दिशो विभक्तिः किंसर्वादि राम.
भ्यः इत्यतः प्राक् वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः अथ स्वार्थिकाः प्रत्ययाः समथानामिति ११८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कन् शृंगारकः वृंदारकः फलबर्हाभ्यामिनच् फलिनः बर्हिणः हृदयाच्चालुरन्यतरस्यां हृदयालुः
हृदयिकः हृदयी हृदयवान् शीतोष्णतृप्रेभ्यस्तदसहने शीतं न सहते शीतालुः उष्णालुः स्फायितं
चीतिरक तृप्रः पुरोडाशः तं न सहते तृप्रालुः तृप्रं दुःखमिति माधवः हिमाच्चेलुः हिमं न सहते हिमे
लुः बलादूलः बलं न सहते बलूलः वातात्समूहे च वातं न सहते वातस्य समूहो वातूलः तप्पर्वमरु
द्भ्यां पर्वतः मरुत्तः ऊर्णाया युस् सित्वात्पदत्वं ऊर्णायुः अत्र छंदसीति केचिदनुवर्त्तयंति युक्तं चै
तत् अन्यथाहि अहं शुभमोर्युस् इत्यत्रैवोर्णाग्रहणं कुर्यात् वाचो ग्मिनिः वाग्मी आलजाटचौ बहु
भाषिणि कुत्सित इति वक्तव्यं कुत्सितं बहुभाषते वाचालो वाचाटः यस्तु सम्यग्बहु वदति तत्र वाग्मी
त्येव स्वामिन्नैश्वर्ये ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनिच स्वामी अर्श आदिभ्योच् अर्शोस्यवि
द्यंते ऽर्शसः आकृतिगणोयं द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः दंढकटक वलयिनी शंखनूपुरिणी उ
पतापो रोगः कुष्ठी किलासी गर्ह्यं निंद्यं ककुदावर्त्ती काकतालुकी प्राणिस्थात्किं पुष्प फलवान् घटः
प्राण्यंगाच्च पाणिपादवती अतः इत्येव चित्रकललाटिकावती सिद्धे मत्वर्थे पुनर्वचनं ठनादिबाध
नार्थं वातातिसाराभ्यां कुक्च चादिनिः वातकी अतीसारकी रोगे चायमिष्यते नेह वातवती गुहा पि
पिशाच्च पिशाचकी वयसि पूरणात् पूरणप्रत्ययांतान्मत्वर्थे इनिः स्यात् वयसि पंचमोस्य मासः संव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि. कौ. वैतं तत्र भवेत्तं एवं दीर्घायुः देवानांप्रियः आयुष्मान् सर्वैकान्यकिंयत्तदः काले दा सप्तम्यंतेभ्यः काला
पू. र्थेभ्यः स्वार्थे दा स्यात् सर्वस्मिन् काले सदा सर्वदा एकदा अन्यदा कदा काले किं सर्वत्र देशे इदमो र्हिल् यदान्तरा
११७ सप्तम्यंतात्कालइत्येव हस्यापवादः अस्मिन्काले एतर्हि काले किं इह देशे अधुना इदमः सप्तम्यंतात्का
लवाचिनः स्वार्थे ऽधुनाप्रत्ययः स्यात् इश् यस्येति लोपः अधुना दानींच इदानीं तदोदा च तदा त
दानीं तदो दावचनमनर्थकं विहितत्वात् अनद्यतने र्हिलन्यतरस्यां कर्हि कदा यर्हि यदा तर्हि तदा
एतस्मिन्काले एतर्हि सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरु
भयेद्युरुत्तरेद्युः एते निपात्यन्ते समानस्य सभावो द्यश्चाहनि समानेहनि सद्यः पूर्वपूर्वतरयोः परः उदारौ च
प्रत्ययौ संवत्सरे पूर्वस्मिन्वत्सरे ऐषमः परस्मादेद्यव्यहनि परस्मिन्नहनि परेद्यवि इदमोशद्यश्च अ
स्मिन्नहनि अद्य पूर्वादिभ्योष्टभ्यो ऽह्न्येद्युस् पूर्वस्मिन्नहनि पूर्वेद्युः अन्यस्मिन्नहनि अन्येद्युः उभयोर
ह्नोः उभयेद्युः द्युश्चोभयाद्वक्तव्यः उभयद्युः प्रकारवचने थाल् प्रकारवृत्तिभ्यः किमादिभ्यः थाल् स्यात् स्वा
र्थे तेन प्रकारेण तथा यथा इदमस्थमुः थालोपवादः एतदोपि वाच्यः अनेन एतेन वा प्रकारेण इत्थं कि राम.
मश्च केन प्रकारेण कथं ॥ इति प्राग्दिशीयानां विभक्तिसंज्ञानां प्रत्ययानामवधिः ॥ ॥ दिक्शब्देभ्यः सप्तमी ११७
247
पंचमी प्रथमाभ्यो दिग्देशकालेष्वस्तातिः सप्तम्याद्यंतेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थे ऽ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रथमादिति च निवृत्तं वेत्यनुवर्त्तत एव किंसर्वनामबहुभ्योऽद्व्यादिभ्यः किमः सर्वनाम्नो बहुशब्दाच्चेति
प्राग्दिशोधिक्रियते इदम इश् प्राग्दिशीये परे एतेतौ रथोः इदम्शब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थ
कारादौ च प्राग्दिशीये परे इशोपवादः एतदोऽन् योगविभागः कर्त्तव्यः एतदः एतेतौ स्तो रथोः अन् एतद इत्ये
व अनेकाल्त्वात्सर्वादेशः नलोपः प्रातिपदिकान्तस्य सर्वस्य सोऽन्यतरस्यां दि प्राग्दिशीये दकारादौ प्रत्यये परे
सर्वस्य सो वा स्यात् पंचम्यास्तसिल् पंचम्यन्तेभ्यः किमादिभ्यस्तसिल् स्यात् कु तिहोः किमः कुः स्यात्तादौ हा
दौ च विभक्तौ परतः कुतः कस्मात् यतः ततः इतः अतः अमुतः बहुतः द्व्यादेस्तु द्वाभ्यां तसेश्च किंसर्व
नामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात् स्वरार्थो विभक्त्यर्थो वचनं पर्यभिभ्यां च आभ्यां तसिल् स्या
त् सर्वोभयार्थाभ्यामेव परितः सर्वत इत्यर्थः अभितः उभयत इत्यर्थः सप्तम्यास्त्रल् कुत्र यत्र बहुत्र इ
दमो हः त्रलोपवादः ईशादेशः इह किमोऽत् वाग्रहणमपकृष्यते सप्तम्यन्तात्किमो वा स्यात् पक्षे त्रल् ।
क्वाति किमः क्वेत्यादेशः स्यादति क्व कुत्र वा ह च छंदसि कुह स्थः कुह जग्मथुः एतदस्त्रतसोस्त्रतसौ चानु
दात्तौ अन्वादेशविषये एतदोऽश् स्यात् स चानुदात्तः त्रतसोः परतः तौ चानुदात्तौ स्तः एतस्मिन् ग्रामे सु
खं वसामः अथो अत्राधीमहे अतो न गंतास्मः इतराभ्योऽपि दृश्यंते पंचमीसप्तमीतरविभक्त्यंतादपि
तसिलादयो दृश्यंते दृशिग्रहणाद्भवदादियोगे एव स भवान् ततो भवान् तत्र भवान् तं भवंतं ततो भ

किंसर्वनामद्व्यादिपर्युदासात्किमः
पृथग्ग्रहणं द्व्यादिषु किंशब्दपा
ठे प्रयोजनं॰ ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ पृ॰ १२० आहि च दूरे दक्षिणाहि दूरे आहिः स्यात् चादाच् दक्षिणादि दक्षिणा उत्तराच्च उत्तरादि उत्तरा संख्याया ७
विधार्थे धा क्रियाप्रकारे वर्त्तमानात्संख्याशब्दात्स्वार्थे धा स्यात् चतुर्धा पंचधा अधिकरणविचाले च द्र
व्यस्य संख्यांतरापादने संख्याया धा स्यात् एकं राशिं पंचधा कुरु एकाद्धो ध्यमुञन्यतरस्यां ऐकध्यं एकधा द्वि
त्र्योश्च धमुञ् आभ्यां धाऽत्ययस्य धमुञ् वा स्यात् द्वैधं त्रैधं द्विधा त्रिधा धमुञंतात्स्वार्थे डदर्शनं पथि द्वै
धानि एधाच्च द्वेधा त्रेधा याप्ये पाशप् कुत्सितो भिषक् भिषक्पाशः पूरणाद्भागे तीयादन् द्वितीयो
भागो द्वितीयः स्वरे विशेषः तीयादीकक्स्वार्थे वा वाच्यः द्वैतीयीकः द्वितीयः तार्तीयीकः तृतीयः न विद्या
याः द्वितीयात् तीया विद्येत्येव प्रागेकादशभ्योऽछंदसि पूरणप्रत्ययांताद्भागेऽन् चतुर्थपंचमः षष्ठा
२४८ ष्टमाभ्यां ञ च चादन् षष्ठो भागः षाष्ठः षष्ठः अष्टमः आष्टमः मानपश्वंगयोः कन्लुकौ च षष्ठा
ष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो मानपश्वंगे वाच्ये षष्ठको भागमानं चेत् अष्टमो भागः पश्वंगं चेत् ग्रं ५
ञस्य अनो वा लुक् चकारादयथा प्राप्तं षष्ठः षाष्ठः अष्टमः आष्टमः महाविभाषया सिद्धे लुग्वचनं
पूर्वत्र ज्ञानो नित्याविति ज्ञापयति एकादाकिनिच्चासहाये चात्कन्लुकौ एकः एकाकी एककः भूत राम॰
पूर्वे चरट् आढ्यो भूतपूर्वः आढ्यचरः षष्ठ्या रूप्य च षष्ठ्यंतात् भूतपूर्वेऽर्थे रूप्यः स्यात् चात् चरट् च कृष्ण १२०
स्य भूतपूर्वो गौः कृष्णचरः नाथिलादिषु रूप्यप्रत्ययपरिगणनात्क्वचन शुभ्राया भूतपूर्वः शुभ्रारूप्यः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कृष्णरूप्यः १

स्ताति प्रत्ययः पूर्वाधरावराणामसि पुरधवश्चैषां एभ्यो स्तात्यर्थे असिप्रत्ययः स्यात्तद्योगे चैषां क्रमात् पुर
अध् अव् इत्यादेशाः स्युः अस्ताति च अस्तातौ परे पूर्वादीनां पुरादयः स्युः पूर्वस्यां पूर्वस्याः पूर्वा वा दि
क् इति पुरः पुरस्तात् अधः अधस्तात् अवः विभाषावरस्य अवरस्यास्तातौ परे अव् स्याद्वा अवस्तात्
अवरस्तात् एवं देशे काले च दिक्शब्देभ्यः किं एं ग्रामं वसति सप्तम्यादिभ्यः किं पूर्वं ग्रामं गतः दिगादि
वृत्तिभ्यः किं पूर्वस्मिन् गुरौ वसति अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते दक्षिणोत्तराभ्याम
तसुच् अस्तातेरपवादः दक्षिणतः उत्तरतः विभाषापरावराभ्यां परतः अवरतः परस्तात् अवर
स्तात् अञ्चेर्लुक् अञ्चत्यन्ताद्दिक्शब्दादस्तातेर्लुक् लुक्तद्धितलुकि प्राच्यां प्राच्याः प्राची वा दि
क् प्राक् उदक् एवं देशे काले च उपर्युपरिष्टात् अस्तातेर्विषये ऊर्ध्वशब्दस्य उपादेशः स्यात् रिल् रि
ष्टातिलौ च प्रत्ययौ परि उपरि ष्टाद्वा वसति आगतो रमणीयं वा पश्चात् अपरस्य पश्चभाव आति
पश्चात् ४ श्च प्रत्ययोऽस्तातेर्विषये उत्तराधरदक्षिणादातिः उत्तरात् अधरात् दक्षिणात् एनबन्यतरस्याम
दूरेऽपञ्चम्याः उत्तरादिभ्य एनप् वा स्यादवध्यवधिमतोः सामीप्ये पञ्चम्यन्तं विना उत्तरेण दक्षिणेन
अधरेण पक्षे यथा स्वं प्रत्ययाः इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनपमाहुः पूर्वेण ग्रा
मं अपरेण ग्रामं दक्षिणा दाच् अस्तातेर्विषये दक्षिणा वसति आगतं रम्यास्त्वेव दक्षिणादागतः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ कारणं प्रस्थस्फवर्बंहिगर्वर्षित्रपद्राघिवृंदाः प्रियादीनां क्रमात् प्रादय इष्ठादिषु प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः
ष॰ बंहिष्ठः गरिष्ठः वर्षिष्ठः त्रपिष्ठः द्राघिष्ठः एवमीयसुनि प्रियोरुबहुलगुरुदीर्घाणां इत्यादित्वात् इमेत्यादि बहो
१२१ र्लोपो भू च बह्वोः बहोः परयोरिमेयसोर्लोपः स्यात् बहोश्च भूरादेशः आदेः परस्य भूमा भूयान् इष्ठस्य यिट्
च बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च भूयिष्ठः युवाल्पयोः कनन्यतरस्यां एतयोः कनादेशो वा
स्यादिष्ठेयसोः कनिष्ठः कनीयान् पक्षे यविष्ठः अल्पिष्ठः इत्यादि विन्मतोर्लुक् विनो मतुपश्च लुक् स्यादि
ष्ठेयसोः अतिशयेन स्रग्वी स्रजिष्ठः स्रजीयान् अतिशयेन त्वग्वान् त्वजिष्ठः त्वचीयान् प्रशस्तायां रू
पप् सुबंतात्तिङंताच्च प्रशस्तः पटुः पटुरूपः प्रशस्तं पचति पचतिरूपं ईषदसमाप्तौ कल्पब्देश्यदेशी
२४७ यरः ईषदूनो विद्वान् विद्वत्कल्पः यशस्कल्पं यजुष्कल्पं विद्वद्देशीयः पचतिकल्पं विभाषासुपो बहुच्पुर
स्तात्तु ईषदसमाप्तिविशिष्टेर्थे सुबंताद्बहुज्वा स्यात् स च प्रागेव न तु परतः ईषदूनः पटुः बहुपटुः प
टुकल्पः सुपः किम् यजतिकल्पं प्रकारवचने जातीयर् प्रकारवतिचायं यालत्तु प्रकारमात्रे पटुप्रकारः प
टुजातीयः प्रागिवात्कः इवेप्रतिकृतावित्यतः प्राक् काधिकारः अव्ययसर्वनाम्नामकच् प्राक्टेः तिङ
श्चेत्यनुवर्त्तते कस्यापवादः कांताव्ययस्य दकारोंतादेशः स्यादकच् अज्ञाते कस्यायमश्वोऽश्वकः उच्चकैः
नीचकैः सर्वके विश्वके ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागच् युवकयोः आवकयोः युष्म

१२१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अतिशायने तमबिष्ठनौ अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः अयमेषामतिशयेनाढ्यः आढ्यतमः ल
घुतमो लघिष्ठः तिङश्च तिङन्तादतिशये द्योत्ये तमप् स्यात् तरप्तमपौ घः एतौ घसंज्ञौ स्तः किमेत्तिङव्यय
घादाम्वद्रव्यप्रकर्षे किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे किंतमां पचतित
उच्चैस्तमां ४ मां प्राह्णेतमां द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः द्विवचनविभज्योपपदे तरबीयसुनौ द्वयोरेकस्यातिशये विभ
रूः क्ते चोपपदे सुप्तिङन्तादेतौ स्तः पूर्वयोरपवादः अयमनयोरतिशयेन लघुः लघुतरः लघीयान् उदीच्याः
प्राच्येभ्यः पटुतराः पटीयांसः अजादी गुणवचनादेव इष्ठनीयसुनौ गुणवचनादेव स्तः नेह पाचकतरः
पाचकतमः तुश्छन्दसि तृन् तृजन्तादिष्ठन्नीयसुनौ स्तः तुरिष्ठेमेयःसु तृशब्दस्य लोपः स्यादेतेषु परेषु
अतिशयेन कर्ता करिष्ठः दोहीयसी धेनुः प्रशस्यस्य श्रः अस्य श्रादेशः स्यादजाद्योः प्रकृत्यैकाच इष्ठा
दिष्वेकाच् प्रकृत्या श्रेष्ठः श्रेयान् ज्य च प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः ज्येष्ठः ज्यादादीयसः आदेःप १५
रस्य ज्यायान् वृद्धस्य च ज्यादेशः स्यादजाद्योः ज्येष्ठः ज्यायान् अन्तिकबाढयोर्नेदसाधौ अजाद्योः ने
दिष्ठः नेदीयान् साधिष्ठः साधीयान् स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः एषां यणा यण ३
दिपरं लुप्यते पूर्वस्य च गुण इष्ठादिषु स्थविष्ठः दविष्ठः यविष्ठः ह्रसिष्ठः क्षेपिष्ठः क्षोदिष्ठः एवमीयस्
ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा क्षेपिमा क्षोदिमा प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दार

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ पू॰ १२२ घेऽजादौ च चतुर्थादनजादौ वा स्तः वालयथा प्राग्भावोऽस्य हलं ह्रस्वार्थे अनुकम्पित उपेन्द्रदत्तः उपडः उपकः उपिकः उपि-
यः उपिलः उपेन्द्रदत्तकः षड्ङ्गुलेः । जातिनाम्नः कन् मनुष्यनाम्नः इत्येव जातिशब्दो यो मनुष्यनामधेयः तस्मा-
दनुकम्पायां नीतौ च सिंहकः रासभकः द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो वाच्यः कहोडः कहिकः
एकाक्षरपूर्वपदानामुत्तरपदलोपो वाच्यः वागाशीर्दत्तः वाचिकः कथं षडङ्गुलीदत्तः षडिकः इति षषष्ठा
जादिवचनात्सिद्धं शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् एषां मनुष्यनाम्नां ठाजादौ परे तृतीयाद्
च ऊर्ध्वस्य लोपः स्यात् पूर्वस्यापवादः अनुकम्पितः शेवलदत्तः शेवलिकः शेवलियः सुपरिकः विशा- शेवलिलः
लिकः वरुणिकः अर्यमिकः अजिनान्तस्योत्तरपदलोपश्च अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन् त-
250 स्योत्तरपदलोपः अनुकम्पितो व्याघ्राजिनो व्याघ्रकः सिंहकः अल्पे अल्पं तैलं तैलकं ह्रस्वे ह्रस्वो वृक्षो
वृक्षकः संज्ञायां कन् ह्रस्वत्वहेतुकायां संज्ञायां गम्यमानायां कन् पूर्वस्यायमपवादः वंशकः वेणुकः कु-
टीशमीशुण्डाभ्यो रः ह्रस्वा कुटी कुटीरः शमीरः शुण्डारः कुत्वा डुपच् ह्रस्वा कुतूः कुतुपः कुतूः [illegible] स्ने-
हपात्रं ह्रस्वा सा कुतुपः उमान् कासूगोणीभ्यां ष्टरच् आयुधविशेषः कासूः ह्रस्वा सा कासूतरी गो- राम्॰
णीतरी वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे वत्सतरः द्वितीयं वयः प्राप्तः उक्षतरः अश्वतरः ऋषभतरः भवति १२३
निमित्तं तनुत्वमेवायं किं यत्तदो [illegible] बहूनां मध्ये एकस्य निर्धारणे डतमज्वा स्यात् जा-
अनयोः कतरो वैष्णवः यतरः ततरः महाविभाषया कः यः सः वा बहूनां जातिपरिप्रश्ने डतम-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

काचु अस्मकासु युष्मकाभिः अस्मकाभिः ओकारेत्यादि किं त्वयकामयका अकच् प्रकरणे तूष्णीमः काम् व
क्तव्यः मित्यादेत्याचः परः तूष्णीकामास्ते शीलेको मलोपश्च तूष्णीशीलस्तूष्णीकः पचतकि जल्पतकि धकित्
हिरुकुत् कुत्सिते कुत्सितोऽश्वोऽश्वकः संज्ञायां कन् कुत्सिते कन् स्यात् नदेते न चेत्संज्ञाऽवगम्यते शूद्रकः राधके
स्वरार्थवचनं अनुकम्पायां पुत्रकः अनुकम्पितः पुत्र इत्यर्थः नीतौ च तद्युक्तात् सामदानादिरूपायां नीतौ तिः
तस्यां गम्यमानायां अनुकम्पायुक्तात्प्रत्ययः स्यात् हंत ते धानकाः गुडकः एहकि अद्धकि सर्वेणानुकम्पमा
नात्प्रत्ययः अनेन तु परंपरा संबंधे पीति विशेषः बह्वचो मनुष्यनाम्न ठज्वा एवं सत्य चद्वय विषये घनिलचौ
च तत्रैव ठजादावूर्ध्वं द्वितीयादचः अस्मिन्प्रकरणेऽष्टाऽजादि प्रत्यये परतस्मिन्परे प्रकृते द्वितीयादच ऊ
र्ध्वं सर्वं लुप्यते अनुकम्पितो देविकः देवियः देविलः देवदत्तकः अनुकम्पितो वायुकः उग्रहणमुकोद्वितो
यत्वेक विधानार्थं वायुदत्तः वायुकः पितृकः चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः अनुकम्पितो बृहस्पतिदत्तो
बृहस्पतिकः अनजादौ च विभाषा लोपो वक्तव्यः देवदत्तकः देवकः लोपः पूर्वपदस्य च दत्तिकः दत्तियः दत्त
कः विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः देवदत्तः दत्तः देवः सत्यभामा भामा सत्या उवर्णाल्ल
इलस्य च भानुदत्तः भानुलः अवर्णाद्यपि सुवित्रियः सवितलः चतुर्थादनजादौ च लोपः पूर्वपदस्य च
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च प्राचामुपादेरड्वुचौ च उपशब्दपूर्वात्प्रातिपदिकान्सर्वे विध

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ कः काकमरणसदृशस्तु प्रत्ययार्थः अजाकृपाणीयं अतर्कितोपनत इति फलितोर्थः शर्करादिभ्योऽण्

पु॰ शार्करेव शार्करं अंगुल्यादिभ्यष्ठक् अंगुलीव आंगुलिकः भरुजेव भारुजिकः एकशालायाष्ठजन्यतर

१२३ स्यां एकशालाशब्दादिवार्थे ठज्वा पक्षे ठक् एकशालेव एकशालिकः ऐकशालिकः कर्कलोहितादीक

क् कर्कः शुक्लोऽश्वः स इव कार्कीकः लौहितीकः स्फटिकः पूगाञ्ञ्योऽग्रामणीपूर्वात् इवार्थो निवृत्तः ना

नाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगास्तद्वाचकात्स्वार्थे ञ्यः स्यात् लौहितध्वज्यः व्रा

तच्फञोरस्त्रियाम् व्राते कापोतपाक्यः च्फञ् कौंजायन्यः ब्राध्नायन्यः आयुधजीविसंघाञ्ञ्यड्वा

हीकेष्वब्राह्मणराजन्यात् वाहीकेषु य आयुधजीविसंघस्तद्वाचिनः स्वार्थे ञ्यट् क्षौद्रक्यः मालव्यः स्त्रि

251 त्वान्ङीप् क्षौद्रकी मालवी आयुधेति किं मल्लाः संघेति किं सम्राट् वाहीकेषु किं शबराः अब्राह्मणे

ति किं गोपालवाः शालंकायनाः ब्राह्मणेतद्विशेषग्रहणं राजन्ये स्वरूपग्रहणं वृकाट्टेण्यण् आयुध

जीविसंघवाचकात्स्वार्थे वार्केण्यः आयुधेति किं जातिशब्दान्मा भूत् दामन्यादित्रिगर्तषष्ठाच्छः दा

मन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः स्यात् त्रिगर्तः षष्ठो वर्गो येषां ते त्रि दाम॰

गर्तषष्ठाः आहुस्त्रिगर्तषष्ठांस्तु कौंडोपरथदांडकी क्रौष्टुकि जालमानिस्तु ब्रह्मगुप्तोथ जानकिः १२३

दामनीयः दामनीयौ दामनयः औलपि औलपीयः त्रिगर्तः कौंडोपरथीयः दांडकीयः पर्श्वादियौधे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ति परिमृश्च इति प्रत्याख्यातमाकरे कतमो भवतां कठः यतमः ततमः वा ग्रहणमकजर्थं यकः सकः महावि
भाषयायं सः किं मोस्मिन्विषये उतरजपि कतरः एकाच्च प्राचां डतरच् डतमच् स्यात् अनयोरेकतरो मै
त्रः एषामेकतमः अवक्षेपणे कन् व्याकरणकेन गर्वितः येनेतरः कुत्स्यते तद्धि होदाहरणं स्वतः कुत्सि
ते तु कुत्सिते इत्यस्य पाणिवादीनां प्रग्णो वाधिः इवे प्रतिकृतौ कन् स्यात् अश्व इव प्रतिकृतिः अश्वकः प्रति
कृतौ किं गौरिव गवयः संज्ञायां च इवार्थे कन् स्यात् समुदायेन चेत्संज्ञा अप्रतिकृत्यर्थः आरंभः अश्वसदृ
शस्य संज्ञा अश्वकः उष्ट्रकः लुम्मनुष्ये संज्ञायां विहितस्य कनो लुप् स्यान्मनुष्ये वाच्ये चंचा तृणमयः पु
मान् चंचेव मनुष्यः चंचा वर्ध्रिका जीविकार्थे चापण्ये जीविकार्थे यदविक्रीयमाणं तस्मिन्वाच्ये कनो लु
प् स्यात् वासुदेवः स्कंदः शिवः देवलकानां जीविकार्था सुदेवप्रतिकृतिष्विदं अपण्ये किं हस्तिकान्वि
क्रीणीते देवपथादिभ्यश्च कनो लुप् स्यात् देवपथः हंसपथः आकृतिगणोयं वस्तेर्ढञ् इवेत्यनुवर्त्तते
प्रतिकृता विति निवृत्तं वस्तिरिव वास्तेयं शिलाया ढः शिलाया इति योगविभागाद्ढञपीत्येके शिलेव
शिलेयं शैलेयं शाखादिभ्यो यः शाखेव शाख्यः मुख्यः जघन्यः अग्र्यः शरण्यः द्रव्यं च भव्ये द्रव्यमयं
ब्राह्मणः कुशाग्राच्छः कुशाग्रमिव कुशाग्रीया बुद्धिः समासाच्च तद्विषयात् इवार्थविषयात्समासाच्छः
स्यात् काकतालीयो देवदत्तस्य वधः इह काकतालसमागमसदृशश्चौरसमागमः इति समासार्थः तत्सदृ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क

५।४।८

सि॰कौ॰ पू॰ १२४

समो ग्रहति कालतथा आच्छादने किं वृहतीछंदः अषडक्षीणमलंकर्मालंपुरुषाध्युत्तरपदात्खः स्वार्थे
अषडक्षीणो मंत्रः द्वाभ्यामेव ज्ञात इत्यर्थः आशितागावो स्मिन्नित्याशितंगवीनं अरण्यं निपातनात्पूर्वस्य मुम्
अलंकर्मणे अलंकर्मीणः अलंपुरुषीणः ईश्वराधीनः नित्योयं खः उत्तरसूत्रे विभाषाग्रहणात् अन्ये
त्विके चित्स्वार्थिकानिच्छंति तमबादयः प्राक्तनः आदयः प्राक्तनः आमादयः प्राङ्मयट् वृह
तिजातीयतः समासांताश्चेति विभाषांचेरदिक्स्त्रियां अदिक्स्त्रीवृत्ते रंचत्यंतात्प्रातिपदिकात्खः
स्यात्स चा स्वार्थे प्राक् प्राचीनं प्रत्यक् प्रतीचीनं अवाक् अवाचीनं निकृष्टमाते कथा वेरेफयाप्याव
माधमाः इति कोशात् निकृष्टपर्यायेषु अर्वन् शब्दस्य पाठर्वात् अंचतीत्यर्वाक् अर्वाचीनं निकृष्ट रा॰१
252 मित्यर्थः अदिक्स्त्रियां किं प्राचीदिक् दिग्ग्रहणं किं प्राचीना ब्राह्मणी स्त्री ग्रहणं किं प्राचीनाः आ
माद्यामाः जात्यंताच्छबंधुनि ब्राह्मणजातीयः बंधुनि किं ब्राह्मणजातिः शोभना जातिर्बीजकं
द्रव्यबंधः स्थानांताद्विभाषा सस्थानेनेतिचेत् सस्थानेन तुल्येन चेत्स्थानांतमर्थवदित्यर्थः पितृ
स्थानीयः पितृस्थानः सस्थानेनेति किं गोस्थानं अनुगादिनष्ठक् अनुगदतीत्यनुगादी स एव आ
नुगादिकः णचस्त्रियामञ् णच्प्रत्ययांतात् स्त्रियामञ् स्यात्स्वार्थे कर्मव्यतिहारे अस्चोच राम॰
नस्यात् व्याक्रोशी अणिनुणः इनुणेनादण्स्यात्स्वार्थे इनण्यनपत्ये सांराविणं विसारिणोम १२४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यादिभ्यामणञौ आयुधजीविसंघवाचिभ्य एभ्यः क्रमादणञौ स्तः स्वार्थे पार्शवः पार्शवौ पर्शवः
यौधेयः यौधेयौ यौधेयाः ॥ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् अ
भिजिदादिभ्यो ऽणन्तेभ्यः स्वार्थे यञ् आभिजितो ऽपत्यमाभिजित्यः वैदभृत्यः शालावत्यः शैखावत्यः
शामीवत्यः और्णावत्यः श्रौमत्यः ञ्यादयस्तद्राजाः पूगाञ्ञ्य इत्यारभ्योक्ता एतत्संज्ञाः स्युः तेनास्त्रि
यां बहुषु लुक् लौहितध्वजाः कपोतपाकाः कौञ्जायनाः ब्राध्नायना इत्यादि ॥ पादशतस्य संख्यादे
र्वीप्सायां वुन् लोपश्च लोपवचनमनैमित्तिकत्वार्थं अतो न स्थानिवत् पादः पत् तद्धितार्थे इति स
मासे कृते वुन् अस्य यः इति ह्रियामेव द्वौ द्वौ पादौ ददाति द्विपदिकां द्विशतिकां पादशतग्रहणमन
र्थकमन्यत्रापि दर्शनात् द्विमोदकिकां ॥ दण्डव्यवसर्गयोश्च वुन् स्यात् अवीप्सार्थमिदं द्वौ पादौ दण्डितः
द्विपदिकां द्विशतिकां व्यवसृजति ददातीत्यर्थः ॥ स्थूलादिभ्यः प्रकारवचने कन् जातीयरो ऽपवादः स्थू
लप्रकारः स्थूलकः अणुकः चञ्चद्बृहतोरुपसंख्यानम् चञ्चत्कः बृहत्कः सुराया अहौ सुरावर्णो
ऽहिः सुरकः ॥ अनत्यन्तगतौ क्तात् छिन्नकं भिन्नकं ॥ न सामिवचने सामिपर्याये उपपदे क्तान्तात् कन्
सामिकृतं अर्धकृतं अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात् पूर्वेण कन्प्राप्तः इदमेव निषेधसूत्रम
न्तं स्वार्थिकमपि कनं ज्ञापयति बृहतिकं ॥ बृहत्या आच्छादने कन् स्यात् द्वौ प्रावारोत्तरासंगौ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ साधारणं स्त्रियां ङीप् आगामीभी साधारणी ॥ अतिथेर्ञ्यः ॥ तादर्थ्य इत्येव अतिथये इदं आतिथ्यं ॥ देवात्तल् ॥ दे
श॰ वता ॥ अवेः कः ॥ अविरेव अविकः ॥ यावादिभ्यः कन् ॥ याव एव यावकः ॥ मणिकः ॥ लोहितान्मणौ ॥ लोहित एव मणि
१२५ र्लोहितकः ॥ वर्णे चानित्ये ॥ लोहितकः कोपेन ॥ लोहिता लिंगबाधनं वा ॥ लोहितिका लोहिनिका कोपेन ॥ रक्ते ॥ ला
क्षादिना रक्ते यो लोहितस्तस्मात्कन् स्यात् लिंगबाधनं वेत्येव लोहितिका लोहिनिका शाटी ॥ कालाच्च ॥ वर्णे चा
नित्ये रक्ते इति त्रयमनुवर्त्तते ॥ कालकं मुखं वैलक्षण्येन ॥ कालकः पटः ॥ कालिका शाटी ॥ विनयादिभ्यष्ठक् ॥ वि
नयः एव वैनयिकः ॥ सामयिकः ॥ उपायाद्ध्रस्वत्वं च ॥ औपयिकः ॥ वाचो व्याहृतार्थायां ॥ संदिष्टार्थायां वाचि विद्य
मानात् वाक्शब्दात्स्वार्थे ठक् ॥ सांदेशिकी वाक् वाचिकं स्यात् ॥ तद्युक्तात्कर्मणोऽण् ॥ कर्मैव कार्मणं ॥ वाचिकं श्रुत्वा ॥
253 क्रियमाणं कर्मेत्यर्थः ॥ ओषधेरजातौ ॥ स्वार्थे अण् ॥ औषधं पिबति ॥ अजातौ किं ॥ ओषधयः क्षेत्रे रूढाः ॥ प्रज्ञा
दिभ्यश्च ॥ प्रज्ञ एव प्राज्ञः ॥ प्राज्ञी स्त्री ॥ दैवतः ॥ बांधवः ॥ मृदस्तिकन् ॥ मृदेव मृत्तिका ॥ सस्नौ प्रशंसायां ॥ रूपपोऽप
वादः ॥ प्रशस्ता मृत् मृत्सा मृत्स्ना ॥ उत्तरत्रान्यतरस्यांग्रहणानि ॥ सोऽस्य ॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्यां ॥
बहूनि ददाति बहुशः ॥ अल्पानि अल्पशः ॥ बह्वल्पार्थान्मंगलामंगलवचनं ॥ नेह बहूनि ददात्यनिष्टेषु ॥ अल्प
माभ्युदयिकेषु ॥ संख्यैकवचनाच्च वीप्सायां ॥ द्वौ द्वौ ददाति द्विशः ॥ माषं माषं माषशः ॥ प्रस्थशः ॥ परिमाणशब्द राम॰
वृत्तावेकार्था एव संख्यैकवचनात् किं घटं घटं ददाति वीप्सायां किं द्वौ ददाति कारकादित्येव द्वयोर्द्वयोः ॥ १२५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्सेय ऋणं स्यात् वैसारिणः मत्स्ये किं विसारी देवदत्तः संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् अभ्या
वृत्तिर्जन्मक्रियाजन्मगणनं वृत्ते संख्यायाशब्दात्स्वार्थे कृत्वसुच स्यात् पंचकृत्वो भुंक्ते संख्याया किं भूरिवारा
न्भुंक्ते द्वित्रिचतुर्भ्यः सुच् कृत्वसुचोपवादः द्विर्भुंक्ते त्रिः एतस्य चतुः एकस्य सकृच्च सकृदित्यादेशः स्याद् वा
सुच्च सकृद्भुंक्ते संयोगांतस्येति सस्य लोपः ननु हल्ङ्याब्भ्य इति अभेत्यीत्त इत्यत्र सिच इव सुचोपि तद्योगात् वि
भाषा बहोर्धा विप्रकृष्टकाले अविप्रकृष्टकाल आसन्नः कालः बहुधा बहुकृत्वो वा दिवसस्य भुंक्ते आसन्न
काले किं बहुकृत्वो मासस्य भुंक्ते तत्प्रकृतवचने मयट् प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादने भा
वे धिकरणे वा स्युः आद्ये प्रकृतमन्नमन्नमयं अपूपमयं यवागूमयं द्वितीये अन्नमयो यज्ञः अपूपमयं
पर्व समूहवच्च बहुषु सामूहिकाः प्रत्ययाः प्रातिपदिकेभ्यो चान्मयट् मोदकाः प्रकृताः मोदकिकं मो
दकमयं शाष्कुलिकं शष्कुलीमयं द्वितीयार्थे मोदकिको यज्ञः मोदकमयः अनंतावसथेतिहभेषजाञ्ञ्यः
अनंत एव आनंत्यं आवसथ एव आवसथ्यं इतिह इति निपातसमुदायः ऐतिह्यं भेषजमेव भैषज्यं देव
तान्तात्तादर्थ्ये यत् तदर्थ एव तादर्थ्यं स्वार्थे ष्यञ् अग्निदेवतायै इदं अग्निदेवत्यं पितृदेवत्यं पादार्घाभ्यां
च पादार्थमुदकं पाद्यं अर्घ्यं नश्च पुराणे प्रात् पुराणे वर्तमानात् प्रशब्दात् नो वक्तव्यः चात्स्वार्थे त्नः प्रणं
प्रत्नं प्रतनं प्रीणं भागरूपनामभ्यो धेयः भागधेयं रूपधेयं नामधेयं आग्नीध्रसाधारणादञ् आग्नीध्रं सा
नवस्य नू आदेशस्त्नप्तनखाश्च प्रत्यया वक्तव्या नूत्नं नूतनं नवीनं २४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ भ्वस्तियोगे संपद्यकर्त्तरि च्विः । अभूततद्भाव इति वक्तव्यं विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्त्तमाना द्विका
प्र॰ रशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे अस्य च्वौ अस्य ईत्स्यात् च्वौ वेर्लोपः च्व्यन्तत्वादव्ययत्वं
१२६ अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति ब्रह्मीभवति गंगी स्यात् अव्ययस्य च्वावीत्वं नेति वाच्यं
दोषाभूतमहः दिवाभूता रात्रिः एतच्चाव्ययीभावश्चेति सूत्रे भाष्ये उक्तं क्यच्व्योश्च हलः परस्यापत्यस्य य
कारस्य लोपः स्यात् क्ये च्वौ च परतः गार्गीभवति च्वौ च च्वौ परे पूर्वस्य दीर्घः शुचीभवति पटूस्यात् अ
व्ययस्य दीर्घत्वं नेति केचित् तन्निर्मूलं स्वस्ति स्यादिति तु महाविभाषया च्वेरभावे सिद्धं [illegible]
[illegible] स्वस्तीस्यादित्यपि पक्षे स्यादिति चेत् अस्तु यदि ने
256 ष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यत इत्यतस्तु रीङृतः मात्रीकरोति अरुर्मनश्चक्षुश्चेतोरहोर अ॰ ५
जसां लोपश्च एषां लोपः स्यात् च्वौ च अरूकरोति उन्मनीस्यात् उच्चक्षूकरोति विचेतीकरोति वि
रहीकरोति विरजीकरोति विभाषा साति कार्त्स्न्ये च्विविषये साति र्वा स्यात्साकल्ये सात्पदाद्योः सस्य
षत्वं न स्यात् दधि सिंचति कृत्स्नं शस्त्रमग्निः संपद्यतेऽग्निसाद्भवति अग्नीभवति महाविभाषया वा पाम॰
क्यमपि कार्त्स्न्ये किं एकदेशेन शुक्लीभवति पटः अभिविधौ संपदा च संपदा कृभ्वस्तिभिश्च योगे सा १२६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वामी प्रतियोगे पंचम्यास्तसिः प्रतिनाकमेव चर्म्मीयेन योगे या पंचमी विहिता तदंतात्तसिः स्यात् प्रद्यु
महां इन्द्रः ते त्तिरीयास्तु अनुस्वारमधीयंते तत्र छांदसो व्यत्यय इति भाष्यं। एवं चस त्तस्य फलं वित्यं स
तवान्यापो रुवो भुवस्तस्यस्वात्तवोः पापुरुने छंदसि वाः प्रा म्रेडितयोः विसर्गस्य सो वा स्यात् कुपोः प्रशा
माम्रेडिते चवर्जयित्वा अग्ने त्रातर्कृतस्कविः गिरिनेविश्वतस्पृथुः नेहवसुनः एवंपतिः अप्रेत्यादिदिं न्न
ग्निः पविकान् परुषः परुषः कः करत्करतिकृधिकृतेष्वनदितेः विसर्गस्यसः प्रदिवो अपस्कः। यथानोव
स्पमसस्करत् सुपेश्यामस्कः रति उरुणस्कृधि सोमं नचा रुं म ७ वत्सुनस्कृतं अनदितेरितिकिं यथा नेः अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यात् २

स्य २

सि॰कौ॰ येवाछंदसिसस्यमूर्धन्यः न्यषीदत् [illegible] यसीदत् अभ्यष्टौत् अभ्यस्तौत् छंदस्यदवग्रहा

उ॰ वै॰ त् ऋकारांतादवग्रहात्परस्यनैणः नृमणः पितृयाणं नॄवधातुस्थोरुषुभ्यः धातुस्थात् अग्नेर्‌ह्वाणः

१४ उष्णिक्ताणो अस्मिन्‌उरुणस्कधि अभीषुणः मोषुणः ॥ इत्यष्टमोऽध्यायः ॥ ॐतत्सदितिश्रीमुकु

कुंदचरणकमलेभ्योनमः ॥ श्रीमन्निम्बादित्यायनमोनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ मुकुंद सोदं पुस्तकं

271

सम॰
१४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

९४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ उ॰स्व॰ १ श्रीमन्निम्बार्को जयतितरां वक्रतुंडाय नमः अनुदात्तं पदमेकवर्जं परिभाषेयं। स्वरविधिविषया यस्मिन्पदे य
स्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं स्यात् गोपायतं नः अत्र सनाद्यन्ता धातुस्व इति२
रेणायकार उदात्तः शिष्टमनुदात्तं सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यं तेनोक्तोदाहरणे गुपेर्धातु
स्वरः आयस्य प्रत्ययस्वरेण न शिष्यते अन्यत्रेति किं यत्तं वज्रमभिहृधे गृणीतः अत्र सतिशिष्टोपि श्नाःस्वस्य स्व
रेण शिष्यते तिं तु तस एव अनुदात्तस्य च यत्रोदात्तलोपः अस्मिन्नुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात् नु५
देवीं वाचं अत्र ङीबुदात्तः चौ लुप्ताकारे ऽचतो परेश्वर्यं स्यालोदात्तः उदात्तनिवृत्तिस्वरापवादः देवद्रीचीं नयत देवयं
न्तः अतद्धित इति वाच्यं दाधीचः माधूचः प्रत्ययस्वर एवात्र आमंत्रितस्य च आमंत्रितविभक्त्यंतस्यादिरुदात्तः स्या
त् अग्न इंद्र वरुण मित्र देवाः आमंत्रितस्य च पदात्परस्यापादादि.... स्थस्यामंत्रितस्य सर्वस्यानुदात्तः स्यात्
मागुक्तस्य षाष्ठस्यापवादो यमाष्टमिकः इमं मे गंगे यमुने सरस्वति आ पादादौ किम् शुतुद्रि स्तोमं आमंत्रितं पूर्वम र५
विद्यमानवत् अग्न इंद्र अत्रेंद्रादीनां निघातो न पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावात् नामंत्रिते समानाधिक
रणे सामान्यवचनं समानाधिकरणे आमंत्रिते परे विशेष्यं पूर्वमविद्यमानवत् न अग्ने तेजस्विन् अग्ने त्रातः
सामान्यवचनं किम् पर्यायेषु मा भूत् अघ्न्ये देवि सरस्वति सामान्यवचनं विभाति विशेषवचने अत्र भाष्यकृता राम॰
बहुवचनमिति शरीरं सामान्यवचनमिति च पूर्वसूत्रे योजितं आमंत्रितांते विशेषणे परे पूर्वं बहुवचनांत १

272

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जर भा२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्र० यश्चाह्वः वौषट् श्रौषट् इत्यादौ एकश्रुतिर्दूरात्संबुद्धौ दूरात्संबोधने वाक्यमेकश्रुतिः स्यात् ३

सि॰ कौ॰ हे तेभुचेति उदात्तादनुदात्तस्य स्वरितः। उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात् अग्निमीळे अस्याप्यसिद्धत्वाच्छेषनिघातो न

उ॰ स्व॰ तमीशानासः नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् गार्ग्यादिम

२ ते तु स्यादेव अस्मिन्सूत्रे स्वर्यापवादः आगच्छ भो माणवक यज्ञकर्मण्यजपन्यूङ्खसामसु यज्ञक्रियायां मंत्र एकश्रुतिः स्या

ऋतु॰ ४ ज्जपादीन्वर्जयित्वा अग्निर्मूर्द्धा दिवः यज्ञेति किम् स्वाध्यायकाले त्रैस्वर्यमेव अजपेति किम् ममाग्ने वर्चो विहवे

ष्वस्तु जपो नाम उपांशुप्रयोगः यथा जले निमग्नस्य न्यूङ्खो नाम षोडश ओंकाराः गीतिषु सामाख्या उच्चैस्तरां वा व

षट्कारः यज्ञकर्मणि वौषट् शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा विभाषा छन्दसि छन्दसि विभाषा एकश्रुतिः स्यात् व्य

वस्थितविभाषेयं संहितायां त्रैस्वर्यं ब्राह्मणे एकश्रुतिर्बह्वृचानां अन्येषामपि यथा संप्रदायं व्यवस्था न सुब्रह्मण्या

यां स्वरितस्य तूदात्तः सुब्रह्मण्याख्ये निगदे यज्ञकर्मणीति विभाषा छन्दसीति च प्राप्ता एकश्रुतिर्न स्यात् स्वरितस्यो

दात्तश्च स्यात् सुब्रह्मण्योम् असावित्यंतः तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः गार्ग्यो यजते पिता स्यात् अम॰ । स्यात् ४

आद्युदात्तो नेन वा ध्यते अमुष्येत्यंतः षष्ठ्यन्तस्यापि प्राग्वत् दाक्षेः पिता यजते स्यात् स्योपोत्तमं च वा देतः तेन द्वा

दशान्तो गार्ग्यस्य पिता यजते नामधेयस्य स्यात् तस्य नामधेयं उपोत्तममुदात्तं वा स्यात् देवदत्तस्य पिता यजते देवब्र राम॰

ह्मणोरनुदात्तः अनयोः स्वरितस्यानुदात्तः स्यात् सुब्रह्मण्यायां देवा ब्रह्मण आगच्छत स्वरितात्संहितायाम २

स्या॰ २

नुदात्तानाम् स्वरितात्परेषामनुदात्तानां संहिता

याम १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

273

मविद्यमानवद्या देवीः षड्वीरुरुनः करोति अत्र देवीनां विशेषणत्वमदि तिदेवाः शरण्याः इहदिति ती यैनिघातो वैकल्पि स
३२ कः सुवामंत्रिते पराङ्गवत्स्वरे सुबंतमामंत्रिते परे परस्याङ्गवत्स्वंकर्त्तव्येद्दवत्या णीम्रुभस्यती स्तुभद्दतिस्तुभेः किंवत्ताष
ष्ठ्यंतं तस्य परशरीरानुप्रवेशे षष्ठ्यामामंत्रिताद्युदात्तत्वं नचाष्टमि को निघातः शंकाः पूर्वामंत्रितस्याविद्यमा
नत्वे नपादादित्वात् यत्रेद्विवोदुहित्तर्मत्तेभोजनमद्दह दिवः शब्दस्याष्टमिको निघातः परमुनाह्मघ्वन् सद्यामंत्रि
तकारकवचनं षष्ठ्यंतमामंत्रि तेप्रतिपत्कारकंनुवाचकंचेतिपरिगणनं कर्त्तव्यमिस्यर्थः तेनेद्दन अयमग्नेज
रिता एतेनाग्नेब्रह्मणासमर्धीनुकूल्याद्यावासिद्धमपूर्वाङ्गवद्भेतिवक्तव्यं आतेपितर्मरुतां मतित्वाद्दद्दितदिवः अ
व्ययानान उच्चैरधीयानः अव्ययीभावस्यविष्यते उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य उदात्तस्थानेस्वरि
तस्थानेचयो यणस्ततःपरस्यानुदात्तस्य स्वरितःस्यात् अभ्यामिहि स्वरितयणःखलध्वा ग्वा अस्य स्वरितस्य त्रै
पादिकत्वेनासिद्धत्वाच्छेषनिघातोन एकादेशउदात्तेनोदात्तः उदात्तेन सहैकादेशउदात्तःस्यात्तवोग्वाःकाव
रंमरुतः स्वरितोवानुदात्तेपदादौ अनुदात्तेपदादौपरे उदात्तेन सहैकादेशः स्वरितोवास्यात् पक्षेप्रर्वं स्वेणोदा
त्तः वी देंज्योतिर्हृदये अस्यश्लोकोदिवीयते व्यवस्थितविभाषात्वादिकारयोः स्वरितःदीर्घप्रवेशेतूदात्तः किं
च एङः पदांतादिति पूर्वेरूपे स्वरितएव तेवदन् सोयमागात् उक्तंच प्रातिशाख्ये इकारयोश्चप्रश्लेषैक्षाभिनि
उपाग्रमधीयानः ६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. उ.स्व. ३ अंतोऽगुरोऽनि पात्यते कालविशेषे रथाद्यवयवे च वैश्वानरः कुशिके भिर्युगे युगे अन्यत्रयोगे गैत्वमस्तरं भित्त शब्दोयन्तं
गावः सोमस्य पथ्यमस्य भद्रः उत्तमशाश्वतमावपि उउत्तमं वरुं शाश्वत्तमभीत्हे चतुरः शासि चतुरोऽन्तउदात्तः पास्तिपरे
चतुरः कल्पयन्तः अचिरउति रादेशस्य पूर्वविधौ स्थानिवत्वान्नेह चतस्रः पश्य चतेरुरन् नित्त्वादाद्युदात्तता मध्युपोत्त
मं षट्त्रिचतुर्भ्यो याहलादि विभक्तिस्तदंते पदेउपोत्तममुदात्तं स्यात् अ षड्भिः पंचभिः नवभिर्वाजैर्नवतीच सप्त
भ्यो जायमानः आदशभिर्विवस्वतः उपोत्तमं किं आ षड्भिर्हूयमानः विश्वैर्देवैस्त्रिभिः रुलिकं नवानां नवती
नां विभाषा भाषायां उक्त विषये सर्वस्य सुपि सुपि परे सर्वशब्दस्यादिरुदात्तः सर्वे नंदन्ति यशसा त्नित्यादिर्नित्यंनि
निदं तस्य ह्रंतस्यां चादिरुदात्तः यस्मिन्विश्वानि पौंस्या ऊसः कर्मणि ब्राह्मणो त्वात् ष्फन् स्तुतेरघिष्ठन ष्नन्नः चायते रस्तुन् दि६
चायैरन्ने ह्रस्वश्चेति ककारादसुनो नुडागमः पथिमथोः सर्वनामस्थाने आदिरुदात्तः स्यात् अयं पंथाः सर्वनाम
275 स्थाने किम् ज्योतिष्मतः पथो रक्ष उदात्तनिवृत्तिः स्वरेणांतोदात्तं पदं अंतश्च तवै युगपत् तवैप्रत्ययांतस्याद्यं
तौ युगपदुदात्तौ स्तः हर्षसे दातवा उ क्षयो निवासे आद्युदात्तः स्यात् स्वे क्षये शुचिव्रतः जयः करणं करणवाची
घु २ जयशब्दआ दात्तः जयंत्यनेन जयोश्वः वृषादीनां च आदिरुदात्तः आकृतिगणोयं वाजेभिर्वाजिनीवती इंद्रं राम. ३
वाणी संज्ञायामुपमानं उपमानशब्दः संज्ञायामाद्युदात्तः चंचेव चंचा कनोलुप् एतदेव ज्ञापयति क्वचित्स्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रुश्वतिः स्यात् इमंमेगंगे यमुने सरस्वति उदात्तस्वरितपरस्य सन्नतरः उदात्तस्वरितौ परौ यस्मात् स्यानुदात्तस्तरः

स्यात् सरस्वति शुतुद्रि अचर्चयत्स्वा तस्य परमाम्रेडितं अनुदात्तं च द्विरुक्तस्य परं रूपमनुदात्तं स्यात् दिवे दिवे

॥ इति साधारणस्वराः ॥ धातोः अंत उदात्तः स्यात् गोपायतं नः असि सत्यः स्वपादिहिंसामच्यनिटि स्वपादीनां

हिंसेश्चानिटि अजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात् स्वपादिरदाद्यंतर्गणः स्वपंति स्वपंति श्वसं

ति श्वसंति हिंसंति हिंसंति पक्षे प्रत्ययस्वरेण मध्योदात्तता क्ङिति वेष्यते नेह स्वपानि हिनसानि अभ्यस्ता

२७६ नामादिः अनि अजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः येददति प्रियासःसु परत्वाच्चित्स्वरमयं बाधते दधा

नाः ईइस्वविद्यमानोदात्ते लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात् योग्निहोत्रं जुहोति ममत्तु नः परिज्मा मातायश्री

रेदधन्त जागर्तित्वं लिति प्रत्ययात्पूर्वमुदात्तं चिकीर्षकः आदिर्णमुल्यन्यतरस्यां अभ्यस्तानामादिरुदात्तो वा स्या

लोल्व्यं ४ त् णमुलि परे लोलूयं पक्षे लित्स्वरः अचः कर्तृयकि उपदेशे अजंतानां कर्तृयकि परे आदिरुदात्तो वा स्यात् लू

यते केदारः स्वयमेव चङ्यन्यतरस्यां चङंते धातावुपोत्तममुदात्तं वा मा हि चीकरतं धात्वकार उदात्तः पक्षांत

रेचङुदात्तः ॥ इति धातुस्वराः ॥ कर्षात्वतो घञोंत उदात्तः कर्षते र्धातोराकारवतश्च घञंतस्यांत उदात्तः स्यात्

कर्षः पावानिर्देशात्तुदादेराद्युदात्त एव कर्षः पाकः उञ्छादीनां च अंत उदात्तः स्यात् उञ्छादिषु युगशब्दोय

अभ्यस्तानामादिरुदात्तः दधाति ... यात्पूर्वं पिबति भी ह्री भृ हुवामभ्यस्ता

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ.
उ.स्व.
४

पित्वादनुदात्तत्वे प्राप्ते ईवन्तः ईवत्वं तस्यापि प्राग्वत् अहीवती मुनीवती अथ फिट्स्वरादि फिषोऽन्त उदात्तः प्रातिपदि
कं फिट् तस्यान्त उदात्तः स्यात् उच्चैः पाटला पालंका बोमाग एर्थानां एतद्धर्थानामन्त उदात्तः पाटला फलेरुहा सुरूपाया
कलेतिपर्यायाः लपावेत इमनिप्राप्ते अपालंक व्याधिघात आरेवत आरग्वध इति पर्यायाः अंबार्थः माता उर्न्वन्तेनता
मित्याद्युदात्ते प्राप्ते सागरः समुद्रः गेहार्थानामस्त्रियां गेहं नद्विषयस्येति प्राप्ते अस्त्रियां किं शाला आद्युदात्तो
ऽङ्गहेव पर्यंदासात् ज्ञापकात् गुदस्य च अन्त उदात्तः स्यात् न तु स्त्रियाम् गुदं अस्त्रियां किम् आन्त्रेभ्यस्ते गुदाभ्यः स्वां
गशिटामर्दलानामितस्वरं गमाद्युदात्तत्वं ततः ध्यपूर्वस्य स्त्रीविषयस्य धकारयकारपूर्वो योऽन्त्योऽच् स उदात्तः अं
तर्थास्त्रीविषयवर्णे नि प्राप्ते श्रद्धा जाया यान्तस्यान्त्यात् पूर्वमित्याद्युदात्ते प्राप्ते स्त्रीति किम् बाह्यम् यजंत
त्वाद्युदात्तत्वं विषयग्रहणं किम् इभ्या क्षत्रिया यतोऽनाव इत्याद्युदात्त इभ्यशब्दः क्षत्रियशब्दस्तु यान्तस्यान्त्यात्
पूर्वमिति मध्योदात्तः खान्तस्याश्मादेः नखं उखा मुखं ङुः खं नखस्य स्वांग शिखा मित्याद्युदात्ते प्राप्ते उखानाम भांड
विशेषः तस्य स्वांगत्वात् वर्णानामाख्याचेदिति स्वरवर्णस्योदात्तत्वे प्राप्ते मुखं ङुः खयोर्नद्विषयस्येति प्राप्ते
आश्मादेः किम् शिखा मुखं मुखस्य स्वांग शिखामिति नद्विषयस्येति वा आद्युदात्तत्वं शिखायास्तु शीङः खो नि
ह्रस्वश्चेति उणादिषु नित्वात् अन्तरेगत्वाहायः प्रागेव स्वांगशिखामिनिवावोध्वं दिक्शब्दस्येति शस्यान्तानां द राम.
४

275

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रविधौ प्रत्ययलक्षणं नेति संज्ञायां किं अग्निर्माणवकः उपमानं किं चैत्रः निष्ठा च द्व्यजनात् निष्ठान्तस्य द्व्यचः सं
ज्ञायां मादिरुदात्तो न त्वाकारः दत्तः द्व्यच् किं चिंतितः अनात् किं म्रातः संज्ञायामित्यनुवृत्तेर्नेह कृतं हृतं भुक्त
धृष्टो एतावाद्युदात्तौ स्तः अ संज्ञार्थमिदं असंसक्तं भुक्तं आशितः कर्त्ता कर्तृवाची आशित शब्द आद्युदात्तः
शुष्कधनिल फालस्याशितं रिक्ते विभाषा रिक्तशब्दे वादिरुदात्तः रिक्तः । २ निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तत्वं
पूर्वविप्रतिषेधेन जुष्टार्पिते च छंदसि आद्युदात्ते वाऽस्तः नित्यं मंत्रे एतत्सूत्रं शक्यमकर्तुं जुष्टोदमूनाः बलस्या
ऽऽहुरर्पितं इत्यादेः पूर्वेणैव सिद्धेः छंदसि पाठस्य व्यवस्थितत्वात् विपरीतापादनायोगात् अर्पिताः षष्टिर्न च
लाचलास इत्यत्रानेकात्तदर्शनाच्च युष्मदस्मदोर्ङसि आदिरुदात्तः स्यात् नहि षत्वको मम ङे इ तुभ्यं हि
त्वा न मसंवातः एवताः यतोनावः अस्मत्यावतस्यच्च आदिरुदात्तो नावंविना भ्रजं स्यस्यकाम्या कमेरित्रि
ङेता द्वाचा एत ईडवंदवृ शंसदुहां ण्यतः एषां ण्यदंतानां आदिरुदात्तः ईड्यो नूतनैरुत आजुह्वान ईड्यो वं
द्यश्चाश्चैहं नोधेहि वार्यं उक्थमिन्द्राय शंस्यं विभाषा वेण्विन्धानयोः आदिरुदात्तः इंधानो अग्निं त्यागरागहा
सकुचक्रयाक्रथानां आदिरुदात्तो वा आयास्त्र योपजंतोः यः पचाद्यजंतः मतोः पूर्वमात्संज्ञायां स्त्रियां मतोः पू
र्व आकार उदात्तः स्त्रीनाम्नि उदुंवरावती पुरा वती अंतोदात्तः अवती शब्दस्यांत उदात्तः वेत्रवती ङीपः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

छतमिति भिद्दे आकृतिगणोयम् ज्येष्ठकनिष्ठयोर्वयसि ॥ ०६दा
नःस्यात् ९४

सि॰कौ॰
उ॰स्व॰
५

ख्याचेत् यांतस्यांतात् पूर्वमिति यतोनाव इति वायुदात्ते प्राप्ते वचनं आशाया अ दिगाख्याचेत् दिगाख्याव्या वस्मर्थमिदं अत एव त्रायवा
दिक्पर्यायस्या युदात्तता ॥ इंद्र आशाभ्यस्परि नक्षत्राणामाव्विषयाणां अंतःउदात्तः स्यात् आश्लेषानुराधादीनां लघावंत इति प्राप्ते
ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नंतत्वेनाद्युदात्ते प्राप्ते वचनं नकुंचे स्यस्तनिकाख्याचेत् अंतउदात्तो न कृतिकानक्षत्रं केचित्त
कुर्वीयन्नाप्रह्वियया णामिति व्याख्याय आर्यिकाबकुलिकाइत्यत्राप्यंतोदात्तो नेत्याहुः पृथ्नादीनां च अंतउदात्तः स्यात् ज्येष्ठश्चा
स्यचमसां कनिष्ठ आहचतुरः वयसि किं ज्येष्ठः श्रेष्ठः कनिष्ठोऽल्पिष्ठः इत्यनित्यादाद्युदात्त एव बिल्वतिष्ययोः स्वरितो वा अन
योरंतः स्वरितो वा स्यात् पक्षे उदात्तः ॥ इति फिट्सूत्रेषु प्रथमः पादः ॥ अथादिः प्राक्शकटेः आधिकारोयं शकटेशब्दात्प्रा
तियावत् ह्रस्वांतस्य स्त्रीविषयस्य आदिरुदात्तः बलिः तनुः नब्विषयस्यानिसंतस्य वनेनन्नायः इसंतस्य तु सर्पिः नपृनपुं
सकं तत्रणधान्यानां च व्द्यषां द्व्यचामित्यर्थः कुशाः काशाः माषाः तिलाः बह्वचां तु गोधूमाः त्रः संख्यायाः पंचचत्वारः
पालं स्वांगशिटामदंतानां शिट्सर्वनाम कर्णाभ्यां चिबुका दंध आश विवमध्य विम्बो विहायाः प्राणिनां कुपूर्वं क
वर्गात्पूर्व आदिरुदात्तः काकः वृकः शुकेषुमे प्राणिनां किम् उदकं खय्युवर्णं कृत्रिमाख्याचेत् खयि परे उवर्णउदात्त
स्यात् कंडुकः उनर्वन्नंतानां उनवसएं वो दिशादसं स्व स्वसारंत्वा कृणवै वन् पीवानंमेषं वर्णानां तणतिनिं तानां आदिरुदा
त्तः एनः हरिणः शितिः पृश्निः हरित् ह्रस्वांतस्य ह्रस्वमनृत्तां ब्छील्ये ऋस्वजे ह्रस्वांतस्यादिमनृतं ह्रस्वमुदात्तं स्यात् मुनिः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

६२ षामन्त उदात्तः स्यात् अतिशयेन वकुलो वंहिष्ठः नित्वा दाद्युदात्ते प्राप्ते वंहिष्ठे रंभ्वे। सुवतारं येन यद्वंहिष्ठं नातिविधे इत्या
८।२ दौ अस्यर्थाद्युदात्तः संवत्सरः अव्ययपूर्वपदप्रकृतिस्वरोत्र बाध्यत इत्याह: संप्रातिः अशीति लघावेत इति प्राप्ते वक्त्वा।
दिशात् इह्वापि प्राग्वत् अम्ब्रवीना प्रभृत्यस्यायो: अव्ययपूर्वपदप्रकृति स्वरोत्र बाध्यते इत्याह: या षादिसूत्रे गणः चाप्ये
मेनत् दाक्षिणस्य साधो अंतउदात्तः स्यात् साधुवा चित्वाभावे तु अवस्थायां सर्वनामतया स्वांगशि दामित्याद्युदात्तः अर्धां
नेरतुल घावेत इति गुरु रुदात्तः दाक्षिणः सरलो दार पर छंदानुवर्तिनीषितिकोष्ठः स्वांगाख्यायां मादिर्वा इह दक्षिणस्या
घेलो पर्यायेणोदात्तौ स्तः दक्षिणो बाहुः आख्याग्रहणं किं प्रत्यङ्‌ सुखमासीनस्य वामपाणिर्दक्षिणो भवति छंदसि
च अस्वांगार्थमिदं दाक्षिणः इदप्रायो वैराघंता युदात्तौ ह्रस्वस्य गाख्याचेत् वर्णानां तणेत्याद्युदात्ते प्राप्ते अंतोदा
त्तो विधीयते कृष्णानां व्रीहीणां कृष्णो नो नाव वृषभः मृगाख्यायां तु कृष्णो रात्र्ये वा नामधेयस्य कृष्णस्यैव अयं वा
कृष्णो अश्विना कृष्णऋषिः शुक्ल गौर यो रादिः नित्यमुदात्तः स्यादिसे केवलस्यनुवर्त्तनार्थ इति वृत्तं सरोगोरोयस्मा
पिवेत्यंतोदात्तदर्शनात् अंगुष्ठोदक बकवशानां छंदस्यंतः अंगुष्ठस्य स्वांगानामकुर्वादीनामिति द्वितीयस्योदा
त्तत्वे प्राप्ते ऽतो दात्तार्थ आरंभः वशाग्रहणं नियमार्थं छंदस्येवेति तेन लोके आद्युदात्तता इत्याह: पृष्ठस्य च छं
दस्यंत उदात्तः स्यात् वाभाषायां पृष्ठं अर्जुनस्य तृणाख्या चेत् उनर्वनंतानामित्याद्युदात्तस्यापवादः अर्जुनस्य त्वाख्या।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

देवत्रवितस्तेत्वा जिह्वाकलोमाकाश्यपेष्टाकाशी नामादिवौ तषामादिर्द्वितीयोवोदात्तः मकरः मत्र्यईति छंदसिच अमकराद्यर्थे आरंभः लस्यानुसारा दादिर्द्वितीयंवोदात्तंज्ञेयं कर्दमादीनां च आदिर्द्वितीयंवोदात्तंसुगंधितेजनस्सेनवा आदिर्द्वितीयंनेत्यादुक्ष्यो तिजयः पर्यायेणोदात्ताः सुगंधितेजनाः नपफलांतानां आदिर्द्वितीयंवोदात्तं राजादनफले यांतस्यांत्यात् पूर्वंकला यांतस्य चनालघुनी नाणकलघुचउदात्तेस्तः मनाथा मभा पिंशुमारोऽव रवलीवदोष्टार पुरूरवसांच अंत्यात् पूर्वमुदात्तं द्वितीयं

५ चेसांकाष्ठकामि नासिक्यसवीर्यादानां द्वितीयमुदात्तंवा उषांतस्पहयादेशादिवी हलीषालांगलीषा उशीरदारोरकपाल ष लालपैवालश्यामाकशरीरशरावहृदयहिरण्यपारण्यपत्यदेवराणां तषामादिरुदात्तः स्यात् महिषीषा इ योजीयेष्टकाख्या चेत् आदिरुदात्तः महिषीजाया अषाढाउपदधाति ॥ इतितृतीयपादः ॥ शकटिशकट्योरक्षरमक्षरंपर्यायेणोदात्तंगो ष्ठजः ब्राह्मणः अमत्त्रगोष्ठजः पश्चः कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः पारावतस्योपरित्रमंजेपि षंकमेणो दात्तं पारा वतः धूम्रजानुमुंजकेशकालवालस्थालीपाकानामच्जलैनां तेषांचतुर्णामंत्यात्पूर्वमुदात्तंविता पीशंकमेणो दात्तानि धूम्रजानुःमुंजकेशः कालवालः स्थालीपाकः कपिकेशहरिकेशयोश्छंदसि कपिकेशः हरिकेशः ष न्यर्बुदव्य ल्कशयोरादिः स्वरितःस्यात् तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामंतः स्वरितःस्यात् तिलानां भवत्क्षेत्रं तिल्यंपलानावइतिप्राप्ते बिल्वभक्ष्यवीर्याणि छंदसि अंतः स्वरितानि त्वत्वसमसिमेत्यनुच्चानिस्वरीवत उत्तरः प

५२ दात् नभंतामन्यकेसमेसिमस्मैसिमस्या ऽ पर्वतेषांतउदात्तः आथर्वणइतिमाधिकं तत्रदृष्टस्यत्वेवपरवो तेनबाह्म यांधेयरा उदात्त शकटि शकरी इ गोष्ठजस्यब्राह्मणनाम धेयस्य अक्षरमक्षरं७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. उ.स्व. ६६

२७७ स्य५

तृतीये ब्राह्मण

अलसादेवतस्य आदिरुदात्तः तस्यानाम्नः देवनेतु अदेमीदीयः अर्धमासमयोत्तने आर्धोयामस्य समेशकेतु अर्धं पिप्पल्याः
पीतद्रुप्रभृतीनां आदिरुदात्तः पीतद्रुः सरलः ग्रामादीनां च ग्रामः सोमः यामः लुवंतस्योपमेयनामधेयस्य चेचेव चे चा सिंगे तस्ये
तिपान्तरं स्फिगितिलुपः प्राचांसंज्ञा नवक्त पर्वत विशेषस्या घसिंह महिषाणां एषामुपमेयनाम्नामादिरुदात्तो न। तालव
वताल: मेरु शिवमेरुः व्याघ्रसिंह: महिषःराजविशेषस्य यमन्वाचेत् यमन्वाहद्रुः आंगउदाहरणं अंगाः मनुदाहरणं लशावे
छ५ नेकृषोष्ठलघोः सतोर्षकौस्यगुरुरुदात्तः कल्याणः कोलाहलः स्त्रीविषयवर्णाक्षुपूर्वाणां एषान्त्रयाणां माद्युदात्तः स्त्रीविषय
मल्लिका वर्णः श्येनी हरिणी अक्षु शब्दात्पूर्वो येषां ते लुम्पलीः तरक्षुः शकुनीनां च लघुपूर्वं पूर्वं लघु उदात्तं स्यात् कुक्कु
टः तित्तिरिः नत्रैमाण्यास्याया यथालक्षणं प्राप्तमुदात्तत्वं न वसंत। कलसः धान्यानां च वृद्धान्तानां आदिरुदात्तः
कोत्तासो श्यामाकाः षोतासो राजमाषा जनपदशब्दानामषान्तानां केकयः हयादीनामसंयुक्तलान्तानामंतः पूर्वं वा हयि
तिलः संज्ञाः पललं पाललं हयादीनां किं एकलः असंयुक्तेति किं मल्लः इगंतानां च द्व्यचां आदिरुदात्तः कृषिः ॥ ॥
इति द्वितीयः पादः ॥ अथ द्वितीयप्रागीषात् ईषांतस्याहमादेरित्यतः प्राग्द्वितीयाधिकारः अषाधाध्रकरात् मकरवदृते
म३ तातः प्राकृच्यचामित्यधिकारः स्वांगानांकुर्वादीनां कवर्गरेफवकारादीनां वर्जयित्वाद्यचां गानां द्वितीयमुदात्तं ललाटं कु स्वांग
वीदीनां तुकपोलः रसनावदनं मादीनां च मलयः मकरः पादीनां पाकानां पीतन्या श नपथ्या मांतानां गुर्वादीनां पादपः
आतपः लघ्वादीनां तु अनूपः द्व्यचां तु नीयं यतान्यथान्तानां पुत अयुतः अनि धमनिः अणिविप... ए: मकरवदृश्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यात् अच्छ रवंग्रथमजानती कारावते अन्तोदात्तात्किं दध्नती
अभ्यस्तानामादिरित्य ७

सि॰कौ॰ उ॰ स्व॰ ७ २१

भक्तिरुदात्ता इंद्रो इषीचः चाविति र्श्वपदांतोदात्तत्वं प्राप्तं तत्रीयादिरित्यनुवर्त्तमाने सर्वनामस्थानग्रहणं घास्यदियन्नाप्यं
प्रतीचो वाहून् ऊडिदंपदाद्यप्पुम्यैद्युभ्यः तभ्योः सर्वनामस्थानं विभक्तिरुदात्ता प्रष्ठौहः प्रष्ठौहा ऊयुपधाग्रहणं कर्त्तव्यं इहमा
भूत् अक्षद्युवा अक्षद्युवे इदं एभिर्नृभिर्नृतमः अन्वादेशेन अंतोदात्तादित्यनुवृत्तेः नचतत्रांतोदात्तताप्यस्तीति वाच्यं इ
दं मोन्वादेशेनुदात्तस्तत्रीयादाविति सूत्रेणानुदात्तस्य अष्टनो विधानात् पूर्वेण आभ्यां गाः अनु पद्दन्नोमास् हृन्निशः इति
पद्दन्नादयः पद्भ्यां शस्मि दक्षिणेजिह्वामसोमात्ता जायते मासिमासि पन्नस्थिति दत्दच्छा अपस्थापनेन पुमन् अथमानेव
ऊंसः रै रायावयं रायो धर्ती दिवः दिवेदिवे अष्टनोदीर्घात् शसादिर्विभक्तिः दात्ता अष्टाभिर्दशभिः शतुरनुमोनद्यजादी
अनुमः शतप्रत्ययः तदंतादेतोदात्तात् परानदी अजादिश्च शसादिर्विभक्तिरुदात्ता मामादिरित्यायुदात्तः अनुमः किं
तुदंती एकादेशोऽत्र उदात्तः अदुपदेशान्नूरत्वात् शतुर्लसार्वधातुकमिति निघातः उदात्तयणो हल्पूर्वात् उदात्तस्थाने
योयण् हल् पूर्वस्तस्मात्परानदीशसादिर्विभक्तिश्च उदात्ता स्यात् चोदयित्री सूनृतानां राधानेत्री कर्त्तंदेवाय कृण्वते
सवितृ नेउथाचोः अनयोर्यणः परेशासादय उदात्ता नस्युः अस्तवेधास्तः अभिः स्तुम्वेकृत्वत्वं उभिनुपकृत्वांतादंतोदात्ता
कुबस्वपरोमगुवुदात्तः यो अद्विमान् उदनिमा इयत्ति नुदः अत्र एवंनः अनोदात्तिं मात्वाविददिघुमान् स्वरविधौ
व्यंजनमविद्यमान् वदित्येतद्वचनमकृत्वात् इदनिघंतानायवागहिरेशात्वाच्च रेवा इंद्रेवतः नामन्यतरस्यां मतुपि
अस्यप्रतिषेधोवाच्यः त्रिवतीयाम २ समांतोदनोदात्ता मतुपउदात्ताविहितानिघातोनभवत्येवसन्निपातपरिभाषा
याअनित्यत्वात् ४२

स्व॰ ७

278

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दित्तौपरस्यांतउदात्त [illegible] तु: शेषं सर्वमनुदात्त
मित्यादि

मनुदात्तमिमस्मै अस्मैवेदिपि भवत्येवनिपाता [illegible] शब्द आद्युदात्ता: स्यात् उपसर्गश्चाभिवर्जं एवादीनामेत: एवमादीनामि
तिपाठांतरं एव एवं नूनं सह तेपुत्रसूरिभि: सहस्य सहेति प्रकरणेसह शब्द आद्युदात्त इतित्तु मांच्च: तद्विंशं वावादीना
मुभावुदात्तौ उभौ यह णमनुदात्तंपदमेकंवर्जमित्यस्यवाधाय चादयोनुदात्ता: स्पष्टं य चेतिपादांते तनेमिमृभवोयथा पा पा ३
दांते किं यथानो अदिति: करत् मकारादिं हिरुक्स्यपरमित्यर्थ: प्रप्रायंदिवेदिवे ॥ इति शांतनवाचार्य प्रणीतसूत्रवृत्ति: स
त्रेषुतुरीय:पाद: ॥ आद्युदात्तश्च प्रत्यय: आद्युदात्त:स्यात् अग्नि:कर्त्तव्यं अनुदात्तौ सुप्पितौ पूर्वस्यापवाद: यज्ञस्य
नयोश्छति यादित्येयोरनुदात्तत्वे स्यादित्नप्रचयौ चित: अंतउदात्त: चित: समस्ते वेकजयोचितिप्रत्यये सतिप्रकृति
ता१ प्रत्ययसमु: यस्यांउदात्तोवाच्य इत्यर्थ: वकुपत्: नभंतामन्यकेयकेसरस्वती तकत्सुत तद्धितस्यचित स्तद्धितस्यांतउदा
त्त: पूर्वेणसिद्धे [illegible] स्वरवाधनार्थमिदं कोजाय ना: कित: कितस्तद्धितस्यांतउदात्त: यदाग्नेय: तिसृभ्योजस: अंत
उदात्त: तिस्रोद्यावचं सवितु: सावेकाच स्तृतीयादिर्विभक्ति: सु: सप्तमीवहुवचनं तत्रयएकाच्तत: परास्तृतीयादिर्वि
भक्तिरुदात्ता वाचाविरूप: सोकि राज्ञेत्यादौ एकाचोपिराज शब्दात्पर स्यमाभूत् राज्ञोनुत्ते विधते राजनित्वे स्तृतीया
ता२ दि:किं नददर्शवाचं अंतोदात्तुत्तरपदादन्यतरस्यामनित्यसमासेनित्याधिकारविहितसमासादन्यत्रयदुत्तरपदंसमंतोदा
त्तमेकाच तत:परा तृतीयादिर्विभक्तिरंतोदात्तावास्यात् परमवाचा अंचेश्छंदस्यसर्वनामस्थाने अंचे:परावि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि.कौ. पूर्वपदं प्रकृत्या स्यात् सत्याश्विन्न अवस्तमः उदात्तेत्यादि किं सर्वानुदात्ते पूर्वपदे समासांतोदात्तत्वमेव यथा स्यात् सप्तपादः ।
उ.स्व. तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या तुल्यश्वेतः सदृशश्वेतः कृ
८ स्वा त्यतुल्याख्या अजात्येति तत्पुरुषः किरिणाकाणः किरिकाणः पत्रयन्मद्यन्त्सवं मदयति मादके ईड्ढे सखेलि सप्तमीतत्पुरुषः शा
स्त्रीश्यामा अव्ययमेतत् कुनिपातानां अयज्ञो वा एषः परिगतानं किं स्नात्वा कालकः मुहूर्तसुखं भोज्योष्णं वर्णो वर्णे ष्वने
ते वर्णवाचिन्युत्तरपदे एतवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे कृष्णसारंगः लोहितकल्माषः कृष्णशब्दो नक्प्रत्ययां
279 तः लोहितशब्द इतन्नन्तः वर्णः किं परमकृष्णः वर्णे किं कृष्णतिलाः अनेते किं कृष्णैतः गाधलवणयोः प्रमाणे एतयोरुत्तर
पदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या अरित्रगाधमुदकं तत्प्रमाणमित्यर्थः गोलवणम् यावद्गवे दीयते तावदित्यर्थः
अरित्रशब्द इत्रान्तो मध्योदात्तः प्रमाणमियत्तापरिच्छेदमात्रं नपुनरायामएव प्रमाणे किं परमगाधं दायाद्यं दायादे तत्पु
रुषे प्रकृत्या धनदायादः धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः दायाद्ये किं परमदायादः प्रतिबंधि चिरकृच्छ्र
योः प्रतिबंधिवाचि पूर्वपदं प्रकृत्या एतयोः परतस्तत्पुरुषे गमनचिरं व्याहरणकृच्छ्रं गमनं कारणविकलतया चिरकालभा
वि कृच्छ्रयोगि वा प्रतिबंधि जायते प्रतिबंधि किं मत्तकृच्छ्रं पदेऽपदेशे व्याजवाचिनि पदशब्दे उत्तरपदे पूर्वपदं प्रकृत्या तत्पु त२ राम. ८
रुषे मूत्रपदेन प्रस्थितः उच्चारपदेन मूत्रशब्दो घञन्तः उच्चारशब्दो घञन्तस्थाथादिस्वरेणान्तोदात्तः अपदेशे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योऽकृत्स्वस्तदन्तादन्तोदात्तात् परो नामुदात्तो वा चेतन्ती सुमतीनां स्त्राः स्कृदति आतरो नामुदात्तो वा देवसेनानाम भिभंजतीनां वेस्व
केनेह जयंतीनां मरुतो यन्तु पट्चित्र्यो हलादिः एभ्यो हलादिर्विभक्तिरुदात्ता आषड्भ्यः प्रमानः विभिर्देव न गोश्वन्सावर्ण
राडुङ्कुङ् क्रुञ्चः एभ्यः प्रागुक्तं न गवां शता गोभ्यो गातं शुनश्चिच्छेपं सोमपामेकवचनेष्वर्णीनात् तेभ्यो युष्मत्तेनेषां पादि स्मृ
धीहं वदितो मेल दिवः परा झलादिर्विभक्तिर्नोदात्ता द्युभिरक्तुभिः झलि तिकि उपत्वाग्ने दिवे दिवे नञ्चान्यतरस्यां नुः पुरा झलादिर्वो

स्पष्टमित्यर्थः

दाता न भियेमानः तित्स्वरितम् निगद्याग्नेनं न्यन्तं नास्यनुदात्तेंदित उपदेशात्सार्वधातुकमनुदात्तम् ह्वृ ह्वो असा ते
त्यां लसार्वधातुकमनुदात्तं स्यात् तासेः कर्त्राघन्यय स्वरापवादोयं अनुदात्तेतः यन्नास्ते हि तः अभिचष्टे अन्न हेभिः अ
दुपदेशात् पुरुः मुञ्चन स्यतं चित्स्वरोप्यनेन बाध्यते वर्धमानं स्वे दने ना [illegible] तिप्यः किं अभिहधे [illegible] गृणाति उपदेशाग्रह
णात् नेह हतो वृत्राण्यार्या लभ्यमहणोः किं कृतिहनिघ्नाः सार्वतिकि [illegible] प्य अ न क्रिडोः किं कुर्ते यदधीते विदी
धिविदिभ्यो नेति वक्तव्यं इंधेराजा एतेश्वानुदात्तस्य च यत्र तिस्रेनेभाष्ये स्थित २ आदिः सिचो न्यतरस्यां सिजंतस्यादि
रुदात्तो वा यासिष्टं वर्तिरश्विनो य लिच्चसे वोडेतो वा सेटि यलि लपदे ३ इडुदात्तः अन्तो वा आदिवीस्यात् यदानेते त्रयः तदा
लितीति प्रत्ययात्पूर्वमुदात्तं लुलविषु अन्नचत्वारो विपर्यायेणोदात्तः उपोत्तमं रिति रित्प्रत्ययांतस्योपोत्तममनुदात्तं स्यात्
यदाहवनीये ॥ इति प्रत्ययस्वराः ॥ समासस्य अन्तउदात्तः यज्ञश्रियं वडक्षोहो मस्तरा सर्वं पदं उदात्तस्वरितयो गि(

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰ कौ॰ कास्तुल्यप्रमाणं भिक्षामात्रं भिक्षाशब्दो गुरोश्च हल इत्यप्रत्ययान्तः पाणिन्युपज्ञं पाणिनिशब्द आद्युदात्तः नन्दोपक्रमं नैग ८९
उ॰ स्व॰ शब्दः पचाद्यजन्तः इषुच्छायं इषुशब्द आद्युदात्तो नित्त्वात् नपुंसके किं कुड्यच्छाया सुखप्रिययोर्हिते एतयोः परयोः तद्वाचिनि हिं
ए तत्पुरुषे तथा गमनप्रियं गमनसुखं गमनशब्दो लित्स्वरः हिते किं परमसुखं प्रीतौ च प्रीतौ गम्यायां प्रागुक्तं ब्राह्मणसुखं पाय
तो॰ ६।४ सं छात्रप्रियोनध्यायः ब्राह्मणछात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ प्रीतौ किं राजसुखं स्वं स्वामिनि स्वामिशब्दे परे स्ववाचि पूर्व
पदं तथा गोस्वामी स्वं किं परमस्वामी पत्यावैश्वर्ये दमूनाग्रपतिर्दमेन भूवाक्चिद्दिधिषु पतिशब्दे परे ऐश्वर्यवाचिनि तत्पु
२०० रुषे नैतानि प्रकृत्या भुवः पतिः चित्पतिः वाक्पतिः दिधिषूपतिः वा भुवनं उक्तविषये भुवनपतिः २ भल्लधम्नास्तिम्यः इ
ति वृत्तान्तो भुवनशब्दः आशङ्काबाधनेदीयस्सु संभावने अस्तित्वाध्यवसायः संभावनं गमनाशङ्कमस्ति गमनाबा
गमननेदीयः ५ धं गमनमाशङ्कते अवाध्यते निकटतरमिति वा संभाव्यते संभावने किं परमनेदीयः पूर्वे भूतपूर्वे आढ्यो भूतपू
पूर्वे४ र्वः आढ्यपूर्वः पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्तते भूतपूर्वे किं परमपूर्वः सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये
एषु पूर्वं प्रकृत्या २ मद्रसविधं गान्धारिसनीडं काश्मीरसमर्यादं मद्रसवेशं मद्रसदेशं सामीप्ये किम् सहमर्यादया स
मर्यादं क्षेत्रं चैत्रसमर्यादं विस्पष्टादीनि गुणवचनेषु विस्पष्टकटुकं विस्पष्टशब्दो गतिरन्तर इत्याद्युदात्तः विस्प सम्॰ ७
ति२ ष्टे किं परमलवणं गुणे इति किं विस्पष्टब्राह्मणः विस्पष्ट विचित्र व्यक्त संपन्न पण्डित कुशल चपल निपुण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुटीनिवातम् कुड्यनिवातम्१

शा१ नि२

किं विस्पुपदं निवाते वातत्राणे निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या कुटीशब्दो गौरादिङीषंतः कुड्यश
ब्दोऽद्युदात्तः यदन्तत इत्यन्ये वातत्राणे किं राजनिवाते वसति निवातशब्दोऽयं रूढः पार्श्वे शारदेऽनार्तवे ऋतौ भवमार्तवं तद
न्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् रज्जुशारदमुदकं शारदशब्दो नूतनार्थः तस्यास्वपदवि
ग्रहः रज्ज्वाः सद्य उद्धृतं रज्जुशब्दः सृजेरसुम्चेत्याद्युदात्तो ज्वित्यादिः अनार्तवे किं उत्तमशारदं अध्वर्युकषाययोर्जातौ ए न४
तयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं कठाध्वर्युः दौवारिककषायं कठशब्दः पचाद्यजन्तः तस्माद्वै
शंपायनान्तेवासिभ्यश्चेति णिनिः कठचरकाल्लुगिति लुक् शारेणिपुणक्रइत्तिठकंतो दान्तः जातौ किं परमाध्वर्युः सदृ
शप्रतिरूपयोः सादृश्ये अनयोः पूर्वं प्रकृत्या पितृसदृशः सादृश्ये किं परमसदृशः समासार्थोऽत्र पूज्यमानता नास्या
दृश्यं द्विगौ प्रमाणे द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं प्राच्यसप्तसमः सप्तसमाः प्रमाण
मस्य प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक् प्राच्यशब्द आद्युदात्तः प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः
प्रस्य:३ द्विगौ किं व्रीहिप्रमाणं प्रमाणे किं परसप्तसमं गन्तव्यपण्यं वाणिजे वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि प
ण्यवाचि च पूर्वपदं प्रकृतिस्वरं मद्रवाणिजः गोवाणिजः सप्तमीसमासः मद्रशब्दो रक्प्रत्ययान्तः गन्तव्येति
किं परमवाणिजः मात्रोपज्ञोपक्रमच्छाये नपुंसके मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे तथा भिक्षा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आचार्योपसर्जनश्चान्तेवासी आचार्योपसर्जनान्तेवासिनां द्वंद्वे पूर्वपदं प्रकृत्या पाणिनीयरौढीयाः छस्वरेण मध्योदात्तावेतौ ४९

सि॰कौ॰ ३॰ख १० पदं तयोरेव र्जनार्थत्वात् अहोरात्रेर्विषयवा आपि वर्ज्यमाना एव तयोर्भेवं तिवर्ज्येति किं आग्निंमति मत्यर्गे राजन्यबहुवच

नद्वंद्वेंधकवृष्णिषु राजन्यवाचिनां बहुवचनान्तानां मंधकवृष्णिषु वर्त्तमाने द्वंद्वे पूर्वपदं प्रकृत्या स्वाफल्कचैत्रकाः सिनिवासु

देवाः शिनिराद्युदात्तो लक्षणपालक्ष्यपत्येवर्त्तते राजन्य किं द्वैप्यभैमायनाः द्वीपे भवा द्वैप्याः भैमेरपत्यं युवा भैमायनः

अंधकवृष्णयः एते न तु राजन्याः राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थं नैते तथा बहुवचने किं

२८१ संकर्षणवासुदेवौ द्वंद्वे किं वृष्णीनां कुमारा वृष्णिकुमाराः अंधकवृष्णिषु किं कुरुपंचालाः संख्या संख्यावाचि सर्वं प

दं प्रकृत्या द्वंद्वे द्वादश त्रयोदश त्रेस्त्रयसादेशोंतोदात्तो निपातः आचार्योपसर्जन ग्रहणं द्वंद्व विशेषणं सकलो

द्वंद्व आचार्योपसर्जनो यथा विज्ञायेत तेनेह न पाणिनीयदेवदत्तौ आचेति किं छांदसवैयाकरणाः अंतेवासी किं

आपिशलपाणिनीयशास्त्रे कात्तकौजवादयश्च एषां द्वंद्वे पूर्वपदं प्रकृत्या कात्तकौजपौ सावर्णिमाण्डूकेयो म

हान्ब्रीह्यपराह्ण गृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु महच्छब्दः प्रकृत्या ब्रीह्यादिषु दशसु महान्ब्री

हिः महापराह्णः महागृष्टिः महेष्वासः महज्जाबालो॰ तोदात्तः सन्महदिति प्रातिपदिकोक्तः समास एवायं स्वरः नेह मह

तो ब्रीहिः महद्ब्रीहिः क्षुल्लकश्च वैश्वदेवे चात्महान् क्षुल्लकवैश्वदेवं महावैश्वदेवं क्षुधं लातीति क्षु राम॰ १०

ल्लः तस्मादज्ञातादिषु कें॰तोदात्तः उष्ट्रः सादिवामयोः उष्ट्रसादी उष्ट्रवामी उष्ठः ष्ट्रः नि उष्ट्र आद्युदात्तः गोसालस्या

दिस्थारपिषु गोसादः गोसादिः गोसारथिः कुरुगार्हपतरिक्तगुर्वसूत जरत्यश्लीलदृढरूपापारेवडवातैतिल

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा२५

गमनाद्यमम् गमनकनिष्ठम् गमनपापिष्ठम् अत्रेति किम् गमनशोभनम् भावकम् २ पंचारत्नयः प्रमाणमस्य पंचारत्निका कालि
शब्दे १
मासः ५

ज्यावमकत्वापवत्सुभावे कर्मधारये अज्यकन् उत्वादेशश्चेति अवर्मणपवादिनिचोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या
गमनश्रेष्ठं गमनज्यायः गम्यते नेनेतिगमनं श्रेयोगमनश्रेयः केति किं षष्ठीसमासे मा भूत् कुमारस्य कर्मधारये कु
२३ मारश्रमणा कुमारशब्दोंतोदात्तः आदिः प्रत्येनसि कुमारस्याद्युदात्तः प्रत्येनसि परे कर्मधारये प्रतिगलमेनोऽस्याप
त्येनाः कुमारप्रत्येनाः पूगेष्वन्यतरस्यां पूगागणास्तेषु परं वा कुमारचातकाः कुमाराः जीमूताः आद्युदात्तत्वाभावे १
कुमारश्चान्त्यस्य भवति इगन्तकालकपालभगालशरावेषु द्विगौ एषु परेषु पूर्वं प्रकृत्या पंचमास्यः तमधीष्टो भृतो भूतो भावी द्वि
गोर्यप् पंचकपालः पंचभगालः पंचशरावः न्तः संख्याया इति पंचशब्द आद्युदात्तः इगन्ता द्विगौ किं पंचाश्वः द्वि
गौ किं परमारत्निः बह्वन्यतरस्यां बहुशब्दः तथा वा प्रकृत्या रत्निः २ बहुमास्यः २ बहुकपालः २ बहुशब्दोंतोदात्तः त २७
स्यायणि सत्युदात्तः स्वरितयोरिति भवति दिष्टिवितस्त्योश्च एतयोः परतः पूर्वपदं प्रकृत्या वा द्विगौ पंचादिष्टिः २
पंचवितस्तिः सप्तमी सिद्धशुष्कपक्वबंधेष्वकालात् अकालवाचि सप्तम्यंतं प्रकृत्या सिद्धादिषु सांकाश्यसिद्धः सां
काश्यनगरं यात आतपशुष्कः भ्राष्ट्रपक्वः भ्राष्ट्रेति पक्वमनं चक्रबंधः चक्रशब्दोंतोदात्तः अकालात्किं पूर्वाह्ण
सिद्धः कृत्स्वरेणवाधितः सप्तमीस्वरः प्रतिपद्यते परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेषु एतेभ्यः प्रकृत्या वर्ज्यमान २८
वाचिनिल्प्रदोरात्रावयववाचि निचोत्तरपदे परित्रिगर्तं वृष्टोदेवः प्रतिपूर्वाह्णं प्रत्युपरात्रं उपपूर्वरात्रं अप
त्रिगर्तं उपसर्गा आद्युदात्ताः बहुव्रीहिः तत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदं अपपर्योरेववर्ज्यमानोत्तर

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सि॰कौ॰ नेयाचिनिसमासे क्तांते परे द्वितीयांतं प्रकृत्या कष्टश्रितः ग्रामगतः कष्टशब्दोऽन्तोदात्तः ग्रामशब्दो नित्स्वरेणा
उ॰स्व॰ द्युदात्तः अहीने किं कांताराततिः अनुपसर्ग इति वाच्यं नेह सुखप्राप्तः थाथेत्यस्यापवादोऽयं तृतीया कर्मणि क
११ र्मवाचके क्तांते तृतीयांतं प्रकृत्या त्वोतासः रुद्रहतः महाराजहतः रुद्रेण गतः कर्मणीति किं रथेन यातः रथया
तः गतिरनंतरः कर्मार्थक्तांते परेऽव्यवहितो गतिः प्रकृत्या थाथेत्यस्यापवादः पुरोहितं अनंतरः किं अ
भ्युद्धृतः कारकपूर्वपदस्य तु सतिशिष्टस्याथादिस्वर एव दूरादागतः तादौ च निति कृत्यतौ तकारादौ निति
तुशब्दवर्जिते कृति परेऽनंतरो गतिः प्रकृत्या अग्ने रायो नृतमस्य प्रभूतौ संगतिर्गोः कृत्स्वरापवादः तादौ किं
२.७२ प्रजल्पाकः निति किं प्रकर्ता तृजंतः अतौ किं आगंतुः तवै चांतश्च युगपत् तवैप्रत्ययांतस्यांत उदात्तो गति
श्चानंतरः प्रकृत्या युगपत् चैतदुभयं स्यात् अन्वेतवा उ कृत्स्वरापवादः अनिगंतो वप्रत्यये अनिगंतो गतिर्व चतौ २
प्रत्ययांतेऽचतौ परे प्रकृत्या ये पराञ्चस्तान् अनिगंत इति किं प्रत्यंचो यंतु ह्रस्व एव परत्वादयमेव जदिरस्या
न् निलगुहीपराचः वप्रत्यये किं उदंचनं न्यधी च वप्रत्ययांतेऽचतौ विगंतौ न्यधी प्रकृत्या न्यङ्ङुत्ता
उ२ नः उदात्तस्वरितयोर्यण इत्येव रकारः स्वरितः अध्यङ् ईषदन्यतरस्यां ईषत्कडारः २ ईषदित्ययमंतोदात्तः काम
ईषद्भेद इत्यादौ कृत्स्वर एव हिरण्यपरिमाणं धने सुवर्णपरिमाणवाचि पूर्वपदं प्रकृत्या धने द्विसुवर्णधने ११

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वकरूपणपकं वलो दासीभाराणां च । एषां समासानां दासीभारादेस्तु पूर्वपदं प्रकृत्या कुरूणां गार्हपतं कुरुगार्हप
तं उ॒ । मत्वर्थात्तः कुरूः वृजेरिति वाच्यं वृजिगार्हपतं वृजिराद्युदात्तः । रिक्तो गुरुः रिक्तगुरुः । रिक्ते विभाषेति रिक्तशब्दः ।
आद्युदात्तः असूता जरती असूतजरती अश्लीला दृढरूपा अश्लीलदृढरूपा अश्लीलपदो नञ्समा
सत्वात् आद्युदात्तः श्रीर्यस्यास्तीति श्लीलं सिध्मादित्वाल्लच् कपिलकादित्वाल्लत्वं पारेवडवेव पारेवडवा निपा
तनादिवार्थे समासो विभक्त्यलोपश्च पारशब्दो घृतादित्वादन्तोदात्तः तैतिलानां कद्रूः तैतिलकद्रूः तितिलिनो ऽप
त्यं छात्रो वा इत्यणन्तः पण्यपाद्यं पदं तान्त्वाद्युदात्तः पण्यकम्बलः संज्ञायामिति वक्तव्यं । अन्यत्र पणितव्यकम्ब
ले समासान्तोदात्तत्वमेव प्रतिपदोक्ते समासे कृत्या इत्येव स्वरो विहितः दास्याभारो दासीभारः देवहूतिः यस्य
तत्पुरुषस्य पूर्वपदप्रकृतिस्वर इष्यते विशिष्टवचनेन विहितः स सर्वो दासीभारादिषु द्रष्टव्यः सराये सौरस्यां प
रंपारीरं सिंहेस्यामिति कर्मण्यधिकरणे चेति किप्रत्ययः अलुक् छान्दसः तद्विषये त्वाद्युदात्तः उरशब्दः चतु
र्थी तदर्थे तादर्थ्ये यच्चतुर्थ्यन्तं विन्दुसरः पदे चतुर्थ्यन्ते प्रकृत्या यूपदारु अर्थे परे चतुर्थ्यन्तं प्रकृत्या देवार्थं क्ते च । अर्थे ६।
क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या गोहितं कर्मधारये निष्ठा क्तान्ते परे पूर्वमनिष्ठं प्रकृत्या श्रेणीकृताः श्रेणीशब्द आद्यु तेर
दात्तः पूगीकृताः पूगशब्दो न्तोदात्तः कर्मधारये किं श्रेण्या कृतं अनिष्ठा किं कृताकृतं अहीनेद्वितीया अहो
चतुर्थ्यन्तु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]

सि॰ कौ॰ कश्चिदयमाचारः कुलादिषु कालोपनविदायितव्यं याज्ञकादीनां त्व स्यादिति धर्म्ये किम् स्तेनरमः अहरणे किं
उ॰ स्व॰ वाडवहरणं वडवायाः अयं वाडवः तस्य बीजनिषेकादुत्तरकाले शरीरपुष्ट्यर्थं यद्दीयते तद्धरणमित्युच्यते परोऽपि ५२
१२ कृत्वरोहणादिस्वरेण बाध्यत इति अहरण इति निषेधो न प्राप्नोति तेन वाडवहार्यमिति हारिस्वरः सिद्ध्यति युक्ते च युक्ते
वाचिनि समासे पूर्वमाद्युदात्तं गोबल्लवः कर्तव्येनत्यरोयुक्तः विभाषाध्यक्षे गवाध्यक्षः २ पापं च शिल्पिनि वा पाप
नापितः २ पापाणकेति प्रतिपदोक्तग्रहणात् षष्ठीसमासे न गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे भार्यासौश्रुतः
सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः अन्तेवासी कुमारीदाक्षाः ओदनपाणिनीयाः कुमार्यादिलाभकामा ये दाक्षादि माघ स्वार्ध
२८३ भिः प्रोक्तानि शास्त्राण्यधीयते तेषं क्षिप्यते भिक्षामाणवः भिक्षां लप्स्येऽहमिति माणवः भयब्राह्मणाः भयेन
ब्राह्मणाः संपद्यन्ते गोत्रादिषु किं दासीश्रोत्रियः क्षेपे किं परमब्राह्मणः अङ्गानि मैरेये मद्यविशेषो मैरेयः मधुमैरे
यः मधुविकारस्य तस्य मधु अङ्गं अङ्गानि किं परममैरेयः मैरेये किं पुष्पासवः भक्ताख्यास्तदर्थेषु भक्ताख्यं
भाजीकं सः ४ भिक्षाकंसः भिक्षादयोऽन्नविशेषाः भक्ताख्याः किं समाशालयः समशनं समाशा प्रतिक्रियामात्रमुच्यते तदर्थे
किं भिक्षाप्रियः बहुव्रीहिरयमतः पूर्वपदमन्तोदात्तं गोबिडालसिंहसैन्धवेषूपमाने धान्यगवः गोबिडालः
तृणसिंहः सक्तुसैन्धवः धान्यं गौरिवेति विग्रहः व्याघ्रादिः गवाकृत्या सन्निवेशितं धान्यं धान्यगव इत्युच्यते राम॰
उपमाने किं परमसिंहः अके जीविकार्थे दन्तलेखकः यस्य दन्तलेखनेन जीविका नित्यं क्रीडेति समासः अ १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

माणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनं २ बहुव्रीहावपि परत्वाद्विकल्प एव द्विरण्यं किं प्रस्थाधनं परिमाणं किं
कांचनधनं धने किं निष्कमाला प्रथमोचिरोपसंपत्तौ प्रथमशब्दो वा प्रकृत्या भिनवत्वे प्रथमवैयाकरणः २ संप्रतिव्या
करणमधीते नु प्रथमः अत्यर्थः प्रथमशब्दः प्रथोरमजेतः अचीति किं प्रथमो वैयाकरणः कतरकतमौ कर्मधारये वा प्रकृत्या क
तरकठः २ कर्मधारयग्रहणमुत्तरार्थं इह तु षष्ठीपदोक्तत्वादेव सिद्धं आर्यो ब्राह्मणकुमारयोः २ आर्यब्राह्मणः २ आर्य
कुमारः आर्योण्य दत्तत्वादंतस्वरितः आर्यः किं परमब्राह्मणः वेति किं आर्यक्षत्रियः कर्मधारय इत्येव राजा च ब्राह्मण
कुमारयोः परतो वा प्रकृत्या कर्मधारये राजब्राह्मणः २ राजकुमारः २ षोरावभाउत्तरार्थः षष्ठी प्रत्येनसि षष्ठ्यंतो
राजा प्रत्येनसि परे वा प्रकृत्या राजप्रत्येनाः २ षष्ठी किं अन्यत्र न क्ते नित्यार्थे क्तांते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या
नित्यप्रहसितः २ कालाः इति द्वितीयासमासोयं नित्यशब्दस्यावांत आद्युदात्तः हसित इति थाथादिस्वरेणांतोदात्तः
नित्यार्थे किं मुहूर्तप्रहसितः ग्रामः शिल्पिनि वा प्रकृत्या ग्रामनापितः २ ग्राम आद्युदात्तः ग्रामः किं परमनापितः
शिल्पिनि किं ग्रामरथ्याः राजा च प्रशंसायां शिल्पिनि परे प्रशंसार्थे राजपदं वा प्रकृत्या राजनापितः राजकुला
लः प्रशंसायां किं राजनापितः शिल्पिनि किं राजहस्ती २ आदिरुदात्तः अधिकारोयं सप्तमी हारिणो धर्म्ये हर
णे सप्तम्यंतं हारिवाचि च आद्युदात्तं धर्म्ये देयं यः स्वीकरोति स हारी स उच्यते धर्म्यमित्याचारनियतं देयं मुकुटे
कार्षापणः हलदिपदिका संज्ञायामिति सप्तमीसमासः कारनाम्नि च इत्यलुक् याज्ञिकाश्वः वैयाकरणहस्ती

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनुदीचां किं कार्तिनगरं

ग्रामः ग्रामशब्दोऽत्र समूहवाची देवग्रामः देवस्वामिकः अनिवसंतः किं दाक्षिग्रामः दाक्षिनिवासः घोषादिषु दाक्षि
घोषः दाक्षिकटः दाक्षिह्रदः २ छात्र्यादयः शालायां छात्रिशाला व्याडिशाला यदापि शालांतः समासो नपुंसक
लिंगो भवति तदापि तत्पुरुषे शालायां नपुंसके इत्येतस्मात्पूर्वविप्रतिषेधेनायमेव स्वरः छात्रिशालं प्रस्थेऽवृद्धमक
र्क्यादीनां प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् इंद्रप्रस्थः अवृद्धं किं दाक्षिप्रस्थः अ
कर्क्यादीनामिति किं कर्कीप्रस्थः मकरीप्रस्थः मालादीनां च वृद्धार्थमिदं मालाप्रस्थः शोणप्रस्थः अमहन्नवं नगरेऽनुदीचां नगरे महन् अ५ न्वं पू परे २
व ६ न्नववर्जितं पूर्वमाद्युदात्तं स्यात् न तूदीचां न ब्रह्मनगरं अमेति किं महानगरं नवनगरं अर्मे चावर्णं द्व्यच्त्र्यच् अर्मे
परे द्व्यच् त्र्यच् पूर्वमवर्णांतमाद्युदात्तं गुप्तार्मं कुक्कुटार्मं अवर्णं किं बृहदर्मं द्व्यच्त्र्यच् किं कपिंजलार्मं अमहन्
न्नवमित्येव महार्मं नवार्मं न भूताधिकसंजीवमद्राश्मकज्जलं अर्मे परे नैतान्याद्युदात्तानि भूतार्मं अधिकार्मं संजी
वार्मं मद्राश्मग्रहणं संघातविग्रहीतार्थं मद्रार्मं अश्मार्मं मद्राश्मार्मं कज्जलार्मं आद्युदात्तप्रकरणे दिवोदासा
दीनां छंदस्युपसंख्यानं दिवोदासाय दाशुषे अंतः अधिकारोऽयं प्रागुत्तरपदादिग्रहणात् सर्वं गुणकार्त्स्न्ये सर्वश
८३ ब्दः पूर्वपदमंतोदात्तं सर्वश्वेतः सर्वमहान् सर्वं किं परमश्वेतः आश्रयव्याप्त्या सर्वपरमत्वे श्वेतस्येति गुणका
कार्त्तकि २ र्त्स्न्ये वर्त्तते गुणे किं सर्वसौवर्णः सर्वेषां श्वेततरः सर्वश्वेतः संज्ञायां गिरिनिकाययोः एतयोः परतः पूर्वमंतोदा राम. १३
त्तं अंजनागिरिः मौण्डिनिकायः संज्ञायां किं परमगिरिः ब्राह्मणनिकायः कुमार्यां वयसि पूर्वपदमंतोदात्तं

284

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

केकिम् रमणीयकर्त्री जीविकार्थे किं उद्दालमञ्जिकां भेथास्यति प्राचां क्रीडायां प्राग्देशवासिनां या क्रीडा तद्वा
निर्चिसमासे अकप्रत्ययांते परे पूर्वमाद्युदात्तं स्यात् उद्दालक पुष्पभंजिका संज्ञायामिति एवुल् प्राचां किं
जीवपुत्रप्रचायिका उष्यमुदीचां क्रीडा क्रीडायां किम् तवपुष्पप्रचायिका पर्याये एवुल् अणि नियुक्ते ।
अणंते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तं छत्रधारः नियुक्ते किं कांडलावः शिल्पिनि चाकृञः शि
ल्पिवाचिनि समासे अणंते परे पूर्वमाद्युदात्तं स चेदण् कृञो न भवति तंतुवायः तुन्नवायः शिल्पिनि किं
कांडलावः अकृञः किं कुंभकारः संज्ञायां च अणंते परे तंतुवायो नाम कृमिः अकृञ इत्येव रथकारो ना
म ब्राह्मणः गोतंतियवं पाले गोपालः तंतिपालः यवपालः अनियुक्तार्थो योगः गोइति किं वत्सपालः पा
ले किं गोरक्षः णिनि पुष्पहारी उपमानं शब्दार्थप्रकृतावेव उपमानवाचि पूर्वं णिन्यंते परे आद्युदात्तं
वि५ उष्ट्रक्रोशी ध्वांक्षरावी उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थं शब्दार्थप्रकृतौ किं वृकवंची
२४ प्रकृतिग्रहणं किं प्रकृतिरेव यत्रोपसर्गनिपेक्षा शब्दार्थी तत्रैव यथा स्यात् इह माभूत् गर्दभोच्चारी युक्ता
रोह्यादयश्च आद्युदात्ताः युक्तारोही आगतयोधी क्षीरहोता दीर्घकाशतुषभ्राष्ट्रवटं जे कुटीजः काशजः
तुषजः भ्राष्ट्रजः वटजः अंत्यात्पूर्वं बहचः बह्वचः पूर्वस्यान्त्यात्पूर्वमुदात्तं स्याज्जे उत्तरपदे उपसरजः आ
मलकीजः बहुचः किं स्पृजः ग्रामेऽनिवसंतः अग्रामे परे पूर्वमुदात्तं तच्चेन्निवसद्वाचि न मल्ल

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अपरयांचालकः४

सि॰कौ॰ उ॰स्व॰ १४

ग्रहणं कालवाचिनो पि दिग्शब्दस्य परिग्रहार्थं आचार्योपसर्जनश्चांतेवासिनि आचार्योपसर्जनांतेवासिनि परे दिग्शब्दा
अंतोदात्ता भवंति पूर्वपाणिनीयाः आचेति किं पूर्वांतेवासी अंतेवासिनि किं पूर्वपाणिनीयशालं उत्तरपदवृद्धौ
सर्वं च उत्तरपदस्येत्यधिकृत्य यावद्धि विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चांतोदात्ता भवंति सर्वपांचा
लकः अधिकारग्रहणं किं सर्वभासः सर्वकारकः बहुव्रीहौ विश्वं संज्ञायां बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायां
मंतोदात्तः स्यात् पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः विश्वकर्मा विश्वदेवः [illegible] मेकं जलाश्चे
आद्युदात्तप्रकरणे दिवोदासादीनां [illegible] दिवोदासाय [illegible] अधिकारेण [illegible]
त्वात् सर्वगुणकार्त्स्न्ये सर्वशब्दः पूर्वपदभूतः [illegible] सर्वश्वेतः सर्वमहान् सर्वे किं [illegible]
परमत्वं श्वेतस्येति गुणकार्त्स्न्ये वर्तते गुणे [illegible] सर्वेषां श्वेततरः [illegible] संज्ञायां गिरिनिकाययोः
[illegible] पूर्वमंतोदात्तं अंजनागिरिः [illegible] संज्ञायां किम् [illegible] कुमार्यां च
[illegible] पूर्वमंतोदात्तं वृद्धकुमारी कुमारीशब्दः [illegible] योगमात्र [illegible] तु पादाय [illegible]
समानाधिकरणे [illegible] कुमारी [illegible]
[illegible] पूर्वमंतोदात्तं [illegible] पदं [illegible]

राम॰ १४

205

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वृद्धकुमारी कुमार्यां कुमारीशब्दः पुंसासहासंप्रयोगमात्रप्रवृत्तिनिमित्तमुपादायप्रयुज्यते वृद्धादिभिः समानाधि
करणः तत्त्ववयस्त्वग्रहणलनेनकुमारत्वमेव वयसि किं परमकुमारी उदकेऽकेवले अकेवलं मिश्रं तत्राचिनि समासे
उदकेपरे पूर्वमन्तोदात्तं गुडोदकं स्वरेकृतेत्र एकादेशः स्वरितोवानुदात्तेपदादाविति पक्षे स्वरितः अकेवले किं शी ६।२
तोदकं [illegible] द्विगौक्रतौ द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तं गर्गत्रिरात्रं द्विगौ किं अति
रात्रः क्रतौ किं बिल्वहोमस्य सप्तरात्रं बिल्वसप्तरात्रं सभायां नपुंसके सभायां परतो नपुंसकेलिंगे समासे पूर्व
मन्तोदात्तं गोपालसभं स्त्रीसभं सभायां किं ब्राह्मणसेनं नपुंसके किं राजसभा प्रतिपदोक्तनपुंसकग्रहणान्नेह
रमणीयसभं ब्राह्मणकुलं पुरेप्राचां शिवदत्तपुरं नान्दीपुरं प्राचां किं शिवपुरं अरिष्टगौडपूर्वे च पुरेपरे अरिष्टगौ
डपूर्वे समासे पूर्वमन्तोदात्तं अरिष्टपुरं गौडपुरं पूर्वग्रहणं किं इहापि यथा स्यात् अरिष्टश्रितपुरं गौडभृत्यपुरं
न हास्तिनफलकमार्देयाः पुरेपरे नेतान्यन्तोदात्तानि हास्तिनपुरं फलकपुरं मार्देयपुरं मर्देरपत्यमिति शुभ्रादि ५४
त्वात् ढक् कुसूलकूपकुंभशालं बिले एतान्यन्तोदात्तानि बिलेपरे कुसूलबिलं कूपबिलं कुंभबिलं शालबिलं
कुसूलादि किं सर्पबिलं बिले किं कुसूलस्वामी दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु दिक्शब्दाः अन्तोदात्तं भवं ६।२
त्येषु पूर्वेषुकामशमी अपरकृष्णमृत्तिका। जनपद पूर्वपंचालाः आख्यान पूर्वयायातं पूर्वचानराटं शब्दस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ज्ञार्यो ऽव्यशृंगः उपमायां मेषशृंगः अवस्थेति किं स्थूलशृंगः नञो जरमरमित्रमृताः नञः परे एते आद्युदात्ता भव।
सि.कौ. उ.स्व. ऊव्रीहौ तामेजरा सुजरं अमित्रमदियाश्च वो देवेषमृतं नञ। किं ब्राह्मणमित्रः जेति किं अशत्रुः सोर्मनसी अलोमो-
१५ षसी सोः परं लोमोषसीव र्जयित्वामन्नेन मसंतं चाद्युदात्तं स्यात् नञ्सुभ्यामित्यस्यापवादः सुकर्माणः सुयुजः मनोबस्नौ नि २२
मानः सुब्रह्माशिवा पशुभ्यः सुमनाः सुवर्चाः सुपेशस्करोति सोः किं कृतकर्मा मनसौ किं सुराजा अलोमोषसी किं सुलो-
सू.५ मा ऽषा कपित्तु परत्वात् कपि पूर्वमिति भवति सुकर्मकमेकः सुस्रोतस्कः ऋत्वादयश्च सोः परे आद्युदात्ताः स्युः साम्ना
ज्याय सुक्रतुः सुप्रतीकः सुहव्यः सुप्रतूर्तिमनेहसं आद्युदात्तं द्व्यच्छन्दसि यदाद्युदात्तं द्व्यच् तत्सोरुत्तरं बहुव्रीहौ
२९६ आद्युदात्तं अश्वा स्वश्वा सुरथा ऽआतिथिग्वेति त्स्वरेणास्यार्थाद्युदात्तौ आद्युदात्तं किं यासुबाहुः द्व्यच् किं सुगु-
रसत्सुहिरण्यः हिरण्यशब्दस्य च वीरवीर्यौ च सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ सुवीरेणरयिणा सुवीर्यस्य गोम-
तः वीर्यशब्दो यत्प्रत्ययान्तः तत्र यतोऽनाव इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकं तच्चाहि सति पूर्वेणैव सिद्धं स्यात्
कूलतीरतूलमूलशालाक्षसममव्ययीभावे उपकूलं परितीरं उपतूलं उपमूलं उपशालं उपाक्षं सुषमं निःष-
द्रु२ मं तिष्ठद्गु प्रभृतिषु कूलादिग्रहणं किं उपकुंभं अव्ययीभावे किं परमकूलः कंसमंथशूर्पपाय्यकांडं द्विगौ द्वि-
कंसः द्विमंथः द्विशूर्पः द्विपाय्यं द्विकांडं द्विगौ किं परमकंसः तत्पुरुषे शालायां नपुंसके शालाशब्दान्ते तत्पुरु- रा.म.
षे नपुंसकलिंगे उत्तरपदमाद्युदात्तं ब्राह्मणशालं तत्पुरुषे किं दृढशालं ब्राह्मणकुलं शालायां किं ब्राह्मणसे १५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रैता अर्धकेवलेति संज्ञायां दर्भवेत्ययमंतोदात्तं भिन्नैश्लौ भिन्नातुलः २५२ मातृत्वादिनि समाने पूर्वमंतोदात्तं गर्गा नित्रा
पेत्तमाचार्यसंसेके समाधी पत्तौ समेद्धसक लिंगे समा सेपूर्वमंतोदात्तं गोपाल संस्त्री ... समार्यां ... संज्ञान
पंसके यि राजसभापतिसत्येन ... समरे ... भास्करतुलं ३ भावों शि विश्वदेवंसंपाति आ३
बहुव्रीहौ किं विश्वेचदेवाश्च विश्वदेवाः संज्ञायां किं विश्वदेवः प्रागव्ययीभावाद्बहुव्रीह्यधिकारः उदराश्वेषुषु तथा
१५ दरः हर्यश्वः महेषुः लोपे उदश्वेषुष्पपरेषु पूर्वमंतोदात्तं बहुव्रीहौ मिंदायां यवोदरः कटुकाश्वः चलाचलेषुः अ
नुदर इत्यत्र नञ्सुभ्यामिति भवति पूर्वविप्रतिषेधेन नदीवंधुनिवंधुशब्दे परे नद्यंतं पूर्वमंतोदात्तं बहुव्रीहौ गार्गी
बंधुः नदीति किम् ब्रह्मबंधुः ब्रह्मशब्द आद्युदात्तः बंधुनि किं गार्गीप्रियः निष्ठोपसर्गपूर्वा न्यतरस्यां निष्ठांतं पूर्वपदं गौ ७
मंतोदात्तं वा प्रधौतपादः २ निष्ठा किं प्रसेचकमुखः उपसर्गपूर्वा किं शुष्कमुखः उत्तरपदादिः उत्तरपदाधिका
र आपादांतं आद्यधिकारस्तु प्रकृत्याभगालमित्यस्यावधिक कर्णो वर्णलक्षणात् वर्णवाचिनो लक्षणवाचि
नश्चपरः कर्णशब्द आद्युदात्तो बहुव्रीहौ शुक्लकर्णः शंकुकर्णः कर्णः किं श्वेतपादः वर्णलक्षणात्किम् शोभनक
र्णः संज्ञोपम्ययोश्च मणिकर्णः गोकर्णः कंठपृष्ठग्रीवाजंघं च संज्ञौपम्ययोर्बहुव्रीहौ शितिकंठः कांडपृष्ठः सुग्री
वः नाडीजंघः औपम्ये खरकंठः गोपृष्ठः अश्वग्रीवः गोजंघः शृंगमवस्थायां च शृंगशब्दोऽवस्थायां संज्ञोप
म्ययोश्च आद्युदात्तो बहुव्रीहौ उद्गतशृंगः व्यंगुलशृंगः अत्र शृंगोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्थात्र

